ठ ~~२११~~
पं. ना. पु

॥ श्रीः ॥

संक्षेपशारीरकस्य

प्रथमोऽध्यायः ।

लोकोत्तरबुद्धिविद्यावैभवशालि-
श्रीसर्वज्ञमुन्युपनिबद्धः ।

विश्वविख्यातविद्यश्रीमधुसूदनसरस्वतीतर्कोद्भा-
सितसारसंग्रहाख्यव्याख्यारत्नभूषितः ।

विलक्षणतर्कविचक्षणसमीक्षणाय श्रीबा-
बूगोविन्ददासगुप्तेन स्वकीये का-
शिककाशिकायन्त्रालये मु-
द्रयित्वा प्रचारितः ।

Salka
SAR/MAD

तेनैव काशीस्थराजकीयप्रधानपाठालयाध्यापकश्रीद्वि-
वेदहरिनाथमनीषिप्रदर्शितरीतिमनुरुन्धानेन
श्रीबाबूभगवानदासस्यानुजस्य साहा-
य्यात् परिशोधितः संस्कृतश्च ।

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
क्र० 236

सं० १९४४. अनन्तचतुर्दश्याम् ।

236

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Vidyalaya

24827

No. 37
ना-पं-पु:
उत्तर मीमांसा
नं: 39

॥ श्रीः ॥

॥ सटीकसंक्षेपशारीरकस्योपक्रमः ॥

शिवदेव्यास्तपोमूर्त्तेर्मातुः पादाब्जजन्मनः ।
पितुः श्रीविश्वनाथस्य कणाँल्लेस्मशादरान् मुहुः ॥

सत्त्वादिलेशमवलम्ब्य विभाति लोकः
सत्त्वादिमाननृतदुःखजडोऽपि यस्य ॥
पूर्णः सुखामृतमहोदधिरेष विश्व-
माप्लावयन्निजरसैरमृतीकरोतु ॥ १ ॥
यो विश्वमेतदखिलं कृपयोद्दधार
वेदान् विभज्य तदुपोद्बलितैः स्ववाक्यैः ॥
आख्यानकैः सुविततैर्मधुरैः स कृष्ण-
द्वैपायनो विजयतेऽतिपुराणवाक्यः ॥ २ ॥
रत्नानि वेदपुरुषस्य शिरःकिरीट-
संभूषणानि निजसूक्तिमयानि तेषु ॥
सद्युक्तिवीचितरलीकृतभारतादि-
वाक्सागरेषु विततान्यचिचीषतासौ ॥ ३ ॥
प्रत्येकमध्यायचतुष्टयस्थैः
पादैश्चतुर्भिस्सुदृढीकृतेषु ॥
सूत्रेषु भूतेषुशरैर्मितेषु
प्रोवाय निष्कृष्य ततः स तानि ॥ ४ ॥ 236
काले गते बहुतिथेऽथ विलुण्ठितानि
श्रुत्यर्थविप्लवनसाहसमाश्रयद्भिः ॥
बौद्धादिभिः पुनरमूनि समुद्दिधीर्षुः
श्रीशङ्करो भुवि दयोदधिराविरासीत् ॥ ५ ॥

Sankaracharya Sanskrit Mahavidyalaya

निजमतच्युतिदेहनिपातना-
न्यतरमाहवभङ्गपणं दिशन् ॥
विततवादकथासमरे परान्
व्यजयताऽजयतां प्रथयन्निजाम् ॥ ६ ॥
इति विजित्य दिशो दश शिष्यतां
गतवतः करुणावरुणालयः ॥
बुधसुरेश्वरपद्मपदादिका-
न्निजधियाऽजधियां समयोजयत् ॥ ७ ॥
इत्थं स वेदान्तमतं पृथिव्यां
सम्यग् व्यवस्थाप्य न सन्तुतोष ॥
कालक्रमेणास्य पुनर्विनाश-
माशङ्कमानो विजितान्यमानः ॥ ८ ॥
ततोऽभ्यगाच्छिष्यगणैः प्रशिष्यै-
र्वृतो विविक्तं बदरीवनं सः ॥
अद्यापि यत्रासुभृतां हिताय
वृषाकपी मूर्त्तिषु सन्निधत्तः ॥ ९ ॥
गत्वाथ तत्रात्मनिवासयोग्यं
विचिन्त्य देशं सह शिष्यमुख्यैः ॥
उवास कालं चिरमात्मतत्त्वं
तान् बोधयन् वेदशिरःप्रतिष्ठम् ॥ १० ॥
अथैकदा तानुपदेक्ष्यमाणः
परं हितं वाक्यमिदं जगाद ॥
भवद्भिरेवं क्रियतां यथैत-
च्चिरं न लुप्येद् भुवि वेदतत्त्वम् ॥ ११ ॥
अतिप्रयत्नेन मया भवद्भिः
समुद्धृतं यन्निगमान्तरत्नम् ॥
तन्नास्तिकैः साहसिकैर्ममान्ते
पुनर्विलुण्ठेरत पुरेव नूनम् ॥ १२ ॥

BHARATIY VIDYA BHAVAN LIBRARY S. N..........

मीमांसकंमन्यमुखाः स्वकीयै-
स्तर्कैर्यथा वेदशिरो हरन्ति ॥
निजोक्तिषु श्रौतवचो नयन्त-
स्तथा न ते नास्तिकजैनमुख्याः ॥ १३ ॥
नात्यन्तिकं स्वर्गसुखं सुखं तद्
यागादिजन्यं विषयोपरक्तम् ॥
शुद्धात्मरूपं श्रुतितोऽनुमानात्
सुषुप्तिकालानुभवाच्च नित्यम् ॥ १४ ॥
को नाम जन्तुर्विषयैः सुखी स्या-
दित्यप्यगूढं सुधियां तथापि ॥
अनन्तजन्मार्जितवासनाया
जहत्यसूंस्ताननुधावमानाः ॥ १५ ॥
तद्भ्रान्तिशान्त्यै न समर्थमन्यद्
वेदान्तशास्त्राद् विधिना गृहीतात् ॥
ततस्तु तस्मिन् परिलुण्ठिते स्या-
ज्जगत्समुद्रस्तरिहीन एषः ॥ १६ ॥
न ग्रन्थबन्धनमृते परिरक्षितं तत
स्यादित्यवश्यमतिमञ्जुलवाग्विलासान् ॥
ग्रन्थांस्तनुध्वमतिविस्तरतादिहीना-
नाक्षेपकक्षदहनोत्तरवह्निगर्भान् ॥ १७ ॥
श्रुत्वा गुरोस्त उपदेशमिमं प्रहृष्टा
मूर्द्धाऽग्रहीषत गुरोरनुशासनं तत् ॥
ईशोऽपि तान् समुपदिश्य मनो न्ययुङ्क्त
स्वं ब्रह्मसूत्रमुखभाष्यनिबन्धनायं ॥ १८ ॥
ततो गुरुर्वत्सरपञ्चकेन
सूत्रादिभाष्यं निबबन्ध येन ॥
अद्यापि संसारसमुद्रपारं
गच्छन्ति सन्तो दृढसेतुनेव ॥ १९ ॥

सुरेश्वराद्या अपि तर्कवीथी-
विलासगम्भीरतरान्निबन्धान् ॥
गुर्वङ्घ्रिसेवाप्तमतिप्रसादा
वितेनिरे वार्त्तिकतोटकादीम् ॥ २० ॥
अथैकदा संसदि सन्निविष्टः
शिष्यप्रशिष्यादिविभूषितायाम् ॥
आनाय्य तत्तद्रचितान्निबन्धान्
प्रावर्त्ततैषां सदसद्विचारे ॥ २१ ॥
स्वकीयभाष्याण्यपि तत्र धृत्वा
विचार्य तत्त्वानि विलोक्य तेषाम् ॥
श्रीशङ्कराचार्य उवाच हृष्टो
महामतींश्चित्सुखमुख्यशिष्यान् ॥ २२ ॥
सर्वेऽपि यूयं कृतबुद्धयोऽतो
भवन्निबन्धा उपमानशून्याः ॥
अत्युत्तमास्तत् प्रचरन्तु लोके
येनान्ध्यमेतस्य निराक्रियेत ॥ २३ ॥
सर्वानतिक्रम्य विराजिते तु
लोकोत्तरं हृद्यनिबन्धरत्नम् ॥
संक्षेपशारीरकनामधेयं
सर्वज्ञनाम्ना मुनिना प्रणीतम् ॥ २४ ॥
धन्यो मुनिर्यस्य मतिः समस्तं
वेदान्ततत्त्वं करबिल्वतुल्यम् ॥
करोति पद्यैरतिमञ्जुलैस्तत
कथं न्यबध्नात् सुखमन्यथैषः ॥ २५ ॥
मीमांसार्णवपारदृक् सुयशसा शुभ्रश्चरित्रेण यो
मोहध्वान्तविनाशनोज्ज्वलतनुः सन्मानसैकाश्रयः ॥
सूरिस्वान्तसरोजसंघरसिको मङ्गल्यमूर्त्तिर्नृणां
सोऽयं विश्वसुखप्रदो विजयते सर्वज्ञनामा मुनिः ॥ २६ ॥

शास्त्राम्भोधिकुतर्ककर्कशचलद्वीचिच्छटासम्मिल-
न्मीमांसाद्वयकूलकेलिरसिकामोदैकसौधोपमम् ॥
अन्यूनानतिरिक्तवर्णमधुरालापावलीतोरणं
तेनेदं रचितं सदा विजयतां संक्षेपशारीरकम् १ ॥ २७ ॥
शास्त्राम्भोधिवितर्कदामविधृतप्रामाण्यमन्थानज-
क्षोभोद्भूतमणिप्रमेयखचितश्लोकाग्रयूपावृतम् ॥
वैराग्याङ्गणसज्जशुद्धशयनप्रान्तस्थधीदीपकं
शालाध्यायचतुष्टयं गुरुकृपाद्वारार्हणादर्शकम् २ ॥ २८ ॥
श्रद्धाभल्लनिवारणीयविविधासत्तर्कवज्रोपमो-
द्यच्छद्दन्तकरीन्द्रतार्किकमुखानिर्भेद्यदुर्गावृतम् ॥
सन्तोषामृतपूर्णवृत्तितटिनीतीरप्रदेशस्थितं
मीमांसोपनिषत्प्रधानवनितासंरुद्धबाह्याजिरम् ३ ॥ २९ ॥
शब्दाद्रिश्रुतिकूटसंस्थितमहावाक्योच्चवंशोल्लसत्-
सद्युक्तिध्वजवेपनाहितमहावादीन्द्रहृत्कम्पनम् ॥
आकाङ्क्षादिघनद्रुसंकुलवनावासप्रहृष्टद्विजो-
त्तंसाद्वैतरुतप्रधानपटहापूर्णावनीमण्डलम् ४ ॥ ३० ॥
सर्वत्वैकरसात्मजादिविषयक्लेशावहत्वेक्षणो-
द्यानप्रोद्गतशान्तिकुञ्जनिहितस्वातन्त्र्यसत्कुट्टिमम् ॥
आनन्दाम्बुमहाह्रदस्थविकसद्धृत्पद्मकेलिप्रिय-
स्वच्छाचारमनीषिहंससरसारावप्रमोदावहम् ५ ॥ ३१ ॥
सद्युक्तिप्रतिपद्ययन्त्रगणप्रच्छन्नसीलद्बहि-
र्द्वारोद्घाटनकौतुकाकुलधियोऽसारेक्षणास्तार्किकाः ॥
यन्त्रागार इव स्थितं न ददृशुर्वेदान्तरत्नं महद्
धूमान्धीकृतबुद्धयस्तु सुतरां वृद्धाश्च मीमांसकाः ॥ ३२ ॥
यद्यप्यस्मदुदाहृतश्रुतिशतग्रन्थ्यात्मभाष्याभिध-
ग्रन्थ्यानद्धसुसूत्रबन्धनदृढां वेदान्तरत्नावलीम् ॥
नैते तर्ककुठारिणः श्लथयितुं शक्तास्तथापि क्व चि-
च्छून्ये च्छिन्द्युरलं स्वशून्यहृदयास्तोकाय तां दुर्बलात् ॥ ३३ ॥

एते यद्यपि चित्सुखादिकलिता ग्रन्था अतीवोत्तमाः
किन्त्वेषामतितर्कमूढविषयाः के चिद् भृशं कर्कशाः ॥
के चिद् वेदशिरःप्रमेयबहुलास्तर्कं विना दुर्बलाः
सर्वे ते न समर्पयन्त इतरग्रन्थानपेक्षाः फलम् ॥ ३४ ॥
एतत्त्वन्यनिबन्धगन्धविधुरानप्यर्पयत्यात्मनो
मेयं सम्यगितीदमेव सुबृहच्छारीरकाख्योचितम् ॥
सद्भाष्यं तु न तावदर्थगतये पर्याप्तमित्याह्वयं
लोके धारयितुं समर्हति निजं संक्षेपशारीरकम् ॥ ३५ ॥
इत्थं तं विमृशन्तमद्वयमतिं श्रीशङ्करस्वामिनं
प्रोवाचातिविनीततानतशिराः सर्वज्ञनामा मुनिः ॥
नेदं गुर्वतिलङ्घनोत्थितमहापापं श्रयेन्मामतो-
ऽप्येवं विश्वगुरो यथा कुरु दयामस्मिन्निबन्धे लघौ ॥ ३६ ॥
एवं प्रार्थित ऊचिवानतितरां तुष्टो गुरुः शङ्करो
नाम्ना यद्यपि लोक एष भविता संक्षेपशारीरकः ॥
स्वीयैरन्यनिबन्धदुर्लभतरैरोजःप्रसादादिभिः
सर्वानेव गुणैस्तथापि बृहतो ग्रन्थान् विजेजेष्यते ॥ ३७ ॥
इत्युक्त्वा स सभां व्यसर्जयदमूञ् च्छिष्यप्रशिष्यावृता-
मेवं सन्तनुताऽपरानपि बहून् ग्रन्थानिति प्रब्रुवन् ॥
तेऽप्याज्ञां प्रणिपत्य शङ्करगुरोरादाय मूर्ध्ना ययुः
स्वस्वस्थानमसावपि प्रमुदितः स्वावासमेवाजगौ ॥ ३८ ॥
कालेऽथातिगते कियत्यपि जनाँल्लोके प्रसिद्धोऽप्ययं
ग्रन्थो मन्दमतीन् क्रमादवरतो नो बोधयेदात्मनः ॥
सर्वं हृद्यमिति प्रबुद्धमतिभिः श्रीमन्नृसिंहादिभिः
पर्यायोहितपञ्चषाधिकलसद्व्याख्याभिरुद्द्योतितः ॥३९॥
तासु श्रीमधुसूदनेन मुनिना टीका कृता सा गुणैः
स्वैः शारीरकसारसंग्रह इति प्रख्यातनाम्नी पराः ॥
सर्वा आक्रमतान्यदुर्लभतरैरित्यादृता सूरिभि-
र्लोके सम्प्रचचार तर्कतरलासत्पक्षविध्वंसनी ॥ ४० ॥

धन्यः श्रीमधुसूदनो मुनिवरो योऽद्वैतसिद्ध्यादिभिः
सद्ग्रन्थैर्नववक्रतर्कचपलान् मूकान् व्यधात् स्वैर्नवैः ॥
सत्तर्कैर्निगमोत्तमाङ्गविधृताद्वैतप्रतिष्ठापकै-
र्वेदान्ताकथनीयवस्तुनिरतस्वान्तांस्तु वाग्म्युत्तमान् ॥ ४१ ॥
तस्यैषा प्रतिवर्णयन्त्रणगणानुद्घाट्य सद्युक्तिभिः
प्रोल्लीढश्रुतिमौलिमान्यविषयालोकैः पुनाना जगत् ॥
शुद्धा ब्रह्मपरायणा निजपदन्यासैर्मनोहारिणी
धीराणामपि योगिनां विजयते टीकामयी भारती ॥ ४२ ॥
सव्याख्यानमनुत्तमेष्टविषयश्रौतप्रमाणादिक-
प्रख्यानात् परपूरुषार्थरसिकप्रेक्षावतामीप्सितम् ॥
यद्यप्येतदथापि पुस्तकवरप्राप्तिं विना नो बहून्
कांश्चिल्लेखनशोधनादिविषयायासप्रियांस्तोषयेत् ॥ ४३ ॥
इत्यालोच्य नितान्तसंस्कृतवचोग्रन्थप्रचारप्रियः
श्रीमान् वैश्यकुलोद्भवः स्थिरमतीन् गोविन्ददासो बहून् ॥
एतत्तत्त्वविदो बुधान् सुखयितुं स्वीये मनः प्रणयधान्
मुद्रायन्त्र इदं चिरं प्रथयितुं संमुद्र्य विद्वत्प्रियः ॥ ४४ ॥
एतत्पुस्तकशोधनादिविषये साहाय्यमाचक्रिरे
चत्वार्य्यब्दशतात् पुरा विलिखितान्यादर्शभूतान्यतः ॥
संशुद्धानि सुपुस्तकानि मिलितान्येतस्य शुद्धिं बुधा
जानीयुः स्वयमप्यवेत्य मनसा पूर्वापराद्यन्वयम् ॥ ४५ ॥
श्रीपूर्णाश्रमदण्डिनो बुधवरस्याद्यं सुशुद्धं लिपे-
र्मीमांसाद्वयमर्मभेदनिपुणेनानेकधा शोधितम् ॥
विद्वच्छ्रीहरिकृष्णशर्मसुधिया द्वैतीयिकं धीमता
यः सारस्वतवंशभूसुरमणिः शीलोदधिर्धार्मिकः ॥ ४६ ॥
अन्त्ये द्वे हरिनामदाससुधिया संशोधिते पुस्तके
प्राक् शुद्धे अपि नैजबुद्धिविभवादालोक्य भूयोऽपि यः ॥
पञ्चायत्तमठप्रतिष्ठिततमोदासीनसाधुः सदा
लोकानामुपकार एव मतिमान् कालं निनीषत्यहो ॥ ४७ ॥

उक्तश्रीयुतवैश्यवंशतिलकेनायोजितोऽत्राप्यहं
यं कञ्चिन्निरवाहयं निजधिया कार्यप्रबन्धं लघुम् ॥
तस्मिन् यत्र ममाच्युतैकमतयः संशोधकादेश्च तद्
भूयः संस्खलनं भवेद् भ्रमकृतं क्षाम्यन्तु बुद्ध्वा निजम् ॥ ४८ ॥
किञ्चैतत्स्खलनं स्वबुद्धिविभवादालोच्य संशोध्य स-
न्मित्रारातिगणोचितैकमनसो धीराः समस्तं जगत् ॥
पश्यन्तो निजमात्मतुल्यमथ वा कुर्वन्तु सर्वं श्रमं
सर्वेषां फलशालिनं निजधियेत्यभ्यर्थनं तेषु मे ॥ ४९ ॥
आशासे च समस्तविश्वजननीं शक्त्यात्मिकां काशिका-
यन्त्रागारमतिप्रसादमधुरैः सव्येतरैरुक्षितम् ॥
पीयूषोदधिदृक्कटाक्षपृषतैर्दुर्गां स्वपार्श्वस्थितं
रक्षन्तीं स्वसरोवरोत्तरमुखैर्वातैः पवित्रीकृतम् १ ॥ ५० ॥
सर्वेषां मतिरेवमेव सततं लोकोपकारप्रिया
धीराणां च विशेषतः सुकृतिनां सच्छ्रीमतामेधताम् ॥
येनाज्ञानमहातमिस्रपतिते लोकेऽखिलेऽहर्निशं
विद्याबोधविवेकशोधितजगद्दीपावलिर्द्योतताम् २ ॥ ५१ ॥
इत्यद्रिराजतनयामथ वा दिनेशं
विष्णुं शिवं गजवराननमाश्रयाशम् ॥
यद्वाऽखिलान्तरगतं निजबोधरूपं
श्रीकाशिकेश्वरमनिर्वचनीयरूपम् ३ ॥ ५२ ॥
आवेदयं यदिह वृत्तमिदं निबध्य
तत्रापि या च्युतिरमूं सुधियः क्षमन्ताम् ।
सम्प्रार्थयेऽहमिति

यन्त्रगृहप्रधानाध्यक्षो द्विवेदकुलजो
बुधरामनाथः ॥

॥ श्रीः ॥

सटीकसंक्षेपशारीरकम् ॥

अनृतजडविरोधिरूपमन्त-
त्रयमलबन्धनदुःखताविरुद्धम् ॥
अतिनिकटमविक्रियं मुरारेः
परमपदं प्रणयादभिष्टवीमि ॥ १ ॥

श्रीगणेशाय नमः ॥

सत्यं ज्ञानमनन्तमद्वयसुखं यद्ब्रह्म गत्वा गुरुं
मत्वा लब्धसमाधिभिर्मुनिवरैर्मोक्षाय साक्षात्कृतम् ॥
जातं नन्दतपोवनात्तदखिलानन्दाय वृन्दावने
वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम् ॥ १ ॥
श्रीरामविश्वेश्वरमाधवानां
प्रणम्य पादाम्बुजपुण्यपांसून् ॥
तेषां प्रभावादहमस्मि योग्यः
शिलापि चैतन्यमलब्ध येभ्यः ॥ २ ॥
पूर्वाचार्यवचो विचार्य निखिलं सत्संप्रदायाध्वना
हित्वोच्छृङ्खलमार्गमागमगिरां तात्पर्यपर्याप्तितः ॥
विच्छिद्यार्थविभागतः प्रकरणान्युद्भिद्य तत्त्वं रहः
कुर्वे संप्रति सारसंग्रहमिमं संक्षेपशारीरके ॥ ३ ॥

हित्वा हेयमुपादेयमुपादाय विचारतः ॥
प्रायेण पूर्वटीकानामिहार्थः प्रकटीकृतः ॥ ४ ॥
विशेषाद्विश्ववेदस्य प्रत्यग्विष्णोश्च बुद्धयोः ॥
व्याख्यानं श्रद्धयालेखि गुरूणां तौ हि नो गुरू ॥ ५ ॥

तत्र श्रीमच्छारीरकशास्त्रस्य तात्पर्यविषयीभूते मुमुक्षुजिज्ञास्ये निर्विशेषे ब्रह्मणि बोधनीये प्रासङ्गिकममुमुक्षुजिज्ञास्यसविशेषब्रह्मोपासनावाक्यानेकविधविचारविक्षिप्ततया दुरवबोधतामाकलय्य तद्विक्षेपपरित्यागेन मुमुक्षुजिज्ञास्यं निर्विशेषं ब्रह्म शास्त्रतात्पर्यविषयीभूतमनायासेन मुमुक्षुबोधाय संक्षेपशारीरकाख्येन श्लोकग्रन्थेनाविश्चकार करुणया श्रीसर्वज्ञात्माचार्यः । अत एव मुमुक्ष्वजिज्ञास्यसविशेषब्रह्मप्रासङ्गिकविचारपरित्यागरूपसंक्षेपविशिष्टं निर्विशेषब्रह्मविचारात्मकं शारीरकशास्त्रमेवैतदिति संक्षेपशारीरकमिति समाख्यास्य युक्तैव । तत्राद्यं श्लोकचतुष्टयं श्रीमच्छारीरकशास्त्रस्याद्यचतुःसूत्रीस्थानीयम् । तत्र हि प्रथमसूत्रे ब्रह्मविद्याधिकारी शुद्धस्त्वंपदार्थो जिज्ञास्यब्रह्माभेदान्वययोग्यः प्रतिपादितः । तयोर्भेदे हि स्वनिष्ठकर्तृत्वाद्यध्यासरूपबन्धनिवृत्तिकामस्य मुमुक्षोर्ब्रह्मणि जिज्ञासा न स्यात् अन्यज्ञानादन्यत्राध्यासनिवृत्तेरनुपपत्तेः तस्मात्तयोरनन्यत्वमेव । द्वितीये सूत्रे च जगत्कारणत्वप्रदर्शनव्याजेन तत्पदार्थोऽपि शुद्धस्त्वंपदार्थाभेदान्वययोग्यस्तटस्थस्वरू-

पलक्षणाभ्यां प्रतिपादितः। चतुर्थसूत्रे च तयोरैक्यमैकान्तिकं प्रतिपादितम्। एतावदेव शास्त्रस्य प्रमेयं त्वंपदार्थस्तत्पदार्थोऽखण्डवाक्यार्थश्चेति। एतत्प्रमाणं तु तत्त्वमस्यादिवेदान्तमहावाक्यरूपं शास्त्रं तच्चोक्तम्। शास्त्रयोनित्वादिति तृतीयसूत्रे। अत्रार्थक्रमस्य पाठक्रमाद्बलवत्त्वात्तृतीयचतुर्थसूत्रयोर्व्यत्यासो द्रष्टव्यः। प्रमेये हि कथिते किमत्र प्रमाणमिति जिज्ञासायां प्रमाणं कथनीयं नान्यदाप्राप्तकालत्वात्। एवमिहोचितक्रमेणैव त्वंपदार्थस्तत्पदार्थस्तदैक्यं चेति प्रमेयप्रतिपादनार्थास्त्रयः श्लोकाः प्रमाणप्रतिपादनार्थस्तु चतुर्थश्लोकः। एतावता हि शास्त्रस्य विषयप्रयोजनसंबन्धाः प्रतिपादिता भवन्ति प्रत्यग्ब्रह्मणोरेकत्वमेव हि विचारपुरःसराद्वेदान्तवाक्यप्रमाणाद्विज्ञातं प्रयोजनं शास्त्रस्य एतदेवोपेयम्। उपायस्तु द्विविधो विषयस्त्वंपदार्थस्तत्पदार्थश्चेति तस्य चाज्ञातत्वमात्रेण वेदान्तप्रमाणविषयत्वम्। अज्ञातत्वमिथ्याविज्ञातत्वाभ्यां विचारविषयत्वमिति विवेकः। पदार्थज्ञानपूर्वकत्वाद्वाक्यार्थज्ञानस्य पदार्थद्वयरूपविषयकथनपुरःसरं वाक्यार्थरूपप्रयोजनकथनं क्रमेण कृतम्। चतुर्थेन तु शास्त्रेण समं तयोः संबन्धः प्रतिपादितः। एतावता हि संक्षेपेण कृत्स्नशास्त्रार्थसमाप्तिः परापरविद्ययोः पर्यवसानात्। तथा च श्रुतिः। द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्म-

विदो वदन्ति परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेद इत्यादिना षडङ्गवेदचतुष्टयात्मकं शब्दब्रह्मापरविद्याविषयत्वेन व्याख्याय अथ परा यया तदक्षरमधिगम्यते इत्यादिना परं ब्रह्म परविद्याविषयं दर्शयति । स्मृतिश्च । द्वे ब्रह्मणी वेदितव्ये शाब्दं ब्रह्म परं च यदित्यादि । उत्तरग्रन्थस्त्वस्यैव प्रपञ्च इति द्रष्टव्यम् । संग्रहविवरणाभ्यां शिष्यबोधस्योद्देश्यत्वात् तत्र सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्यनुसारेण नपुंसकलिङ्गशब्दप्रयोगेण प्रथमः श्लोकः सेयं देवतैक्षतेत्यादिश्रुत्यनुसारेण स्त्रीलिङ्गशब्दप्रयोगेण द्वितीयः श्लोकः स एष इह प्रविष्ट एष त आत्मान्तर्याम्यमृत इत्यादिश्रुत्यनुसारेण पुल्लिङ्गशब्दप्रयोगेण तृतीयः श्लोकः। एतेन सर्वेऽपि ब्रह्मप्रतिपादकाः शब्दा व्याख्याताः । अक्षरार्थस्तु ॥ मुरारेर्जगदुपद्रवकारिमुराद्यसुरसंहरणाज्जगत्पालयितुः । श्रीविष्णोर्जगत्कारणमायासत्त्वांशप्रतिबिम्बचैतन्यात्मनोऽन्तर्यामिणः परमं मायाकल्पितजगत्कारणत्वादिशून्यत्वेन सर्वोत्कृष्टं बिम्बभूतं पदं स्वरूपमुपाधेः प्रतिबिम्बपक्षपातित्वेन बिम्बे स्वधर्माकल्पकत्वात्। बिम्बेश्वरपक्षेऽज्ञानप्रतिबिम्बितजीवचैतन्यप्रतियोगितया बिम्बत्वेन व्यवह्रियमाणस्य विष्णोः परमं पदं बिम्बप्रतिबिम्बकल्पनाशून्यं निरुपाधिस्वरूपं बिम्बे तमोनिपतितप्रतिबिम्बेत्यादिनेश्वरस्य द्वैरूप्यं वक्ष्यति । परमत्वं चापर-

मत्वापादकोपाधिराहित्येन । पदत्वं चाविद्यातिरोधानापनयाय सर्वपदनीयत्वेन स्वरूपस्य द्रष्टव्यम् । तद्विष्णोः परमं पदमिति श्रुतेः । तदेतत्पदनीयमस्य सर्वस्य यदयमात्मेति श्रुतेश्च । अत्र षष्ठ्यन्तप्रथमान्ताभ्यां तत्पदस्य वाच्यं लक्ष्यं च त्वंपदलक्ष्याभिन्नान्वययोग्यं दर्शितम् । अत्र च हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति स्मृतेः । सर्वोपद्रवकारिमुराद्यसुरारित्वेन भगवत्स्मरणरूपं मङ्गलमाचरन् तत्पदाभिष्टवलक्षणं मङ्गलान्तरमाचरति । अभिष्टवीमीति । अभितः स्तौमीत्यर्थः । तुरुस्तुशम्यमः सार्वधातुक इत्यनेन विभाषयेडागमः । अत्र निर्विशेषब्रह्मणि गुणविशिष्टगुण्यभिधानलक्षणायास्स्तुतेरसम्भवात्स्तवीमीति निदिध्यासनेनाभितः प्रत्यगभिन्नतया आभीक्ष्ण्येन वा तदेकाग्रोऽस्मीत्यर्थ इति केचित् । तत्स्तुतिरूपं तत्स्वरूपनिरूपणपरं ग्रन्थं करोमीत्यर्थ इत्यन्ये आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा इति टीकोक्तेरकल्पितधर्मस्य क्वाप्यनुपपत्तेः कल्पितसत्यत्वादिधर्मपुरस्कारेण गुणकथनरूपा स्तुतिर्मुख्यैव निर्गुणेऽपि वस्तुनि सम्भवतीति तु तत्त्वम् । अतोऽस्थाने निदिध्यासनप्रतिज्ञा ग्रन्थकारणारम्भप्रतिज्ञामुख्यवृत्तिसंभवे जघन्यवृत्तिकल्पना च निरस्ता । एतादृशभगवत्स्तुतौ च तद्भक्तिरेवासाधारणं कारणमि-

त्याह । प्रणयादिति । प्रणयः परा प्रीतिर्भक्तिरित्यर्थः । सा हि स्वरसतः परमानन्दरूपे परमात्मनि समुल्लसन्ती धारासन्ततिरूपा मनोवृत्तिर्भागवती भक्तिरित्युच्यते । तया चाविघ्नेन सत्त्वशुद्धिज्ञानप्राप्त्यादिद्वारेण परं निःश्रेयसं लभ्यते यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मन इति श्रुतेः । भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तमिति स्मृतेः । ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चेति योगसूत्राच्च । निर्गुणेऽपि ब्रह्मणि भक्तिरुपपद्यत इति व्याख्यातं भगवद्गीतासु चतुर्विधा भजन्ते मामित्यादिना अभिष्टवे प्रकृष्टनयानपेक्षणाद्रूढिभङ्गदोषाच्च न प्रकृष्टो नयः प्रणय इति व्याख्यानमुपादेयम् । तत्र निर्विशेषे वस्तुनि जगत्त्वेन जीवत्वेन परमेश्वरत्वेन च प्राप्तां विक्रियां निषेधत्यविक्रियमिति । जगति जन्माद्या विक्रियाः जीवे जाग्रदाद्या ईशे सृष्ट्याद्या विक्रिया मायया प्रसक्ता निर्विशेषे वस्तुनि सर्वथा न सम्भवन्तीति तदविक्रियम् । एतेन सर्वविकारशून्यत्वात्सर्वेन्द्रियाग्राह्यतारूपा सूक्ष्मता सर्वोपाधिसंबन्धशून्यतारूपा नित्यमुक्तता च दर्शिता । एवं सामान्यतः सर्वविक्रियाशून्यतामुक्त्वा विशेषेणाप्याह । अनृतेत्यादिना । अत्रानृतविरोधि परमार्थसत्यमबाध्यम् । जडविरोधि स्वप्रकाशं ज्ञानम् । रूपं सर्वानुस्यूत-

सन्मात्रम्। अन्तत्रयविरुद्धम्। अन्तानां देशकालवस्तुपरिच्छेदानां यत्त्रयं तद्विरुद्धं देशपरिच्छेदो ह्यत्यन्ताभावस्तदप्रतियोगित्वेन विभु कालपरिच्छेदौ च ध्वंसप्रागभावौ तदप्रतियोगित्वेन नित्यम्। वस्तुपरिच्छेदश्चान्योऽन्याभावः तदप्रतियोगित्वेनाद्वितीयम्। एतेन प्रपञ्चधर्माणामनृतत्वजडत्वव्यावृत्तरूपत्वाविभुत्वानित्यत्वसद्वितीयत्वानां व्यावृत्तिः सिद्धा। मलबन्धनदुःखताविरुद्धमिति जीवधर्माणां व्यावृत्तिः। मलः कर्तृत्वभोक्तृत्वरागादिलेपोऽशुद्धिस्तद्विरुद्धं कर्तृत्वादिलेपशून्यं शुद्धं बन्धनं धर्माधर्मतत्फलसंबन्धस्तद्विरुद्धं मुक्तं दुःखताविरुद्धं परमानन्दरूपं न तु तदाश्रयः। नापि दुःखरूपस्तदाश्रयो वा जीवो हि रागादिमलैर्धर्माधर्मादिबन्धनेन सुखदुःखाश्रयत्वेन च प्रसिद्धः। अतिनिकटमितीश्वराद्व्यावृत्तिः। वादिभिर्हि पराग्रूपः परोक्ष एवेश्वरः कल्पितः। इदं त्वतिनिकटं साक्षादपरोक्षं प्रत्यगात्मस्वरूपमत्यव्यवहितमित्यर्थः एतेन सत्यं ज्ञानमनन्तं ब्रह्म॥ तदेद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्। सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं नित्यं विभुं सर्वगतं सुसूक्ष्मं विमुक्तश्च विमुच्यते न वर्द्धते कर्मणा नो कनीयान् शुद्धमपापविद्धमेष एव परम आनन्दः। यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः अयमात्मा ब्रह्म न जायते म्रियते वा विपश्चित् निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्ज-

नमित्याद्याः श्रुतयोऽसत्यत्वादितत्तद्भ्रमापोहेनाखण्ड प्रत्यगभिन्नं ब्रह्म मुमुक्षुजिज्ञास्यं प्रतिपादयन्ति । न तु सत्यत्वादिरूपेण तस्य निर्विशेषत्वेन सर्वधर्मानाधारत्वादिति प्रतिपादितं भवति । सर्वविशेषणानां समुच्चयमेकेन श्लोकेन वक्ष्यति । नित्यः शुद्धो बुद्धमुक्तस्वभाव इत्यादिना ।अत्र प्रथमं नगणद्वयवता पुष्पिताग्राख्येन छन्दसार्द्धसमेन कविरीत्यापि मङ्गलमाचरितम् । अकारादिपदचतुष्टयोपन्यासश्च श्लोकग्रन्थकरणकौशलप्रदर्शनाय । प्रणवप्रथमावयवोच्चारणेन मङ्गलातिशयाय च ॥ अ इति ब्रह्म । अकारो वै सर्वा वागिति च श्रुतेः ॥ १ ॥

स्वाज्ञानकल्पितजगत्परमेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ॥
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥२॥

एवं जिज्ञास्यब्रह्मप्रदर्शनेन प्रथमसूत्रार्थो दर्शितोऽतः परं द्वितीयसूत्रार्थः प्रदर्श्यते । पूर्वत्र जगद्धर्माणां जीवधर्माणामीश्वरधर्माणां चापवादो दर्शितः स चाध्यारोपमन्तरेण न संभवति । प्रसक्तस्यैव प्रतिषेधार्हत्वादित्यभिप्रेत्याध्यारोपमाह । स्वाज्ञानेति । स्वस्य स्वस्मिन्यदज्ञानं स्वाश्रयविषयकमविद्यामायाशब्दितमनादिभावरूपमनिर्वाच्यमावरणविक्षेपशक्तिमदज्ञानन्तेनावरणशक्त्यात्मस्वरूपभानन्तिरोधाय विक्षेपशक्त्या कल्पितान्य-

ध्यस्तानि यानि जगत्परमेश्वरत्वजीवत्वानि तैरनुयोगित्वेन प्रतियोगित्वेन च तन्निमित्तो जीवजगद्भेदो जीवपरमेश्वरभेदो जीवपरस्परभेदो जगत्परस्परभेदो जगत्परमेश्वरभेदश्चेति यः पञ्चविधो भेदस्तेन च कलुषीकृतोऽकलुषोऽपि कलुषः कृतोऽध्यारोपितदोषेणासत्कल्पतामापादितो भूमा बाहुल्यं यस्य स तादृक्कलुषीकृतभूमा भावः सद्भावो यस्याः सा तथा । जगज्जडत्वात्स्वरूपेणैव कल्पितम् । जीवेश्वरौ तु चैतन्यरूपत्वात्स्वरूपेण सत्यौ केवलमेकस्मिन्नेव चैतन्ये बिम्बप्रतिबिम्बादिभावेन जीवत्वमीश्वरत्वं च कल्पितमिति बोधयितुं द्वयोः प्रयोगः । चितेर्भावो न कलुषीकृतः सर्वभासकत्वेन सर्वदा प्रकाशमानत्वात् किन्तु तत्तद्भेदकल्पनया तदपरिच्छिन्नत्वरूपो भूमैव कलुषीकृतः । पूर्णत्वेनाप्रकाशमानत्वात् । तदुक्तं वार्तिके । तस्यैकमपि चैतन्यं बहुधा प्रविभज्यते । अङ्गारकितमुत्पाते वारिराशेरिवोदकमिति । भूम्नो भाव इति व्याख्यानमनुपादेयं बहोर्भावस्य भूमशब्दवाच्यत्वेन भावशब्दवैयर्थ्यापत्तेः । कलुषीकरणेन किं भूमा नाशितो नेत्याह । स्वाभाविकेति । भूम्नः कलुषीकरणं हि परिच्छिन्नत्वारोपमात्रं न तु स्वरूपहानिः । आरोपेण वस्तुसत्तानपायात् । यत्र यदध्यस्तं तत्कृतेन दोषेण गुणेन वाणुमात्रेणापि स न सम्बध्यत इति न्याया-

त् । स्वाभाविकी नित्यसिद्धाध्याससहस्रेणाप्यपनेतुमशक्या स्वमहिमस्थितिः स्वरूपादप्रच्युतिर्यस्याः सा तथा तथापि सर्वाध्यासकारणस्याज्ञानस्यानारोपितत्वात्तेनैव द्वितीयेनाद्वितीयत्वरूपो भूमा कलुषः कृत इत्यत आह । अस्तमोहेति । अस्तोऽध्यस्तोऽपरमार्थसन्मोहोऽज्ञानाख्यो यस्यां सा तथा । अज्ञानाध्यासस्याप्यज्ञानमूलत्वादनादित्वाच्च नात्माश्रयादिदोषप्रसङ्गः । तदुक्तं वार्तिके । अविद्यास्तीत्यविद्यायामेवासित्वा प्रकल्प्यते । ब्रह्मदृष्ट्या त्वविद्येयं न कथं चन युज्यत इति । ननु अज्ञानाध्यासस्य किमधिष्ठानं न जीव ईश्वरो वानयोरध्यासपरिनिष्पन्नत्वेनान्योन्याश्रयात् । नापरस्तदनिरूपणादित्याशङ्क्याह । प्रत्यक्चितिरिति । प्रतीची जीवेश्वरविभागरहिता चितिः स्वप्रकाशज्ञप्तिः सा भुवनस्याज्ञानसहितस्याध्यस्तस्याकाशादिप्रपञ्चस्य विवर्त्तस्य योनिरज्ञानद्वारोपादानम् । एकैव योनिर्न द्वितीयसापेक्षाऽसत्यत्वेनाज्ञातत्वेन च तस्या एवाधिष्ठानत्वोपपत्तेः । तथा च वक्ष्यति । आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवलेति । वार्तिकं च । आन्त्यात्कार्यात्तदेव स्याद्यदाद्यं प्रति कारणमिति । सा च विजयते परमार्थसत्यस्वप्रकाशपरमानन्दरूपत्वेन सर्वोत्कृष्टा भवति । अतस्तां प्रत्यस्मि प्रणत इति ध्वन्यते । तस्मा-

देवमध्यारोपसम्भवादनृतजडविरोधीत्यादिना तदपवादो युक्त एव । भुवनैकयोनिरिति तटस्थलक्षणं प्रत्यक्चितिरिति स्वरूपलक्षणमिति विवेकः । एतेन मिथ्याप्रपञ्चोपादानत्वेन तत्पदवाच्यनिरूपणाज्जन्माद्यस्य यत इति व्याख्यातम् ॥ २ ॥

प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं
प्रक्षीणकारणविकारविभागमेकम् ॥
चैतन्यमात्रपरमार्थनिजस्वभावं
प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥ ३ ॥

एवं त्वंपदार्थं तत्पदार्थं च विषयमुक्त्वा प्रयोजनकथनाय वाक्यार्थमाह । प्रत्यगिति । प्रत्यञ्चमिति त्वंपदार्थः । अच्युतमिति तत्पदार्थः । एकमिति तयोरगौणमैक्यं वाक्यार्थः । तमहं श्रवणादिपरिपाकवशात् स्थितप्रज्ञो नित्यं सर्वदा प्रणतोऽस्मि देहेन्द्रियादिप्रतिभासावस्थायां प्रह्वीभावेन पूजयामि । ननु कथमेकत्वं मुख्यं सत्यज्ञानाद्यपुनरुक्तानेकशब्दप्रतिपाद्यत्वादित्यत आह । चैतन्येति । वाच्यार्थे भेदप्रतिभासेऽपि चैतन्यमात्रस्यैव परमार्थानौपाधिकस्वभावस्य लक्ष्यत्वान्नैकवाक्यविरोध इत्यर्थः । चैतन्यमात्रमेवपरमार्थोऽत्यन्ताबाध्यः परमानन्दरूपत्वेन परमप्रयोजनरूपो वा निजोऽनुपाधिकः स्वभावः स्वरूपं यस्य तमित्यक्षरार्थः । ननु जीवस्य कार्यकारणादिविभागव-

त्वेन सद्वितीयत्वादीश्वरस्य च परोक्षत्वेन पराक्त्वात्कथं तयोरैक्यमिति तत्राह । प्रक्षीणेति । असत्येति च । प्रक्षीणः प्रज्ञानेन बाधितः प्रमातृत्वकर्तृत्वभोक्तृत्वादिरूपः कारणविकारविभागो हेतुफलसन्तानो मायाकाशादिप्रपञ्चो वा यस्मिंस्तं निर्विभागं संसारदशायामपि परमार्थतो द्वैतरहितमित्यर्थः । एवमसत्यः सर्वथा बाधितः पराग्रूपेणाहमितिव्यपदेशानर्हत्वेन प्रत्यग्रूपाद्भेदो यस्मिंस्तं साक्षादपरोक्षमित्यर्थः । प्रतीचोऽद्वितीयाच्युताभेदबोधफलं प्रक्षीणेति । अच्युतस्यापरोक्षप्रत्यगभेदबोधफलमसत्येति विवेकः । ननु प्रक्षीणकार्यकारणविभागस्य प्रमातृत्वादिशून्यस्य प्रमाणाभावादसिद्धिः । प्रमाणाभ्युपगमे च कार्यकारणविभागापत्तिरित्याशङ्क्याह । प्रत्यक्प्रमाणकमिति । प्रत्यक्स्वरूपमेव प्रमाणं यस्मिंस्तं स्वप्रकाशचैतन्यरूपतया स्वभिन्नमानानपेक्षं स्वत एव सिद्धमित्यर्थः । एतेनाखण्डवाक्यार्थकथनात्तत्तु समन्वयादिति व्याख्यातं । वसन्ततिलकावृत्तम् ॥ ३ ॥

औत्पत्तिकी शक्तिरशेषवस्तु-
प्रकाशने कार्यवशेन यस्याः ॥
विज्ञायते विश्वविवर्तहेतो-
र्नमामि तां वाचमचिन्त्यशक्तिम् ॥ ४ ॥

एवं त्वंपदार्थस्तत्पदार्थोऽखण्डवाक्यार्थश्चेति शा-

स्तस्य प्रमेयमुक्तम् । अधुना तत्प्रमाणं वेदान्तवाक्यं दर्शयितुं निखिलवेदाभिमानिनीं वाग्देवतां प्रणमति । औत्पत्तिकीति । शास्त्रयोनित्वादिति सूत्रे हि प्रथमेन वर्णकेन ब्रह्मणो वेदोपादानत्वं द्वितीयेन तु वर्णकेन ब्रह्मणि तस्य प्रामाण्यं दर्शितं तदुभयमप्यनेन प्रदर्श्यते । विश्वः सर्वोऽपि प्रपञ्चो विवर्तोऽतत्त्वतोऽन्यथाभावः । कारणसत्तया सत्तावान् । कारणप्रकाशेन च प्रकाशवान् यस्य स सर्वसत्तास्फूर्तिप्रदः परमात्मा विश्वविवर्तः स एव हेतुरुपादानं यस्याः सर्वप्रकाशशक्तिमत्परमेश्वरोपादानकत्वेन सर्वप्रकाशनफलयोगिन्याः अखिलवस्तूनामिक्षुक्षीरादिमाधुर्यादीनामपि प्रकाशने नानाविधाभिर्वृत्तिभिरौत्पत्तिकी अकृत्रिमा शक्तिः प्रतिपादकतारूपा प्रतिपत्तिरूपकार्यवशेन वृद्धव्यवहारेषु विज्ञायते तर्ककुशलैर्यस्या वेदलक्षणाया वाचस्ताम् । कथमेतस्या ईदृशं सामर्थ्यमिति चिन्तयितुमशक्या शक्तिःप्रभावो यस्यास्तामहं नमामीति सर्वप्रकाशनशक्तिमत्परमेश्वरोपादानत्वं वेदस्य सर्वप्रकाशनसामर्थ्ये हेतुरिति प्रथमवर्णकार्थः । शेषः परार्थः । न शेषोऽशेषः सर्वपुरुषार्थस्तादृशं सर्वशेषिभूतं वस्तु परमार्थसद्ब्रह्म तत्प्रकाशने तदाकारवृत्त्युत्पादनेन तदज्ञानावरणापनये यस्या वेदलक्षणाया वाचः औत्पत्तिकी शक्तिः कार्यवशेन ब्रह्मसाक्षात्काराख्यकार्यलिङ्गेन विज्ञा-

यते । कीदृश्याः विश्वविवर्तस्य कृत्स्नप्रपञ्चस्य हेतोः कारणभूतायाः एत इति वै प्रजापतिर्देवानसृजत असृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरः पवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्रमभिसौभगेत्यन्याः प्रजा इति छान्दोग्यब्राह्मणश्रुतेः । अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तय इति । नाम रूपञ्च भूतानां कर्मणाञ्च प्रवर्तनम् । वेदशब्देभ्य एवादौ निर्ममे स महेश्वर इति च मनुस्मृतेः । शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यामिति सूत्रे श्रुतिस्मृती एवैते प्रत्यक्षानुमानशब्दाभ्यामुक्ते । ननु यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति सर्ववागगोचरत्वश्रुतेः कथन्तादृशे ब्रह्मणि वाचः शक्तिरिति तत्राह । अचिन्त्यशक्तिमिति । तां नमामीति च पूर्ववत् । यथा च लक्षणया वा मुख्यवृत्त्या वोभयाभावेऽपि स्वत एव षड्विधतात्पर्यलिङ्गोपेतोपनिषन्निर्विशेषमपि ब्रह्म बोधयति । तथा विस्तारेण स्पष्टतरमुपरिष्टात्तत्प्रदर्शयिष्यते । तदेवं निर्विशेषे ब्रह्मणि वेदान्तवाक्यमेव प्रमाणमिति द्वितीयवर्णकार्थः । एवं प्रत्यग्ब्रह्मैक्याख्यविषयेण समं प्रतिपाद्यप्रतिपादकलक्षणः संबन्धो वेदान्तानां दर्शितः वेदान्तवच्चतुर्लक्षणमीमांसाख्यशास्त्रस्य शास्त्रवत्तत्प्रकरणस्यास्येति द्रष्टव्यम् । इन्द्रवज्रोपेन्द्रवज्रोपजाति-

वृत्तम् । चतुःसूत्र्यर्थकथनेन मङ्गलम् ॥ ४ ॥

आरम्भाः फलिनः प्रसन्नहृदयो यश्चेत्तिरश्चामपि
नो चेद्विश्वसृजोप्यलं विफलतामायान्त्युपायोद्यमाः ॥
विश्वैश्वर्यमतोनिरङ्कुशमभूद्यस्यैव विश्वप्रभोः
सोऽयं विश्वहिते रतो विजयते विघ्नेश्वरो विश्वकृत् ॥ ५ ॥

अथ विघ्नेश्वरं प्रसादयति । आरम्भा इति । यश्चेत्प्रसन्नहृदयोऽनुग्राहकस्तदा तिरश्चामपि सुग्रीवहनुमत्प्रभृतीनामारम्भा अभिमतक्रियोद्यमाः फलिनः फलाव्यभिचारिणः सातिशयफला वा भवन्ति । नित्ययोगेऽतिशायने वा तद्धितः । नो चेत्प्रसन्नहृदयस्तदा विश्वसृजो ब्रह्मणोऽपि किमुतान्येषामलमत्यर्थमपि ये फलोपायविषया उद्यमास्ते विफलतां व्यर्थतां यान्ति । ब्रह्मणोऽप्यभिमतभङ्गो वत्साहरणादौ स्मर्यते । अत एवमन्वयव्यतिरेकाभ्यां विश्वस्मिन्नैश्वर्यं निग्रहानुग्रहसामर्थ्यं विश्वप्रभोः सर्वप्रशासितुर्भीषास्माद्वातः पवत इत्यादिश्रुतिसिद्धस्य यस्यैव निरङ्कुशमप्रतिहतमभूत्सोऽयं विश्वकृद्विघ्नतदभावादिकृत्स्नप्रपञ्चकृद्भगवानेव विघ्नेश्वरः श्रीगणेशरूपेणावतीर्णो विजयते सर्वोत्कर्षेण वर्तमानोऽस्माननुगृह्णात्वित्यर्थः । तस्याभक्तविघ्नकारिणोऽपि भक्तविघ्ननिवारणायावतारे हेतुर्विश्वहिते रत इति कृपैव तस्यावतारे कारणमित्यर्थः । तस्य सर्वान्प्रत्येकरूपत्वेऽपि तद्भजनाभजनयोरेव विषमफलस्वभाव-

त्वान्न वैषम्यनैर्घृण्यप्रसङ्ग इति भावः । शार्दूलविक्रीडितम् ॥ ५ ॥

वाग्विस्तरा यस्य बृहत्तरङ्गा
वेलातटं वस्तुनि तत्त्वबोधः ॥
रत्नानि तर्कप्रसरप्रकाराः
पुनात्वसौ व्यासपयोनिधिर्नः ॥ ६ ॥

अतः परं सूत्रभाष्यकारवार्तिककारान्गुरुपूर्वक्रमेण पूजयति त्रिभिः । तत्र रत्नाकररूपकेण भगवन्तं व्यासं विष्णववतारं सूत्रकारं प्रथमगुरुं स्तौति । वाग्विस्तरा इति । व्यास एव पयोनिधिः महत्त्वपवित्रत्वगम्भीरत्वस्वच्छत्वादिसाम्यात्तस्य च पयःस्थानीया वेदा एव द्रष्टव्याः । वाचां तरङ्गोक्तेर्व्यासशब्देन वेदव्यसनगुणोपन्यासाच्च । दृष्टमात्राः पुनन्त्येते राजा भिक्षुर्महोदधिरिति स्मृतेः । स नः पुनातु पापमलरहितान्करोत्वित्युक्तम् । यस्य वेदपयसः श्रीव्यासपयोधेर्वाचो वेदलक्षणाया ये विस्तरास्तत्तच्छाखाभेदास्त एव बृहन्तस्तरङ्गाः । विस्तरबृहच्छब्दाभ्यां संक्षिप्ता वाक् सूक्ष्मतरङ्गा इति द्योतितं वेलायास्तीरस्य तटं प्रान्तदेशस्तस्यैव तरङ्गवेगावसानभूमित्वाद्वस्तुनि ब्रह्मात्मैक्ये तत्त्वबोधः । शिष्याणामिति शेषः । सूत्रकारस्य वाक्प्रवृत्तेः शिष्यज्ञानार्थत्वेन तत्सिद्धावेवोपरतिसिद्धेर्युक्तं तस्य तटत्वम् । पदार्थसिद्धौ पदार्थद्वयशोधने

वाक्यार्थनिर्णये तदुपयुक्तप्रमेयस्थितिषु च ये तर्काणां प्रसरणप्रकारास्त एव उपादेयत्वस्वप्रकाशत्वादिसाम्याद्रत्नानि । एतेन रत्नानां पद्मरागेन्द्रनीलादिविविधवैलक्षण्यवत्तर्काणामपि विविधवैलक्षण्यं सूचितम् । यच्छब्दस्य तच्छब्दसापेक्षत्वादसाविति स इत्यर्थः । इन्द्रवज्रोपेन्द्रवज्रोपजातिः ॥ ६ ॥

वक्तारमासाद्य यमेव नित्या
सरस्वती स्वार्थसमन्वितासीत् ॥
निरस्तदुस्तर्ककलङ्कपङ्का
नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥ ७ ॥

सत्संप्रदायेन भाष्यकर्तारं शङ्करावतारं श्रीशङ्कराचार्यं प्रणमति । वक्तारमिति । यमेव व्याख्यातारमासाद्य नित्या सरस्वती वेदलक्षणा निरस्ता निर्मूलिता दुष्टतर्का एव मालिन्यहेतुत्वात् कलङ्काश्च तन्मग्नानां पुनरुत्थानासंभवात्पङ्काश्च यस्याः सा सर्वदुस्तर्कदोषनिरासेन स्वतात्पर्यविषयीभूतार्थसमन्वितत्वेन प्रकटासीत्तं शङ्करं सर्वकल्याणकरं भगवदवतारत्वेन सर्वपूजितपादपद्मं नमामीति संबन्धः । जैमिन्यादिभिर्हि कर्मकाण्डमेव स्वार्थसमन्वितं कृतमुपनिषदस्तु स्वार्थात्प्रच्याविताः कैश्चिच्च भेदविलयवादिभिरुपनिषदः स्वार्थसमन्विताः कृताः कर्मकाण्डं तु स्वार्थात्प्रच्यावितम् । भगवता व्यासेन च विविदिषावाक्यं विचा-

रयता यद्यपि कर्मकाण्डब्रह्मकाण्डयोस्तुल्यमेव प्रामाण्यमङ्गीकृतं तथापि तावन्मात्रेण न स्वार्थसमन्वितता कैश्चित्तत्सूत्रं व्याचक्षाणैर्भर्तृप्रपञ्चादिभिर्भेदादेरवेदार्थस्य वेदार्थत्ववर्णनाच्छ्रीमद्भगवत्पूज्यपादैस्तु व्यावहारिकत्वेन कर्मकाण्डप्रामाण्यप्रवृत्त्यादि व्यवस्थाप्य वेदान्तानां तात्त्विकशुद्धाद्वैतपरत्वं व्यवस्थापितमिति स्वार्थसमन्वितत्वं कृत्स्नवेदस्य संपन्नमिति महिमातिशयं दर्शयितुं यमेवेत्येवकारः प्रयुक्तः। उपजातिः ॥ ७ ॥

यदीयसंपर्कमवाप्य केवलं
वयं कृतार्था निरवद्यकीर्तयः ॥
जगत्सु ते तारितशिष्यपङ्क्तयो
जयन्ति देवेश्वरपादरेणवः ॥ ८ ॥

इदानीं स्वगुरुं वार्तिककारं पूजयति। यदीयेति। देवेश्वरस्य सुरेश्वराचार्यस्य ते पादरेणवो जयन्ति सर्वोत्कर्षेण वर्तन्ते तान्प्रत्यस्मि प्रणत इत्यर्थः। येषां पादरेणवोऽपि सर्वोत्कृष्टास्तेषामुत्कर्षः केन वक्तुं शक्यत इत्यभिप्रायः। सुरपदस्थाने देवपदप्रयोगः साक्षाद्गुरुनामाग्रहणाय गुरोर्नाम न गृह्णीयादिति स्मृतेः। कीदृशास्ते तारिताः संसारसमुद्रपारं गमिताः शिष्यपङ्क्तयोऽस्मदादिशिष्यसमूहो यैः पांसुभिस्ते तथा येषां पादरेणवोऽपि शिष्यांस्तारयन्ति ते स्वयं तारयन्तीति किमु वक्तव्यम्। यदीयानां यत्संबन्धिनां पवनादीनामपि संपर्कं संबन्धं

केवलमवाप्य साधनान्तरशून्या अपि वयं सर्वेऽपि तच्छिष्याः कृतार्थाः कृतप्रयोजना ब्रह्मसाक्षात्कारेण जीवन्मुक्ताः जगत्सु लोकेषु च सद्ग्रन्थकरणाध्यापनादिना निरवद्यकीर्तयो निर्मलयशसो वयमिति महाफलावान्तरफलकीर्तनम्। अतः सर्वथा ते नमस्या एवेत्यभिप्रायः। वंशस्थम् ॥ ८ ॥

गुरुचरणसरोजसन्निधाना-
दपि वयमस्य गुणैकलेशभाजः ॥
अपि महति जलार्णवे निमग्नाः
सलिलमुपाददते मितं हि मीनाः ॥ ९ ॥

गुरुस्तुतिशेषत्वेन ये प्रस्तारिते आत्मनः कृतार्थत्वनिरवद्यकीर्तित्वे ताभ्यां प्राप्तमात्मन औद्धत्यमपाकरोति। गुरुचरणेति। अनेककल्याणगुणार्णवस्य गुरोश्चरणसरोजयोर्महासौभाग्यशालिनोः सन्निधानादनेकगुणार्पणयोग्यादपि वयं तच्छिष्याः सर्वेऽप्यस्य गुरोर्गुणैकलेशमेव भजामो न तु बहुतरं स्वायोग्यत्वात्। स्तुतावेकवचनमपि प्रयोज्यमित्यस्येति न विरुध्यते स्वायोग्यत्वेन बहुप्राप्तव्यसन्निधानेऽप्यल्पग्रहणे दृष्टान्तमाहापि महतीति। चतुःषष्टिलक्षयोजनविस्तृततयातिविपुले शुद्धोदाख्ये सप्तमे समुद्रे निमग्नाः कात्स्न्येन तत्सम्बद्धा अपि मीनाः सलिलं मितमल्पमेवोपाददते गृह्णन्ति। स्वायोग्यत्वेनेति लोकप्रसिद्धमित्यर्थान्तरन्यासः ॥ ९ ॥

शक्तो गुरोश्चरणयोर्निकटे निवासा-
न्नारायणस्मरणतश्च निरन्तरायः ॥
शारीरकार्थविषयावगतिप्रधानं
संक्षेपतः प्रकरणं करवाणि हृष्यन् ॥ १० ॥

एवमल्पज्ञत्वेन ग्रन्थकरणाशक्तौ प्राप्तायामाह । शक्त इत्यादिना । गुरोश्चन्दनवृक्षस्येवान्यत्र स्वगुणसञ्चारणसमर्थस्य निकटे निवासाच्छक्तोऽहमिति कारणपौष्कल्यं दर्शयित्वा महत्यारम्भे विघ्नबाहुल्यसम्भवादभावमाह । गुरोर्नारायणस्मरणतः तद्रूपादाशीर्वादाच्च निरन्तरायो निर्विघ्नोऽहमतो गुरुचरणसमीपवासात्पादसंवाहनादिसमये तत्तत्प्रश्नैरप्रतिपत्तिविप्रतिपत्तिनिराकरणेन शास्त्रार्थज्ञानरूपसामग्रीसम्भवाद्गुरुनारायणस्मरणतश्च निखिलविघ्ननिवृत्तिसम्भवाद्ग्रन्थकरणानुकूलसकलोपकरणसंपत्त्या हृष्यन्हर्षम्प्राप्नुवन्प्रकरणं शास्त्रैकदेशसम्बद्धं शास्त्रप्रयोजनापेक्षया प्रयोजनातिशययुक्तं ग्रन्थविशेषं करवाणि कुर्याम् । शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम् । आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चित इति विष्णुधर्मोत्तरस्मरणात् । शरीरमेव कुत्सितत्वाच्छरीरकं तत्र भवः शारीरको जीवस्तस्य तत्त्वमधिकृत्य कृतो ग्रन्थश्चतुर्लक्षणशारीरकमीमांसालक्षणोऽपि शारीरकः । शारीरं जीवं ब्रह्मतया कायतीति वा तस्यार्थः प्रयोजनं विषयश्च यस्य तत्त-

था । अवगतिरज्ञाननिवर्तिका निर्गुणब्रह्मविद्या सैव प्रधानं विचार्यत्वेन तात्पर्यविषयीभूतं यस्य तच्च तच्चेति कर्मधारयः । अनेन शास्त्रैकदेशसम्बन्धो दर्शितः । संक्षेपत इति सगुणविद्याविचारबाहुल्यपरित्यागरूपेण संक्षेपेणेति शास्त्रात्प्रयोजनान्तरं दर्शितं प्रागेव विवृतमेतत् गुरुप्रशंसापूर्वकं ग्रन्थारम्भप्रतिज्ञा ॥ १० ॥

पदवाक्यमाननिपुणा निपुणं
विमृशन्त्विदं प्रकरणं मनसा ॥
गुणदोषनिर्णयनिमित्ततया
प्रथिता हि पण्डितजना जगति ॥ ११ ॥

ननु स्वस्येवान्यस्यापि मूलशास्त्रादेव तदवगतिसम्भवात्किमनेनेत्याशङ्क्य स्वस्य विद्याशुद्धिरसाधारणं प्रयोजनमित्याह । पदवाक्येति । अथ वा गुरुप्रशंसया गुरुव्यतिरिक्तेषु विद्वत्सु अनादरात्तैरपरिगृहीतोऽयं ग्रन्थो न प्रचरेदित्यभिप्रेत्य तानपि संमानयति । पदवाक्येति । पदनिपुणा वैयाकरणा वाक्यनिपुणा मीमांसका माननिपुणास्तार्किकास्तेषां तद्विचारकुशलत्वात् इदं प्रकरणं पदतो वाक्यतो मानतश्च निपुणमवधानेन मनसा स्वबुध्या विमृशन्तु विचारयन्तु निपुणं मनसेति विशेषणाभ्यामनवधानं परप्रत्ययं च वारयति । प्रार्थितानां तेषां गुणदोषनिर्णयाय प्रवृत्तौ कारुण्यमेव हेतुरित्याह । गुणदोषेति । तथा चोक्तं कविना । आपरि-

तोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् । बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत इति ग्रन्थनिर्माणमात्रं मदधीनं विशुद्धिस्तु निर्मत्सरविद्वदधीनेत्यर्थः ॥ ११ ॥

विद्वांसो यदि मम दोषमुद्गिरेयु-
र्यद्वा ते गुणगणमेव कीर्तयेयुः ॥
तुल्यं तद्बहु मनुते मनो मदीयं
कष्टं तद्वत मनुते यदाह मन्दः ॥ १२ ॥

नन्वस्माभिर्निपुणं विमृशद्भिः दोषकीर्तने क्रियमाणे तव दुःखमेव स्यादित्याशङ्क्याह । विद्वांस इति । निर्मत्सरा विद्वांसो गुणदोषपरीक्षका यदि मम ग्रन्थे दोषं हानाय कथयेयुर्गुणगणं चोपादानाय कथयेयुः , तद्दोषकथनं गुणकथनं च तुल्यं सममेव बहु मनुते आदरेणाङ्गीकरोति मम मनो न तु वाङ्मात्रम् । दोषकीर्तने हि सति तन्निवारणान्निर्दोषो ग्रन्थः शुद्धः स्यादित्यभिप्रायेण दोषकीर्तनं ग्रन्थशुद्धिरूपगुणपर्यवसानाद्गुण एवेति महाननुग्रह इत्यभिप्रायः । यस्तु मन्दो मात्सर्यग्रस्तो दोषगुणविवेचनासमर्थश्च सोऽविचार्यैव यद्वान्ध इव चित्रस्य गुणं दोषं चाह तदपि तुल्यमेव कष्टं दुःखं मनुते वतेति खेदे बह्विति पाठे बहु कष्टं मनुत इत्यन्वयः मनो ममेति शेषः । तदुभयस्यापि ग्रन्थविशुद्ध्यप्रयोजकत्वादित्यर्थः ॥ १२ ॥

महामहिम्नामपि यश्चिकीर्षति

स्वभावसंशुद्धतरं तिरो यशः ॥
सनूनमाच्छादयितुं प्रवर्तते
विवस्वतो हस्ततलेन मण्डलम् ॥ १३ ॥

नन्वस्माभिर्निपुणं विचार्य निर्दोषत्वेन निश्चितेऽपि ग्रन्थे कश्चिदतिमत्सरी दोषमुद्भावयतीति चेत्तदास्माकं महदयशो भवेत्तव च ग्रन्थशुद्धिर्न भवेदित्याशङ्क्याह । महामहिम्नामिति । प्रसिद्धयशसां दोषगुणपरीक्षणक्षमाणां विदुषां भवद्विधानां निर्मत्सरत्वेन मानकुशलत्वेन च स्वभावतः संशुद्धतरमतिनिर्मलं परग्रन्थनिर्दोषत्वापादनरूपं यश आरोपितदोषोद्भावनेन यस्तिरश्चिकीर्षति तिरोभावयितुमिच्छति स जगन्मण्डलव्यापिप्रकाशस्य विवस्वतो मण्डलं लक्षयोजनविस्तृतं हस्ततलेनात्यल्पेन तदसम्बद्धेनाच्छादयितुं प्रवर्तते नूनमिति सर्वथैवासम्भावितमिदं यथा तद्वदसम्भावनीयं कर्तुमिच्छन्सर्वलोकोपहास्य एव भवति । अतो भवतां विशुद्धज्ञानानां मम च भवदादृतग्रन्थस्य न कापि क्षतिरित्यर्थः । विद्वन्माहात्म्यखलतुच्छते दर्शिते ॥ १३ ॥

पुरुषापराधमलिना धिषणा
निरवद्यचक्षुरुदयापि यथा ॥
न फलाय भर्तृविषया भवति
श्रुतिसम्भवापि तु तथात्मनि धीः ॥ १४ ॥

ननु शारीरकार्थविषयमवगतिप्रधानं प्रकरणं कर-

वाणीत्युक्तं तन्नोपपद्यते । शारीरकमीमांसाया एव प्रयोजकाभावेनासंगतत्वात् । शिष्यजिज्ञासितसन्दिग्धार्थनिर्णयाय भगवता निरस्तसमस्तैषणेनाथातो ब्रह्मजिज्ञासेत्याद्यारब्धव्यम् । शिष्यस्य च ब्रह्मण्यत्यन्तानुपलब्धे जिज्ञासा वा सन्देहो वा कथं भवेत् । धर्मिज्ञानसाध्यत्वात्तयोः । तच्च निर्विशेषे ब्रह्मणि न प्रत्यक्षादिना सम्भवति । रूपादिहीनत्वात्तस्य अद्वितीये तस्मिन्लिङ्गासम्भवाच्चाद्वयमेव हि ब्रह्म मुमुक्षुं प्रति शारीरकेण विचार्यते । सगुणब्रह्मविचारस्य प्रासङ्गिकत्वात् । नापि वेदान्तात्तज्ज्ञानम् । विचारात्पूर्वं ततस्तदयोगात् । अन्यथा विचारवैयर्थ्यात् । न चापातज्ञानं विचारं विनापि भवतीति वाच्यम् । तस्यैवानिरूपणात् । निःसामान्यविशेषे ब्रह्मणि सामान्यविषयस्य तस्यासम्भवादपरोक्षे ब्रह्मणि परोक्षज्ञानरूपस्य तस्यायोगात् । अतः शिष्यस्य जिज्ञासासम्भवादजिज्ञासितार्थनिर्णये प्रेक्षावतः प्रवृत्त्ययोगादसङ्गतैव शारीरकमीमांसेति तदर्थविषयमिदं प्रकरणं सुतरामसङ्गतमित्याशङ्क्य विचारात्प्रागपि वेदान्तादेवाधिकारिणो विदितपदतदर्थस्य निर्विशेषब्रह्मसाक्षात्काररूपं ज्ञानं भवत्येव तच्च श्रोतुरसम्भावनाविपरीतभावनादिचित्तदोषैः प्रमाणमप्यप्रामाण्यशङ्काकलङ्कितमित्यनभ्यासदशापन्नजलज्ञानवत्फलाय न भवतीति ततो विचारप्र-

योजिका शिष्यस्य जिज्ञासोपपद्यत इति नोक्तासांगत्यमित्यभिप्रेत्य सदृष्टान्तमाह चतुर्भिः । पुरुषापराधेति । पुरुषस्य प्रमातुरसम्भावनादिलक्षणेनापराधेन मलिना अप्रामाण्यशङ्कया कलङ्किता । न तु प्रमाणस्यापराधेन तस्य दृष्टान्ते दार्ष्टान्तिके च निर्दोषत्वात् । ननु निर्दुष्टप्रमाणजन्यं ज्ञानमप्रामाण्यशङ्कावशादध्यासं न निवर्तयतीति क्व दृष्टमित्याशङ्क्य दृष्टान्तमाह । निरवद्येति । भर्त्तुर्नाम कश्चित्कस्य चिद्राज्ञोऽत्यन्तं वल्लभो ब्राह्मणो राजोपजीविभिर्मात्सर्याद्द्विष्यमाण आसीत्स कदाचिद्दैवयोगान्नेत्रे पिधायारण्ये क्षिप्तश्चिरं तत्र स्थितो दैवयोगेनारण्यकैः सह पुरसमीपमागतोऽपि विद्वेषिराजकीयावरुद्धपुरमार्गः पुरं प्रवेष्टुं न शशाक राजा च भर्त्तुर्मृतः प्रेतो जात इति तैः प्रबोधितः सन्तथैव निश्चयमकरोत । दैवात्कदाचिद्बहिर्गतो बाह्योपवने तं दृष्ट्वापि ब्रह्मराक्षसं मेन इति । पुरुषं सोम्य गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेदित्यादिश्रुतिमूला ग्रन्थकर्तृदेशप्रसिद्धिर्यथा भर्त्तुविषया निर्दोषचक्षुर्जनिता प्रमाणभूतापि मतिर्मृतो भर्त्तुर्द्रष्टुमयोग्य एव किन्तु प्रेत एवायं दृश्यत इत्यसम्भावनाविपरीतभावनारूपपुरुषदोषेणाभिभूता भर्त्तुरेवायमिति निश्चयफलाय पर्याप्ता न भवति तथा निर्दोषवेदान्तमहावाक्यजन्या प्रमाणभूताप्यहं ब्रह्मास्मीति धीर्वेदान्ता

ब्रह्मपरा न भवन्त्येवाद्वितीयं ब्रह्म न सम्भवत्येव संसार्यसंसारिणोरैक्यं न सम्भवत्येवेत्यसम्भावनाविपरीतभावनारूपपुरुषदोषाभिभूता, विचारात्प्रागज्ञानादिनिवृत्तिफलाय न पर्याप्ता भवतीत्यर्थः ॥ १४ ॥

पुरुषापराधविगमे तु पुनः
प्रतिबन्धकव्युदसनात्सफला ॥
मणिमन्त्रयोरपगमे तु यथा
सति पावकाद्भवति धूमलता ॥ १५ ॥

मानमेययोरुपनिषद्ब्रह्मणोर्निर्दोषत्वात्परिशेषात्प्रमातृदोष एव फलप्रतिबन्धक इति शास्त्रीयेण विचारेण तस्यापगमे सत्यप्रामाण्यशङ्कारूपप्रतिबन्धाभावात् पुनस्तस्मादेव निर्दोषवेदवाक्यात्सफला धीरुदेति यथा भर्त्तुर्दुर्जनैररण्ये प्रक्षिप्तो जीवन्नेव पुनरागत इत्युपपत्त्या भर्त्तुर्ज्ञानाप्रामाण्यशङ्काकारणपुरुषापराधविगमे सति तद्विषया भर्त्तुरेवायमिति सफला धीरुदेतीत्याह । पुरुषापराधेति । अत्रानुरूपं दृष्टान्तान्तरमाह । मणीति । तुशब्दोऽवधारणे । मणिमन्त्रयोर्धूमोत्पत्तिप्रतिबन्धकयोरपगमे सत्येव लताकारो धूम उद्भवति पावकात्सदा धूमजननसमर्थान्नान्यथा यथा तथेहापीत्यर्थः ॥ १५ ॥

पुरुषापराधविनिवृत्तिफलः
सकलो विचार इति वेदविदः ॥

अनपेक्षतामनुपरुध्य गिरः
फलवद्भवेत्प्रकरणं तदतः ॥ १६ ॥

भवतु पुरुषापराधविगमात्सफला धीस्तावता विचारशास्त्रस्य किमागतमित्यत्राह । पुरुषेति । सकल इति । धर्मविषयो ब्रह्मविषयश्चेत्यर्थः । वेदविदः शबरस्वामिप्रभृतयः आहुः धर्मजिज्ञासासूत्रव्याख्यायामर्थादिति शेषः । तेषामेतदभिप्राये प्रमाणमाह । अनपेक्षतामिति । प्रथमतन्त्रे ह्यौत्पत्तिकसूत्रे लोके शब्दस्य प्रमाणान्तरमूलस्यैव प्रामाण्यात्तदभावेऽनाप्तवाक्यवद्वेदाप्रामाण्यमाशङ्क्यानाप्तवाक्यस्याप्रामाण्यं न मूलाभावकृतं किं तु दुष्टपुंमूलतया दुष्टत्वेन स्वभावप्रयुक्तप्रामाण्यप्रतिबन्धाद्वेदे तु पदपदार्थसंबन्धस्य नित्यतया तत एव वाक्यार्थसंबन्धेऽन्यानपेक्षणाद्वेदस्वरूपस्यापौरुषेयत्वाच्च न पुरुषमूलतेत्यनपेक्षत्वेन स्वतःप्रामाण्यमुक्तम् । तद्यदि विचारादिकमपेक्ष्य वेदोऽर्थं प्रतिपादयेत्तर्हि सापेक्षतया तस्यानपेक्षत्वं बाधितं स्यादिति सर्वोऽपि विचारः प्रतिबन्धनिवृत्तिमात्रहेतुरिति सर्ववेदवित्संमतमित्यर्थः । गिरो वेदस्यानपेक्षतामर्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादित्यत्र प्रतिपादितामनुपरुध्याबाधित्वा सकलो विचारः पुरुषापराधविनिवृत्तिफल इति वेदविद आहुरिति संबन्धः । विचारस्य प्रतिबन्धनिवृत्तिसाधनत्वे फलितमाह । फ-

लवदिति । अत इति प्रतिबन्धनिरासित्वाभ्युपगमादित्यर्थः । प्रकृष्टं करणं निर्माणं यस्य विचारशास्त्रस्य तदित्यर्थः।अथवा उक्तरीत्या शारीरकारम्भे निर्दुष्टे सति तदर्थाविष्करणाय प्रकृतप्रकरणं फलवदित्यर्थः ॥ १६ ॥

पुरुषापराधशतसंकुलता
विनिवर्तते प्रकरणेन गिरः ॥
स्वयमेव वेदशिरसो वचना-
दथ बुद्धिरुद्भवति मुक्तिफला ॥ १७ ॥

प्रतिबन्धनिवृत्तेरहेतुत्वे स्वतोऽपुरुषार्थत्वे च कथं तन्निष्ठं प्रकरणं फलवदित्याशङ्क्य विवक्षितकार्यविरोधिनि तदनुत्पादस्याग्रिमसमयसंबन्धप्रयोजके प्रतिबन्धके] सति समर्थात्कारणसहस्रादपि कार्याऽनुदयाद्वर्णिताग्रिमसमयसंबन्धाभावसंपादकतयान्यथासिद्धोऽपि प्रतिबन्धकाभावः कार्येण स्वोत्पत्तयेऽपेक्ष्यते इति प्रकरणं तन्निष्ठमपि फलवदित्याह । पुरुषापराधशतेति । शास्त्रेणैव प्रतिबन्धस्य निरस्तत्वात्किं प्रकरणेनेत्याशङ्क्य पुरुषदोषाणामनन्तत्वादावृत्तिरसकृदुपदेशादिति न्यायेन तत्सार्थक्यमुक्तम् शतेति गिरो वेदलक्षणायाः शास्त्रलक्षणायाश्च स्वयमेव इतरासहकृतादेव अथ प्रतिबन्धनिवृत्त्यनन्तरं मुक्तिफला विद्या वेदशिरसो वाक्यादुद्भवति । अभ्यासदशायां केवलाच्चक्षुष इव जलज्ञानमतो न सापेक्षत्वमित्यर्थः । पुरुषा-

पराधाकुलत्वं चाप्रामाण्यशङ्कैवेत्युक्तं जिज्ञासापूर्वकविचारहेत्वापातज्ञानोपपादनम्।प्रमिताक्षरावृत्तम्॥१७॥

स्वाध्यायवन्नकरणं घटते विचारो
नाप्यङ्गमस्य परमात्मधियः प्रसूतौ ।
सापेक्षतापतति वेदगिरस्तथात्वे
ब्रह्मात्मनः प्रमितिजन्मनि तन्न युक्तम् ॥१८॥

नन्वन्वयव्यतिरेकाभ्यां तात्पर्यज्ञानं वाक्यार्थज्ञानहेतुः शक्तिज्ञानवत्तच्च विचाराधीनमिति चेत्तत्राह । स्वाध्यायवदिति । स्वशाखागतवेदवाक्यवदित्यर्थः । घटते युज्यते अस्य स्वाध्यायस्य किं विचारो वेदान्तवाक्यवत्तदर्थज्ञाने करणम् उताङ्गं नाद्यः प्रत्यक्षादिवद्विचाराख्यप्रमाणस्याप्रसिद्धत्वात्तर्करूपस्य तस्य प्रमाणानुग्राहकत्वेन स्वतोऽप्रमाणत्वाद्वाक्यकरणकज्ञानस्य करणान्तरानपेक्षत्वाज्ज्ञानान्तरस्य चासत्त्वात् । द्वितीये च न प्रोक्षणादिवदाग्नेयादेर्वेदस्य विचारः स्वरूपोपकार्यङ्गं तद्वदत्र श्रुत्यादिविनियोजकाभावात्स्वाध्यायस्वरूपस्य स्वतःसिद्धत्वेन तत्रानुपयोगाच्च । अस्तु तर्हि प्रयाजादिवत्परमात्मज्ञानोत्पत्तावारादुपकार्यङ्गम् । तदुक्तम् । इतिकर्तव्यताभागं मीमांसा पूरयिष्यतीति प्रमाणानामनुग्राहकस्तर्क इति च तन्न प्रयाजादिभिराग्नेयादिषु फलानुकूलशक्तिवद्वेदे तत्त्वसाक्षात्कारजननानुकूलशक्तेराधानाभावात्।न हि वाक्य-

स्यौत्पत्तिकार्थप्रकाशनशक्त्याद्यतिरेकेण विचाराधेयं किंचिदस्ति तदङ्गत्वावेदकप्रमाणाभावस्योक्तत्वाच्च । करणोपकारस्य शक्त्यादिज्ञानेनैव सिद्धेश्च उभयत्र साधारणं प्रागुक्तं दूषणं स्मारयति । सापेक्षतेति । आपततीतिच्छेदः।तथात्वे विचारस्य करणत्वेऽङ्गत्वे वा तत्सापेक्षत्वापतनं न युक्तं प्रागुक्तन्यायेनेत्यर्थः॥ १८ ॥

व्युत्पन्नस्य हि बुद्धिजन्म सहसा वाक्यश्रुतौ दृश्यते
वाक्यार्थे न ततोस्ति बुद्धिजनने मीमांसनव्यापृतिः ॥
तेनार्थात्करणादिभावभजने मीमांसनस्याश्रिते
वेदार्थप्रमितौ तु वेदवचसः सापेक्षतायास्यति ॥१९॥

यत्तु तात्पर्यज्ञानं नियतान्वयव्यतिरेकाभ्यां वाक्यार्थज्ञाने कारणं शक्तिज्ञानादिवत्तच्च विचाराधीनमिति विचारस्याङ्गत्वमिति तत्राह । व्युत्पन्नस्येति । सहसा झटिति विनैव तात्पर्यज्ञानाभावनिमित्तविलम्बं व्युत्पन्नस्य शक्त्यादिज्ञानवतो वाक्यस्य श्रुतौ श्रवणे ततः नियतान्वयव्यतिरेकाभावात् । मीमांसनस्य तात्पर्यज्ञानस्य तदर्थविचारस्य च वाक्यार्थबुद्धिजनने न व्यापृतिर्नोपयोग इत्यर्थः । एतदुक्तं भवति न हि तात्पर्यज्ञानं नियमेन वाक्यार्थज्ञानात्पूर्वं संभवति । गवानयनादिवाक्यश्राविणां तज्ज्ञाननैयत्याभावात् । न हि तदा तात्पर्यव्याप्तलिङ्गज्ञानं तेषामस्ति समभिव्याहारमात्रस्य अहो विमलं जलं नद्याः कच्छे महिषश्चरती-

BVBSSMV
236

त्यत्रानन्वितयोर्नदीकच्छयोरपि दर्शनेन तदलिङ्गत्वात् । न च यत्रैकवाक्यत्वन्तस्य वाक्यस्य विशिष्टार्थे तात्पर्यमिति वाच्यन्तस्यापि प्रतारकवाक्यादौ व्यभिचारात् । एकवाक्यताज्ञानादेव नियतार्थज्ञानसंभवेन तात्पर्यज्ञानस्य तत्रोपयोगाभावाच्च अर्थवादादेः प्रतीयमानार्थे तात्पर्याभावनिश्चयेऽपि तद्गतपदशक्त्यादिस्वारस्येन विशिष्टार्थप्रतीतेश्च न तात्पर्यज्ञानं तत्र कारणं नानार्थपदप्रयोगादपि तत्तत्पदार्थोपस्थितियोग्यताद्यनुरोधेन कदाचित्कस्य चिदर्थस्य प्रतीत्युपपत्तेश्च । न हि तत्र सर्वपदार्थस्मरणं नियमेनास्ति । यत्रास्ति तत्र योग्यतादिज्ञानमस्तीति चेत् । युगपत्तावदर्थज्ञानमस्तु किं तात्पर्यज्ञानेन तत्तत्संसर्गघटिततात्पर्यज्ञानस्य तत्तत्संसर्गात्मकवाक्यार्थबोधात्प्रागनुपपत्तेश्च न तात्पर्यज्ञानस्य तत्र हेतुत्वं संभवतीति । नन्वात्मा वा अरे द्रष्टव्यः श्रोतव्य इत्यादिना ज्ञानोद्देशेन श्रवणादिविधानात्कथं तस्य तदहेतुत्वं तत्राह । तेनेति । येन कारणेन विचारोऽङ्गतया करणतया वा न वाक्यार्थज्ञानोपयोगी तेनेत्यर्थः । अर्थादनुपपत्त्या करणादिभावभजने उद्देश्यज्ञानविशेष्यांश इति शेषः । वेदार्थप्रमितौ जनयितव्यायामायास्यतीति पदम् । श्रुतौ द्रष्टव्यपदेन नात्मज्ञानमात्रमुद्दिश्यते आपातात्मज्ञानस्य प्रागेवोत्पन्नत्वात् । किं त्वप्रतिबद्धमात्मदर्शनमेवं च तदुद्दे-

शेन विहितो विचारो विशेषण एव पर्यवस्यति ज्ञानमात्रस्य प्राक्सिद्धस्य तत्साध्यत्वानुपपत्तेरिति श्रुतितोऽपि न विचारस्य ज्ञानं प्रति हेतुत्वमिति प्रागुक्तैव गतिरिति भावः ॥ १९ ॥

आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
जीवेश्वरत्वजगदाकृतिभिर्मृषैव ॥
अज्ञानमावरणविभ्रमशक्तियोगा-
दात्मत्वमात्रविषयाश्रयताबलेन ॥ २० ॥

एवं विचारात्पूर्वमापातप्रतिपन्नं ब्रह्म मुमुक्षुभिर्जिज्ञास्यं विचारश्च प्रतिबन्धकनिवृत्तिमात्रेणार्थवानित्युक्तम् । नन्वेवमपि जिज्ञास्यं ब्रह्म दृश्यं चेद् घटवदनात्मत्वान्न मुमुक्षुजिज्ञास्यं स्यात्स्वप्रकाशं चेत्तस्य यथावत्प्रकाशमानतया न जिज्ञास्यत्वम् न हि स्पष्टं प्रकाशमाने जिज्ञासा भवति । न च स्वप्रकाशमप्यज्ञानावृतं न यथावत्प्रकाशत इति वाच्यमहमिति ज्ञानस्यैवात्मयाथात्म्यविषयत्वात् । ब्रह्मणस्तदविषयत्वे चानात्मताप्रसङ्गः । स्वप्रकाशे आत्मनि ज्ञानसाध्यप्रयोजनस्य विनापि विचारं संभवेन विचारानर्थक्यं च । किं चात्मज्ञानमात्रं न विचारप्रयोजनं तस्य सुखदुःखनिवृत्त्यन्यतरत्वाभावात् । तत्साध्यं चान्यत्स्वर्गादिवन्न मुमुक्ष्वभिलषितं संसारात्मकोनर्थश्च संश्लेन्न ज्ञानान्निवर्त्यः । असंश्लेन्नितरामतो विषयप्रयो-

जनाभावान्नेदं प्रकरणमारब्धव्यमिति तत्राह । आच्छाद्येति । आवृत्येत्यर्थः । अज्ञानमनादिभावरूपं ज्ञानापनोद्यं वक्ष्यमाणं संस्फुरत्स्वप्रकाशतया निरंशतया च यथावत्प्रकाशमानमप्यद्वयानन्दब्रह्मस्वरूपमाच्छाद्य विक्षिपति विविधं तत्स्वरूपविपरीतप्रपञ्चभावमापादयति। वैविध्यमेवाह । जीवेत्यादिना । तृतीयेत्यम्भावे । तथा च स्वप्रकाशस्याप्यात्मस्वरूपब्रह्मणः अविद्यया यथावदप्रकाशमानत्वाज्जिज्ञास्यत्वमुपपद्यते । प्रयोजनं च जीवेश्वरत्वादिभेदकल्पनानिवृत्तिरस्तीति काकदन्तसमं न ब्रह्मेत्याशयः । प्रपञ्चस्य ज्ञानापनोद्यत्वमाह । मृषेति । एतेनाद्वयानन्दब्रह्मस्वभावस्य कथं तद्विपरीतरूपतेति निरस्तम् । शुक्तिकादेरिवाज्ञानाद्रजतादिभाववदात्मनः प्रपञ्चभावस्याप्यज्ञानकल्पिततया मृषात्वान्न कोऽपि दोष इति भावः। मृषात्वं च सदसद्विलक्षणत्वमिति न सदादिपक्षोक्ता दोषाः । सदसदात्मत्वव्यावृत्तय एवेत्युक्तम् । नन्वज्ञानस्य सत्यत्वे कथं तत्कृतविक्षेपस्य मृषात्वं मिथ्यात्वे वा कथं तस्याच्छादकत्वं लोके सत्यस्यैव तद्दर्शनादित्याशङ्क्य मृषाप्यज्ञानमर्थक्रियाकारितयाच्छादयति विक्षिपति च तत्कारित्वे च सत्यत्वं न प्रयोजकमसम्प्रतिपत्तेः । किं त्वाच्छादनाद्यनुकूलशक्तिमत्त्वं तच्च मृषात्मकेऽपि स्वप्नदृष्टे दृष्टमाच्छादकस्य लोकेऽपि सत्यत्वमसम्मतमित्याशयेनाह ।

आवरणविभ्रमशक्तियोगादिति । आवरणशक्तिविक्षेपशक्तिभ्यां योगादित्यर्थः । आवरणशक्तिर्नास्त्यद्वयं ब्रह्म न प्रकाशत इति व्यवहारयोग्यतावरणं तत्प्रयोजकशक्तिः । विक्षेपशक्तिस्त्वहं कर्ता भोक्तेत्यादिभ्रमजननशक्तिरित्यर्थः । नन्वज्ञानमपि शक्तिमच्चेत्परकीयप्रधानान्न विशेष इत्यत आह । आत्मत्वेति । आत्मत्वं सदखण्डचैतन्यं तन्मात्रमेवाश्रयो विषयश्च यस्य तस्य भावस्तत्ता तद्बलेनेत्यर्थः । अज्ञानस्य ह्यात्माश्रयविषयत्वमेव परकीयप्रधानाद्बलं शक्तिद्वयाश्रयत्वप्रयोजकं न तु स्वत इति प्रधानाद्विलक्षणमित्यर्थः ॥२०॥

प्रत्यक्त्वमात्रविषयाश्रयताबलेन
प्रत्यक्स्वरूपमपिधाय पराग्विवर्तैः ॥
प्रत्यञ्चमद्वयमशेषविशेषहीनं
विक्षिप्य तिष्ठति तदग्रहणं मृषैव ॥ २१ ॥

नन्वात्मनोऽज्ञानावृतत्वे प्रकाशायोगात्कथं ततोऽज्ञानान्तःकरणादिभानं न ह्यप्रकाशमानज्ञानाद्विषयप्रकाशो भवति तत्राह । प्रत्यक्त्वेति । विषयपदमत्राविवक्षितं चैतन्यमात्रं यो विषयः तदाश्रयताबलेनेत्यर्थः । अथ वा वक्ष्यमाणरीत्या अधिष्ठानावरणस्य विक्षेपहेतुत्वम् । एवं चोभयमपि हेतुरिति तदुपादानं प्रत्यक्स्वरूपं प्रत्यगात्मनोऽज्ञानादिसाधकचैतन्यांशमपिधायानाच्छाद्य प्रत्यञ्चं पराग्विवर्तैः जीवत्वादिविवर्तैः विक्षिप्य ति-

ष्ठतीति सम्बन्धः । अज्ञानं हि स्वाश्रयावभास्यं न जानामीति तदनुभवात् । अवभासकं च प्रकाशमानमेवेति तदाश्रयचैतन्यमनावृतम् । एवं चाज्ञानं तदाश्रयत्वादेव तदाच्छादकं न भवतीत्यभिप्रेत्यैवमुक्तं तदा चाज्ञानादिभानमविरुद्धं चैतन्यं नास्तीति व्यवहारादर्शनेन तद्योग्यतारूपमावरणं नास्तीति भावः । तर्ह्यज्ञानं ब्रह्मततोऽन्यः स्यादिति नेत्याह । अद्वयमिति । तर्हि कथं प्रकाशमानस्याप्रकाशमानत्वमित्याशङ्क्य उक्तं तावत्प्रकाशमानत्वे प्रमाणम् । एवं जीवेश्वरत्वाद्यध्यासाधिष्ठानतया तत्राप्रकाशमानत्वं च वाच्यम् । विशेषावरणं विनाध्यासायोगादित्यभिप्रेत्य प्रत्यञ्चं जीवत्वादिभिर्विक्षिपतीत्युक्तम् । यद्यपि चैतन्यमात्रमेव ब्रह्म तथापि तदावृतमनुभूयते । तच्च वक्ष्यमाणविधया अविरुद्धमिति । मास्तु तर्हि जीवत्वादेस्तत्राध्यासस्तत्राह । अशेषेति । तथा च निर्विशेषे जीवत्वाद्यवभासोऽध्यासं विना न सम्भवतीति तस्य तत्रारोपो वक्तव्य इत्यर्थः ॥ २१ ॥

प्रतयक्षलिङ्गवचनानि हि दर्शयन्ति
निर्दुःखनित्यसुखविग्रहतां प्रतीचः ॥
निर्दुःखनित्यसुखविग्रहभूम्नि नास्मिन्
संभावयते हशि पुरोदितमल्परूपम् ॥ २२ ॥

ननु यथा साङ्ख्यमते प्रकृतिः पुरुषाश्रयत्वविषय-

त्वमन्तरेण जगदुत्पादयति एवमज्ञानमप्यस्तु, किं तस्य प्रत्यगाश्रयत्वविषयत्वकल्पनया । न चाध्यस्तमज्ञानं तत्कार्यं चेति ततोऽस्य वैलक्षण्यमिति वाच्यम् । तदध्यासस्यैवाद्याप्यसिद्धेरित्याशङ्क्यात्मनि प्रपञ्चस्याध्यासं दर्शयिष्यंस्तदर्थं प्रथमं तस्य तत्र वस्तुतोऽसम्भवं तदर्थं च प्रमाणसिद्धमात्मस्वरूपं दर्शयति । प्रत्यक्षेति । एतानि वक्ष्यमाणानि द्रष्टव्यानि । निर्दुःखनित्यसुखविग्रहतामिति भूम्नश्चैतन्यस्योपलक्षणम् । अन्यथानुवादे तत्कीर्तनायोगात् । ततः किं तत्राह । निर्दुःखेति । निर्दुःखादिस्वरूपेऽस्मिन् चैतन्याद्वयात्मनि अनृतजडेत्यादिनोक्तमल्पं रूपं न सम्भाव्यते । वस्तुतः कथमपि न सम्भवतीत्यर्थः । अहङ्कारप्रमुखो जडप्रपञ्चो न तावदात्मनोऽन्यत्र सिध्यति,आत्मन एव तदुपादानतया वक्ष्यमाणत्वात् । कार्यस्योपादानादन्यत्रावस्थित्यनुपपत्तेः ततसत्तास्फूर्त्ययोगाच्च न ह्यात्मातिरिक्तमपि किञ्चित्सम्भवति, नाप्यात्मनि सम्बन्धान्तरेण तस्य वृत्तिः सम्भवति निरवयवेऽसङ्गे सम्बन्धान्तरासम्भवात् । तादात्म्यं च वास्तवं विरुद्धयोर्न सम्भवति, तद्विरुद्धरूपं चात्मनः प्रत्यक्षादिसिद्धमिति न कथमप्यात्मनि प्रपञ्चस्य वस्तुतः सम्भव इति भावः ॥२२॥

प्राज्ञे सुखं समनुभूय समुत्थितः सन्
सर्वप्रकारविषयप्रतिपत्तिशून्ये ॥

सुप्तोऽहमत्र सुखमित्यनुसन्दधानः
सर्वोऽपि जन्तुरवगच्छति तस्य सौख्यम् ॥ २३ ॥

प्रतिज्ञातमर्थमुपपादयन्प्रथमं प्रत्यक्षेणात्मनो निर्दुःखनित्यसुखतां दर्शयति । प्राज्ञ इति । यद्यपि सुखप्रत्यक्षमात्रमात्मस्वरूपसुखमेव विषयीकरोति तथाप्यन्यथासिद्धिशङ्काशून्यतया निर्दुःखत्वादिसिध्यर्थं च सौषुप्तिकं प्रत्यक्षमुदाहृतं यस्मिन्नेकीभूतः सुषुप्त्यवस्थायां जीव उपाधिकालुष्याभावात्प्रकृष्टप्रज्ञो भवति तस्मिन्प्राज्ञाभेददशायामित्यर्थः । समनुभूय स्पष्टमनुभूयान्यथा सुषुप्त्यर्थं कस्यापि प्रवृत्तिर्न स्यात् । ननु तदपि सुखं जन्यमेव किं न स्यात्तत्राह । सर्वप्रकारेति । स्मृतिरूपा अनुभवरूपा वा या विषयप्रतिपत्तिः तच्छून्ये सुषुप्तेः सर्वविशेषज्ञानोपरमरूपत्वाद्विषयज्ञानं विना सुखजन्मासम्भवात् न तदात्मन्यन्यत्सुखमस्तीत्यर्थः। अत्र देशे काले वा सुखमिति क्रियाविशेषणम् । अनुसन्दधानः स्मरन्नर्थात्तदेव सुखमित्याशयः तस्यानुसन्धानात्स्वरूपचैतन्यस्य सौख्यं निर्दुःखनित्यसुखात्मत्वं यद्यपि सुखमहमस्वाप्समिति स्मृतिर्न निर्दुःखत्वं न वा नित्यत्वं तस्य विषयीकरोतीति तद्बलात्प्राज्ञसुखस्य निर्दुःखत्वादि न सिध्यति तथापि सुषुप्त्यवस्थायामनुभूयमानसुखबलान्निर्दुःखतात्मनः सिध्यति, अत एवोत्थितस्य निर्दुःखमस्वाप्समितिव व्यहारः

सुषुप्तिकालीनसुखसामर्थ्यादेव तस्य नित्यत्वमपि सिध्यतीति प्राज्ञसुखप्रत्यक्षसामर्थ्यादात्मा निर्दुःखनित्यसुखमिति ॥ २३ ॥

सर्वं यदर्थमिह वस्तु यदस्ति किञ्चित्
पारार्थ्यमुज्झति च यन्निजसत्तयैव ॥
तद्वर्णयन्ति हि सुखं सुखलक्षणज्ञा-
स्तत्प्रत्यगात्मनि समं सुखतास्य तस्मात्॥२४॥

एवमनुमानेनाप्यात्मनः सुखात्मत्वसिद्धौ तस्य निर्दुःखनित्यतापि सिध्यतीत्यभिप्रेत्यात्मा सुखाभिन्नः सुखलक्षणवत्त्वाद्वैषयिकसुखवद्यद्यल्लक्षणवत्तत्तदात्मकं यथा गवादीत्यनुमानमाह । सर्वमिति । प्राचुर्याभिप्रायमेतत् यदर्थं यत्सम्बन्धितया प्रीतिविषयः न तु तद्धेतुरित्यर्थः आत्मसुखस्याजन्यत्वात् । इह जगति वस्तु यदस्ति किञ्चित् एतदपि प्राचुर्याभिप्रायं पारार्थ्यमन्यप्रयुक्तप्रीतिविषयत्वं यदिष्यमाणमिति शेषः । निजसत्तया स्वस्वरूपेण सुखमिति वर्णयन्तीति सम्बन्धः । व्याप्तस्य हेतोः पक्षधर्मतामाह । तत्प्रत्यगात्मनीति । समं वैषयिकसुखतुल्यमस्तीति वार्थः । निगमयति । सुखतेति । तस्मादुक्तहेतोः, अत्र यदिष्यमाणं पारार्थ्यमुज्झति निजसत्तया यदिष्यमाणं तद्वा सुखमितिलक्षणं विवक्षितम् । एतदुपपादनाय सर्वमित्याद्युक्तंदुःखादौ सुखसाधने चातिव्याप्तिवारणाय दलद्वयम् । ननु पुत्रा-

दिवत्सुखमपि मम सुखं भूयादित्यात्मार्थमेव काम्यत इति कथं पारार्थ्यमुज्झतीति तन्न । न हि पुत्रादिनैवात्मनः सुखेनापीष्टं किञ्चिज्जायते येन सुखं तदर्थं भवेत् न च सुखमात्मसम्बन्धितयैवाभिलाषास्पदमात्मसम्बन्धित्वस्य दुःखादिसाधारणस्य सुखप्रीत्यप्रयोजकत्वात् न चात्मसुखत्वं तत्र प्रीतिनिमित्तमिति वाच्यं लाघवेन सुखत्वमात्रस्यैव तथात्वात्सुखं चैकमेवेति नातिप्रसङ्गः न च कथं तर्हि मम सुखं भूयात् इत्यभिलाष इति वाच्यं मम प्रत्यक्षसुखं भूयादिति हि तथा काम्यते सुखव्यक्तेरेकत्वेन व्यावर्त्याभावात् प्रत्यक्षं त्वज्ञातब्रह्मसुखादिव्यवच्छेदकमिति तदेव ममेति विशिष्यत इति नोक्तदोषः अहङ्कारशबलात् ममताधिकरणात्केवलं सुखमन्यदिति मदीयत्वमपि प्रतीयमानमस्त्येव परं तु तत्कामनाप्रयोजकं न भवतीति भावः ॥ २४ ॥

प्रेमानुपाधिरसुखात्मनि नोपलब्धः
स प्रत्यगात्मनि कृमेरपि नित्यसिद्धः ॥
प्रेयः श्रुतेरपि ततः सुखतानुमानं
नैयायिकोऽपि न दृगात्मनि निन्हुवीत ॥ २५ ॥

किं च आत्मा सुखमनौपाधिकप्रेमगोचरत्वात् यन्नैवं तन्नैवं यथा दुःखादीत्यनुमानान्तरमाह । प्रेमेति । अनुपाधिरिति । अन्याप्रयुक्त इत्यर्थः । असुखात्मनि सु-

खव्यतिरिक्ते प्रत्यगात्मनि निष्कृष्टाहङ्कारतत्साक्षिचैतन्ये कृमेरपीति बहुलदुःखप्राणिनामप्यात्मनि प्रेमा दृश्यते किमु वक्तव्यं विशिष्टात्मनामिति द्योतितम् । कृमीणामपि स्वदुःखपरिहाराय धावनादिदर्शनेनास्त्येव स्वदुःखे द्वेषः स च तदात्मनि तेषां प्रेमाभावे नोपपद्यते उदासीननरदुःखद्वेषादर्शनादिति भाव- । ननु कृमीणामन्येषां वात्मनि कथं स भवेत्सिद्धे तदयोगादित्याशङ्क्य सर्वानुभवसिद्धः कथं स निराकार्य इत्याह । नित्यसिद्ध इति । सदानुभवसिद्ध इत्यर्थः । दृश्यते हि धनपुत्रादौ सिद्धेऽपि पित्रादेस्तत्साध्योपकारमप्रतिसन्दधतोऽपि प्रेमा एवमात्मन्यपि निरतिशयसुखरूपे स न विरुध्यत इत्यर्थः । किं च तदेतत्प्रेयः पुत्रात्प्रेय वित्तादित्यादिश्रुतितोऽप्यात्मनि नित्यसिद्धे स सिद्ध इत्याह । प्रेयःश्रुतेरिति । तत इति व्याप्तस्य हेतोः पक्षधर्मत्वादित्यर्थः । नैयायिकोऽपीति । अपिशब्दान्मीमांसकादिरपि नैयायिको ह्यनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता चेत्याहेति स्वाभिमताङ्गयुक्तम् आत्मनः सुखतानुमानं न निह्नुवीत न निराकुर्यात् किमु वक्तव्यं श्रुतिप्रधानो मीमांसकादिरिति भावः । नचात्मनि दुःखित्वग्राहकप्रत्यक्षबाधः दुःखित्वादिरूपाधिधर्मतया दृगात्मनि सुखतानुमानस्य ततो भिन्नविषयत्वादित्याह ॥ दृगात्मनीति ॥ २५ ॥

आनन्दविग्रहमपास्तसमस्तदुःखं
वस्तुस्वभावपरिवर्जितसर्वभेदम् ।
आत्मानमध्ययनविध्यनुसारिणस्तं
प्रत्यक्षतः श्रुतिशिरःसु समामनन्ति ॥ २६ ॥

प्रत्यक्षलिङ्गवचनानीति श्लोकोक्तं प्रत्यक्षमनुमानं च दर्शितम्, इदानीं वचनशब्दितां श्रुतिमपि तत्राह । आनन्दविग्रहमिति । आनन्दस्वरूपमित्यर्थः । अपास्तसमस्तदुःखमिति तस्य प्रेक्षावन्मुमुक्षूपादेयत्वं द्योतितम् । ननु सद्वितीये जीवे नाल्पे सुखमस्तीति सुखनिषेधात्कथं तस्यानन्दरूपत्वमिति तत्राह । वस्तुस्वभावेति । यद्यपि जीवस्वरूपं सप्रपञ्चं प्रतीयते, तथापि यत्र नान्यत्पश्यति नान्यच्छृणोतीत्यादिश्रुतिसिद्धमद्वयं ब्रह्मैव तस्य वास्तवं स्वरूपमिति नासावल्पः, तथा च न सुखनिषेधश्रुतेरयं विषय इति भावः । ननु स्वर्गकामादिवाक्यात्सुखवत्त्वमेवात्मनो गम्यते न सुखरूपत्वमिति तत्राह । अध्ययनेति । अध्ययनविधिर्हि स्वाध्यायशब्दोपस्थितकृत्स्नस्वशाखाया अध्ययनं विधत्ते न तु कर्मकाण्डमात्रस्य । एवं चाधीतोपनिषत्काः साधनचतुष्टयसम्पन्नास्तद्गतानि न लिप्यते लोकदुःखेन बाह्यः योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति, विज्ञानमानन्दं ब्रह्म एषोऽस्य परम आनन्दः, यो वै भूमा तत्सुखमित्यादीनि प्रत्य-

क्षवाक्यानि आनन्दात्मप्रतिपादकानि आमनन्ति पठन्ति । पठ्यमानवेदान्तवाक्यान्निर्दुःखनित्यसुखविग्रहं दृग्रूपं भूमानमात्मानमवगच्छन्तीत्यर्थः । अथ वा वेदोषरा वेदान्ता इति मतेन तेषामर्थशून्यत्वात्तत आनन्दाद्यसिद्धिमाशङ्क्याध्ययनविधेर्दृष्टार्थत्वात्कर्मवाक्यवत्तेषामप्यर्थवत्त्वं दुरपह्नवमित्याह । अध्ययनेति । यः प्रत्यक्षानुमानाभ्यां सिद्धस्तमात्मानमानन्दविग्रहमिति सम्बन्धः । एतदुक्तं भवति । उक्तं तावदनृतजडविरोधीत्यत्रात्मा जडाहङ्कारविलक्षणश्चिद्रूप इति । ननु सत्यमुक्तं तदेवानुपपन्नं ज्ञानस्यानित्यत्वादिति चेन्न । ज्ञानपदवाच्यवृत्तेरनित्यत्वेऽपि तदाश्रयसाक्षिचैतन्यस्य तदभावात् । तथाहि । अस्ति तावद्देवदत्तादेः सुखदुःखादिसाक्षात्कारः, स च घटादिसाक्षात्कार इव चक्षुरादिना केन चित्करणेन न साध्यते, तत्र प्रमाणाभावात् । न च सुखाद्युपलब्धिः सकरणिका क्रियात्वादिति तत्कारणं मनः सिध्यतीति वाच्यम् । तत्क्रियात्वस्यासिद्धेः । न च साक्षात्कारत्वात्तत्सिद्धिः । तस्य नित्यत्वेऽप्युपपत्तेः । किं च सुखाद्युत्पत्तिसमयभाविनस्तज्ज्ञानस्य तदा विषयासक्तमनोजन्यत्वमनुपपन्नम् । न च द्वितीयक्षण एव सुखादिज्ञानमिति वाच्यम् । प्रमाणाभावात्, प्रथमक्षणेऽज्ञातसुखसत्त्वे प्रमाणप्रयोजनयोरभावाच्च, द्वितीयक्षणेऽपि सुखाद्युत्पादकमनःसंयोगस्यान्यथासिद्धतया ततस्त-

ज्ञानासम्भवाच्च । न वा विषयासमवायिकारणस्य ज्ञानासमवायिकारणत्वं क्वचिद् दृष्टम्, संयोगान्तरकल्पने चासमवायिकारणनाशेन नष्टसुखादेरनुभवासम्भवाच्च। कथं तर्हि सुखज्ञानमुत्पन्नं विनष्टमित्यनुभव इति चेन्न तावत्सुखादिस्थितिसमये तज्ज्ञानस्योत्पत्तिविनाशानुभवोऽस्ति येन ज्ञाने पृथगुत्पत्त्यादि सिध्येत्। सुखाद्युत्पत्त्यादिदशायां तदनुभवस्य तदुत्पत्त्यादिविषयतयान्यथासिद्धत्वेन तदसाधकत्वात्, तस्मात्सुखाद्युपलक्षिततदनुभवस्य दुःखादिसमयेऽपि स्थितेस्तदुत्पादककरणाऽनिरूपणात्सुखादिविशिष्टतदुत्पत्त्यादेरन्यथासिद्धत्वान्नास्त्येव सुखानुभवोत्पत्त्यादिरेवं तद्भेदानुभवस्यापीत्यबाधितलाघवात् सुखदुःखादिविषयानुभव एक एव स एव पुरुषान्तरस्यापि सुखादिसाधक इति जगन्मात्रसाधकं चैतन्यमेकं तस्यैव घटादेरपि प्रकाशकत्वात्स चात्मैव श्रुतिसिद्धस्तदभेदस्य बाधकाभावादिति चिद्रूप एव आत्मा। एवमुक्तानुमानेन तस्यानन्दत्वसिद्धावानन्दस्य दुःखविरोधित्वेन निर्दुःखत्वमात्मनोऽनित्यत्वायोगेन नित्यत्वं च सिद्धमिति निर्दुःखनित्यचित्सुखविग्रह आत्मा, एवं सर्वस्य प्रपञ्चस्य दृश्यतया वक्ष्यमाणन्यायाच्चानिर्वचनीयत्वसिद्धौ सजातीयादिभेदशून्योऽपीत्युक्तात्मसिद्धिः। एतच्च वेदान्तवेद्यसमस्तस्वरूपोपलक्षणतयोक्तं तत्र कथं जडप्रपञ्चस्य व-

स्तुतः सम्भव इति । कथं तर्हि एतदनुभवः, अध्यासात् । असम्भावितस्यानुभवसिद्धस्याध्यासनियमात् ॥ २६ ॥

अध्यस्तमल्पवपुरस्य न वास्तवं तत्
प्रत्यक्पराग्द्वयमिदं हि परस्परस्मिन् ॥
अध्यस्ततां प्रति समर्थमबोधमात्र-
मन्योऽन्यरूपमिथुनीकरणे निमित्तम् ॥ २७ ॥

ननु प्रपञ्चो नाध्यस्तो बाधकाभावान्न च शुक्तौ रजतादिवद्बाधोऽस्तीत्याशङ्क्य तदध्यस्तताग्राहकं प्रमाणमेव तद्बाधकमित्याह । अध्यस्तमिति । आरोपितमित्यर्थः। बाह्याध्यात्मिकप्रपञ्चोऽध्यस्तो न वास्तव इति वा परिच्छिन्नत्वाच्छुक्तिरजतादिवदित्यभिप्रेत्याह। अल्पवपुरिति । अस्यात्मनोऽल्पं वपुरिव वपुर्यथा प्रसिद्धं वपुः स्वातिरिक्तमात्मानं स्वस्वरूपेण निरूपयदवच्छिनत्त्येवमहङ्कारादिरपि सच्चिद्रूपमात्मानं स्वेन रूपेण भासयतीति वपुः । एतच्चाध्यस्तत्वोपोद्बलनायोक्तम् । ननु सन्घट इत्यादिप्रतीतिविरोधान्नेदमनुमानं साध्वित्याशङ्क्य निरधिष्ठानाध्यासायोगात्सच्चिद्रूपात्मन एव तदधिष्ठानत्वं वाच्यम् । ततश्च सत्यानृतात्मत्वात्प्रपञ्चस्य तत्र सद्बुद्धिरन्यथा सिध्यतीत्याशयेनाह । तत्प्रत्यक्पराग्द्वयमिति । तत् अल्पवपुः प्रत्यक्पराग्द्वयसमुदायात्मकमित्यर्थः। न चाप्रयोजकत्वम् । प्रपञ्चविलक्षण आत्मनि प्रपञ्चात्मताया असम्भवस्योक्तत्वात् ।

नन्वध्यस्तमपि शुक्तिरजतादि सत्यमेवेत्यत्राह । न वास्तवमिति । उक्तरीत्या तस्यानिर्वचनीयत्वसाधनादित्यर्थः । अथ वा नन्वधिष्ठानाध्यस्यमानांशद्वयोल्लेखित्वं भ्रमस्य दृष्टमहमिति प्रत्ययस्त्वेकरूपो दृष्टमात्रविषयः कथमध्यास इत्याशङ्क्याह । तत्प्रत्यक्परागिति । अनुभवेऽपि निपुणं निरूप्यमाणे दृग्दृश्यात्मना प्रत्यगंशः परागंशश्च भासते तस्य चेदमनिदंरूपस्य तप्तायःपिण्डवद्विरुद्धोभयरूपत्वादध्यासं विनैकत्वबोधासम्भवादेतदुभयं परस्परस्मिन्परस्परात्मत्वेनाध्यस्ततां प्रति योग्यमित्यर्थः । ननु प्रत्यक्पराचोः सादृश्याभावाद्विशुद्धे चात्मनि दोषस्याप्यसम्भवादारोप्यस्य च पूर्वमननुभवेन संस्काराभावात् कथं परस्पराध्यास इत्यत आह । अबोधमात्रमिति । स्फुरतोऽपि तत्त्वानवबोधः सर्वत्राध्यासपुष्कलकारणं स चात्मन्यनुभवसिद्धश्चेत्कात्र विसामग्रीत्यर्थः । अन्योऽन्येति । अन्योऽन्यार्थाध्यासे मिथुनीकरणे चेत्यर्थः। प्रत्यक्पराग्रूपं ह्यन्योऽन्यात्मकमन्योऽन्यधर्मवच्चाध्यस्तं तस्य मिथुनीकरणं नाम ज्ञानाध्यासस्तदुभयावच्छिन्नमेकं ज्ञानमिति यावत्। असंसर्गाग्रहनिबन्धनत्वानभ्युपगमादित्युभयत्राज्ञानमेव निमित्तमिति भावः। ततश्च प्रत्यगज्ञानमेव बुद्ध्याद्यात्मना तदुभयोपरक्तज्ञानात्मना च परिणममानमहमिति साक्षिविषयः,तदुक्तम्,अविद्यैव बाह्यदोषापेक्षया

रजताद्याकारेण साक्षिचैतन्यस्य रजतावच्छेदकज्ञानाभासाकारेण च परिणममाना स्वकार्येण सह साक्षिविषयत्वमापद्यत इति। अयमर्थः। दुष्टेन्द्रियस्य शुक्तिसन्निकर्षादिदमिति प्रमाणवृत्तिर्भवति, तत्प्रतिफलितशुक्त्यवच्छिन्नचैतन्यनिष्ठशुक्तित्वाज्ञानं रागसंस्कारादिसचिवं शुक्त्या सह मिथ्यातादात्म्यापन्नरजतात्मना परिणमते, इदमाकारवृत्त्यवच्छिन्नचिन्निष्ठशुक्तिविषयत्वाज्ञानं तु ज्ञानसंस्कारसहकृतं साक्षिरजतसम्बन्धापादकरजतज्ञानात्मना, तच्च जडत्वान्न स्वविषयसाधकमिति सविलासाज्ञानं साक्षिविषय इति । अत्र केचित्। किं रजतज्ञानात्मकाऽविद्यावृत्त्या, तया विनापीदमाकारवृत्त्यभिव्यक्तसाक्षिणैव रजतप्रतिभासोपपत्तेः, अध्यस्तरजतादेः प्रमाणागम्यत्वेनावरणरहितत्वात् , आवरणाभिभवार्थं चिदुपरागार्थं वा वृत्तेरन्यत्र स्वीकारात्,अत एव ज्ञानसुखादौ न वृत्त्यन्तरमुपेयते तेषामनावृतचैतन्याध्यस्तत्वादेव भानसम्भवादन्यथा वृत्तावपि वृत्त्यन्तरापेक्षायामनवस्थापत्तेः,नापि संस्कारार्था वृत्तिः, रजतविशिष्टचिन्नाशेनैव सुखादाविव तज्जननात्,न चार्थनाशजसंस्कारस्य स्मृत्यहेतुत्वाद् वृत्तिसिद्धिः;सुखादावेव तत्कल्पनात्, वृत्त्यन्तरापेक्षया धर्मकल्पनामात्रत्वेन लघुत्वाच्च,न च ज्ञानसंस्कारस्यार्थाहेतुत्वम्,अन्वयव्यतिरेकाभ्यामिहैव तत्कल्पनात्, अत एव प्रातीतिकं रजतम्, दोषादेरप्यावश्य-

करजतोत्पादेनैवार्थवत्त्वमिति वदन्ति। अत्रोच्यते। अनावृतचैतन्याध्यस्ततामात्रस्य जडभानप्रयोजकत्वेऽनुमेयवह्न्यादेरभानापत्तिः, तत्र विषयगतावरणभङ्गानङ्गीकारात्। कथं तर्हि तत्र वह्निभानम्, अनुमानरूपवृत्त्यान्तःकरणावच्छेदेन वह्निविषयकाज्ञानापसरणात्। वह्निमहं न जानामीत्यनुभवेन वह्नावात्मनि चाज्ञानसाधनात्तदन्यतरावरणभङ्गस्य च वह्निव्यवहारहेतुत्वमिति वक्ष्यते। ततश्च तदाकारवृत्तिविषयत्वमेवास्वच्छतामसेषु भानप्रयोजकमास्थेयम्। स्वच्छान्तःकरणसुखादिभाने च वृत्तिं विनापि तदाकारत्वसंभवाच्चित्प्रतिबिम्बाश्रयत्वमपीति जडप्रतिभासे द्वय्येव गतिः। चैतन्यं हि यदाकारवृत्तौ प्रतिबिम्बते तद्भासयति प्रतिबिम्बाश्रयं च वृत्त्यादिकं तथा दर्शनात्। न च क्व चिद्वृत्तिः क्व चित्प्रतिबिम्बाश्रयत्वं तन्त्रमित्यननुगमः। सर्वजडप्रतिभासानुगतं हि चैतन्याकारत्वमेव प्रयोजकं ब्रूमः। चैतन्यं यदाकारं भवति तत्प्रतिभासत इत्यर्थः। चैतन्यस्य तदाकारत्वं न स्वतोऽसङ्गत्वात्। किं तु क्व चित्प्रतिबिम्बात्क्व चित्तदाकारवृत्तिसंबन्धादित्यन्यदेतत्। तत्र सात्त्विकान्तःकरणतद्धर्मेषु प्रतिबिम्बात् तामसेषु तदाकारवृत्तिसंबन्धादेवेति कुतो रजताकारवृत्तिं विना तद्भानम्। न चाध्यस्तरजतस्य अस्वच्छतामसस्य चित्प्रतिबिम्बाश्रयत्वमभ्युपगन्तुं युक्तमस्वच्छरजतसंस्कारसंस्कृताऽवि-

द्यारब्धत्वेनास्वच्छत्वादिति सिद्धाऽविद्यावृत्तिः । ननु परोक्षे तदाकारवृत्तिरपरोक्षे त्वनावृतचिदध्यस्तत्वं तन्त्रमस्तु । मैवम् । सामान्यसामग्रीं विना विशेषसामग्र्या अहेतुत्वेन तत्राप्यस्वच्छतामसमात्रभानहेतुवृत्तिविषयत्वस्यापरिहार्यत्वात् । किं च रजतस्य विषयावच्छिन्नसाक्षिभास्यत्वे अहं रजतवानिति प्रतीतिः स्यान्न त्वहं रजतज्ञानवानिति । किं च त्वन्मतेऽर्थसंस्कारस्य स्मृतिहेतुत्वं ज्ञानसामग्र्या अर्थहेतुत्वं चाक्लृप्तं कल्प्यमिति गौरवम् । प्रातीतिकत्वं च प्रतीतिकालान्यकालासत्त्वं न तु प्रतीतिजन्यत्वं संस्कारादेरपि प्रातीतिकत्वापत्तेः । न च साक्षिकालान्यकालः संभवतीत्यविद्यावृत्तिरेव तत्प्रतीतिः । ननु तवाप्यविद्यावृत्ते रजतविषयत्वाद्धीवृत्तेश्चेदंमात्रविषयत्वादिष्टपुरोवर्तिविशिष्टविषयं वृत्त्यन्तरप्रवर्तकं कल्प्यमिति गौरवमिति चेन्न । एकावच्छिन्नजलदर्पणयोरेकमुखप्रतिबिम्बवदेकतापन्नसत्यमिथ्यावस्तुद्वयेऽप्येकप्रतिभासाभ्युपगमेन शुक्त्यभेदापन्नरजतस्फुरणस्य फलस्यैकत्वात् प्रवृत्त्युपपत्तेरिति संक्षेपः ॥ २७ ॥

सादृश्यधीप्रभृति न त्रितयं निमित्त-
मध्यासभूमिषु जगत्यनुगच्छतीदम् ॥
ब्राह्मण्यजातिपरिकल्पनमात्मनीष्टं
जात्या न साम्यमुपलब्धमिहास्ति किंचित् ॥२८॥

सादृश्यज्ञानादेरध्यासहेतुत्वं व्यभिचारेण निरस्यति । सादृश्यधीति । सर्वाध्यासाननुगतत्वान्न हेतुत्वाभिमतमेतत्त्रितयं सादृश्यधीदोषसंस्कारात्मकमध्यासनिमित्तमित्यर्थः । सादृश्यधियो व्यभिचारस्थानमाह । ब्राह्मण्येति । ब्राह्मणोऽहमिति जात्यध्यास आत्मनि सर्वैरिष्यते, अन्यथा ब्राह्मणो यजेत ब्राह्मणो न हन्तव्य इति विधिनिषेधव्यवस्थानुपपत्तिः, तत्र च न सादृश्यमस्तीत्यर्थः । ननु सोऽपि त्रितयनिमित्तोऽध्यासत्वादिति नेत्याह । जात्येति । आत्मनि हि जात्या सादृश्यमनुपलब्धिबाधितम्, द्वयोरपि गुणक्रियावयवशून्यत्वान्न तस्य प्रतिमेतिश्रुतेश्चेत्यर्थः । ततश्च रजताद्यध्यासेष्वार्थिकं तत्त्रयं न त्वध्यासमात्राङ्गमिति भावः ॥ २८ ॥

भूयस्त्ववत्तनुगुणावयवक्रियाणां
सामान्यपूगवपुरुक्तमिहाभियुक्तैः ॥
सादृश्यवस्तु न चिदात्मनि किंचिदत्र
जात्यादिभिः सह निरीक्षितमस्ति तादृक् ॥ २९ ॥

नन्वत्रापि प्रमेयत्वादिना सादृश्यमस्तीत्याशङ्क्य न तादृक्सादृश्यमध्यासप्रयोजकमतिप्रसङ्गात्, किन्तु भूयोऽवयवगुणादिसाम्यम्, न चैतयोस्तदस्तीत्याह । भूयस्त्ववदिति । एतच्च सामान्यपूगवपुषो विशेषणम्, गुणावयवादीनां बहूनामनेकसामान्यात्मकमित्यर्थः । अथ वा इह गोगवयादावभियुक्तैर्जैमिन्यादिभिः सामान्यपूगात्मकं सादृ-

श्यवस्तूक्तमित्यन्वयः। कासां व्यक्तीनामित्यत्राह। भूयस्त्ववतीनां गवादितनुगतगुणावयवक्रियाणामिति। गुणानां शुक्लत्वदीर्घत्वादीनि सामान्यान्यवयवानां पादपृष्ठत्वादीनि क्रियाणां गमनभक्षणचर्वणत्वादीनि तेषां पूगः समूह एव वपुर्यस्य। नन्विति पाठे गुणादीनां भूयस्त्वं सादृश्यं वस्तूक्तमिति स्वार्थे वतिर्व्याख्येयः। नन्वाकाशवत्सर्वगतश्च नित्य इति वैदिकप्रयोगादध्यासानुपपत्त्या चात्मन्यपि किं चित्सादृश्यं कल्प्यमित्याशङ्क्याह। नेति। अत्र चिन्मात्रात्मनि न तादृगपि सादृश्यं किंचिदस्तीत्यर्थः। न च नित्यत्वसर्वगतत्वाद्यपि जातिसादृश्यम्, अनुवृत्तकारणात्मिकाया जातेरनित्यत्वाज्जातावृत्तेरसर्वगतत्वाच्चेति भावः ॥ २९ ॥

विषयकरणदोषान्न भ्रमः संविदि स्या-
दपि तु भवति मोहात् केवलादेवमेव ॥
भगवति परमात्मन्यद्वितीये विचित्रा
द्वयमतिरियमस्तु भ्रान्तिरज्ञानहेतुः ॥ ३० ॥

दोषस्य व्यभिचारस्थलमाह। विषयेति। विषयदोषः सादृश्यादिः, करणदोषः काचादिः, तत्र संविदि प्रमाणफले घटादिज्ञाने यः परेषां वेद्यत्वादिभ्रमः स तावद्विषयदोषात्करणदोषाद्वा न संभवति, संविदः स्वप्रकाशत्वेनाविषयत्वात्करणागोचरत्वाच्च। अस्तु प्रमातृदोषादेवेति चेत्तर्हि दोषान्तरासंभवात् प्रमात्रभिव्यक्तान्मोहा-

देवेति वक्तव्यं तच्चास्मदिष्टमेवेत्याह। अपि त्विति। तत्रमोहमात्रजत्वसिद्धौ तद्वत्प्रकृतेऽपि मोहैकनिमित्तता साधनीयेत्याह। एवमिति। यथा संविदि वेद्यत्वादिधीर्भ्रमस्तथा परमात्मनि द्वैतबुद्धिरपि यतो भ्रान्तिरतोऽज्ञानहेतुरस्त्वित्यन्वयः। अज्ञानजत्वं संभावयति। विचित्रेति। भिन्नाभिन्नत्वसदसत्त्वादिविचारासहत्वेनानिर्वचनीयेत्यर्थः। भ्रान्तिसाधकमाह। अद्वितीये द्वयमतिरिति। अतस्मिंस्तद्बुद्धिरित्यर्थः। इयमिति साक्षिसिद्धत्वमाह। भगवतीत्यनेन महामहिमत्वात्प्रपञ्चरचनासामर्थ्यं सूचितम्। अस्त्विति समर्थने लोट्। अज्ञानजत्वं शक्यसमर्थनमित्यर्थः। एवं सादृश्यधीदोषयोर्व्यभिचार उक्तः। संस्कारोऽपि व्यभिचारी शुक्तिरजतादिवैशिष्ट्यस्य प्रागनुभूतस्यापि भ्रमविषयत्वादिति स्पष्टत्वान्नोक्तम्॥ ३०॥

संसिद्ध्या सविलासमोहविषये वस्तुन्यधिष्ठानगी-
र्नाधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान्संभ्रमः॥
केषां चिन्महतामनूनतमसां निर्बन्धमात्राश्रया-
दन्योऽन्याध्यसने निरास्पदमिदं शून्यं जगत्स्यादिति॥३१॥

इदानीं परस्पराध्यासे सत्यात्मनोऽप्यनात्मन्यध्यस्तत्वेन बाध्यत्वान्निरधिष्ठानं सच्छून्यं जगत्स्यादित्याशङ्क्याज्ञानस्य बाधावधेरनध्यस्तस्य च शिष्यमाणत्वान्नोक्तदोष इत्यभिप्रेत्याह। संसिद्ध्येति। विलसति व्यक्तीभवति मोहोऽनेनेति विलासो मिथ्यारजतादिः। त-

तन्न यतः सविलासाज्ञानावृते वस्तुनि शुक्त्यादावधिष्ठानसंज्ञा प्रसिद्ध्यां, अधितिष्ठति ह्येतं सकार्यो मोह इति, स च नाध्यस्तोऽतोऽयमस्थानेऽविषये शून्यत्वापादनसंभ्रम इत्यर्थः। ननु यदाधारमारोप्यं भासते तदधिष्ठानं तच्चारोप्येऽध्यस्तमेवान्यथा परस्पराध्यासो न स्यादित्यत आह। नाधार इति। अध्यस्तस्याधारत्वेन भासमाने शुक्तीदमंशे नाधिष्ठानगीरित्यर्थः। किं च शबले संसृष्टतयाध्यस्तोऽधिष्ठानांश आधारः। तदुक्तम्। अतद्रूपोऽपि तद्रूपेणारोप्यबुद्धौ स्फुरन्नाधार इति। न चासावधिष्ठानं भवितुमर्हति, परस्पराश्रयात्, अधिष्ठाने सत्यध्यासोऽध्यासे सत्यधिष्ठानमितीति भावः। यद्वा अन्योऽन्याध्यासे निरास्पदं सच्छून्यं जगत्स्यादिति तर्केण केषांचिद्वादिनं जेतुं महानयं संभ्रम उत्साहोऽस्थाने न युक्तमित्यर्थः। संभ्रमे हेतुमाह। महतामिति। अनूनं तमोज्ञानं येषां तेषां मध्ये महतां शून्यवादिनां निर्बन्धः परमतखण्डने श्रद्धातिशयः। यद्वा निरास्पदमिदं चोद्यं निर्विषयमित्यर्थः॥ ३१॥

अधिष्ठानमाधारमात्रं यदि स्यात्
प्रसज्येत सत्यं तदा चोद्यमेतत्॥
न चैतत् सकार्यस्य मोहस्य वस्तु-
न्यधिष्ठानगीर्गोचरे लोकसिद्धा॥ ३२॥

नन्वधिष्ठानमेवाधारस्तदाश्रयविषयाज्ञानकार्यस्या-

ध्यस्तस्यान्याधारत्वायोगादतः कथमुक्तरीत्या शून्यतोद्धार इत्याशङ्क्याह । अधिष्ठानमिति । यन्निष्ठतया मिथ्यारजतादि भासते सोऽधिष्ठानसामान्यांश आधार इत्युक्तं तन्मात्रमेव चेदधिष्ठानं स्यात्सत्यं शून्यता प्रसज्येत न तु तथेत्यर्थः । यतः सकार्यमोहाविषये विशेषांश एवाधिष्ठानगीर्लोकसिद्धा तद्बोधादेव हि भ्रमो निवर्तते तेन य एव लौकिका इति न्यायेन तथैव शास्त्रेऽपीति नोक्तदोष इत्यर्थः। अत्र केचित्, अध्यस्तमेव हीति न्यायाद् भ्रमविषय इदमंशः सत्येदमंशाद्भिन्नः स चाविद्यावृत्तिगोचरो बाध्यः, शुक्तीदमंशस्तु प्रमाणवृत्तिगोचरो न बाध्यः, न चेदन्ताद्वयविवेकापत्तिः, विवेचकस्य शुक्तित्वादेरावृतत्वात्तद्विवेकाग्रहस्याध्यासहेतुत्वाच्च, न चाविद्यावृत्त्या शुक्तीदन्ताऽभेदेनैव रजतं बोध्यतां किं मिथ्येदन्तयेति वाच्यम्, प्रमाणवृत्त्यविद्यावृत्त्योर्विरुद्धयोरेकत्र कार्येऽप्रवृत्तेः, न चाविद्यावृत्तेर्नेदन्त्वं विषयः, रजतप्रतीतिरिदमि प्रथत इत्यादिविरोधादिति वदन्ति। तन्न, उक्तरीत्या शुक्तीदन्तासंसर्गाध्यासेनैवेदं रजतमित्यध्यासोपपत्तौ मिथ्येदन्त्वकल्पने मानाभावाद्गौरवात्किं चेत्युत्तरश्लोकविरोधाच्च। अध्यस्तमेव हीति स्वरूपेण संसृष्टतया वाध्यस्तमेव भ्रमविषय इत्यर्थः । प्रमाणवृत्त्यविद्यावृत्त्योरेकस्फुरणेनैककार्यत्वस्योपपादितत्वात् । चित्सुखाचार्यैरपीदन्तासंसर्गोऽ-

प्यनिर्वचनीय इत्युक्तं नेदन्त्वमिति दिक् ॥ ३२ ॥

किं चानृतद्वयमिहाध्यसितव्यमिष्टं
स्याच्चेत्तदा भवति चोद्यमिदं त्वदीयम् ॥
सत्यानृतात्मकमिदं मिथुनं मिथश्चे-
दध्यस्यते किमिति शून्यकथाप्रसङ्गः ॥ ३३ ॥

इदानीमाधारावष्टम्भेनापि सत्यानृतमिथुनीकरणतया संसर्गबाधेऽप्याधारस्वरूपाबाधाच्छून्यतापत्तिमपहस्तयति । किं चेति । इहान्योऽन्याध्यासे यद्यनृतद्वयमेव परस्परात्मतयाध्यसितव्यमिष्टं स्यात्तदा शून्यता प्रसज्येत द्वयोरपि बाध्यत्वात् । न चैवं किं तु सत्यं प्रत्यक्,अनृतं परागर्थः स्वरूपतोऽप्यध्यस्तत्वात्,तयोर्मिथोऽध्यासश्चेत्, प्रतीचः पराक्संसृष्टत्वाकारेण बाध्यत्वेऽपि स्वरूपेण सत्यत्वान्न शून्यप्रसङ्ग इत्यर्थः ॥ ३३ ॥

इदमर्थवस्त्वपि भवेद्रजते
परिकल्पितं रजतवस्त्विदमि ॥
रजतभ्रमेऽस्य च परिस्फुरणा-
न्न यदि स्फुरेन्न खलु शुक्तिरिव ॥ ३४ ॥

नन्वन्योऽन्याध्यास एव किं प्रमाणमित्याशङ्क्याहङ्काराध्यासस्यास्फुटत्वात्प्रसिद्ध एव रजताध्यासे तं प्रथमं साधयति । इदमर्थेति । रजतं तावदिदमि शुक्त्यादावध्यस्तमिति सम्प्रतिपन्नमेव, इदमंशोऽपि रजतेऽध्यस्त इति साध्ये हेतुमाह । रजतभ्रम इति । भ्रान्तौ

भासमानत्वाद्रजतवदित्यर्थः । व्यतिरेके शुक्तिविशेषांशवदित्यर्थः । यद्वा यदीदन्त्वमनध्यस्तं स्यान्न भ्रमे स्फुरेच्छुक्तिवदिति तर्क उक्तः। रजते पुरोवर्तित्वलक्षणेदन्त्वास्फुरणे तदर्थिप्रवृत्तिरपि न स्यादिति निगर्वः ॥३४॥

रजतप्रतीतिरिदमि प्रथते
ननु यद्वदेवमिदमित्यपि धीः ॥
रजते तथा सति कथं न भवे-
दितरेतराध्यसननिर्णयधीः ॥ ३५ ॥

एवमर्थाध्यासेऽनुमानमुक्त्वा ज्ञानाध्यासेऽध्यक्षं प्रमाणयति। रजतेति। एकैवेदं रजतमिति धीस्तत्र यथा रजतस्येदमा तादात्म्यं भासत एवमिदमोऽपि रजततादात्म्यमित्यनुभव एवात्रेतरेतराध्यासे मानमित्यर्थः॥ ३५ ॥

अध्यस्तमेव हि परिस्फुरति भ्रमेषु
नान्यत् कथं चन परिस्फुरति भ्रमेषु ॥
रज्जुत्वशुक्तिशकलत्वमरुक्षितित्व-
चन्द्रैकताप्रभृतिकानुपलम्भनेन ॥ ३६ ॥

उक्तानुमानमूलभूतां व्याप्तिं प्रकटयति । अध्यस्तमेव हीति। अध्यस्तस्यैव भ्रमे स्फुरणादिदमंशोऽप्यध्यस्त इति साधितमित्यर्थः । ननु सर्वं ज्ञानं धर्मिण्यभ्रान्तमिति न्यायादनध्यस्तोऽपीदमंशः प्रथतामिति नेत्याह । नान्यदिति । अन्यत्स्वरूपेण संसृष्टतया वा अनध्यस्तमित्यर्थः । धर्मिण्यभ्रान्तमिति च धर्मिस्वरूपे अ-

भ्रान्तं न तु संसर्गोऽपीत्यर्थः । कथं न स्फुरतीति चेदनुभवबाधादेवेत्याह । भ्रमेष्विति । सर्परजतमरीचिद्विचन्द्रादिभ्रमेष्वनध्यस्तानां रज्जुत्वादीनां स्फुरणानुपलम्भादित्यर्थः ॥ ३६ ॥

इतरेतराध्यसनमेव तत-
श्चितिचेत्ययोरपि भवेदुचितम् ॥
रजतभ्रमादिषु तथावगमा-
न्न हि कल्पना गुरुतरा घटते ॥ ३७ ॥

ननु रजतादिभ्रमे द्वैरूप्यावभासादस्तु परस्पराध्यासो न त्वहमध्यासे तत्र द्वैरूप्यानवभासादित्याशङ्क्य तद्दृष्टान्तेनात्रापि साधनीयमित्याह । इतरेति । चितिचेत्ययोर्योऽयमहमित्यध्यासः सोऽपि ततोऽध्यासत्वादेव हेतोरितरेतराध्यासः स्याद्रजताध्यासवदन्यथाध्यासद्वैरूप्यकल्पनानुचिता स्यादित्यर्थः । अत एवाहमुपलभ इत्यहमि चैतन्यानुभवः । व्याप्तिं स्मारयति । रजतेति । प्रकारान्तरेण कल्पनागौरवमाह । न हीति । द्वैरूप्यावभासश्चात्रापि विवेकिनामस्त्येवेति भावः । चित्रादिशब्दवच्चाहंशब्दस्य शबलवाचित्वान्न शब्दद्वयप्रयोगः ॥ ३७ ॥

अनुभूतियुक्त्यनुमितित्रितया-
दितरेतराध्यसनसिद्धिरतः ॥
चितिचेत्यवस्तुयुगलस्य न चेत्
त्रितयस्य बाधनमिहापतति ॥ ३८ ॥

उपपादितमितरेतराध्यासं सोपपत्तिकमुपसंहरति । अनुभूतीति । अस्मात्पूर्वोक्तानुभवयुक्त्यनुमानरूपात्त्रितयाच्चितिचेत्ययुगलेतरेतराध्याससिद्धिः, अन्यथा त्रितयस्यापि बाधापत्तेरित्यर्थः ॥ ३८ ॥

सदृशसांशपराग्विषयेषु चेद्
भवति दोषवशाज्जगति भ्रमः ॥
भवतु तत् सकलं वदितुं वयं
तदुपचारवशाद् दृशि शक्नुमः॥ ३९ ॥

नन्वज्ञातत्वे सादृश्यादिरहितस्य निरंशस्य प्रतीचो विषयिणः कथमध्यासाधिष्ठानत्वं लोके सदृशसावयवपराग्विषयाणामेव शुक्त्यादीनामधिष्ठानत्वदर्शनादिति शङ्कते । सदृशेति । कथं चित्सादृश्यादिसंपादनेन प्रौढ्या परिहरति । भवत्विति । उपचारो व्यवहारः, तत्सामर्थ्याच्चिद्रूपेऽप्यात्मनि तत्सर्वं सुवचमित्यर्थः । तथाह्यन्तःकरणस्य देहेन्द्रियापेक्षया प्रत्यक्त्वं स्वच्छत्वं चास्ति चैतन्यसादृश्यम् । सांशत्वमपि चैतन्यस्याविद्यावशादखण्डस्यापि जीवत्वब्रह्मत्वाद्यात्मकमस्ति । पराक्त्वमपि साभासान्तःकरणे तदविविक्तत्वेन स्पष्टीभावाद्विषयतामिवापन्नस्य शक्यमुत्प्रेक्षितुमनादित्वाच्च पूर्वपूर्वापेक्षया सर्वमिदमुत्तरोत्तराध्यासे शक्यसमर्थनमिति भावः॥३९॥

अपि च भाष्यकृदेव तदब्रवीद्
विषयताद्युपचारसमाश्रयात् ॥

स्ववचसैव न तावदिति ब्रुवन्
सकलमात्मनि विभ्रमसिद्धये ॥ ४० ॥

उक्तपरिहारस्यापसिद्धान्तत्वशङ्कामपनयति । अपि चेति । न तावदस्मत्कल्पितोऽयं परिहारः किं तु भाष्यकृदेवोपचारमाश्रित्य सर्वमिदं विश्वमात्मनि विभ्रमसिद्ध्यर्थमब्रवीदित्यर्थः । न च भाष्यकृदुक्तिरनुपलब्धिबाधितेत्याह । स्ववचसेति । कण्ठरवेणैव न त्वभिप्रायगत्येत्यर्थः । भाष्योक्तिमाह । न तावदिति । अध्यासभाष्ये कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषयतद्धर्माणामित्याक्षिप्य न तावदयमेकान्तेनाविषयोऽस्मत्प्रत्ययविषयत्वादिति ब्रुवन्नित्यर्थः । अस्मत्प्रत्ययोऽन्तःकरणं तत्राभिव्यक्तः सन्विषय इव भवति स ह्यविद्यायामाभासाविवेकेन सूक्ष्मप्रतिबिम्बात्मना प्रविष्टोऽस्पष्टोऽपि प्रत्युपाधौ साभासान्तःकरणे स्थूलप्रतिबिम्बात्मना प्रविष्टः सङ्कीतभानौ स्वर्भानुवदभिव्यक्तः स्वप्रकाशोऽपि स्पष्टीभावमात्रेणोपचारादस्मत्प्रत्ययविषय इत्युच्यते ॥ ४० ॥

अपरोक्षरूपविषयभ्रमधी-
रपरोक्षमास्पदमपेक्ष्य भवेत् ॥
मनसः स्वतो नयनतो यदि वा
स्वपनभ्रमादिषु तथा प्रथितेः ॥ ४१ ॥

एतच्चाभ्युपेत्योक्तम्, वस्तुतस्त्वपरोक्षाध्यासेऽधिष्ठाना-

परोक्ष्यं तत्त्वं न तु सादृश्यादीत्याह । अपरोक्षेति । अपरोक्षरूपाऽपरोक्षविषया च भ्रमधीरपरोक्षाधिष्ठानमात्रमपेक्षते न त्वारोप्याधिष्ठानयोरेकेन्द्रियग्राह्यत्वसादृश्यादिकमपि, व्यभिचारादित्यर्थः । नन्विन्द्रियागोचरस्यात्मनोऽपरोक्षत्वमपि दुर्घटमित्याशङ्क्याह । मनस इति । यदि वेति व्यवस्थार्थम्, क्व चिन्मनसः क्व चित्स्वतः क्व चिच्चक्षुरादित इत्यर्थः । क्वेदमवधारितमित्यत्राह । स्वपनेति ॥ ४१ ॥

स्वतोऽपरोक्षा चितिरत्र विभ्रम-
स्तथापि रूपाकृतिरेव जायते ॥
मनोनिमित्तं स्वपने मुहुर्मुहु-
र्विनापि चक्षुर्विषयं स्वप्नास्पदम् ॥४२ ॥

नन्वात्मभिन्नस्य स्वतोऽपरोक्षत्वाभावात्तादृशोऽध्यासः क्व संप्रतिपन्न इत्याशङ्क्यात्मनि चैवं विचित्राश्च हीति न्यायसिद्धत्वात्स्वप्नभ्रम इत्याह । स्वत इति । चितिस्तावद् ग्राहकान्तराभावात्स्वसत्तायां संशयादिराहित्यात्स्वयंज्योतिष्ट्वश्रुतेश्च स्वतोऽपरोक्षा, रूपादिहीनतया सादृश्यादिशून्या स्वप्नभ्रमाधिष्ठानम् । तथाप्यत्र चितौ स्वप्ने निद्रादोषाद्रूपाद्याकार एव भ्रमश्चक्षुर्विषयं मनोनिमित्तं वा रूपवदधिष्ठानं विनापि पुनःपुनर्जायते, स हि स्वप्नो भूत्वेति श्रुतेः । यद्वा चक्षुरादिव्यापारोपरमात्कथं रूपाकृतिरित्यत्राह । मनोनिमित्तमि-

ति । मनोगतरूपादिवासनानिमित्तमित्यर्थः । स्वप्ने तैजसजीवभोग्यत्वेन वासनापुञ्जशेषस्य मनसोऽवस्थानात् । अत्रेदं विचारणीयं किं ब्रह्मचैतन्यं स्वप्नभ्रमाधिष्ठानम्, उत जीवचैतन्यमिति । आद्ये व्यावहारिकः सन्नज्ञातसत्ताकः स्वप्नप्रपञ्चः स्यात् । अन्त्येऽपि किं जागरे तस्य बाधः किं वा लय इति । अत्र वदन्ति । अवस्थात्रयाविष्टं ह्यात्मचैतन्यं भवति, स्थूलान्तःकरणोपहितं जागरे, वासनाविशिष्टान्तःकरणोपहितं स्वप्ने । सुषुप्तौ च सूक्ष्मतदुपहितम्, इति । तत्र जाग्रदवस्थोचितं चैतन्यं स्वप्नभ्रमाधिष्ठानम्, जागरादौ चाहं चैत्र इति तादृगधिष्ठानबोधात्तद्बाधः । एवं च स्वप्नस्य जाग्रत्प्रपञ्चवैलक्षण्यं सति प्रमातरि बाध्यत्वं वक्ष्यमाणमुपपत्स्यते । स्वप्नान्ते सुषुप्तिश्चेत् स्वप्नसृष्टेर्लय एव, तदभिप्रायेण च वक्ष्यति क्षीणे तु तत्र लयमेतीत्यादीति न पूर्वोत्तरविरोधः । बुद्ध्याद्युपहितजीवरूपं हि तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेरीशकल्पितत्वेन व्यावहारिकत्वाच्छुक्त्यादिवदधिष्ठानत्वयोग्यम्, तन्निष्ठाश्च जीवकल्पिताज्ञानावस्थाः स्वप्नभ्रमोपादानभूता अहं चैत्र इत्यादिजाग्रद्बोधेन बाध्यन्ते, शुक्तिज्ञानेनेव रजतोपादानाज्ञानावस्था इति । न चैवं सत्यहं गजोऽहं नील इति स्वप्नाकारापत्तिरिति वाच्यम् । न हि स्वप्नः सर्वोऽपि तादात्म्याध्यासः किं तु जाग्रत्संस्कारानुसारात्क्वचित्त-

था कश्चित्तु संसर्गाध्यासोऽहं राजायं गजो मम क्षेत्रमिति तदाकारदर्शनादिति । तदिदमापातरमणीयम् । तथा हि । न तावदीशकल्पितस्थूलान्तःकरणोपहितं चैतन्यं स्वप्नकालेऽस्ति यत्तदधिष्ठानं स्यात्,नापि तज्ज्ञानं जागरादिजन्यं स्वप्नभ्रमबाधकं भवितुमर्हति, तद्धि किं साक्षिज्ञानमविद्यावृत्तिरन्तःकरणवृत्तिर्वा । नाद्यौ, तयोरज्ञानानिवर्तकत्वेनाबाधकत्वात् । नान्त्यः, अन्तःकरणवृत्तेरज्ञातबोधत्वादन्तःकरणस्य चाज्ञातसत्तानभ्युपगमेन प्रमाणावेद्यत्वात् स्वस्मिंश्च स्ववृत्तेरसंभवादित्यलमसद्ग्रहेण । केचिदवच्छिन्नानवच्छिन्नसाधारणं चिन्मात्रं स्वप्नाधिष्ठानमाहुः, तच्च साधारणचिन्मात्रस्य परस्परविरोधे हीत्यादिन्यायेन दुर्निरूपत्वादेव नोपपद्यत इति किं प्रपञ्चेन। शरीरावच्छिन्नं चैतन्यं तदधिष्ठानमित्यपरे। तदतिस्थवीयः। न हि जागरादौ शरीरबोधं विना स्वप्नानिवृत्तिः, घटज्ञानादपि तन्निवृत्तेः । अन्ये त्वाहुरन्तःकरणोपलक्षितं चैतन्यमधिष्ठानमिति, तन्मते शुद्धचित एवाधिष्ठानत्वाज्जागरे स्वप्नस्य न बाधः स्यात्तथा च सति प्रमातरि बाध्यत्वं नोपपद्यते।तस्मादनुपहितचैतन्यं जाग्रत्प्रपञ्चाधिष्ठानम्,तदुपहितं तु स्वप्नप्रपञ्चाधिष्ठानमिति वृद्धाः। एवं च जागरादाववश्यकजाग्रद्वस्तूपहितचिद्गोचरप्रमाणवृत्त्या सति प्रमातरि स्वप्नबाध उपपद्यते। तत्र चाधिष्ठानतावच्छेद-

कं घटत्वाद्येव,जाग्रदुपहितत्वमुपलक्षणं सर्वनामशक्तौ बुद्धिस्थत्ववत् । तथा च जाग्रदनुभूतवस्तूपहितमेव ब्रह्मचैतन्यमिन्द्रियोपरमात्तथात्वेनाप्रथमानमुपाधेस्तटस्थत्वात्स्वरूपमात्रेण प्रथमानान्निद्रादोषजाग्रत्संस्कारादृष्टसहकृताज्ञानेन सूक्ष्मप्रपञ्चात्मना विवर्तमानं स्वेनैव भासते अस्य लोकस्य सर्वावतो मात्रामुपादायेति श्रुतेः । अत्र तिरोहितजाग्रदुपाधिविशेषस्य चैतन्यमात्रस्य स्वतोऽपरोक्षस्फुरणमेवाधिष्ठानसामान्यज्ञानमज्ञातोपाधेश्चोपहितानवभासादधिष्ठानतावच्छेदकजाग्रद्घटाद्याकारधिया बाधः । मूलाज्ञानाकार्यत्वादविद्यातिरिक्तदोषजन्यत्वाच्च स्वप्नस्य न व्यावहारिकतेति दिक् ॥४२॥

मनोऽवगम्येऽप्यपरोक्षताबलात्
तथाम्बरे रूपमुपोल्लिखभ्रमः ॥
सितादिभेदैर्बहुधा समीक्ष्यते
यथाक्षिगम्ये रजतादिविभ्रमः ॥ ४३ ॥

आरोप्याधिष्ठानयोरेकेन्द्रियग्राह्यत्वस्य व्यभिचारं वक्तुं मनःप्रमाणत्वाभ्युपेत्यवादेन मानसे नभसि चाक्षुषाध्यासं दर्शयति । मनोऽवगम्येऽपीति । मानसापरोक्षेऽप्यम्बरेऽधिष्ठानेऽपरोक्षतामात्रसामर्थ्याच्छुक्लं नभो नीलं नभ इति नानारूपोल्लेखी भ्रमो दृश्यतेऽतो नोक्तनियम इत्यर्थः । एवं स्वतोऽपरोक्षे मनोऽपरोक्षे च स्वप्नभ्रमनभोनैल्यभ्रमानुदाहृत्य नयनत

इत्यस्योदाहरणमाह । यथाक्षिगम्य इति । व्याख्यातम् । ननु नाकाशो मानसो बाह्यत्वान्मनसो बहिरस्वातन्त्र्यादपि तु साक्षिवेद्य एवेति चेन्न । बाह्यस्य प्रमाणेनैव ज्ञाततया साक्षिवेद्यत्वात्, नभसश्च बहिरिन्द्रियागोचरस्य मानसत्वमन्तरेणाज्ञाततयैव भानप्रसङ्गात्तदुक्तम् । ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षत इति । कथं तर्हि सुखादेः कल्पितरजतादेश्च ज्ञातत्वेनानुभव इति चेत्, तेषामान्तरत्वेनानावृतत्वाद् बाह्यस्य तु नभसो घटादिवदावृतत्वेनावरणभङ्गाय प्रमाणापेक्षणान्मनोवेद्यत्वमगत्याभ्युपेयम् । न च तस्य बहिरस्वातन्त्र्यम्, मनसा ह्येव पश्यतीत्यादिश्रुत्या बाह्यानामपि मनोवेद्यताया दर्शितत्वात्, बहिरस्वातन्त्र्योक्तिश्च केवलमनोविषया । न चानर्पिताकारं मनः साक्षात्कारसमर्थमिति चक्षुरेव तत्राकारार्पकमुपेयम् । ननु कथं नीरूपे नभसि चक्षुषः प्रवृत्तिस्तस्य रूपपुस्कारेणैव द्रव्येषु प्रवृत्तेरिति चेत्, सत्यमेतन्न स्वीयरूपपुरस्कारेणेत्यत्र किंचिन्नियामकमस्ति, पीतः शङ्खो रक्तः स्फटिक इत्यन्यरूपद्वारापि चक्षुःप्रवृत्तिदर्शनात् । न च तत्र रूपवृत्तेः शौक्ल्यस्यैवाभिभवो न रूपस्येति वाच्यम् । तथाप्युद्भूताभिभूतरूपस्पर्शस्य सुवर्णस्याचाक्षुषत्वप्रसङ्गात्ततश्चालोकादिरूपोपहिते नभसि तद्द्वारापि चक्षुःप्रवृत्त्यविरोधः । अप्रत्यक्षेऽपि ह्याकाश इति भाष्यं तु रूपानुपधानकालाभिप्रायं परमतेन वा ।

न चान्यरूपद्वारापि रूपवत्त्येव चक्षुःप्रवृत्तिर्गौरवादुद्भूतरूपं गृह्णदेव चक्षुः प्रवर्तते न तूद्भूतरूपवत्त्येवेति । अस्तु तर्हि चाक्षुषमेव नभ इति चेन्न । अरूपिद्रव्यत्वान्महत्त्वे सत्युद्भूतरूपवत्त्वस्य द्रव्यचाक्षुषत्वे तन्त्रत्वात् । ततश्चात्र रूपद्वारकचक्षुरर्पिताकाशाकारमनोवृत्तिविषयत्वे नीलत्वाद्यारोप इति भावः । एवं तमोऽपि मानसमालोकं विना रूपिग्रहे चक्षुषोऽसामर्थ्यादिति संक्षेपः ॥४३॥

ज्ञातेऽपि तावति ततोऽनतिरिक्तरूपे-
ऽप्यज्ञानतः स्फुरणमस्फुरणं च दृष्टम् ॥
दूरस्थयोर्ननु वनस्पतिवस्तुनोस्तद्-
भेदो न दृष्टिविषयोऽवगते च ते नः ॥ ४४ ॥

तथापि ज्ञातसामान्यांशमज्ञातविशेषांशमधिष्ठानं न चात्मनो निरंशस्य तत्संभव इत्याशङ्क्याभेदेऽपि ज्ञाताज्ञातत्वसंभवमुपपादयति । ज्ञातेऽपीति । तावति तन्मात्रे तदभिन्न इत्यर्थः । ईदृशे वस्तुनि ज्ञातेऽप्यज्ञानवशात्तस्यैव स्फुरणमस्फुरणं च दृष्टमित्यर्थः । कुत्र दृष्टमित्यत्राह । दूरस्थयोरिति । दूरस्थे वनस्पतिद्वये एकोऽयं वनस्पतिरिति भ्रमो भवति तत्र चानवस्थाभयादन्योऽन्याभावप्रतियोगिप्रमाणयोरनिरूपणाच्च भेदस्य वनस्पतिरूपानतिरेकात्तत्स्फुरणेऽपि भेदास्फुरणं दृष्टमित्यर्थः । ते वनस्पतिवस्तुनी नोऽस्माकमवगते तयोर्भेदस्तु तदभिन्नोऽपि न दृष्टिविषय इत्यर्थः । ननु

ननु तत्रापि वनस्पतित्वेन स्फुरणं भेदत्वेनास्फुरणं तच्च भिन्नमेवेत्याशङ्क्याह । तत इति । शब्दान्तराभिलप्यत्वेन भेदेऽपि स्वरूपेणाभिन्नमेव भेदरूपं वनस्पतिरूपादित्यर्थः,इतश्च ज्ञातस्याज्ञातत्वं न विरुद्धं त्वदुक्तमर्थं न जानामीत्यर्थे भासमान एव तदज्ञानानुभवात् ज्ञानवदज्ञानस्यापि विषयनिरूप्यत्वात्सविषयके च विषयस्यैव विशेषणत्वात् ज्ञानस्य च विशेषणत्वात् । न च तत्र ज्ञातसामान्यांश एवाज्ञाननिरूपकस्तस्य प्रमाणावगतस्याज्ञानाविषयत्वात् परबुद्धिस्थविशेषस्याशक्यज्ञानत्वात् । कथं विशेषणत्वमिति चेन्न । अज्ञाततया साक्षिवेद्यत्वाविरोधात् । आवृतचितेरज्ञानाविरोधस्यानुभवसिद्धत्वाच्च, परैरप्यनभ्यासदशायां ज्ञातेऽपि जलादौ संशयाभ्युपगमादिति दिक् ॥ ४४ ॥

यत्रापि दैवगतितोऽस्त्यतिरिक्तभावो
रूपात्प्रतीतिविषयादितरत्र रूपे ॥
तत्राप्यबोधघटनां प्रति नाङ्गभाव-
स्तस्यातिरिक्तवपुषोऽपुनरुक्तरूपात् ॥ ४५ ॥

ननु शुक्त्यादौ ज्ञाताज्ञातांशयोरियं शुक्तिरिति शब्दद्वयवाच्यत्वेन भेददर्शनान्नैकस्य ज्ञाताज्ञातत्वमित्याशङ्क्य तत्र सन्नप्यंशभेदस्त्वप्रयोजक इत्याह । यत्रापीति । यत्रापि शुक्त्यादौ प्रतीतादिदंरूपादितरत्राप्रतीते विशेषांशे दैवाद् भेदो विद्यते तत्रापि तस्य

भेदस्यापुनरुक्तशब्दवाच्यादिदंरूपादतिरिक्तवपुषः शुक्त्यादेरज्ञाततां प्रति नाङ्गत्वमित्यर्थः ॥ ४५ ॥

शुक्तीदमंशात् पृथगप्रतीता
त्रिकोणता स्यान्ननु वस्तुवृत्त्या ॥
तथापि तत्स्थं न पृथक्त्वमिष्टं
तदप्रबुद्धत्वनिमित्तभूतम् ॥ ४६ ॥

इदन्त्वशुक्तित्वधर्मभेद एव ज्ञाताज्ञातत्वावच्छेदक इति चेन्नेत्याह । शुक्तीदमंशादिति । अप्रतीता त्रिकोणता शुक्तित्वं यद्यपि प्रतीताच्छुक्तीदन्त्वाद्वस्तुतः पृथक् तथापि तत्स्थं पृथक्त्वं तस्याः शुक्तिताया अप्रतिबुद्धत्वे निमित्तं नेष्टमिति सम्बन्धः ॥ ४६ ॥

यतः प्रपश्यन्नपि भेदिनः स्वं
वनस्पते रूपमभिन्नमस्मात् ॥
न भेदमस्य प्रतिपद्यतेऽक्ष्णा
वनस्पतेः पार्श्वगतात्परस्मात् ॥ ४७ ॥

कथं नेष्टमिति चेदुक्तव्यभिचारादेवेत्याह । यत इति । यस्माद् भेदवतो वनस्पतेः स्वं रूपं प्रपश्यन्नप्यस्माद्वनस्पतेः सकाशादभिन्नं पार्श्वस्थाद्वनस्पतेः सकाशादस्य भेदमक्ष्णा न प्रतिपद्यते स्वतो धर्मधर्म्यभेदेऽपि ज्ञाताज्ञातत्वदर्शनात्तद्भेदोऽप्रबुद्धत्वानङ्गमित्यर्थः ॥४७॥

सम्प्रत्यभिज्ञनयनोत्थधियो घटादेः
स्वाभाविकात्स्ववपुषोऽनतिरिक्तरूपः ॥

स्थेमाप्रबोधविषयो विषयत्वमेती-
त्यङ्गीकृतं ननु मितेऽपि घटादिकेऽर्थे ॥ ४८ ॥

स्वभिन्नभेदवादिमतेऽपि ज्ञातस्याज्ञातत्वमविरुद्धमित्याह । सप्रत्यभिज्ञेति । मितेऽपि प्रमाणान्निश्चितेऽपि घटाद्यर्थे तस्यैव घटादेः स्वाभाविकात्स्ववपुषः स्वरूपादनतिरिक्तः स्थेमा स्थिरत्वमभेदः पूर्वमप्रबुद्धोऽपि सप्रत्यभिज्ञस्य पुंसो नयनोत्था या धीः सोऽयं घट इति प्रत्यभिज्ञात्मिका तस्याः पश्चाद्विषयो भवतीति सर्वैरप्यङ्गीकृतमित्यर्थः । अथ वा प्रत्यभिज्ञा संस्कारः तत्सहितनयनोत्थधिय इत्यर्थः । न हि स्थैर्यं नाम कश्चिद्गुणः क्रिया धर्मान्तरं वा, अपि तु वस्तुस्वरूपमेव पूर्वापरकालसम्बन्धं निमित्तीकृत्य स्थेमोच्यते । एवं च क्षणिकवादिनां प्रत्यक्षेऽपि घटादौ तदभिन्नस्थैर्याज्ञानं चेत् ज्ञानसाम्राज्यसीमनि प्रतीचि ज्ञातेऽज्ञानाविरोध इति किमु वक्तव्यमिति भावः ॥ ४८ ॥

एवं स्फुरत्यपि दृगात्मनि तत्स्वरूपे-
णास्फूर्तिभाजि परिकल्पिततोपपन्ना ॥
स्वाज्ञानतो जगदिदं परमेश्वरोऽसौ
जीवोऽहमित्यपि विभागवतोऽल्पकस्य ॥ ४९ ॥

एवं च निरंशस्यापि सिद्धमात्मनोऽधिष्ठानत्वमित्युपसंहरति । एवमिति । प्रत्यगनिदंरूपेण स्फुरत्यपि चिदात्मनि नित्यमुक्ताद्वयानन्दरूपेणास्फूर्तिभाजि अ-

धिष्ठाने स्वाज्ञानमात्रदोषादल्पकस्याहङ्कारादेरध्यस्तता प्रागुक्तयुक्तिभिरुपपन्नेत्यर्थः। अल्पकं रूपं विशिनष्टि। जगदिति। इदमिति साक्षिसिद्धत्वादसाविति परोक्षत्वाद्विभागो नानात्वं तद्वत इत्यर्थः। यद्यपि स्फुरति चिदात्मनि नास्ति न भातीति व्यवहारयोग्यतालक्षणमावरणं नास्ति विरोधात्। तथापि तदत्यन्ताभिन्नेऽप्यद्वयानन्दरूपेऽनुभूयमानत्वादेव तदङ्गीक्रियते न ह्यज्ञानावृतत्वं तद्वेष्टितत्वं येन विरोधः स्यात्किं तूक्तव्यवहारयोग्यत्वमेवेति भावः॥ ४९ ॥

अल्पं रूपं बन्धनं प्रत्यगात्मा
बद्धोऽनेन स्वच्छचैतन्यमूर्त्तिः॥
स्वात्माज्ञानं कारणं बन्धनेऽस्य
स्वात्मज्ञानात्तन्निवृत्तिश्च मुक्तिः॥ ५० ॥

एवमल्परूपस्याध्यस्तत्वे साधिते बन्धतदनर्थत्वतत्कारणमुक्तितदर्थत्वतत्कारणात्मकं षट्कं सिद्धमित्याह। अल्पं रूपमिति। अल्पं परिच्छिन्नं कर्तृत्वादि रूप्यत इति रूपं यन्नामरूपकर्मात्मकं तदस्य भूम्नो बन्धनमिव बन्धनमित्यर्थः। ननु कुतोऽस्याल्परूपस्यानर्थत्वमित्याह। बद्ध इति। अनेन ह्यल्परूपेण धर्मधर्म्यध्यासात्मकेनात्मा बद्धो निगडितः। स्वच्छोऽप्यस्वच्छ इव विज्ञोऽप्यज्ञ इवानन्दोऽप्यशनायादिविविधदुःखदावदहनप्रदीप्तशिरा इवानिशं बम्भ्रमीति। ननु

कूटस्थासङ्गचिदेकरसः सन् कथमयमीदृशीं दशामापन्न इत्यत्राह । स्वात्माज्ञानमिति । स्वाश्रयविषयाज्ञानमेवास्यात्मनो बन्धकारणं नान्यदित्यर्थः। नन्वीदृशस्य सहजमोहान्धकूपमग्नस्य विवशस्य कुतो बन्धविच्छित्तिः स्यादित्यत्राह । स्वात्मेति । स्वात्मनोऽद्वयानन्दब्रह्माभेदेन यज् ज्ञानं तत एवास्य समूलबन्धनिवृत्तिरित्यर्थः । तस्या उपादेयत्वमाह । मुक्तिरिति । सा हि मुक्तिरखिलानर्थनिर्मुक्तपूर्णानन्दावाप्तिरूपत्वात् परमपुरुषार्थ इत्यर्थः ॥ ८० ॥

अज्ञानमप्यविदुषोऽस्य न तु स्वतोऽस्ति
चैतन्यनिर्विकृतिताद्वयताविरोधात् ॥
अज्ञातताप्यनवबोधनिबन्धनैव
नात्माश्रयत्वमपि चोदयितव्यमत्र ॥ ८१ ॥

नन्वनादिभावरूपस्याज्ञानस्य ब्रह्मवदेव निवृत्त्यसम्भवात्कुतस्तन्निवृत्तिरूपा मुक्तिः फलमित्याशङ्क्य तस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वं साधयति । अज्ञानमपीति । तथाहि, अज्ञस्य स्वात्मन्यज्ञानान्वयः किं स्वाभाविकः कल्पितो वा। नाद्य इत्याह । न त्विति । कुत इत्यत्राह । चैतन्येति । स्वभावत आत्मन्यज्ञानमस्ति चेद्वस्तुभूतं स्यात्, न च स्वप्रकाशचिदात्मके वस्तुतोऽज्ञानं वर्तितुमर्हति । प्रकाशतमसोर्विरोधात् । तथाऽज्ञानमात्मधर्मश्चेत्स्वयं विनश्यदात्मानं विकुर्यात्।

उपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायात् तथाऽज्ञानस्य वस्तुत्वे द्वैतापत्तिरिति चित्त्वनिर्विकारत्वाद्वयत्वश्रुतिविरोध इत्यर्थः। द्वितीयमङ्गीकरोति। अज्ञाततापीति। अपिस्त्वर्थः। तथात्वे हि मध्यन्दिनालोकमण्डले कौशिकादिकल्पितान्धकारवदविरोधः स्यादिति भावः। नन्वेवमज्ञानेनैवाज्ञानकल्पनायामात्माश्रयत्वमिति नेत्याह। नात्मेति। अनादि ह्यज्ञानमज्ञानतन्त्रमज्ञातत्वमप्यनादीति क्वात्माश्रय इति भावः। यद्वा अत्रानिर्वचनीयवादे नानुपपत्तिर्दूषणमिति भावः। के चित्तु सत्कार्यासत्कार्यवादिनोरभिव्यक्तावुत्पत्तौ च नात्माश्रयश्चेत्किमु मायावादिन इत्यर्थमाहुः ॥५१॥

द्वारं तमोऽन्वयमपेक्ष्य दृशा हि दृश्यं
सङ्गच्छते सकलमत्र न नो विवादः ॥
मोहोऽपि दृश्यवपुरत्र च सम्वदध्वे
तस्मात्तदन्वयनिमित्तमपीह मोहः ॥ ५२ ॥

अज्ञानादेवाज्ञानकल्पने प्रमाणमाह। द्वारमिति। आत्मन्यज्ञानसम्बन्धोऽज्ञानकृतो दृग्दृश्यसम्बन्धत्वाद् घटज्ञानसम्बन्धवत् प्रसाध्याङ्गकत्वाद्व्याप्तिसूचनार्थो हि शब्दः। अयमर्थः। यस्मादसङ्गया दृशा सकलमेव दृश्यं घटादि सम्बध्यमानमज्ञानसम्बन्धं द्वारीकृत्याध्यासिकेन तादात्म्येनैव सम्बध्यते, अन्यस्य संयोगसमवायादेरशक्यनिरूपणत्वादिति वक्ष्यति न सङ्करो ना-

पि च संयुतिस्तयोरित्यादि, आत्मनोऽनात्मना योगो वास्तवो नोपपद्यत इति च वार्त्तिकं तस्मान्नात्र व्याप्तौ विवदितव्यमित्यर्थः। हेत्वसिद्धिमुद्धरति। मोहोऽपीति। अहमज्ञ इत्यनुभवादित्यर्थः। अत्र चेति। व्याप्तौ विवादो न तु हेतोः पक्षधर्मत्वे इत्यर्थः। ततश्चात्रापि मोहनिमित्तत्वमिति निगमयति। तस्मादिति ॥५२॥

संविद्धुरं वहति तद्विषयोपयुक्तां
स्वात्मन्यपि स्वरसतः स्वकरूपसिद्धेः।
कार्यप्रपञ्चपरिकल्पनमात्ममोहान्
मोहप्रकल्पनमपीति तथोपपन्नम्। ५६ ॥

ननु कथं प्रपञ्चकल्पनोपक्षीणस्याज्ञानस्य स्वकल्पकत्वमपीत्याशङ्क्य स्वपरनिर्वाहकस्वभावत्वादित्याह। संविदिति। यथा हि प्रमाणफलभूता संवित्स्वविषयघटादिसिद्धौ स्वसिद्धौ चोपयुक्तां धुरं तद्विषयाज्ञानसंशयादिनिवृत्तिभावं वहत्युभयमपि साधयतीत्यर्थः। एवमज्ञानादेव प्रपञ्चकल्पनमज्ञानकल्पनं चोपपन्नमित्यर्थः। ननु संवित्संविदन्तरवेद्यैव स्वस्य स्वविषयत्वासम्भवादित्याशङ्क्याह। स्वरसत इति। संविदन्तरवेद्यत्वेऽनवस्थानात्स्वसत्तायां संशयादिराहित्यात्स्वव्यवहारे परानपेक्षैव संविदित्याद्युक्तप्रायम् ॥५३॥

आत्मा प्रसाधयति वेद्यपदार्थजातं
स्वात्मानमप्यवगतिक्षमशक्तियोगात् ॥

स्वाज्ञानमेवमिदमात्मपरप्रक्लृप्तौ
शक्तं भवेदिति न किं च न दौस्थ्यमस्ति ॥५४॥

संवित्स्वप्रकाशत्वे विप्रतिपन्नं प्रति निदर्शनान्तरमाह । आत्मेति । यथा वेद्यं घटादिकं स्वं चावगतिसमर्थज्ञानाख्यगुणयोगात्साधयति, आत्मकार्यव्यवहारसहकारित्वात्, ज्ञानं शक्तिरित्युक्तम् । एवमज्ञानमपि शक्तिवशात्स्वपरकल्पकं स्यादित्यर्थः ॥ ५४ ॥

भेदं च भेद्यं च भिनत्ति भेदो
यथैव भेदान्तरमन्तरेण ॥
मोहं च कार्यं च बिभर्ति मोह-
स्तथैव मोहान्तरमन्तरेण ॥ ५५ ॥

नन्वात्मनोऽज्ञानाख्यशक्तिमत्त्वादस्तु स्वपरसाधकत्वमज्ञानस्य तु परशक्तिभूतस्य शक्त्यन्तराभावादज्ञानान्तरमेवाज्ञानसाधकमुपेयमेवञ्चानवस्थेत्याशङ्क्य परदृष्टैव दृष्टान्तान्तरमाह । भेदं चेति । यथैव हि भेदोऽन्योन्याभावो भेद्यं घटपटद्वयं मिथो भिन्नं बोधयति । आत्मानमपि भेदं घटादेर्भेद्यात्सकाशाद्भिनत्ति न तु स्वप्रतियोगिकं भेदान्तरमपेक्षते । अनवस्थानात्तथा मोहोऽपि मोहान्तरं विना मोहं तत्कार्यं च कल्पयतीत्यर्थः ॥ ५५ ॥

ब्रह्मज्ञानं सूत्रयन् सूत्रकारो
बन्धोत्पत्तेर्हेतुविध्वंसनाय ॥

एतत्सर्वं सूचयामास तस्मा-
देतत्सर्वं भाषते भाष्यकारः ॥ ५६ ॥

एवं भाष्योक्ते बन्धमिथ्यात्वे साधिते यदि शास्त्रारम्भोपोद्घात आदावध्यासः, किमिति सूत्रकृतोपेक्षित इत्याशङ्क्य सूत्रेष्वेव हि तत्सर्वमिति न्यायादसौत्रस्य भाष्यविषयत्वायोगादर्थगतया सूत्रित एवेत्याह । ब्रह्मज्ञानमिति । अथातो ब्रह्मजिज्ञासेति मुमुक्षोर्ब्रह्मजिज्ञासोपदेशादधिकारिविशेषणस्य मोक्षस्य बन्धहेत्वज्ञानध्वंसात्मकस्य ब्रह्मज्ञानं साधकमिति सूचयन्, बन्धस्य सत्यत्वे ज्ञाननिवर्त्यत्वानुपपत्तेः, एतत्सर्वं पूर्वोक्ताध्याससाधनप्रबन्धं मुनिः सूचयामासेत्यर्थः । तेन नासूत्रितार्थवर्णनं भाष्यकृत इत्याह । तस्मादिति । ननु ज्ञानमध्यस्तस्यैव निवर्त्तकमिति नायं नियमः, पूर्वज्ञानस्योत्तरज्ञानेनेच्छायाः स्वविषयज्ञानेन शोकस्य सुहृद्दर्शनेन पापस्य सेतुदर्शनेन विषस्य गरुडध्यानेन प्रवृत्तिप्रागभावस्य प्रवर्त्तकज्ञानेन निवृत्तिदर्शनादिति चेन्न । तत्त्वज्ञानत्वेन निवर्त्तकत्वस्य विवक्षितत्वात्, उत्तरज्ञानादेस्तु विरोधिगुणत्वेन सिद्धित्वेन सुहृज्ज्ञानत्वेन विहितक्रियात्वेन प्रवृत्तिसामग्रीत्वेन यथायथं निवर्त्तकत्वात् । प्रकृतेऽप्यात्मज्ञानत्वेनैव निवर्त्तकत्वमिति चेन्न । अहमिति ज्ञानादपि बन्धनिवृत्त्यापत्तेः । अहं ब्रह्मास्मीति ज्ञानमेव निवर्त्तक-

मिति चेत्तदेव हि तत्त्वज्ञानम्, आत्मानं चेद्विजानीयोदयमस्मीति पूरुष इत्यादिश्रुतेः । तत्त्वज्ञानत्वेन निवर्त्तकत्वं च न निवर्त्त्यस्य मिथ्यात्वं विना निर्वहति। तथा हि। न तावद् बुद्ध्यादिप्रपञ्चोपहितब्रह्मज्ञानं तत्त्वज्ञानं भवति, ब्रह्मणो वस्तुतस्तथात्वाभावात् , किन्तु विशुद्धब्रह्मज्ञानम्, विशुद्धिश्च प्रपञ्चराहित्यम्, न च सत्यप्रपञ्चाश्रये तदानीमेव तद्राहित्यं वर्त्तते , न चावर्त्तमानस्य साक्षात्कारविषयत्वसंभवः , येनासौ भाविनीं निष्प्रपञ्चतामवगाहेत । अस्तु प्रपञ्चोपादानत्वेन ज्ञानमेव तत्त्वज्ञानमिति चेन्न । मृदादेस्तथात्वेन ज्ञानेऽपि घटाद्यनिवृत्तेः, दृष्टविपरीतस्य चाकल्पनात् । तस्मात्प्रपञ्चसत्त्वकालेऽपि ब्रह्मणि निष्प्रपञ्चत्वप्रमा वाच्या, सा च न प्रपञ्चमिथ्यात्वं विनेति । तथापि कथं सप्रपञ्चे प्रपञ्चराहित्यं तद्वति तदत्यन्ताभावासत्त्वादिति चेन्न । तत्समसत्ताकस्यैव तदत्यन्ताभावस्य तद्वत्यवृत्तेर्व्यावहारिकस्य च प्रपञ्चस्य स्वकालेऽपि ब्रह्मणि पारमार्थिकात्यन्ताभावाविरोधात्,अत एव त्रैकालिकनिषेधस्य परमार्थदृष्टरजताभावविषयत्वमुक्तं विवरणे। शुक्तौ परमार्थत्वेन दृष्टं यन्मिथ्यारजतं तत्प्रतियोगिकाभावात्मकाधिष्ठानविषयत्वं हि तदर्थो न तु लौकिकापणस्थरजताभावविषयत्वम् । लौकिकस्यात्र निषेध्यत्वे मिथ्यात्वापत्तेः, नेह नानेति श्रुत्या दृश्य-

मानप्रपञ्चस्य ब्रह्मणीव शुक्तौ प्रतीयमानरजतस्यैव तत्र त्रैकालिकाभावप्रतीतेश्च । घटस्य तदभावाभावत्ववच्चाधिष्ठानस्य भावस्याप्यध्यस्तनिरूपिताभावत्वं न विरुध्यते । केचित्तु रजतस्य परमार्थत्वाकारेण प्रतियोगिमति यस्त्रैकालिकाभावस्तत्परोऽयं ग्रन्थः, परमार्थत्वस्य व्यधिकरणत्वे च प्रतियोगिनो मिथ्यात्वमपि सिध्यतीति व्याचक्षते । सर्वथाप्युपपन्नः प्रपञ्चकालेऽपि ब्रह्मणि प्रपञ्चाभाव इति संक्षेपः ॥ ५६ ॥

तस्माद्ध्यस्तमेतत्सकलमपि दृशौ भूमरूपातिरिक्तं
रूपं स्वाज्ञानमात्रादिति भवति परब्रह्मधीबाध्यमेतत् ॥
ईशित्रादिप्रभेदप्रतिहतिफलकज्ञानदौस्थ्यापनुत्त्यै
श्रीमच्छारीरकार्थप्रकटनपटुताशालि शास्त्रं विदध्मः॥५७॥

अध्यासवर्णकमुपसंहरन्सम्भावितविषयप्रयोजनत्वाच्छास्त्रारम्भं निगमयति । तस्मादिति । एतत्प्रत्यक्षं सकलमपि कर्तृत्वभोक्तृत्वादि स्वाज्ञानमात्रादेव दोषाद् दृशौ चिदात्मन्यध्यस्तम् । कुत इत्याह । भूमेति । भूमरूपे हि ब्रह्मणि अल्परूपं परत्र परावभासत्वादध्यस्तमेव सम्भवतीत्यर्थः । ततः किमित्यत आह । इतीति । अध्यस्ततासिद्धौ च परब्रह्मधीबाध्यत्वं सूत्रितं सिद्धं भवतीत्यर्थः । तेन विषयादिसम्भवात् श्रीमच्छारीरकार्थब्रह्मात्मैक्यस्य यत्प्रकटनमपराधापनयनेन स्फुटीकरणं तत्र यत्पटुत्वमुपपत्तिबाहुल्यं त-

दुक्तं शास्त्रं समासव्यासाभ्यां चतुर्लक्षणीनयसंग्रहाच्छास्त्रकल्पं प्रकरणं कुर्म इत्यर्थः । तन्निर्माणफलमाह । ईशित्रादीति । जीवेशादिभेदाध्यासप्रतिहतिफलकवाक्योत्थज्ञानस्य यद् दौस्थ्यं प्रतिबन्धात्फलपर्यन्तताराहित्यं तन्निराकर्तुमित्यर्थः ॥ ८७ ॥

मीमांसितव्यमनयैव सदद्वितीयं
मीमांस्यमेव च सदात्मतयानयैतत् ॥
ज्ञातं प्रयोजनमनेन यथेदमस्या-
स्तन्नान्तरीयकतया च तमोनिवृत्तिः ॥ ८८ ॥

अगतार्थवर्णकमवतारयिष्यन्ननु यदि ब्रह्मान्यतः सिद्धं किं तद्विचारेण, अथासिद्धं न शक्यं विचारयितुम्, वेदान्तादापातप्रतिपन्नं विचार्यमिति चेत्, केयमापातप्रतिपत्तिः, न पदजन्या, ब्रह्मपदे व्युत्पत्त्यभावात्, अत एव न तत्समभिव्याहृतवाक्यजन्या, किं चिद्ब्रह्मास्तीति प्रतिपत्तिः सेति चेन्न, तस्या बुभुत्सामात्रहेतुत्वेन विचाराहेतुत्वात्, अतो न ब्रह्म विचार्यम्, न वा बन्धनिवृत्तिस्तत्फलमित्यादावाक्षिप्य समाधत्ते। मीमांसितव्यमिति। न तावदन्यतः सिद्धमेव ब्रह्मेह विचार्यम्, तस्योपनिषदन्यमानागोचरत्वात्, अतोऽद्वितीयं सदविचारितान्महावाक्यात्सम्मुग्धोपस्थितमनयैव मीमांसया मीमांसितव्यमखण्डानन्दात्मना ज्ञातव्यम्, ब्रह्मण औपनिषदत्वेन तद्विचारस्यैव तन्निश्चायकत्वौचित्यात्।

ब्रह्मपदस्य बृहत्पदार्थानुगमेन सर्वानुवृत्तसत्तास्फुरणात्मनि व्युत्पन्नत्वादात्मशब्दस्य च यच्चाप्नोति यदादत्त इति प्रत्यगर्थ एव प्रसिद्धेस्तयोरैक्यस्य विचार्यत्वसम्भवात्तद्दर्शयति। मीमांस्यमेवेति। सत आत्मत्वेनाज्ञानादनया मीमांसया तदेवात्माभेदेन मीमांस्यं नान्यन्नियोगाद्धीत्यर्थः। नन्वस्तु ब्रह्मात्मैक्यं विचार्यत्वाद्विषयः फलासिद्धिस्तु तदवस्थैवेत्याशङ्क्याह। ज्ञातमिति। अनेन प्रागुक्तेन यथास्या मीमांसाया इदमेव प्रत्यगभिन्नमद्वयानन्दं ब्रह्म ज्ञातं सत्प्रयोजनं भवतीत्यर्थः। नन्वेवं बन्धनिवृत्तिर्न फलं स्यात्ततः प्रागुक्तविरोध इत्यत आह। तन्नान्तरीयेति। ब्रह्मात्मबोधे सति तमोनिवृत्तेरर्थसिद्धत्वेन पृथग्व्यापारानपेक्षत्वात्तुलोन्नमनवन्न सापि पृथगुद्देश्यतया फलमित्यर्थः। ननु तमोनिवृत्तेरधिष्ठानमात्रत्वेन आत्माभिन्नायाः प्रागपि सत्त्वात्कथं ज्ञानसाध्यत्वमिति चेन्न। यस्मिन्सत्यग्रिमक्षणे यत्सत्त्वं यदभावे चाभावस्तस्यैव तत्साध्यत्वात्। अस्ति च ज्ञाने सत्यग्रिमक्षणेऽज्ञाननिवृत्तिरूपात्मसत्त्वं तदभावे चाज्ञाननिवृत्त्यभावोऽज्ञानम्। आत्मनोऽज्ञानाभावत्वेऽज्ञानस्यापि तदभावरूपत्वादिति। अस्तु तमोऽत्यन्ताभावस्तमोनिवृत्तिस्तस्यानादित्वेन ब्रह्माभेदयोग्यत्वात्, न तमोध्वंसस्तस्य प्रतियोग्यसमानकालत्वादिति चेन्न। प्रतियोगिसमसत्ताक-

स्यैव तस्य तदसमानकालत्वमित्युक्तत्वादिति दिक् । अथ वा ननु कथं निरतिशयं सुखमेव पुरुषार्थः, अविद्यानिवृत्तेरपि तथात्वादित्याशङ्क्याद्वैतानन्दब्रह्मावाप्त्यर्थं ब्रह्मणि प्रतिपाद्यमाने तदविद्यानिवृत्तिस्ततोऽनुद्देश्यापि ज्ञानसामर्थ्याद्भवतीति न तत्परमप्रयोजनमिति भावेनाह । तन्नान्तरीयकतयेति । नन्वद्वितीयं सद्ब्रह्माविचारितान्महावाक्यादापातप्रतिपन्नमनयैव मीमांसितव्यमखण्डानन्दात्मना ज्ञातव्यमित्ययुक्तम्, जैमिन्यादीनां कृत्स्नस्य वेदस्य किं केन कथमित्यंशत्रयविशिष्टार्थभावनाख्यपुम्प्रवृत्तिरूपक्रियापरत्वावगमेनाक्रियार्थानां धर्मप्रमितिजननरूपप्रयोजनशून्यत्वेन लौकिकवाक्यत्वमाशङ्क्य शिष्टैरध्ययनविधिपरिगृहीतत्वेन विधिनैकवाक्यत्वेन सिद्धार्थानामपि प्रयोजनवत्त्वेन लक्षणयापि क्रियापेक्षितस्तुत्यादिबोधित्वेन प्रामाण्यवद्वेदान्तानामपि विध्यपेक्षितकर्तृस्तावकत्वेन ज्ञानविधिशेषत्वेन वा आत्मब्रह्मप्रतिपादकत्वेन विचार्यत्वस्याभिप्रेतत्वादिति चेन्न । जैमिन्यादेरक्रियार्थानां क्रियाप्रतिपादकत्वेन प्रामाण्यवर्णनं कर्मकाण्डप्रकरणस्थसिद्धबोधिवाक्याभिप्रायेण न भिन्नप्रकरणस्थवेदान्ताभिप्रायेण तेषामकर्त्रात्मबोधकत्वेन कर्मापेक्षितकर्तृस्तावकत्वासम्भवात् कर्त्रतन्त्रे ज्ञाने विध्यसम्भवेन तच्छेषतया ब्रह्मप्रतिपादकत्वासम्भवाच्च ॥५८॥

न च गतार्थमिदं प्रतिभाति नो
न हि विधेः पदमात्मसमीक्षणम् ॥
न खलु यागददातिजुहोतिवत्
पुरुषतन्त्रमिहात्मनिदर्शनम् ॥ ५९ ॥

ननु जैमिन्यादेरित्थमाशयवर्णनमयुक्तम्, तेन सर्ववेदार्थविचारस्य कृतत्वात्, अन्यथा धर्मजिज्ञासासूत्रस्याथातःशब्दविरोधात्, अथ शब्देन हि कृत्स्नशाखाध्ययनानन्तर्यं स्वविचारस्य दर्शयति, वेदान्तानामविचार्यत्वे च तदध्ययनानन्तर्यस्य स्वविचारे किं प्रयोजनम्, एवमतःशब्देन कृत्स्नवेदस्य स्वार्थे प्रामाण्यं दर्शयति, तदप्येवं सत्यनुपपन्नं स्यात्ततो वेदान्तानां जैमिन्यादिभिरेव विचारितत्वाद्बादरायणादिभिस्तन्न विचारणीयमिति तत्राह। न च गतार्थमिति। गता विचारपूर्वकं ज्ञातोऽर्थो यस्य वेदान्तविचारशास्त्रस्य तत्। किं वेदान्तगम्यमद्वयं ब्रह्म तच्च जैमिन्यादिभिर्निरूपितमित्युच्यते। किं वा कार्यमेव वेदान्तानामप्यर्थः तच्च जैमिनिना निरवशेषं निरूपितमितीदं शास्त्रं गतार्थमिति। न तावदाद्यः। तत्र तदप्रतीतेः, साध्यरूपधर्मन्यायेन सिद्धब्रह्मणो निर्णयासम्भवात्, धर्मजिज्ञासासूत्रे धर्मस्यैव विचार्यत्वेन प्रतिज्ञातत्वाच्च। न चाथातःशब्दानुरोधेन धर्मशब्देन वेदार्थमात्रं लक्ष्यतामिति वाच्यम्। अन्यथासिद्धाथातःशब्दानुरोधेन विचा-

र्यमाणतया अनन्यथासिद्धप्रधानाभिधायिधर्मशब्दस्य लक्षणायोगात् । अध्ययनविधिर्हि कृत्स्नशाखाध्ययनं विधत्ते न त्वेकदेशाध्ययनमात्रमतोऽध्ययनविधिप्रयुक्त्या न कर्मकाण्डमात्राध्ययनं सम्भवति । एवं च वेदान्ताध्ययनं यद्यपि न कर्मविचारोपयोगि तथाप्येकविधिप्रयुक्ततया तस्यावश्यकत्वेन तदध्ययनवत्त एव कर्मविचार इति तदन्यथासिद्धम् । एवमतःशब्दसूचिताध्ययनदृष्टार्थत्वस्यापि वेदान्ताध्ययने समत्वादेव तदर्थवत्त्वासिद्धेर्न तद्बलादपि धर्मशब्दे लक्षणेति नाद्वयब्रह्मविचारो गतार्थ इति भावः । नापि द्वितीयः । अग्निहोत्रादिकार्यस्य उपासनाकार्यस्य वा भिन्नप्रकरणस्थत्वाद् ब्रह्मनिष्ठवेदान्तेभ्यस्तदप्रतीतेश्च । नन्वात्मा वा अरे द्रष्टव्य इत्यादिना ज्ञानं विधीयत इति कार्यमेव वेदान्तार्थ इति चेत्तत्राह । न हीति । विधेः पदं विषयः विधेयमिति यावत् । यद्धि वाक्यार्थप्रतीतिजन्यचिकीर्षाप्रयत्नाभ्यां निष्पाद्यं तद्विधेयं यथाग्निहोत्रादि, उपासना वा, न चात्मज्ञानं लौकिकं वा तत्तथाऽनिच्छतोऽप्रयतमानस्यापि शब्देन प्रत्यक्षादिना वा तद्दर्शनात्, एतदेव कर्तृतन्त्रं विधेयं ज्ञानं च न तथेत्युच्यत इति ज्ञानं न विधेयमित्याशयेनाह । न खल्विति । देवतोद्देशेन द्रव्यत्यागो यागः, तस्य परस्वत्वापादनव्यापारो दानम्, याग एवासेचनाधिको होम इति वि-

भागः ॥ ५९ ॥

अपि च रूपितगोचरताविधे-
र्न परमात्मधियोऽस्ति च रूपणम् ॥
अविदिते परमात्मनि तद्धियो
न खलु रूपितता घटनान्विता ॥ ६० ॥

किं च विधेयपदार्थज्ञानं विधिवाक्यार्थप्रतीतेः प्राग् वक्तव्यं न च परमात्मज्ञाने तत्संभवतीत्याह । अपि चेति । रूपितो ज्ञातो गोचरो विषयो यस्य तस्य भावस्तत्ता ज्ञाधात्वर्थगोचरता, वक्तव्येति शेषः । ततः किं तत्राह । न परमात्मेति । रूपणं ज्ञानं प्रागिति शेषः, तथा च परमात्मज्ञानं कर्तव्यमिति वाक्यार्थधीर्न संभवतीति भावः । कुतस्तदनिरूपणमिति चेत्, किमज्ञाते परमात्मनि तज्ज्ञानं ज्ञायते, विदिते वा, नाद्य इत्याह । अविदित इति । घटनान्विता युक्ता, न हि विशेषणीभूतं परमात्मानमज्ञात्वा परमात्मज्ञानमिति ज्ञातुं शक्यमित्यर्थः ॥ ६० ॥

विदितता परमात्मन इष्यते
यदि वृथा विधिरस्य धियो भवेत् ॥
निखिलभेदनिदाननिवृत्तितो
भवति तद्विषयादि च दुर्लभम् ॥ ६१ ॥

द्वितीय आह । विदिततेति । ज्ञानविधिवाक्यार्थज्ञानात्प्रागिति शेषः । तर्हि ज्ञानविधिर्व्यर्थः पुरुषार्थ-

साधनात्मज्ञानस्य प्रागेव सिद्धत्वादित्याह । वृथेति । किं चात्मज्ञाने सति अविद्यातत्कार्यसकलनियोज्यविषयादिभेदनिवृत्तेस्तत्सापेक्षो न ज्ञानविधिः । न वा तदनुष्ठानं संभवतीत्याह । निखिलेति । निदानस्य कारणस्याज्ञानस्य निवृत्तित इत्यर्थः ॥ ६१ ॥

इति न धर्मविशेषसमर्पणं
श्रुतिशिरोवचनैः क्रियते ततः ॥
भवति धर्मविचारगतार्थता-
नवसरः परमात्मविचारणे ॥ ६२ ॥

नन्वात्मनि परोक्षज्ञाने प्रथमं जातेऽपि तद्विशिष्टज्ञानं विधेयमिति चेत्, किं विशिष्टज्ञानं परोक्षमपरोक्षं वा नाद्यः, प्रथमज्ञानेनैव तत्कृत्यसिद्धेस्तद्वैयर्थ्यात्, विदितस्वार्थसंबन्धशब्दादिभ्य एव प्रथमज्ञानवद् द्वितीयज्ञानस्यापि विना पुंव्यापारमुत्पत्तिसंभवेन विधिवैयर्थ्याच्च, नापि द्वितीयः, किं कर्तव्यतयावगतं शाब्दं ज्ञानमेव विधिबलादपरोक्षं भवति, किं वा ततस्तदुत्पद्यते, नाद्यः, तस्य शब्दादुत्पन्नत्वे न तव मते तदयोगात्, अन्यथा प्रथममेवापरोक्षज्ञानं किं न स्यात् । न द्वितीयः, तत्करणस्यासम्भवात्, न ह्यपरोक्षज्ञानकरणमिन्द्रियमात्मन्यस्तीति न ज्ञानविधिसंभव इत्युपसंहरति । इतीति । धर्मविशेषसमर्पणं विधेयज्ञानमेवावान्तरो धर्मस्तस्य च निर्विषयस्यानुपपत्ते स्तदाकाङ्क्ष-

यात्मानं व्युत्पादयद्भिर्वेदान्तवचनैर्विध्येकवाक्यतया धर्मविशेषसमर्पणं क्रियत इति यन्मतं तत्र । ततोऽपि परमात्मविचारे धर्मविचारगतार्थताया अनवसरो भवतीत्यर्थः । तथा च जैमिन्यादेः प्रागस्मदुक्त एवाशय इति भावः ॥ ६२ ॥

अर्हाद्यर्थे च कृत्यस्मरणमभिमतं पाणिनेः प्रार्थनादौ
लिङ्लोडादेश्च वृत्तिः प्रचुरमभिमता पाणिनेर्जैमिनेश्च ॥
तस्माद्वेदान्तवाक्ये पठितमपि लिङाद्यन्यथा योजनीयं
विध्यर्थासंभवेन स्फुटमुदितनयादेतदन्यागतार्थम् ॥६३॥

कथं तर्ह्यात्मा वा अरे द्रष्टव्य आत्मन्येवात्मानं पश्येदित्यादिविधिव्यक्तीनां गतिरिति तत्राह । अर्हेति । अर्हे कृत्यतृचश्च, विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्, लोट् चेत्यादिपाणिनिस्मरणात्, विष्णुरुपांशु यष्टव्य इत्यादौ जैमिनीयन्यायाच्च तव्यप्रत्ययादेर्विध्यतिरिक्तार्थत्वं सिद्धं यस्मात्तस्मादुक्तवेदान्तवाक्ये पठितमपि लिङादि अन्यथा विधिमन्तरेण अर्हाऽर्थतया योजनीयम् कुतः स्फुटमुदितनयाद् विध्यर्थाऽसंभवेन । अत एतद्वेदान्तविचारशास्त्रं धर्मविचारशास्त्रेणागतार्थमतस्तद्भगवताथातो ब्रह्मजिज्ञासेत्यारभ्य विचारितं भाष्यकारादिभिरपि तदाशयानुरोधेन तदर्थो वर्णित इति मयापि तदर्थाविष्करणाय यत्नः क्रियत इति ॥ ६३ ॥

एकाहाहीनसत्रद्वयविधिविहितानेककर्मानुभाव-
ध्वस्तस्वान्तोपरोधाः कथमपि पुरुषाश्चिद्दिदृक्षां लभन्ते॥
यज्ञेनेत्यादिवाक्यं शतपथविहितं कर्मवृन्दं गृहीत्वा
स्वोत्पत्त्याम्नानसिद्धं पुरुषविविदिषामात्रसाध्ये युनक्ति॥

नन्वेवमप्यधिकार्यभावादिदं शास्त्रं नारम्भणीयम्, न तावत्स्वर्गादिकाममुद्दिश्यैतदारम्भः, अग्निहोत्रादिभिरेव तत्सिद्धेः, नापि निरतिशयविषयभोगार्थिनमुद्दिश्य, तस्याप्युपासनातः सिद्धेः, न च मुमुक्षुरत्राधिकारी, सकलवैषयिकानन्दविलक्षणे मोक्षे कस्यापि कामनाऽदर्शनात्, अत एव ब्रह्मजिज्ञासुरत्राधिकारीति निरस्तम्, ब्रह्मज्ञानस्यापुरुषार्थस्य कामनाऽयोगान्निरतिशयाभिलषितस्वर्गादिविरोधित्वाच्च, न चाविरक्तस्य स्वर्गाद्यभिलाषेऽपि विरक्तस्य तदभावान्मुमुक्षा संभवतीति तदर्थं ब्रह्म जिज्ञासमानोऽत्राधिकारीति वाच्यम्, स्वर्गादौ निरतिशयप्रीत्यास्पदे कस्यापि वैराग्यासंभवात्, दुःखमिश्रितत्वात्ततोऽपि वैराग्यं युक्तमिति चेन्न, तादृशेपि तदधिकसुखे प्रवृत्तिदर्शनात्, दुःखपरिहारे च यतितव्यं न तु सुखमपि परित्याज्यम्, न चान्यः, कश्चिदधिकारी संभवतीत्यधिकार्यभावान्नेदमारम्भणीयमिति तत्राह। एकाहाहीनेति। अयमिह चिद्दिदृक्षाप्रतिलम्भप्रकारः। अनादिप्राग्भवेषु संसरञ्जीवः कदाचित्तत्र तत्र विशिष्टवर्णाश्रमो भूत्वा यावज्जीवश्रुतिचोदितानि

नित्याग्निहोत्रादीनि सम्यगनुष्ठति, ततः कदाचिदीषदासादितपरमेश्वरप्रसादादग्निहोत्रादिषु दृढश्रद्धो भवति, तत ईश्वरप्रसादादेवं चिन्तयति, मदीयं मनः स्वर्गादिसुखतत्साधनान्येवाभिलषति न तु मोक्षं तत्साधनं वा ज्ञानं तत्र चादृष्टमेव केवलं निमित्तमिति तदर्थं यतितव्यमिति विविदिषोद्देशेन तान्येव कर्माण्यनुतिष्ठति ततोऽतिविमलमानसस्तद्यथेहेत्यादिश्रुतिं यत्कृतकमित्यादिन्यायं चानुसंधाय ब्रह्मलोकपर्यन्तं कर्मसाध्यं फलमनित्यमिति निश्चिनोति, आत्मा च श्रुतिन्यायाभ्यां नित्यानन्द इति च, सोयं नित्यानित्यवस्तुविवेकः। ततस्तदर्थं सकलवैषयिकसुखभोगजिहासा पुनःपुनरस्योपावर्तते, नित्ये संभवत्यनित्ये कस्तुष्येदिति, तदिदं कर्मफलवैराग्यम्। पश्चाच्छान्तिदान्त्यादिसंपन्नो दृढतरमोक्षेच्छां करोति, सेयं साधनचतुष्टयसंपत्तिः। तत इष्यमाणमोक्षसाधनं चिदानन्दस्वरूपात्मज्ञानमिच्छतीति नात्राधिकारी दुर्लभः। तदिदमनेन श्लोकेन सूचितम्। एकाहः। एकसुत्याकः क्रतुः। अहीनः। द्व्यहप्रभृतिद्वादशसुत्यान्तः। सत्रं द्विविधम्, एकमहःसमुदायसाध्यम्, यथा द्वादशाहम्, द्वादशाहस्य चाहीनसत्त्रात्मत्वं यजेत उपयन्तीत्युभयश्रुतिबलादवगतम्, किं चित्संवत्सरगणसाध्यम्। उपलक्षणमेतदग्निहोत्रादेः। एतेषां ये विधयस्तद्विहितानि

यान्यनेकानि अग्निहोत्रप्रभृतीनि सहस्रसंवत्सरपर्यन्तानि कर्माणि तेषामनुभावो दुरितनिवर्हणसामर्थ्यं तेन ध्वस्तः स्वान्तस्यान्तःकरणस्योपरोधो विविदिषाप्रतिबन्धो येषां ते तथा कथमपि अनेकजन्मव्यवधानेऽपि पुरुषाः साधनचतुष्टयसंपन्ना अधिकारिणः चिद्दिदृक्षामखण्डचैतन्यात्मकप्रत्यग्ब्रह्मसाक्षात्कारेच्छामित्यर्थः। नन्वग्निहोत्रादेः पुन्दिदृक्षाप्रतिबन्धकदुरितनिवर्त्तकत्वं कुतोऽवगतं येन तदर्थमनुतिष्ठेयुः, न तावत्प्रत्यक्षादिना तदवगन्तुं शक्यम्, नाप्यग्निहोत्रादिवाक्येन तत्र तद्वाचकपदाभावात्तत्राह । यज्ञेनेति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादिवाक्यम्। शतपथविहितमिति । शतपथग्रहणं विनियोजकवाक्येन विनियोज्यकर्मणः प्रत्यासत्तिज्ञापनार्थम् । नन्वग्निहोत्रादेः स्वर्गकामयावज्जीवादिवाक्येन तत्र तत्र विनियुक्तस्य कथं चिद्दिदृक्षायां विनियोगः, विनियुक्तविनियोगविरोधात्तत्राह । स्वोत्पत्तीति। स्वस्याग्निहोत्रादेर्यदुत्पत्त्याम्नानं कर्मस्वरूपमात्रबोधकं वाक्यं तत्सिद्धमित्यर्थः । अग्निहोत्रादिकं हि प्रथममग्निहोत्रं जुहोतीत्यादिवाक्यैः फलविशेषशून्यमेव विधीयते, पश्चाद्वाक्यान्तरेण तदपेक्षितफलविशेषे तस्य संबन्धः प्रतिपाद्यते, एवं च तद्वदेव विविदिषायामपि तस्य संबन्धो न विरुध्यते, विनियोजकवाक्यानां तुल्यकल्पत्वा-

त्, एवं च विषयसौन्दर्यज्ञानलभ्यायामिच्छायां कर्मणः साक्षात्साधनत्वासम्भवेन सामर्थ्यात्प्रतिबन्धकनिवृत्तावेव साधनत्वं कल्प्यत इति । पुरुषः परमात्मा । मात्रशब्देन तस्य ज्ञानादिपर्यन्तव्यापारं वारयति । एवं च नाधिकार्यभाव इति भावः ॥ ६४ ॥

उपससाद चतुष्टयसाधनो
निशितबुद्धिरशुद्धिपरिक्षयात् ।
विविदिषुर्विहितैर्विविधाध्वरै-
र्विदितवेद्यतमं विधिवद् गुरुम् ॥ ६५ ॥

एवं विषयप्रयोजनसंभवादगतार्थत्वाद्विशिष्टाधिकारिलाभाच्च ब्रह्मविचारशास्त्रमारम्भणीयमित्युक्तम्, इदानीं गुरुशिष्यसंवादमुखेन शास्त्रं प्रवर्त्तयितुं जिज्ञासासूत्रगताथशब्दोपात्तविशिष्टाधिकारिणस्तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिदर्शितं गुरूपसदनमाह । उपससादेति । प्राप्तवानित्यर्थः । विवेकादिचतुष्टयं ब्रह्मज्ञानसाधनं यस्य स चतुष्टयसाधनः । निशितातिसूक्ष्मा ब्रह्मैकाकारतायोग्या बुद्धिरन्तःकरणं यस्य स तथा । विहितैः सम्यगनुष्ठितैः विविधाध्वरैरशुद्धिपरिक्षयान्निशितबुद्धिः चतुष्टयसाधनो विविदिषुरिति संबन्धः । श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिदर्शितं गुरुविशेषणमाह । विदितवेद्यतममिति । अवगतब्रह्मतत्त्वमित्यर्थः । समित्पाणिरिति

श्रुतिदर्शितमुपसदनप्रकारमाह । विधिवदिति ॥६५॥

इह जगति हि सर्व एव जन्तु-
र्निरतिशयं सुखमुत्तमं ममास्तु ।
उपरमतु तथोपघातरूपं
विषयजदुःखमिति स्पृहां करोति ॥ ६६ ॥

ननु मुमुक्षुर्गुरुमुपससादेत्युक्तमयुक्तमनुभूतसुखविजातीये मोक्षे कामनाऽयोगादत एव निखिलानर्थनिवृत्तिकामो मुमुक्षुरित्यपि न संभवति अनर्थनिवृत्तेःस्वतः पुरुषार्थशेषतयैव काम्यमानतया तदभावे अयोगादित्याशङ्क्य कैमुतिकन्यायेन प्रस्तुताधिकारिणो मुमुक्षां दर्शयितुं लोके तदतिसुलभतामाह । इहेति । सर्व एवेति । जन्तुमात्रे निरतिशयसुखादिकामनायां मानाभावेन योग्यनराभिप्रायम् । उपरमतु मा भवतु । उपघातरूपं पुरुषार्थविरोधिरूपम् ॥ ६६ ॥

निरतिशयसुखं च दुःखजात
व्युपरमणं च वदन्ति मोक्षतत्त्वम् ॥
उभयमपि जनोऽभिवाञ्छतीति
स्फुटतरमस्य सदास्ति मोक्षवाञ्छा ॥ ६७ ॥

नन्वेवमपि मुमुक्षायां किमागतमिति तत्राह । निरतिशयेति । लौकिकैरभिलष्यमाणनिरतिशयसुखादेर्मोक्षत्वे फलितमाह । उभयमपीति । अस्य जनस्य । एवं प्राणिमात्रस्य मुमुक्षासद्भावे किमु वक्तव्यं निरस्त-

निखिलचित्तमलस्य तीव्रवैराग्यादिसम्पन्नस्य तत्सद्भावे मोक्षरूपसुखस्यैव तत्तद्विषयसम्बन्धेन लौकिकैरिष्यमाणत्वान्न तल्लौकिकसुखविलक्षणमिति भावः ॥ ६७ ॥

उभयमपि परात्मनः स्वरूपं
विमलचिदेकरसं स्वयंप्रकाशम् ॥
इति भवति विना प्रमाणमस्मि-
न्नुदितनयादभिवाञ्छनोपपत्तिः ॥ ६८ ॥

ननु निरतिशयसुखादावज्ञाते कथं सर्वप्राणिनामभिलाषः, ज्ञातगोचरत्वात्तस्येति चेत्तत्राह । उभयमिति । निरतिशयसुखं निःशेषदुःखहानं चेत्यर्थः । परमात्मनोऽहङ्कारविलक्षणस्य तत्साक्षिण इत्यर्थः । तादृशसुखज्ञानार्थं साक्षिस्वरूपं विशिनष्टि । स्वयं प्रकाशमिति । तत्र हेतुत्वेनाह । विमलेति । साक्षिस्वरूपस्यानावृतता वैमल्यमुक्तम् । तथा च स्वयंप्रकाशात्मस्वरूपत्वान्निरतिशयसुखादेः सर्वेषां भानमविरुद्धमित्याह । इति भवतीति । उदितनयात्, इह जगतीत्यादिनेति शेषः ॥ ६८ ॥

कर्मकाण्डकृतशुद्धिबुद्धित-
स्तर्किते च खलु मोक्षवस्तुनि ॥
अर्थितास्य घटते प्रयोजक-
ज्ञाननुन्नमनसो महात्मनः ॥ ६९ ॥

नन्वनावृतसाक्षिस्वरूपसुखादेः कथं निरतिशयत्वं

लोके तथाननुभवात्, वस्तुतस्तत्तथाविधर्मिति चेत्सत्यं तथाप्यज्ञानावृतप्रकाशे तज्ज्ञानं विना न कामना स्यादित्याशङ्क्याह । कर्मकाण्डेति । काण्डशब्दः समूहवाचो । तर्किते परमप्रेमास्पदत्वादिनोहिते । मोक्षवस्तुनि आनन्दात्मनि । अस्य विशिष्टाधिकारिणः । प्रयोजकज्ञानमानन्दाद्वयात्मप्रतिपादकवाक्यजन्यमापातज्ञानं तेन नुन्नं प्रेरितं तदभिमुखीकृतं मनो यस्य । अत एव महात्मनः नित्याद्यनुष्ठानादतिविमलमानसस्य परमप्रेमास्पदत्वादिलिङ्गेनवेदान्तवाक्येन चापाततोऽवगतानन्दाद्यात्मनि प्रेप्सा कथं न भवेदित्याशयः ॥ ६९ ॥

धर्मनिर्णयनिमित्तमिष्यते
वेदवित्परिषदेव मानवे ॥
तद्वदत्र गुरुणास्य सङ्गति-
स्तेन चास्य घटतेऽर्थिता गुरौ ॥ ७० ॥

ननु प्रथममेवाधिकारिणा श्रुतिन्यायाभ्यामानन्दाद्यात्मकं वस्तु परिज्ञातं चेत्कृतं तस्य गुरूपसदनादिनेत्याशङ्क्य स्वयमुत्पादितज्ञानस्यान्यथात्वशङ्काकलङ्कसम्भवादाचार्यवान्पुरुषो वेदेत्यादिशास्त्राच्चाचार्यमुखेनैव ब्रह्म निर्णेतव्यमिति सदृष्टान्तमाह । धर्मनिर्णयेति । मानवे मनुस्मृतौ शास्त्रे । चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा । सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तम इति मनुना धर्मनिर्णयो वेदवित्पर्षत्साध्य इत्युच्यते । तद्व-

दात्मज्ञानस्यापि गुरूपदेशसाध्यत्वात्तदर्थमस्य गुरूपसदनं युक्तमित्याशयेनाह । तद्वदत्रेति । ब्रह्मनिर्णयसाधनमिति शेषः । फलितमाह । तेनेति ॥ ७० ॥

य: कर्मकाण्डविषयेऽभिहितोऽधिकारी
सोऽयं प्रवृत्तिषु निवृत्तिषु तुल्यरूपः ॥
अत्राभिधित्सितविशेषणपूगयुक्तो
साधारणस्त्वभिमतः पुरुषो निवृत्तौ ॥ ७१ ॥

ननु धर्ममीमांसायां षष्ठाध्याये वेदार्थाधिकारी निरूपित इति किमत्राथशब्देनाधिकारिनिरूपकेण, न च शास्त्रान्तरत्वान्न पुनरुक्तिर्दोषायेति वाच्यम्, तथापि कृतकरणानर्थक्यात्, अन्यथा वेदस्यार्थवत्त्वादेरप्यत्र निरूपणं स्यादिति तत्राह । यः कर्मकाण्डेति । मीमांसाशास्त्र इति शेषः । कर्मसमूहमुद्दिश्येति वार्थः । अभिहितः षष्ठाध्याये निरूपित इत्यर्थः । प्रवृत्तिषु निवृत्तिषु तुल्यरूप इति । अग्निहोत्रादौ प्रवर्तमानस्यापि कलञ्जभक्षणादिनिवृत्तिलङ्घने तन्निवृत्तिशीलस्याप्यग्निहोत्राद्यनुष्ठानलङ्घने प्रत्यवायतौल्यात्, अयं प्रवृत्त्यादितुल्य इत्यर्थः । प्रस्तुताधिकारिणस्ततो विशेषमाह । अत्रेति । अस्मिन् शास्त्रे । अथशब्देन सूचितमप्यधिकारिविशेषणं तार्तीयन्यायेनैव स्थिरं भवतीत्यभिधित्सितेत्युक्तम्, वेदान्तशास्त्रे हि साधनचतुष्टयसंपन्नेन सकलकर्मत्यागिना ब्रह्म विचार्यमिति निरूप्यत इति तता-

ऽस्य विशेषः, न चायं षाष्ठन्यायेन सिध्यतीति न वैयर्थ्यम्। अर्थवत्त्वादिकं तु वेदस्य न ततो न्यायान्तरमपेक्षत इति नात्र तन्निरूपणमिति भावः ॥ ७१ ॥

शास्त्रं प्रवृत्तिषु निवृत्तिषु तुल्यरूपं
साधारणस्य पुरुषस्य पुराभ्यधायि ॥
अस्योच्यते सकलकर्मनिवृत्तिभाजः
सर्वं निवृत्तिविषयं श्रवणादिशास्त्रम् ॥ ७२ ॥

नन्वस्यापि श्रवणादिप्रवृत्तेर्निवृत्तेश्चाग्निहोत्रादेः सत्त्वादयमपि प्रवृत्तिनिवृत्तिसाधारण एवेत्याशङ्क्याह। शास्त्रमिति। प्रवृत्तिषु निवृत्तिषु साधारणस्य पुरुषस्य तुल्यं समबलं शास्त्रं विधिनिषेधशास्त्रमिति पुरा पूर्वतन्त्रे अभ्यधायि जैमिनिनेति शेषः। अस्य ज्ञानाधिकारिणः संन्यासिनः सर्वं श्रवणादिशास्त्रं निवृत्तिविषयमित्युच्यते बादरायणादिभिरिति सम्बन्धः। अग्निहोत्रादिशास्त्रं हि तदधिकारिणस्तदर्थकर्तव्यतामेव प्रतिपादयति, न तु तदितरव्यापारं परिसञ्चष्टे स्वार्थे बाधकाभावादिति स उभयसाधारणः, अतस्तच्छास्त्रद्वयमपि तं प्रति समबलमेव जैमिनिना विचारितम्। बादरायणस्तु शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदितिशास्त्रानुसारेण ज्ञानोद्देशेन सकलकर्मत्यागं निरूप्य संन्यासिनैव ब्रह्म विचार्यमित्याह। तत्र यदि श्रवणादि-

शास्त्रमस्य प्रवृत्तिं काममप्युपदिशेत्तर्हि सकलकर्मसंन्यासशास्त्रं बाध्येतेति श्रवणादिशास्त्रमपि निवृत्तिविषयमेवेत्यधिकारिद्वयं परस्परविलक्षणमित्यर्थः ॥ ७२ ॥

शास्त्रद्वैविध्यदृष्टेर्द्विविधमधिकृतेर्भेदमप्याश्रयन्ते
तद्वद्द्वैविध्योपलब्धेः पुरुषमधिकृतं शास्त्रयोर्भिन्नमाहुः॥
शास्त्रार्थद्वित्वहेतोः पुरुषमधिकृतं तद्गतं चाधिकारं
नो चेद्भिन्नं प्रतीयुर्द्विविधमिह वृथा शास्त्रमापद्यते हि॥७३॥

एवं धर्ममीमांसाशास्त्रस्य प्रवृत्तिनिवृत्तिसाधारणाधिकारिविषयत्वं ब्रह्ममीमांसायास्तु निवृत्तिमात्रनिष्ठपुरुषविषयत्वमित्युक्तम् , एतच्च मीमांसकानामपि सम्मतमित्याह । शास्त्रेति । असन्निकृष्टार्थप्रतिपादकं वचनं शास्त्रं तद्द्वैविध्यदृष्टेर्हेतोरधिकारस्य द्विविधं भेदमप्याश्रयन्ते । तस्याधिकारस्य द्वैविध्योपलब्धेः पुरुषं तद्विशिष्टमधिकृतमधिकारिणम् , शास्त्रयोः शास्त्रार्थयोः । उक्तमर्थं विपक्षे बाधकमुखेन द्रढयति । शास्त्रार्थेति । मीमांसका एवमाहुः । असन्निकृष्टार्थवचनं शास्त्रं तद्भेदे च तदर्थो भिद्यते , भिन्नासन्निकृष्टार्थं विना तदयोगात् , तदर्थभेदे च तदनुष्ठाननिमित्तमधिकारोऽपि भिद्यते , अन्यथा चित्राकारीर्यादेरपि स्वर्गकामाद्यधिकारसम्बन्धप्रसङ्गात् , ततश्च तद्विशिष्टोऽधिकार्यपि शास्त्रभेदे भिद्यते, अन्यथा शास्त्रभेदो न स्यादिति । तद्वदिहापि प्रवृत्तिनिवृत्तिविषयतया केव-

लनिवृत्तिविषयतया च भिन्नयोर्धर्मब्रह्ममीमांसयोस्तदर्थाधिकारिणोर्भेदेन भवितव्यमिति भावः ॥ ७३ ॥

यमनियमविधानैर्वाङ्मनःकायचेष्टा-
व्युपरमणमशेषैः कथ्यते न प्रवृत्तिः ॥
यदि भवति कदा चित्का चिदस्य प्रवृत्तिः
श्रुतिविहितनिवृत्तेः कर्मणां कत्थनं स्यात् ॥७४॥

ननु सर्वं निवृत्तिविषयं श्रवणादीत्युक्तमयुक्तं ज्ञानाधिकारिणोऽप्यहिंसादिनियमवच्छौचादेर्नियमस्यापि संन्यासिन उपदेशात्तत्राह । यमनियमेति । यमनियमयोर्विधानैर्विधायकवाक्यैरित्यर्थः । अत्र यमग्रहणं दृष्टान्तार्थमुक्तम् । अशेषैर्यमनियमविधानैरिति सम्बन्धः । प्रवृत्तिः शौचादिरूपा । यमशास्त्रवन्नियमशास्त्रस्यापि निवृत्तिपरत्वमेव न प्रवृत्तिपरत्वमित्यर्थः । तत्र हेतुमाह । यदीति । अस्य ज्ञानाधिकारिणः कर्मणां श्रुतिविहितनिवृत्तेरिति सम्बन्धः । कत्थनं कत्थना पीडेति यावत् । यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुतिर्ज्ञानार्थिनः सकलकर्मत्यागं विधत्ते । न च यावज्जीवादिवाक्यानुसारेण काम्यकर्मन्यासमात्रं प्रव्रज्याश्रुत्यर्थ इति वाच्यम् । यज्ञोपवीतादेरपि तत्र त्यागविधानात्, संन्यासिनो धर्मविधायकवाक्ये मुण्डोऽपरिग्रह इति शिखादिराहित्यनियमदर्शनेन प्रतिप्रसवन्यायेनापि यज्ञोपवीतादेरनङ्गीकारात् । तस्माद्यदहरेव

विरजेदिति वैराग्यस्य तदधिकारस्य श्रवणाद्विरक्तमुमुक्षुविषयं संन्यासशास्त्रम् । यावज्जीवादिशास्त्रं तु न तत्समानविषयमित्यविरक्तविषयमेव । अतः सङ्कोचकाभावात्संन्यासशास्त्रं सकलकर्मनिवृत्तिं विधत्ते । तदस्य शौचादिप्रवृत्त्यभ्युपगमे बाधितं स्यात् । न च शौचाद्यनेकविधिबलात्तदिष्टमिति वाच्यम् । शौचादिशास्त्रस्य संन्यासशास्त्रवद् विरक्तमुमुक्षुमात्रविषयत्वाभावेन सामान्यविषयस्य ततो दुर्बलत्वादिति न कापि ज्ञानाधिकारिणो विधितः प्रवृत्तिरिति भावः॥७४॥

औदासीन्यविशेषमेव हि परब्रह्मात्मधीजन्मने
शास्तीदं श्रवणादिशास्त्रममुना त्वाक्षिप्यते व्यापृतिः॥
तां तां व्यापृतिमन्तरेण घटते सामान्यशास्त्रार्थधी-
रित्यर्थाल्लशुनादिभक्षणगतौदासीन्यबोधादिव ॥७५॥

नन्वेवं श्रवणादौ कथं मुमुक्षोर्ब्रह्मजिज्ञासोः प्रवृत्तिस्तत्प्रापकाभावात्, न चान्वयव्यतिरेकाभ्यां श्रवणादेर्ज्ञानसाधनत्वावगमात्स्वत एव मुमुक्षोस्तत्र प्रवृत्तिरिति वाच्यम्, नियमेन तत्र प्रवृत्त्ययोगात्, अन्यतोऽप्यभिलषितज्ञानसम्भवात् कथं वा तच्छास्त्रस्य निवृत्तिनिष्ठत्वमिति तत्राह । औदासीन्येति । औदासीन्यं प्रवृत्त्यभावस्तस्य विशेषमनात्मश्रवणादिरूपप्रवृत्तिविशेषाभावमित्यर्थः । शास्ति उपदिशति । अमुना ज्ञानार्थमुपदिष्टौदासीन्यविशेषेण व्यापृतिः आत्मश्रवणादिप्र-

वृत्तिः अर्थादाक्षिप्यत इति सम्बन्धः। अनुपपत्तिमेवाह। तां तामिति। श्रवणमननादिरूपामित्यर्थः। सा सा शास्त्रार्थधीरनात्मश्रवणमननादिनिवृत्तिरूपौदासीन्यात्मकश्रोतव्यादिशास्त्रार्थधीः। न घटते इति। यत इत्यर्थः। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्य इत्यादिशास्त्रेणात्मज्ञानान्वयव्यतिरेकासिद्धतयोक्तबाधकबलेन च श्रवणादिव्यापारविधानासम्भवेनात्मज्ञानविरोध्यनात्मश्रवणाद्यभावरूपमौदासीन्यं विधीयते सेयं परिसंख्या अनात्मव्यापारवर्जनमन्तरेण शतशोऽनुष्ठितश्रवणादिनाप्यद्वयात्मज्ञानासम्भवात्तस्मिंश्च विहिते चेतसो निर्व्यापारत्वासम्भवेन तावताप्यभिमतज्ञानासिद्धेश्चान्वयव्यतिरेकाद्यवधृतज्ञानसाधनभावश्रवणादिप्रवृत्तिराक्षिप्यत इति भावः। अर्थान्तरनिषेधसामर्थ्यादर्थान्तरसिद्धौ दृष्टान्तमाह। लशुनादीति। लशुनं न भक्षयेन्न कलञ्जं भक्षयेदित्यादिनिषेधेन तत्तद्भक्षणादेरिष्टसाधनत्वाभावरूपौदासीन्यबोधाद्यथा तद्भक्षणादिप्रापकरागादिनिवृत्तौ यतते तद्वदित्यर्थः॥ ७५॥

औदासीन्ये बोधिते शास्त्रवृन्दै-
रर्थादस्मात्प्रच्युतस्यास्त्यनर्थः।
इत्यालोच्य प्रच्युतेः प्रापकस्य
प्राबल्येऽर्थे प्रातिलोम्यं विधत्ते॥ ७६॥

दृष्टान्तं विशदयति। औदासीन्य इति। भक्षणादि-

धात्वर्थगतेष्टसाधनत्वाभाव इत्यर्थः। शास्त्रवृन्दैः लशुनादिभक्षणनिषेधशास्त्रैः। अस्मान्निषेधशास्त्रार्थादौदासीन्यात्प्रच्युतस्य भ्रष्टस्य भक्षणादौ प्रवृत्तस्येति यावत्। अनर्थो नरकपातोऽस्तीत्यर्थादालोच्येति संबन्धः। लशुनं न भक्षयेदित्यादिनिषेधवाक्येन तद्भक्षणस्य बलवदनिष्टाननुबन्धीष्टसाधनत्वं निषिध्यते तस्यैव लिङादिप्रतिपाद्यत्वात्। तत्र लशुनादिभक्षणस्य प्रत्यक्षप्रमितेष्टसाधनतया तद्विरहप्रयुक्तवर्णितविशिष्टाभावानुपपत्ते र्बलवद निष्टाननुबन्धित्वरूपविशेषणाभावादेव स वाच्य इति नरकसाधनत्वं तस्य निश्चीयते, तदिदमुक्तमर्थादालोच्येति। एवं तस्यानर्थहेतुत्वनिश्चयवान्भक्षणादिप्रवृत्तेः प्रापकस्य वक्ष्यमाणरागादेः प्राबल्यरूपेऽर्थे प्रातिलोम्यं विधत्ते, यथा पुनस्तद्भक्षणादावुत्कटरागो न भवति तथा स्वयं यत्नं कुरुत इत्यर्थः। एवं च यथा लशुनादिभक्षणे प्रवर्तकरागोत्कटत्वनिवृत्तये श्रुतिमन्तरेण स्वयमेव प्रवर्तते एवमत्रापीति द्रष्टव्यम्॥ ७६॥

औदासीन्यं बोधयच्छास्त्रमेत-
न्नित्यं पथ्यं बोधयत्यस्य पुंसः॥
पथ्यादस्मात्प्रच्युतस्यास्त्यपथ्यं
बुद्ध्वापथ्यप्रातिलोम्ये यतेत॥ ७७॥

दार्ष्टान्तिकं विशदयति। औदासीन्यमिति। अना-

त्वविचारादेर्मोक्षसाधनत्वाभावमित्यर्थः । एतच्छास्त्रं श्रोतव्यो मन्तव्य इत्यादि नित्यमात्यन्तिकं पथ्यमिष्टं ज्ञानद्वारा मोक्षसाधनमिति यावत् । तथा च श्रुतिः । अन्या वाचो विमुञ्चथेति । अस्य मुमुक्षोस्ततः किं तत्राह । पथ्यादिति । अस्त्यपथ्यं संसाररूपोऽनर्थ इति बुद्ध्वेति संबन्धः। अपथ्यप्रातिलोम्ये यतेत, यथाऽपथ्यं न भवति तथा पूर्वोक्तविधयात्मश्रवणादौ यतेतेत्यर्थः । पाठान्तरेत्वपथ्यं बुद्ध्वेति संबन्धः॥ ७७ ॥

वृत्ता प्रवर्त्तकनिवर्त्तकशास्त्रसिद्ध्यै
षष्ठे प्रवृत्तिविनिवृत्त्यधिकारिचिन्ता ॥
अत्रैकमेव तु निवृत्त्यधिकारमार्ग-
माश्रित्य सूत्रकृदथात इति प्रवृत्तः ॥ ७८ ॥

एवं काण्डद्वयस्याधिकारिभेदमुपपाद्योपसंहरति । वृत्तेति। कृतेत्यर्थः। प्रवर्त्तकनिवर्त्तकशास्त्रसिद्ध्यै विधिनिषेधशास्त्रार्थानुष्ठानसिद्ध्यै। षष्ठे पूर्वमीमांसायामिति शेषः। प्रवृत्तिनिवृत्त्यधिकारिचिन्ता स्वर्गकामाधिकरणादौ कलञ्जभक्षणनिषेधाधिकरणादौ च प्रवृत्तिनिवृत्त्यधिकारिचिन्ता वृत्तेति संबन्धः। अत्र अस्मिन् शास्त्रे त्वेकमेवेति संबन्धः। एवं चात्राधिकारिचिन्तायां न पुनरुक्तिरिति भावः ॥ ७८ ॥

औदासीन्यप्रच्युतेः प्रापकौ च
रागद्वेषौ नापरो हेतुरस्ति ॥

रागद्वेषप्रातिलोम्ये प्रवृत्ति-
रौदासीन्यप्रापणाच्छास्त्रतोऽर्थात् ॥ ७९ ॥

इदानीं सिंहावलोकनन्यायेन प्रच्युतेः प्रापकस्येत्युक्तम् प्रापकमेव विशदयति । औदासीन्यप्रच्युतेरिति । रागद्वेषौ, धात्वर्थस्येष्टसाधनताज्ञानाद्धात्वर्थगोचरेच्छा रागः, अनिष्टसाधनताज्ञानात्तत्र द्वेषः । लौकिकभोजनादौ वैदिकाग्निहोत्रादौ चाविशेषेण राग एव प्रवर्त्तकः, न तु वेदे प्रवर्त्तनातो लिङादिव्यापारात्प्रवृत्तिः, प्रमाणस्येष्टसाधनत्वादिस्वप्रमेयबोधनव्यापारं विना व्यापारान्तराभावादित्याशयेनाह । नापर इति । एवं प्रवर्त्तकनिवर्त्तकौ रागद्वेषावित्युक्त्वा लशुनभक्षणादौ रागिणस्तन्निवृत्त्यर्थं प्रवृत्तिप्रकार इत्यालोच्य प्रच्युतेः प्रापकस्येति प्रागुक्तं स्मारयति । रागद्वेषेति । प्रातिलोम्ये प्रतिलोमे शश्वदनिष्टसाधनतानुसन्धाने प्रवृत्तिः स्यादिति शेषः ॥ ७९ ॥

अशुचेः प्रतिषेधशास्त्रतो
न भवत्येव हि वेदचिन्तनम् ।
श्रवणादिनिवृत्तिशास्त्रतः
स्वयमर्थादथ शौचमापतेत् ॥ ८० ॥

एवं मुमुक्षोर्निवृत्तिमात्रेऽधिकार इति बादरायणस्य तद्व्युत्पादनमर्थवदित्युक्तम्, नन्वेवं सति मुमुक्षोः कथं शौचादिसिद्धिरित्यत आह । अशुचेरिति । प्रतिषे-

धशास्त्रत इति । द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिं चाशुद्धामात्मनं चाशुचिं द्विज इति स्मृत्या वेदानुशीलिनोऽशुचित्वप्रतिषेधादशुचेर्वेदचिन्तनं न संभवत्येव, तेन विना च प्रागुक्तन्यायेन वेदान्तश्रवणादिर्न स्यात् । न हि वेदवाक्यमननुसन्दधता वेदान्तवाक्यं विचारयितुं शक्यमिति इतरनिवृत्तिपरश्रवणादिशास्त्रसामर्थ्यादेव शौचादिविधिमन्तरेणापि तदस्य सिद्ध्यतीति ॥ ८० ॥

अचतुर्गुणशौचवारणात्
स्वयमेवास्य चतुर्गुणं भवेत् ॥
अचतुर्ष्वशनस्य वारणात्
स्वयमेवास्य चतुर्षु भोजनम् ॥ ८१ ॥

नन्वेवमपि यतीनां तु चतुर्गुणं चातुर्वर्ण्यं चरेद्भैक्ष्यमित्यादिशास्त्रसिद्धशौचाद्याश्रितचातुर्गुण्यादिनियमः कथं सिध्येत्तत्राह । अचतुर्गुणेति । तेनापि हि शास्त्रेण सकलनिवृत्तिविधायिशास्त्रानुसारेणाचातुर्गुण्यादिनिवारणादर्थाच्छौचचातुर्गुण्याशनचातुर्गुण्यादि सिध्यतीति न काप्यनुपपत्तिरिति भावः ॥ ८१ ॥

इति योजय सर्वमीदृशं
कथितन्यायवशेन सादरम् ॥
विधिहीननिवृत्तिशास्त्रतः
कथितेऽस्मिन्नधिकारवर्त्मनि ॥ ८२ ॥

एवं सकलसंन्यासविधायकशास्त्रबलान्मुमुक्षोरात्मश्रवणादिशास्त्रमपि तदितरपरिवर्जनपरमेव नास्य प्रवृत्तिविधायकं किंचिदपि शास्त्रमस्तीत्युपपादितमुपसंहरति । इतीति । अनेन प्रकारेणेत्यर्थः । ईदृशमापाततः प्रवृत्तिविधायितया प्रतीयमानं त्रिषवणस्नानादि शास्त्रम् । अस्य पक्षस्य महद्भिरादृतत्वाच्च न त्वयात्रादरशैथिल्यं कार्यमित्याशयेनाह । सादरमिति । अस्मिन्नधिकारवर्त्मनि । कथितन्यायवशेन विधिहीननिवृत्तिशास्त्रतस्तच्छास्त्रबलादीदृशं सर्वं सादरमिति अनेन प्रकारेण योजयेति संबन्धः ॥ ८२ ॥

इति केचन वर्णयन्ति त-
द्विपरीतं प्रवदन्ति केचन ।
प्रविभज्य तदप्युदीर्यते
निपुणाचार्यपरम्परागतम् ॥ ८३ ॥

उक्तमनूद्य तत्प्रतिपक्षं पक्षान्तरं प्रस्तौति । इति केचनेति । ज्ञानाधिकारिणः केवलं निवृत्तावेवाधिकारं केचन वर्णयन्ति । अन्ये केचन तद्विपरीतं ततो निवृत्तिमात्रनिष्ठाया विपरीतं प्रवृत्तिमपि वदन्तीत्यर्थः । ननु सकलकर्मनिवृत्तिविधायिनि शास्त्रे सति कथं तद्विपरीतपक्षोत्थानमित्याशङ्क्याह । प्रविभज्येति । तद्विपरीतं प्रविभज्योदीर्यते मयेति शेषः । ननु श्रुतिविरुद्धत्वात्तदुपेक्षैव न्याय्येति तत्राह । निपुणाचार्येति ।

BHARATIYA VIDYA BH
24827
S. N.

था च तदुपेक्षार्हं न भवतीत्यर्थः, निपुणेति पूर्वस्मादस्य विशेषं द्योतयति, तदग्रे व्यक्तीभविष्यति ॥८३॥

उत्सर्गतः सकलकर्मनिवृत्तिनिष्ठा
संन्यासशास्त्रशतकोटिभिरर्पितास्य ॥
अस्ति प्रतिप्रसवशास्त्रमुखात्प्रतीता
चेष्टात्मबुद्धिपरिपाकफलापि का चित् ॥८४॥

नन्वेवं सति सकलत्यागश्रुतेः का गतिरित्याशङ्क्य ततः सामान्यतः सकलनिवृत्तिसिद्धावपि ज्ञानाधिकारिणो विशिष्य श्रवणादिरूपा प्रवृत्तिरपि प्रतिप्रसवरूपाच्छ्रवणादिशास्त्रात् सिध्यतीति भवति तस्योभयनिष्ठेत्यभिप्रेत्याह। उत्सर्गत इति। सामान्यत इत्यर्थः। निवृत्तिनिष्ठा निवृत्त्यधिकारः, अस्य मुमुक्षोर्ज्ञानाधिकारिणो यद्यपि तथाप्यस्तीत्यध्याहृत्य संबन्धः। तथाप्यस्ति प्रवृत्तिरिति यदुक्तं तदाह। प्रवृत्तिप्रसवशास्त्रमुखादिति। सामान्यतः परित्यक्तस्य विशेषरूपेण विधायिशास्त्रबलात् चेष्टा श्रवणादिरूपा शौचादिरूपा च प्रवृत्तिरात्मबुद्धिपरिपाकफला आत्मसाक्षात्कारस्य साक्षाद्वा परम्परया वा निश्चयत्वप्रयोजिका ॥ ८४ ॥

यमस्वरूपा सकला निवृत्ति-
स्तथा प्रवृत्तिर्नियमस्वरूपा ॥
निवर्त्तकादत्र यमप्रसिद्धिः
प्रवर्त्तकात्स्यान्नियमप्रसिद्धिः ॥ ८५ ॥

ननु संन्यासशास्त्रानुरोधेन श्रवणादिशास्त्रस्यापि पूर्वोक्तनिवृत्तिमात्रपरत्वेनास्यैकनिष्ठायां सम्भवन्त्यां किमुभयनिष्ठाभ्युपगमेनेत्याशङ्क्य श्रवणादिशास्त्रस्येतरनिवृत्तिपरत्वे स्वार्थत्यागोऽन्यार्थकल्पना प्राप्तबाधश्चेति त्रैदोष्यापत्तेर्नियमपक्ष एवाश्रयणीय इति ज्ञानाधिकारिणोऽप्युभयनिष्ठत्वमन्यथा यमनियमादिविभागप्रसिद्धिरपि न स्यादित्याह । यमस्वरूपेति । स्मृतिसिद्धयमसंज्ञितेत्यर्थः । निवृत्तिः सर्वप्रकारेण प्राणिपीडानृतवचनादेर्निवृत्तिः । प्रवृत्तिः शौचादिरूपेत्यर्थः यमनियमयोः संक्षिप्य स्वरूपमाह । निवर्त्तकादिति । अत्र तयोर्मध्ये हिंसादिनिवर्त्तकशास्त्रप्रतिपाद्यो यमः शौचादिप्रतिपादकशास्त्रप्रतिपाद्यो नियम इत्यर्थः॥८५॥

निवृत्तिरस्ति द्विविधा बहिःस्थिता
शरीरसर्वेन्द्रियसंयमात्मिका ॥
तथापराभ्यन्तरवस्तुसंश्रया
सदात्मकूटस्थचिदेकविग्रहा ॥ ८६ ॥

अधिकारिनिरूपणप्रस्तावे मुक्तियोग्यं तत्स्वरूपं प्रागहङ्काराद्यध्यस्तत्वनिरूपणेनार्थसिद्धं ब्रह्म वा इदमित्यादिशास्त्रसम्मतं साक्षाद्दर्शयितुम् , अथ वा यमस्वरूपा सकला निवृत्तिरिति कथम्, असङ्गतया ब्रह्मस्वरूपस्येतरासंसृष्टत्वेन प्रपञ्चोपशम इत्यादिश्रुत्या प्रपञ्चनिवृत्त्यात्मतया च प्रमितस्य निवृत्तिरूपत्वात् ,

न च साध्यरूपा साधनात्मकयमात्मिकेत्याशङ्क्य निवृत्तिविधायकशास्त्रसिद्धैव सा यमात्मिका न निवृत्तिमात्रमिति वक्तुं तां विभजते। निवृत्तिरस्तीति। द्वैविध्यमेवाह। बहिःस्थितेत्यादिना। आत्मबाह्यशरीराद्याश्रितेत्यर्थः। तत्र हेतुमाह। शरीरेति। अभ्यन्तरवस्तुसंश्रया सर्वान्तरवस्त्वात्मिका। तत्सिद्धय आह। सदात्मेति ॥ ८६ ॥

तयोस्तु बाह्या विधिशास्त्रलभ्या
प्रयत्ननिर्वर्त्त्यतया प्रतीतेः ॥
विधानशास्त्रं विरहय्य लभ्या
चितिस्वरूपा त्वितरा निवृत्तिः ॥ ८७ ॥

अस्त्वेवं प्रकृते किमायातमिति अभिधित्सितसिद्धये तयोरवान्तरविशेषमाह। तयोस्त्विति। विधिशास्त्रलभ्या हिंसादिनिषेधविधिलभ्येत्यर्थः। तत्र हेतुः प्रयत्ननिर्वर्त्त्यतयेति। न हिंस्यादित्यादिनिषेधविधेरहिंसां कुर्यादित्यर्थप्रतीतेः सा तथेत्यर्थः। एतच्च परसिद्धान्तमाश्रित्योक्तं स्वमते हिंसादिगतश्रेयःसाधनत्वाभावस्यैव तदर्थत्वादिति। इतरा तु नैवमित्याह। विधानेति। तस्या यत्नासाध्यत्वे चितिस्वरूपेति हेतुगर्भं विशेषणम् ॥ ८७ ॥

मायामयी बाह्यनिवृत्तिरिष्टा
चितिस्वरूपा परमार्थसत्या ॥

तयोर्निवृत्त्योश्च निवृत्तिशास्त्रं
विधायकं बाह्यनिवृत्त्यपेक्षम् ॥ ८८ ॥

बाह्यान्तरनिवृत्त्योः साध्यासाध्यत्वे हेत्वन्तरमेवाह । मायामयीति । तथा चानिर्वचनीयायास्तस्याः साध्यत्वं संभवतीत्यर्थः । परमार्थसत्येति । तथा च तस्या न प्रागसत्त्वमिति न साध्यत्वमित्यर्थः । ततोऽपि किं तत्राह । तयोरिति । बाह्याभ्यन्तरयोरित्यर्थः । बाह्याया एव कृतिसाध्यत्वसंभवाद्धिंसादिनिषेधशास्त्रं हिंसाद्यौदासीन्यानुकूलान्तरक्रियात्मिकां तामेव विधत्ते । एवं च विधेयात्मकयमोऽपि सैवेति भावः ॥ ८८ ॥

प्रवृत्तिशास्त्रेण समेऽपि संमते
निवृत्तिशास्त्रस्य विधेयबोधने ॥
निवृत्त्यनुष्ठाननिबन्धनत्वतो
निवर्त्तकं शास्त्रमिदं प्रचक्षते ॥ ८९ ॥

ननु यदि निषेधशास्त्रमपि निवृत्तिक्रियां विधत्ते तर्हि सर्वमेव विधिशास्त्रमिति विधिनिषेधविभागो न सिध्येदित्याशङ्क्याह । प्रवृत्तीति । प्रवृत्तिनिवृत्तिरूपविधेयवैलक्षण्यात्तद्विभागसिद्धिरित्याशयेनाह । निवृत्तीति । निवृत्त्यनुष्ठाने निबन्धनं कारणं तस्य भावस्तत्त्वं तत इत्यर्थः । इदं यमविषयम् । एतदुक्तं भवति । न ज्ञानाधिकारी मुमुक्षुर्निवृत्तिमात्रनिष्ठः,तथा सति श्रवणादिशास्त्रे त्रिदोषपरिसंख्याप्रसङ्गात्,किन्तु श्रवणादिरूपप्रवृ-

त्तिनिष्ठोऽपि,श्रवणादेश्चात्मज्ञाने साधनत्वं यद्यप्यन्यतः सिद्धं तथापि तुषनिवृत्तिसाधनतया सिद्धावहनन इवात्रापि नियमविधिसंभवाद् नियमापूर्वस्य ज्ञानप्रतिबन्धकनिवृत्त्यार्थवत्त्वोपपत्तेरिति ॥ ८९ ॥

शास्त्रद्वयेन परिदर्शितसाधनेन
साध्यस्पृहापरवशः पुरुषो मुमुक्षुः ॥
शुश्रूषते गुरुमथेत्युदितः स चात्र
वेदान्तवाक्यविषयश्रवणाधिकारी ॥ ९० ॥

ननु यदि ज्ञानाधिकारिणोऽप्युभयत्राधिकारस्तर्हि षष्ठाध्यायनिरूपिताधिकारिणो नास्य विशेष इति किं भगवतः पृथक्तद्व्युत्पादनेनेत्याशङ्क्यास्त्यस्य ततो महान्विशेष इत्याह। शास्त्रद्वयेनेति। पूर्वकाण्डप्रदर्शितेन विविदिषार्थमनुष्ठितेन यज्ञादिनाऽहिंसादिना च शुद्धान्तःकरणो वेदान्तोक्तविवेकवैराग्यशमदमलक्षणसाधनेन हेतुना मुमुक्षुः पुरुषः साध्यस्य तत्त्वसाक्षात्कारस्य स्पृहया परवशः प्रवृत्तिपर्यन्तज्ञानेच्छया प्रेर्यमाणो यो गुरुं शुश्रूषते चोऽवधारणे स एव वेदान्तवाक्यविषयश्रवणाधिकार्यत्र जिज्ञासासूत्रेऽथेत्युदित इति सम्बन्धः।एवं च साधनचतुष्टयसम्पन्नस्य ब्रह्मजिज्ञासोर्गुरुं शुश्रूषमाणस्य वेदान्तश्रवणाधिकारिणोऽविवेकाविरक्ताशान्तऽमुमुक्षुनिवृत्तगुरुकुलवासात् कर्माधिकारिणोऽतिस्फुटमेव वैलक्षण्यं न्यायान्तरसाध्यमस्तीति

नात्र तद्व्युत्पादनं व्यर्थमिति भावः ॥ १० ॥

स परिपृच्छति कोऽहमसौ च कः
सहजमस्य च तस्य च किं पृथक् ॥
उत तयोरभिदेश्वरजीवयो-
रिति च संशयसंकुलमानसः ॥ ११ ॥

एवमुपससाद चतुष्टयसाधन इत्यादिना प्रस्तुताधिकारिनिरूपणं समाप्येदानीं स गुरुमुपव्रज्य किमकरोदिति जिज्ञासायामाह । स परिपृच्छतीति । उक्तोऽधिकारी इति संशयसंकुलमानसो गुरुमुपेत्य पृच्छतीति सम्बन्धः । संशयप्रकारं दर्शयन्नर्थात्प्रश्नप्रकारमप्याह । कोऽहमित्यादिना । अहमनुभवे प्रकाशमान आत्मा मम स्वरूपमहमनुभवश्च देहेन्द्रियादिसङ्घे जायमानः किमालम्बन इति न ज्ञायत इति कोऽहमिति त्वम्पदार्थप्रश्नः, स्वस्वरूपस्याभ्यर्हितत्वात्प्रथमं जिज्ञासेति द्रष्टव्यम् । तत्पदार्थे प्रश्नमाह । असौ च क इति । तत्त्वमसिवाक्ये यस्तत्पदार्थः असौ च कः, किं तत्तेजोऽसृजतेत्यादिना जगत्कर्तृत्वादिप्रपञ्चवत्तया निर्दिष्ट एव सः, किं वा सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतिप्रसिद्धं समस्तभेदशून्यं सदेवेति । वाक्यार्थे प्रश्नमाह । सहजमित्यादिना । स्वाभाविकमित्यर्थः । अस्य जीवस्य । तस्य तत्पदार्थस्य ब्रह्मणः । पृथक्पृथक्त्वं तयोरीश्वरजीवयोरिति सम्बन्धः ।

द्वा सुपर्णेत्यादौ जीवेश्वरयोर्भेदश्रवणात्तत्वमसीत्यादौ चाभेदश्रवणाद्वाक्यद्वयस्य विशेषानवगमात्संशयः॥११॥

तीर्थेन तं विविदिषन्तमनन्यभक्तं
संसारसागरभयातुरचित्तवृत्तिम् ॥
एकं मुमुक्षुमधिकारिणमात्मतत्त्व-
ज्ञाने समीक्ष्य गुरुराह दयाविधेयः ॥ १२ ॥

इदानीमेतादृशमेव शिष्यमुपलभ्य गुरुणा ब्रह्माद्वयमुपदेष्टव्यमिति शिक्षयन् गुरुरुपदिशतीत्याह । तीर्थेनेति । पावनेन विविदिषार्थमनुष्ठितयज्ञादिना गङ्गास्नानादिना चात्मानं विविदिषन्तं तमिति सम्बन्धः । तीर्थेन गुरुणा वा वेदितुमिच्छन्तं तमित्यर्थः । आत्मविविदिषुरपि कश्चिद्यद्यन्यां देवतामुपास्ते स न गुरुणोपदेष्टव्य इत्यभिप्रेत्याह । अनन्यभक्तमिति । प्रत्यगेकप्रवणचित्तमित्यर्थः । एवं भूतोऽपि कश्चित्सांसारिकभोगपरित्यागातुरचित्तो भवतीति तं व्यावर्तयति । संसारेति । नन्वेवंविधोऽधिकारी जगति दुर्लभः,सत्यम्, तथापि कश्चित्सम्भवति, उक्तं हि भगवता, मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये इत्याशयेनाह। एकमिति । एकजीवाभिप्रायं वा । गुरोः शिष्योपदेशव्यापारे निमित्तमाह । दयाविधेय इति । तथा च न शिष्याननुबध्नीयादिति निषेधोऽत्र न प्रवर्त्तेत इति भावः ॥ १२ ॥

वक्ष्यामि वत्स तव वाञ्छितमत्यवस्थ-
मत्यन्तमेव च हितं शृणु तन्मनस्कः ॥
त्वं प्रत्यगव्यवहितं तव सुप्रसिद्धं
ब्रह्माद्वितीयमुदितं च तदस्यजस्रम् ॥ ९३ ॥

इदानीं गुरोः शिष्योपदेशप्रकारं शिक्षयंस्तदुपदेशमाह । वक्ष्यामीति । अनुद्विग्नमनाः सन्नुपदेशार्थमवगच्छत्विति वत्सेति पुत्रवत्सम्बोधनम् । सदेवसोम्येत्यादिलिङ्गाच्छरणागतस्य शिष्यस्य वाञ्छितमप्यनर्थकरं चेद् गुरुणा कथं तदुपदेष्टव्यमित्याशङ्क्य वाञ्छितं विशिनष्टि । अत्यवस्थमिति । अवस्थात्रयातीतं तुरीयमिति यावत् । तथा च प्रपञ्चोपशमः शिव इति श्रुत्या निष्प्रपञ्चस्य सुखरूपत्वप्रतिपादनान्नोक्तदूषणमित्याशयेनाह । अत्यन्तमिति । वक्ष्यमाणार्थस्यातिसूक्ष्मतया शिष्यस्य तत्र चेतःप्रणिधानार्थमाह । शृणु तन्मनस्क इति । किं तच्छ्रोतव्यमित्यपेक्षायां प्रश्नक्रमेणोत्तरमाह । त्वमित्यादिना । त्वं न देहो न चेन्द्रियमनःप्राणाहङ्कारास्तेषां सावयवतया कार्यत्वाद्विनाशित्वाच्च घटादिवदनात्मत्वात्, आत्मनश्च कृतनाशादिपरिहारायानादित्वात्, तेषां जड़तया तदतिरिक्तसाक्षिभास्यत्वाच्च नात्मत्वम्, साक्षी च स्वप्रकाशचैतन्यात्मा नान्यमपेक्षते, स च निर्द्धर्म एव साक्ष्यस्य रूपादिवदतद्धर्मत्वादित्याशयेनाह । प्रत्यगव्यवहितमिति । जड़ा-

नृतादिस्वभावदेहादिप्रतीपमञ्चति प्रकाशते इति स्वप्रकाशचैतन्यमत एवाव्यवहितं नित्यापरोक्षमित्यर्थः। तत्र सर्वानुभव एव प्रमाणमित्याह। सुप्रसिद्धमिति। अन्यथा जगदान्ध्यप्रसङ्ग इति भावः। द्वितीयस्योत्तरमाह। ब्रह्मेति। बृहदित्यर्थः। तत्किमाकाशसदृशं नेत्याह। अद्वितीयमिति। सजातीयादित्रिविधभेदशून्यं सन्मात्रमित्यर्थः। तत्र प्रमाणमाह। उदितं चेति। सदेवेत्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेत्यन्तेन ग्रन्थेन दर्शितमित्यर्थः। तृतीयस्योत्तरमाह। तदस्यजस्रमिति। अद्वैतब्रह्मोपासनया जीवस्य ब्रह्मभावो भवतीति केचित् तान्प्रत्याह, तदसीति, तद्विवरणमजस्रमिति, साध्यत्वे तस्यानित्यत्वापत्तिः, चकारदर्शितस्तत्त्वमसीति श्रुतिविरोधः, तत्रासीति ब्रह्मभावस्य वर्त्तमानताश्रवणात्। अतस्त्वं साक्षिचैतन्यात्मा सदाद्वयं सदात्मकं ब्रह्मैव न तु ततो भिन्नोऽसीति ॥ १३ ॥

यद्यत्र पश्यसि विरोधमुदीरय त्वं
सद्यस्ततः परिहराणि तमप्रयत्नात् ॥
वाक्यं निरस्तसकलप्रतिबन्धकं सत्
त्वां बोधयिष्यति करार्पितबिल्वतुल्यम् ॥१४॥

एवं संक्षेपेण शिष्यप्रश्नानामुत्तरमभिहितमिदानीं तत्र शिष्यस्याङ्गीकाराद्यभावलिङ्गेन वाक्याद् दृढतरा-

नुभवो नोत्पन्न इति स्वयमेवोन्नीय वाक्यात्तदनुभवप्रतिबन्धापनयनार्थं प्रयततेऽन्यथा वक्ष्यामीत्यादिस्वप्रतिज्ञाऽसिद्धेः,तत्रापि वाक्यार्थस्य पुरुषार्थत्वादव्यवधानेनोपस्थितत्वाच्च तद्विरोधमेव प्रथमं परिहर्तुमाह । यद्यत्रेति । वाक्यार्थ इत्यर्थः । ततस्त्वदुदीरणानन्तरम् । परिहारे भवतां क्लेशः स्यादिति शिष्यमतिमालक्ष्याह । अप्रयत्नादिति । विरोधपरिहारे प्रयोजनमाह । वाक्यमिति । करार्पितविल्वतुल्यं करतलामलकादिकल्पं यथाऽपरोक्षं स्यात्तथेत्यर्थः ॥ ९४ ॥

अत्राह सद्वयमहं मम रूपमीक्षे
तच्चाद्वयं विगणयामि परोक्षमेव ॥
पारोक्ष्यसद्वयविभागयुजोर्विरोधाद्
वाक्यार्थबोधमतिदुर्लभमेव मन्ये ॥ ९४ ॥

एवं गुरुणानुज्ञातः शिष्यो निःशङ्को वाक्यार्थासम्भवं चोदयति । अत्राहेति । सद्वयं प्रतिशरीरं भिन्नं कर्तृत्वादिमच्च ।ईक्ष इत्यनेनापरोक्षत्वमपि विरोधप्रदर्शनाय स्वस्मिन्दर्शयति । ततः किं तत्राह । तच्चेति । तत्पदार्थरूपमित्यर्थः , चोऽवधारणे , अद्वयमेवेति सम्बन्धः । विगणयामि कार्यलिङ्गेन तदुपादानतया तर्कयामि । तर्कयोग्यन्तत्स्वरूपमाह । परोक्षमेवेति । अपरोक्षे तर्कानुदयात्तर्क्यते चेत्परोक्षमेवेत्यर्थः। ततः किं तत्राह । पारोक्ष्येति । एतच्चाद्वयत्वस्यो-

पलक्षणम्, सद्वयेति भावप्रधानः, । तच्चापरोक्ष्योपलक्षणम्, पारोक्ष्यसद्वयत्वयोः परस्परमविरोधेन विरोध्युपलक्षणस्य कर्तव्यत्वात्। तथा च पारोक्ष्यापरोक्ष्यसद्वयत्वाद्वयत्वरूपविभाजकधर्मयुजोरित्यर्थः। एवं वाक्यार्थाभेदासम्भवे वाक्यात्तद्बोधोऽपि न सम्भवतीत्याह । वाक्यार्थेत्यादिना । एतदुक्तं भवति । तत्त्वमसीत्यादिवाक्यं जीवब्रह्माभेदनिष्ठमिति वाच्यमन्यथातदर्थायोगात्तच्च न सम्भवति सद्वयाद्वययोः परोक्षापरोक्षयोश्च जीवब्रह्मणोरभेदासम्भवात् । एवं च तद्गोचरमुपनिषज्जन्यं ज्ञानं कुतस्त्यमिति ॥ ९५ ॥

यद्वस्तु सद्वयतयावगतं स्वशब्दात्
तस्याऽद्वयत्वमवगन्तुमशक्यमेव ॥
यद्वस्तु च व्यवहितं प्रतिपादितं तत्
प्रत्यक्तया न तु जनः प्रतिपत्तुमीशः ॥ ९६ ॥

ननु जीवेश्वरयोस्तत्त्वमादिशब्दैरभेदबिरोधिसद्वयत्वादि न प्रत्येतुं शक्यं तेषां तदसामर्थ्यादिति कथं न तयोरभेदधीरित्याशङ्क्य प्रसिद्धार्थाभिधायित्वात्तत्त्वमादिशब्दानां जीवस्य च प्रमातृत्वादिसद्वयरूपेणैव प्रसिद्धेस्तदर्थस्यापि प्रकरणेनाद्वयतयैवावगमाद् भेदविरोधिरूपा प्रतीतिरसिद्धेत्याशयेनाह । यद्वस्त्विति । सद्वयतयेत्यापरोक्ष्यस्याप्युपलक्षणम् । अद्वयत्वं सकलभेदशून्यत्वम् । व्यवहितं प्रतिपादितमिति । तच्छब्देनाद्वयं परो-

क्षमेव प्रतीयत इति तथोक्तम् । प्रत्यक्तया । अपरोक्षचैतन्यात्मना । ईशः शक्तः ॥ १६ ॥

आकाङ्क्षितं भवति पूरणशक्तियुक्तं
यत्सन्निधौ पतितमस्य हि सङ्गतिः स्यात् ॥
नाकाङ्क्षयैव न तु सन्निधिनैव वा स्यात्
सम्बन्धिता हि विरहय्य पदार्थशक्तिम् ॥ १७ ॥

ननु शुक्तिरजतयोरभेदायोग्ययोरपि शब्दादभेदधीदर्शनाद्योग्यता शाब्दज्ञाने नाऽपेक्ष्यते किन्तु आकाङ्क्षादिकमेवेत्याशङ्क्य शाब्दप्रमायां योग्यता स्वरूपसत्यपेक्षितैव न त्वाकाङ्क्षादिमात्रमित्याह । आकाङ्क्षितमिति । येन विना यस्य पदस्य स्वार्थानुभवाजनकत्वं सा तस्य शब्दस्य तस्मिन्नाकाङ्क्षा, तदर्थयोरपि साकाङ्क्षशब्दप्रतिपाद्यतया सैवाकाङ्क्षा तद्युक्तमित्यर्थः । पूरणशक्तियुक्तम् अन्वययोग्यम्, यत्सन्निधौ पतितं समीपस्थपदेन यज् ज्ञापितम्, हि यस्मात्, पदार्थशक्तिं योग्यताम्, यद्यपि शाब्दज्ञानमात्रे योग्यता स्वरूपसती नापेक्ष्यते शब्दाभासप्रतिपाद्ये तदभावान्नापि तज्ज्ञानं तत्र मानाभावाद् योग्यताज्ञानविरहसहकृतात्तदितरकारणचक्रादेव शाब्दभ्रमोपपत्तेः, तथापि शाब्दप्रमायां स्वरूपेण सापेक्षितैव,यस्मादाकाङ्क्षादौ सत्यपि तया विना तदभावस्तस्मादन्वयव्यतिरेकाभ्यामाकाङ्क्षादित्रितयमपि शाब्दप्रमायां कारणमिति भावः ॥ १७ ॥

योग्यत्वमत्र न च तत्त्वमसीति वाक्ये
संबन्धितां प्रति पदार्थयुगस्य भाति ॥
पारोक्ष्यसद्वयविभागविरोधहेतो-
र्गौरश्व इत्यभिहिते तु यथैव वाक्ये ॥ १८ ॥

ननु ब्रह्मविकारत्वाज्जीवानां तदंशत्वाद्वा मृद्घटादिवदस्त्येवाभेदयोग्यतेति भेदाऽभेदवादिनस्तत्राह । योग्यत्वमिति । चोऽवधारणे पदार्थयुगस्य तत्त्वंपदार्थयोः संबन्धितामभेदं प्रति योग्यत्वं नैव भातीति संबन्धः । जीवस्य ब्रह्मविकारत्वेऽनित्यत्वाद्यापत्तेर्निरवयवस्य ब्रह्मणः सांशत्वायोगाच्च न मृद्घटवत्तदभेदो वाक्यार्थः किन्त्वात्यन्तिक एव स वाक्यार्थः स्यात्स च प्रागुक्तयुक्त्या न संभवतीत्याशयेन सदृष्टान्तमाह । पारोक्ष्येति । पारोक्ष्यादिकृतो विभागो भेदस्तेन सह विरोधाद्धेतोरित्यर्थः ॥ १८ ॥

सोऽयं गिरोरिव न लक्षणयापि वृत्ति-
र्मानान्तराधिगतिहीनतयात्मनि स्यात् ॥
मानान्तराधिगतगोचर एव दृष्टः
शब्दप्रयोग इह लाक्षणिकस्तु लोके ॥ १९ ॥

ननु तत्त्वंपदवाच्ययोः परस्पराभेदायोग्यत्वेऽपि विरुद्धांशपरित्यागेन पदद्वयलक्ष्ययोरभेदो न विरुध्यत इति तमेव वाक्यं बोधयितुं यथा सोऽयमिति प्रत्यभिज्ञावाक्यं तदेतत्पदवाच्ययोस्तद्देतद्देशकालविशिष्टयोरभेदा-

संभवेन तदेतद्देशकालांशं विहाय लक्षितवस्तुस्वरूपाभेदं प्रतिपादयतीत्याशङ्क्याह । सोऽयमिति । तत्त्वं गिरोरिति शेषः, यथासोऽयमिति गिरोर्लक्षणया देवदत्तादिस्वरूपे प्रवृत्तिरेवं तत्त्वं गिरोरात्मनि लक्षणयापि वृत्तिर्न स्यात्, कुतस्तत्राह । मानान्तरेति । आत्मनि मानान्तरेणावगमासंभवान्न लक्षणेत्यर्थः । ननु मानान्तराभावेऽपि तत्र सा किं न स्यादित्याशङ्क्याह । मानान्तराधिगतेति । मानान्तरेण वाच्यसंबन्धितयावगते लक्षणा भवत्यन्यथा लक्ष्यस्वरूपनिर्धारणायोगात्, शब्दादेव तन्निर्णये तस्यापि शब्दस्य लाक्षणिकत्वेनानवस्थापातात्, ततश्च लक्ष्यस्य मानान्तरगम्यत्वं लक्षणाव्यापकमात्मनो व्यावर्त्तमानं लक्षणामपि व्यावर्तयतीति भावः ॥ ९९ ॥

तस्मादखण्डविषया न वचःप्रवृत्तिः
संसर्गबोधनमपास्तमयोग्यभावात् ॥
एवं न वाक्यगतशब्दसमन्वयोऽपि
दूरे प्रमान्तरविरोधनिराससिद्धिः ॥ १०० ॥

आत्मनि लक्षणाऽसंभवसमर्थनफलमाह । तस्मादिति । यस्माल्लक्षणयापि सामानाधिकरण्यं न घटते तस्मादखण्डविषया तत्त्वमादिवचःप्रवृत्तिरिति योजना । संसर्गबोधनं तु प्रकृतवाक्येऽयोग्यभावादपास्तमित्यर्थः । समानाधिकरणवाक्यं हि लोके द्विविधं दृष्टम्, एकं विरुद्धांश-

परित्यागेन लक्षणया स्वरूपमात्रपरं यथा सोऽयमितिवाक्यं किं चित्तु वाच्ययोरेव तादात्म्यलक्षणसंसर्गपरं यथा मृद्घटः नीलोत्पलमित्यादि, एतच्च द्वैविध्यं लक्षणासंभवात्पूर्वोक्तन्यायेन विरोधाच्च ब्रह्मणि न संभवतीत्यर्थः। ननु वेदान्तविरोधाद्विरोधग्राहकप्रमाणानामेवाप्रामाण्यमस्त्वित्यत आह। एवमिति। वेदान्तवाक्ये प्रयुक्तो यः शब्दस्तस्य सामानाधिकरण्येनान्वयोऽपि न संभवति यदा तदा पदार्थयोर्विशेषणविशेष्यभावेन प्रमितिरेव न सिद्ध्येद्दूरे विरोधग्राहकप्रामाण्यनिराससिद्धिः, प्रत्यक्षादिबाधितमर्थमग्निरनुष्ण इति वाक्यवद्वेदोऽपि न प्रमापयितुं शक्त इति कुतस्तद्विरोधात्तदितराप्रामाण्यमिति भावः ॥ १०० ॥

किं च प्रमान्तरमपेक्ष्य गिरः प्रवृत्तिः
सिद्धेषु वस्तुषु जगत्युपलब्धपूर्वा ॥
ब्रह्मात्मवस्तुनि तथा वचसः प्रवृत्ति-
र्युक्तात्मनस्तु फलवत्परिनिष्ठितत्वात् ॥ १०१ ॥

किं च वेदान्ता यदि सिद्धं ब्रह्म प्रतिपादयेयुस्तर्हि मानान्तरसंवादायत्तप्रामाण्याः स्युः, नदीतीरे फलानीति लौकिकवाक्ये तथा दर्शनात्, न च तत्संभवति तत्र मानान्तरासंभवात्, वेदस्यानपेक्षत्वक्षतिप्रसङ्गाच्चेत्यभिप्रेत्याह। किं चेति। सिद्धेषु प्रयत्नानिष्पाद्येषु पराभिमतकार्यविलक्षणेष्विति यावत्। उपलब्धपूर्वेति। पूर्वमुपल-

ब्धेत्यर्थः । ततः किं तत्राह । ब्रह्मेति । तथा तथैव । कुतस्तत्राह । आत्मनस्त्विति । आत्मनोऽपीत्यर्थः । परिनिष्ठितत्वादिति । सिद्धत्वादित्यर्थः ॥ १०१ ॥

नद्यास्तीरे फलमिति गिरः सिद्धवस्तुप्रवृत्ते-
र्दृष्टा स्वार्थप्रमितिजनने स्वान्यमानव्यपेक्षा ॥
तद्वद् ब्रह्मण्यपि तु वचसो वैदिकस्याभ्युपेया
तस्मादस्मिन्न खलु घटते मानभावः श्रुतीनाम् ॥१०२॥

फलवदित्युक्तदृष्टान्तं विशदयन्दार्ष्टान्तिकमपि विशदयति । नद्या इति । सिद्धवस्तुनि प्रवृत्तिर्यस्यास्तस्याः, तुरवधारणे तद्वदेवेति संबन्धः । अस्त्वेवं तत्राह । तस्मादिति । वेदान्तप्रतिपाद्ये मानान्तरप्रवृत्तौ तत्सिद्धार्थानुवादतया वेदान्तानां तात्पर्याभावेनाप्रामाण्यं स्यात्तदभावे च सिद्धवाक्यप्रामाण्यप्रयोजकरूपाभावादप्रामाण्यं स्यादिति भावः ॥ १०२ ॥

नाखण्डवस्तुविषया वचसः प्रवृत्ति-
र्लोकेऽपि दृष्टिपथमापतिता कदाचित् ॥
नानापदार्थघटनाविषयत्वहेतो-
र्दूरेत्यता श्रुतिशिरोवचनेषु तस्याः ॥ १०३ ॥

पूर्वं सोऽयमित्यादिलौकिकवाक्यस्याखण्डार्थत्वमुपेत्य वेदान्ते लक्षणाऽसंभवेन दूषितम्, इदानीं तत्रापि तदसंप्रतिपन्नं कुतस्तद्दृष्टान्तेन वेदान्तेषु तदवकाशो भवेदित्याह । नाखण्डेति । असंसृष्टवस्तुविषया नेत्यर्थः ।

लोकेऽपि सोऽयमित्यादावपि । कुत इति चेत्तत्राह । नानेति । अपर्यायानेकपदोपस्थापितार्थानां घटना संसर्गस्तद्विषयत्वाद्धेतोर्वचस इत्यनुषङ्गः । ननु यथा प्राभाकराणां लोके लिङादीनां नियोगार्थत्वाभावेऽपि वेदे तदर्थता तद्वदत्रापरस्त्वित्याशङ्क्याह । दूरेत्यतेति । दूरमेतीति दूरेत्यम् अव्ययात्त्यबिति त्यप्प्रत्ययासंभवाच्छेषाधिकारे दूरादेत्य इति वार्तिकोक्तेरेत्यप्रत्ययः तस्य भावस्तत्ता दूरे गतता दूरे गतिरिति यावत् तस्या अखण्डवस्तुविषयप्रवृत्तेर्वक्ष्यमाणदोषादुक्तलिङादिदृष्टान्तासंप्रतिपत्तेश्चेति भावः ॥ १०३ ॥

आदाय मुख्यगुणलाक्षणिकप्रवृत्ती-
रर्थं समर्पयति शब्द इति प्रसिद्धम् ॥
आस्वेष नान्यतमयापि वदत्यखण्डं
शब्दान्तरात्तविषयादधिकार्थवृत्तेः ॥ १०४ ॥

ननु सोऽयमित्यादेरर्थान्तरासंभवादखण्डार्थतैव युक्तेत्याशङ्क्य किं मुख्यया वृत्त्या पदानां तद्वाक्यमखण्डनिष्ठं गौण्या वा लाक्षणिक्या वा न सर्वथापीत्याह । आदायेति । अस्त्वेवं किं तत इत्याशङ्क्याह । आस्विति । मुख्यादिवृत्तिषु मध्य इत्यर्थः । एषः शब्दः । कुतो न वदति तत्राह । शब्दान्तरेति । एकपदोपात्तविषयादधिकार्थवृत्तेः शब्दस्येति शेषः, अन्यथा वाक्यत्वमेव न स्यादिति भावः ॥ १०४ ॥

आधिक्यमुत्सृजति शब्दगणो निजेऽर्थे
शब्दान्तरात्तविषयादिति मन्यमानाः ॥
वाक्यत्वमेव पदजातगतं विहन्यु-
र्न ह्यस्ति हस्तकरशब्दगतं तदेषाम् ॥ १०५ ॥

वाक्यत्वानुपपत्तिमेव स्पष्टयति । आधिक्यमिति । पदान्तरानुपात्तविशेषमित्यर्थः । उत्सृजति न बोधयति । शब्दगणः वाक्ये प्रयुक्तः पदसमूहः । वाक्यत्वविघाते दृष्टान्तमाह । न हीति । हस्तः कर इत्यादिपदगतं तद्वाक्यत्वम् । एषां वादिनां शब्दानां वा । यदि वाक्ये प्रयुक्तानि पदानि मुख्याद्यन्यतमया वृत्त्यान्यमन्यमर्थविशेषं न प्रतिपादयेयुः किंत्वेकमेव तदा तेषां पर्यायतापत्तेर्हस्तादिपदसमूहवद्वाक्यत्वं न स्यात्,अपर्यायपदसमूहस्यैव वाक्यत्वादिति ॥ १०५ ॥

किं च स्वयंप्रभमलुप्तचिदेकरूपं
सर्वप्रमाणविषयाद्बहिरभ्युपेत्य ॥
आत्मानमात्मनि च शास्त्रमुदाहरन्तः
सिद्धान्तमभ्युपगतं परिपीडयन्ति ॥ १०६ ॥

किं च ब्रह्मणो वेदान्तजन्यज्ञानविषयत्वाभ्युपगमे सिद्धान्तहानिरित्याह । किंचेति । स्वयंप्रभत्वे हेतुरलुप्तेति । अत एव सर्वेषां प्रमाणानामविषय इत्याह । सर्वप्रमाणेति । आत्मानं स्वप्रकाशादिस्वभावं सर्वप्रमाणविषयादनात्मनो बहिरन्यमभ्युपेत्येति संबन्धः । अत ए-

वेयं श्रुतिः अन्यदेव तद्विदितादिति । तर्ह्ययमभ्युपगम उचित एवेत्याशङ्क्य वेदान्तमेयता तस्यैवं न सिध्येदित्यभिप्रेत्य विपक्षे बाधकमाह । आत्मनि चेति ॥ १०३ ॥

सर्वत्र वस्तुषु जडेष्वजडप्रकाशं
कुर्वत्प्रमाणमिति संप्रतिपन्नमेतत् ॥
ब्रह्मात्मवस्त्वजडबोधवपुः कुतोऽस्मि
वेदान्तवाक्यजनिताऽजडसंविदन्या ॥ १०७ ॥

किं च वेदान्तानां ब्रह्मण्यकिंचित्करत्वान्न मानत्वमित्याह । सर्वत्रेति । जडेषु अस्वप्रकाशेषु घटपटादिष्वित्यर्थः । अजडप्रकाशं स्वयंप्रकाशं विषयस्फुरणम् , घटादीनां जडत्वात्स्वतः स्फुरणासंभवाच्चक्षुरादि तत्र स्फुरणमादधद्व्यवहार उपयुज्यत इति तस्य तत्र प्रामाण्यं युक्तं ब्रह्मात्मनस्तु अजडबोधस्वरूपतया स्वमहिम्नैव सिद्धेस्तदन्याऽजडप्रकाशासंभवाच्च किं तत्र जनयित्वा वेदान्तास्तत्र प्रामाण्यं लभेरन्नित्याह । ब्रह्मात्मेति । अजडेतिच्छेदः ॥ १०७ ॥

किं च क्रियापदमपेक्ष्य पदानि वाक्य-
भावेन सम्यगिह सङ्गतिमाप्नुवन्ति ॥
नात्र क्रियापदमपेक्षितमामनन्ति
वाक्यं कुतो भवति वेदशिरस्तदानीम् ॥ १०८ ॥

किं च वेदान्तानां सिद्धब्रह्मनिष्ठत्वे तद्गतपदानां परस्परमन्वय एव न सिध्येत् क्रियापदेनैव सिद्धपदानाम-

न्वयनियमाद् ब्रह्मवाक्ये च क्रियाऽसंभवादित्याह । किं च क्रियेति । इह लोके । नन्वत्राप्यसि अस्मीत्यादिक्रियापदमस्तीति चेत्तत्राह । नात्रेति । वेदान्ते अस्यादिक्रियापदमपेक्षितं विवक्षितार्थं वेदान्तिनो नामनन्तीति संबन्धः । अस्यादिपदस्याऽपि सन्मात्रनिष्ठत्वाभ्युपगमान्नास्य क्रियापदत्वं साध्यार्थस्यैव तथात्वादतस्तन्निमित्तो न पदसमन्वय इत्याह । वाक्यमिति ॥ १०८ ॥

नापूर्वमर्थमुपलम्भयितुं पदानां
सामर्थ्यमस्ति परिहृत्य तु वाक्यभावम् ॥
स्वार्थस्मृतिं हि जनयन्ति पदानि लोके
विज्ञातसंगतितया न तु कार्यमन्यत् ॥ १०९ ॥

ननु तर्हि पदविधयैव वेदान्तपदानि ब्रह्म प्रमापयिष्यन्ति इति नेत्याह । नापूर्वमिति । तुरवधारणे नैवास्तीति संबन्धः । कुतः सामर्थ्याभावस्तत्राह । स्वार्थेति । तत्रापि हेतुमाह । लोक इति । वृद्धव्यवहारे इत्यर्थः । अन्यदनुभवरूपम्, पदानि हि वृद्धव्यवहारे स्वार्थे गृहीतसङ्गतिकान्येव वाक्यार्थं वाक्यविधया बोधयन्तीति वाच्यम्, अन्यथाऽव्युत्पन्नानामपि वाक्यश्रवणे तदर्थानुभवप्रसङ्गात्, एवं च पदानि पदविधया पूर्वानुभूतस्वार्थस्मृतिमेव जनयन्ति न त्वनुभवम्, अपूर्वार्थत्वाभावात्, वाक्यभावेनैव तेषामपूर्वार्थोपलम्भनशक्तिः, वाक्यार्थस्य विशिष्टस्य वैशिष्ट्यस्य वाऽपूर्वत्वात्, तदभावे च

वेदान्तानां नापूर्वोपलम्भनशक्तिरस्तीति भावः ॥ १०९ ॥

हित्वा न वाक्यपदते प्रतिपत्तिहेतु-
र्वेदो भवेदिति कथंचन वक्तुमीशः ॥
कश्चित् कदा चिदपि तत्र कुतः श्रुतीनां
प्रामाण्यमात्मनि भवेदिति वर्णयन्ति ॥ ११० ॥

तर्हि वर्णानामेव प्रागनवगतार्थतया प्रामाण्यं स्यादिति तत्राह । हित्वेति । वाक्यपदते वाक्यतां पदतां चेत्यर्थः । वेदो वाक्यपदते हित्वा कथं चन कथमपि वर्णात्मनापि कदाचिदपि प्रतिपत्तिहेतुर्भवेदिति कश्चिदपि वक्तुं नेशः । तत्रैवं सति श्रुतीनां प्रामाण्यमात्मनि कुतो भवेदिति वर्णयन्ति वर्णनीयमित्यर्थः । अथ वैवं सत्यात्मनि श्रुतीनां प्रामाण्यमिति यद्वर्णयन्ति तत्कुतः किंबलादित्यर्थः । न हि वर्णमात्रात्क्वाप्यनुभवोऽस्तीति भावः ॥ ११० ।

किं च प्रमान्तरमिहाभ्युपयन् प्रतीचि
वेदान्तवाक्यमनुवादकमभ्युपेयात् ॥
मानान्तरं यदि च नेच्छति शब्दशक्ते-
स्तत्रग्रहः कथमिति प्रतिपादनीयम् ॥ १११ ॥

किं च वेदान्तस्थसत्यज्ञानादिपदानामनात्मनि संगतिग्रहो न संभवति न ह्यात्मातिरिक्तं सत्यादिस्वभावं किंचिदस्ति, नाप्यात्मनि तेषां सङ्गतिग्रहस्तद्ग्राहकमानानामात्मनि प्रवृत्तौ वेदान्तवाक्यमनुवादकं स्यात्,

आत्मनि मानान्तराभावे च तत्र सदादिशब्दस्य कथं सङ्गतिग्रहः स्यात्तेन विना वा कथं वेदान्तानां तत्प्रामाण्यमित्याह । किं च प्रमान्तरमिति । अभ्युपयन्नङ्गीकुर्वन् कथमिति प्रतिपादनीयमिति । न कथमपि स्यादित्यर्थः ॥ १११ ॥

किं च प्रवृत्तिविनिवृत्तिविहीनवस्तु-
तत्त्वप्रतीतिजननान्न च किंचिदस्ति ॥
पुंसः प्रयोजनमतोऽपि न तत्र मानं
वेदान्तवाक्यमिति युक्तिमदुच्यमानम् ॥ ११२ ॥

एवं वेदान्तानां सिद्धब्रह्मबोधकत्वे नदीतीरे फलसत्तावाक्यवन्मानान्तरसापेक्षतापत्तिर्मानान्तराभावे च सङ्गतिग्रहासंभवान्न तत्र तेषां प्रामाण्यमित्युक्तम्, इदानीं सिद्धवस्तुज्ञानेन प्रवृत्तिनिवृत्त्यसंभवात्प्रवृत्तिनिवृत्ती विना च सुखप्राप्तिदुःखपरिहाररूपप्रयोजनासंभवात्तेन विनाध्ययनविधिपरिगृहीतवेदान्तानां प्रामाण्यायोगादपि न सिद्धनिष्ठं वेदान्तप्रामाण्यमित्याह । किंच प्रवृत्तीति । प्रवृत्तिनिवृत्तिविहीनं तदयोग्यं यद्वस्तुतत्त्वमात्मतत्त्वं तत्प्रतीतिजननादित्यर्थः । हेयोपादेययोःकलञ्जभक्षणाद्यग्निहोत्राद्योरनर्थार्थसाधनयोर्ज्ञानात्तद्भक्षणान्निवृत्तिरग्निहोत्रादौ च प्रवृत्तिः संभवतीति तद्वाक्यं प्रयोजनवदर्थनिष्ठम्, आत्मतत्त्वं तु नित्यसिद्धत्वान्न हेयं नाप्युपादेयमिति न तज्ज्ञानात्प्रवृत्त्यादिसंभव इति नि-

ष्प्रयोजनमेवात्मवाक्याध्ययनं स्यात्तच्चानुपपन्नं न ह्युपेक्षाज्ञानेन तदध्ययनविधिः फलवान् भवतीति न तत्र वेदप्रामाण्यं युक्तमिति भावः ॥ ११२ ॥

अज्ञातमर्थमवबोधयतः प्रमायां
हेतुत्वमभ्युपगतं ननु वेदविद्भिः ॥
अज्ञातता च परमात्मनि दुर्निरूपा
विज्ञानमात्रवपुषीति न मानकृत्यम् ॥ ११३ ॥

किं चाज्ञातार्थावगमकं प्रमाणमिति प्रमाणसामान्यलक्षणं वेदविद आहुः, विशिष्य च वेदस्य तथैव वक्तव्यम्, अर्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्येति जैमिनिनोक्तेः, अन्यतो ज्ञातेऽर्थे मानाभावप्रयुक्ताऽसत्त्वशङ्काऽभावेन वेदस्य तत्र तात्पर्यकल्पनाऽसंभवाच्च, न च तात्पर्यं विना शब्दः स्वार्थे प्रमाणमित्याह । अज्ञातमिति । अवबोधयतः, चक्षुरादिकरणस्येति शेषः । ततः किं तत्राह । अज्ञाततेति । चोऽवधारणे दुर्निरूपैवेति संबन्धः । तत्र हेतुर्विज्ञानेति । स्वप्रकाशचैतन्यात्मनि प्रतीचि नाज्ञानं वक्तुं शक्यं न हि प्रचुरप्रकाशे सवितरि तमः संभवति, ततोऽज्ञातार्थावगमलक्षणप्रमाणकृत्याभावान्नात्मनि वेदान्तप्रामाण्यसंभव इति भावः ॥ ११३ ॥

बोधस्वभावकमबुद्धमनुष्णमुष्णं
शीतस्वभावकमशीतमितीदृशानि ॥
कः श्रद्दधीत पुरुषो वचनानि तस्माद्

ब्रह्माऽप्रबुद्धमिति वाक्यमयुक्तमाहुः ॥ ११४ ॥

ननु नेदं प्रमाणसामान्यलक्षणं धारावहनद्वितीयादिबुद्धावभावात्, किं तु यथार्थानुभवः प्रमा तत्करणं प्रमाणमिति सामान्यलक्षणमिति चेन्न, धारावहनबुद्धिसत्त्वेऽपि तद्विषयस्य प्रथमज्ञानेन निश्चितस्यासत्त्वशङ्कानुदयेन द्वितीयादिज्ञानानां तदनिवर्तकानां प्रमेयसत्त्वप्रयोजकप्रामाण्याभावेन तत्र लक्षणागमनस्यादोषत्वात्, यथार्थानुभवत्वं च शुक्तिरजतादिज्ञानसाधारणम्, अबाधितार्थज्ञानं प्रमेत्यपि न, बाधस्य बाध्याभावप्रमारूपतयात्माश्रयादित्यज्ञातार्थबोधकत्वमेव परीक्षकसंमतं प्रामाण्यम्, तच्चात्मनि वेदान्तानां न संभवति अज्ञानाभावादित्युक्तम्, तदभ्युपगमे च तस्य स्वप्रकाशता हीयेत, न ह्यात्मतत्त्वं स्वप्रकाशमबुद्धमितिवचनद्वयप्रामाण्यं संभवतीति सदृष्टान्तमाह । बोधस्वभावकमिति । आहुः वेदान्तिन इति शेषः ॥ ११४ ॥

उपाध्यभावे न भवेदुपाधिमत्
तटस्थमज्ञानमुपाधिरिष्यते ॥
प्रमाणबुद्धेर्न तदात्मवस्तुनि
स्वयंप्रकाशे न ततोऽत्र मानधीः ॥ ११५ ॥

नन्वज्ञानविशिष्टं न प्रमाणगोचरस्तस्यापि प्रमाणगोचरत्वापत्तेः तस्य ततो निवृत्त्ययोगाच्च, नापि तदुपलक्षितं वस्तुमात्रे प्रमाणप्रसङ्गेन तदभावेऽप्यनुपपत्त्य-

भावादित्याशङ्क्य, नाज्ञानं तत्र विशेषणं न वोपलक्षणं किं तूपाधिः, उपाधिश्च यावत्कार्यावस्थायी तदनन्वयी यथा श्रोत्रत्वस्य कर्णशष्कुली, एवं चाज्ञानाभावे वस्तुनः प्रमेयत्वं न संभवति कर्णशष्कुल्यभाव इव श्रोत्रत्वमित्यभिप्रेत्याह । उपाध्यभाव इति । कर्णशष्कुल्याद्यभाव इत्यर्थः । उपाधिमत्तत्प्रयुक्तश्रोत्रत्वादि । तटस्थं प्रमेयाद्बहिर्भूतम् । किं तदुपलक्षणं नेत्याह । उपाधिरिति । अत्र तटस्थमित्यनेन विशेषणादुपाधेर्विशेषो दर्शितः, उपाध्यभाव इत्यादिनोपलक्षणादिति द्रष्टव्यम् । प्रमाणबुद्धेरुपाधिरिति संबन्धः । अज्ञानस्योपाधित्वे फलितमाह । न तदात्मेति । तदज्ञानं स्वयंप्रकाश आत्मवस्तुनि न ताटस्थ्येनाप्युपाधिः संगच्छत इत्यर्थः । यत एवमज्ञानासंभव आत्मनि ततो हेतोरत्रात्मनि न मानधीः संभाव्यत इत्युपसंहारः ॥ ११५ ॥

अद्वैतमात्मपदमाहुरनन्यमानं
द्वैतं प्रमाणमिह च प्रतिपादयन्ति ॥
वाक्ये निजे पदविरोधमनीक्षमाणाः
पाण्डित्यमप्रतिहतं प्रतिलभ्य धीराः ॥ ११६ ॥

किं चाद्वैतब्रह्मवादिना वेदान्तार्थावगन्ता प्रमाता वेदान्ताः प्रमाणं तदुपदेष्टा गुरुस्तदुपकरणं युक्त्याद्यभ्युपगम्यते न वा, आद्ये व्याहतिः, द्वितीये न प्रमेयसिद्धिः, एवं स्वप्रकाशं स्वातिरिक्तप्रमाणगम्यमित्य-

पि प्रमाणविरुद्धमित्याह । अद्वैतमिति । आहुः वेदान्तिन इति शेषः । द्वैतमुक्तप्रमात्रादिप्रमाणं प्रमितिसाधनं चेति संबन्धः । पाण्डित्यमित्याद्युपहासः ॥ ११६ ॥

मातृप्रमाणमितिमेयविभागभिन्नं
ब्रह्मैव चेद् भवति तत्र च वर्णयामः ॥
कूटस्थतापहतिरेकरसत्वहानिः
शाक्यैश्च सन्धिरिति दूषणमन्यदत्र ॥ ११७ ॥

ननु प्रमात्रादिविभागः सर्वोऽप्यस्त्येव, न चैवमद्वैतक्षतिः, अद्वैतब्रह्मण एव निखिलप्रपञ्चपरिणामितया मात्रादेस्तदभिन्नत्वादित्येवं वदन्तं बौद्धगन्धिनमेकदेशिनं प्रत्याह । मातृप्रमाणेति । मितिः प्रमा । तत्र च वर्णयामो दूषणमिति संबन्धः । तदेवाह । कूटस्थतापहतिरिति । निर्विकारस्य ब्रह्मणः प्रमात्रादिविकाराभ्युपगमे निर्विकारश्रुतिविरोध एवमनेकात्मप्रपञ्चाभेदे विज्ञानघन एवेत्यादिश्रुत्यवगतैकरसत्वहानिरेवं ज्ञानात्मनो ब्रह्मणः स्वावभास्यप्रपञ्चाकारत्वे शाक्यैर्विज्ञानवादिभिः सन्धिः कृतः स्यात्तन्मतप्रवेशापत्तिरिति यावत् । चकारदर्शितं दूषणान्तरमप्याह । अन्यदत्रेति । युगपदेकत्र भेदाभेदविरोधादित्यर्थः ॥ ११७ ॥

अज्ञानकल्पितमनिर्वचनीयमिष्टं
मात्रादि मानफलपर्यवसानमेतत् ॥
इत्युच्यते यदि तदा परमात्मनोऽपि

मेयत्वतो भवति कल्पितताप्रसङ्गः ॥ ११८ ॥

ननु प्रमात्रादिविभागः सत्यो न भवति येनोक्तदूषणं स्यात् किं तु दृश्यत्वाच्छुक्तिरजतवत्तत्राज्ञानकल्पित इति न कोऽपि दोष इत्याशङ्क्याह । अज्ञानकल्पितमिति । ननु तदपि सच्चेत्कथं नोक्तदोषस्तत्राह । अनिर्वचनीयमिति । सदसद्विलक्षणमिति नोक्तदोष इत्यर्थः । एतन्मात्राद्यज्ञानकल्पितमिति संबन्धः । माता आदिर्यस्य मानफलं पर्यवसाने च यस्य तत्तथोक्तम् । दृश्यत्वेन प्रमात्रादेः कल्पितत्वे ब्रह्मणोऽपि तत्प्रसङ्गस्तस्यापि वेदान्तवेद्यतया दृश्यत्वादित्याह । तदेत्यादिना ॥ ११८ ॥

ब्रह्म प्रमेयमथ नेष्टमिह प्रमाणं
वेदान्तवाक्यमिति पक्षपराहतिर्वः ॥
न ह्यप्रमेयमवबोधयदस्ति मानं
नादाह्यदाहक इति प्रथितः कृशानुः ॥ ११९ ॥

ननु नास्ति ब्रह्मणो दृश्यत्वं स्वप्रकाशत्वादिति चेत्तर्हि तत एव वेदान्तप्रमेयमपि न स्यात्, अदृश्यस्य मानविषयत्वानुपपत्तेरित्याह । ब्रह्मेति । अथ चेदित्यर्थः, ब्रह्म प्रमेयं नेष्टं चेत्तर्हि इह ब्रह्मणीति संबन्धः । पक्षपराहतिमेव सदृष्टान्तं व्यनक्ति । न ह्यप्रमेयमिति । अदाह्यं गगनादि तस्य दाहक इत्यर्थः ॥ ११९ ॥

किं चाप्रसिद्धमिदमत्र जगत्त्रयेऽपि

स्वाज्ञानकल्पितमनिर्वचनीयमेकम् ॥
निःशेषतीर्थदृगुदीरिततन्त्रमार्गे
सिद्धे यतः सदसती सकलेऽपि तन्त्रे ॥ १२० ॥

अज्ञानकल्पितमनिर्वचनीयमित्यत्रोक्तं मात्रादेरनिर्वचनीयत्वमुपेत्य ब्रह्मणोऽपि तत्प्रसङ्ग इति दूषितम्, इदानीं तदेवासंप्रतिपन्नमित्याह । किं चाप्रसिद्धमिति । इदंशब्दार्थमाह । स्वाज्ञानेति । एकमेकमपि वस्त्विति शेषः । ननु लोकाप्रसिद्धमपि कस्मिंश्चिच्छास्त्रे वैशेषिकाभिमतविशेषवत्सिद्धं स्यान्नेत्याह । निःशेषेति । तीर्थदृशः शास्त्रार्थविदः, वैशेषिकादिनिखिलशास्त्रार्थविद्भिरुदीरिततन्त्रमार्गे तन्त्र्यत इति तन्त्रं शास्त्रार्थस्तत्प्रतिपत्त्युपाये सकलेऽपि तन्त्रे शास्त्रे सदसती एव सिद्धे यत इति संबन्धः । वैशेषिकादिभिर्हि स्वशास्त्रे सदसद्वस्तुनी एव निरूपिते न तु तदुभयविलक्षणमपि किंचिद्विशेषवस्तु । लोकाप्रसिद्धोऽपि प्रमाणबलात्तैरभ्युपेत इति न तद्वदिदमभ्युपगन्तुमुचितमिति भावः १२०

अज्ञानमप्यसदभावतया प्रसिद्धे-
र्द्वैतप्रसूतिकृदतो न तदभ्युपेयम् ॥
नासत्कदा चिदपि सज्जनने समर्थं
बन्ध्या सुता न खलु पुत्त्रशतं प्रसूते ॥ १२१ ॥

ननु वैशेषिकादिभिरज्ञानानभ्युपगमात्तत्कल्पितमनिर्वचनीयं नाभ्युपेतम्, सिद्धान्ते तु तत्सत्त्वात्कथं त-

त्कृतमनिर्वचनीयं नाभ्युपेयमित्याशङ्क्याज्ञानकल्पितत्वमेव न संभवतीत्याह। अज्ञानमिति। असत्सन्न भवति। तत्र हेतुः। अभावतया प्रसिद्धेरिति। अज्ञानमिति नञा ज्ञानाभावतयाऽज्ञानं प्रतीयते अभावश्च न सन् तत्र सत्ताजातेरभावात्, अभावत्वादिस्वरूपस्यापि दुर्निरूपत्वादित्यर्थः। अज्ञानस्यासत्त्वसमर्थनफलमाह। द्वैतेति। यतोऽसदज्ञानमतो द्वैतस्योत्पत्तिकृत्तदज्ञानं नाभ्युपेयम्। असदपि तत्प्रागभाववत्कथं न द्वैतं जनयेदित्याशङ्क्य तद्दृष्टान्तासंमत्याऽसतोऽकारणत्वं सदृष्टान्तमाह। नासदिति। न हि ज्ञानाभावोऽज्ञानं सतो भावस्य प्रपञ्चस्योपादानं भवितुमर्हतीतिभावः ॥ १२१ ॥

वाक्यप्रसूतमतिरिन्द्रियजन्यधीव-
न्नार्थापरोक्ष्यजननी भवितुं समर्था।
तेनास्तु वाक्यजनितात्मपरोक्षबुद्धि-
र्भ्रान्तिः सदाऽजडतयाऽनुभवेऽपरोक्षे ॥ १२२ ॥

किं चेतोऽपि वेदान्तानां नापरोक्षे ब्रह्मणि प्रामाण्यं संभवतीत्याह। वाक्यप्रसूतेति। किं वेदान्ता ब्रह्मणि अपरोक्षां धियं जनयन्ति किं वा परोक्षां नाद्य इत्याह। इन्द्रियेति। इन्द्रियजन्यज्ञानवद्वाक्यजन्या मतिरर्थापरोक्ष्यस्यार्थाभिव्यक्तेर्जननी भवितुं समर्था न वाक्यजन्यत्वान्नापरोक्षेत्यर्थः। ततो द्वितीयः परिशिष्यत इत्याह। तेनेति। तत्र दोषमाह। भ्रान्तिरिति। तद-

र्थं ब्रह्मात्मानं विशिनष्टि । सदेति । सदाऽपरोक्ष इति संबन्धः । तदर्थमाह । अनुभव इति । अनुभवोऽपि वेद्यत्वेन्न तस्य सदाऽऽपरोक्ष्यं तदर्थमाह । अजडतयेति । तथा च वेदान्तानां तत्राप्रामाण्यमेव स्यादिति भावः ॥ १२२ ॥

नित्यापरोक्षमपि वस्तु परोक्षरूपं
वेदान्तवाक्यमवबोधयति स्वभावात् ॥
प्रामाण्यमत्र कथमस्य वदोपपन्नं
न ह्यन्यदन्यदिति बोधयतः प्रमात्वम् ॥ १२३ ॥

नन्वात्मा चेन्नित्यापरोक्षस्तर्हि घटादाविन्द्रियजन्यज्ञानमिव वेदान्तजन्यमपि तत्रापरोक्षमस्तु मास्तु वेदान्ताप्रामाण्यमिति नेत्याह । नित्यापरोक्षमिति । स्वभावाच्छब्दस्वभावात् । शब्दो हि लोके घटादिगोचरो वेदे चाग्निहोत्रादिगोचरस्तत्र परोक्षज्ञानमेव जनयतीति शब्दस्य परोक्षज्ञानजनकत्वमेव स्वभावो न त्विन्द्रियस्येवापरोक्षज्ञानजनकत्वमिति कथं वेदान्तानामपरोक्षे वस्तुनि परोक्षज्ञानं जनयतामप्रामाण्यं न स्यादित्याह । प्रामाण्यमिति । नन्वपरोक्षं सत्यज्ञानादिस्वभावं ब्रह्म तथैव बोधयन्ति वेदान्ता न विपरीततया तच्च ज्ञानं शब्दस्वभावात् परोक्षमित्येतावन्मात्रमिति कथं प्रामाण्यं न स्यादित्यत आह । न ह्यन्यदिति । वेदान्तजन्यज्ञानस्य परोक्षत्वे तद्विषयब्रह्मापि परोक्षं वाच्यं परो-

क्षार्थविषयस्यैव ज्ञानस्य परोक्षत्वदर्शनात्,एवं च परोक्षं ब्रह्म यत्साक्षादपरोक्षादहं ब्रह्मास्मीति वाक्यमपरोक्षतया प्रतिपादयत्कथं प्रमाणम्, न चापरोक्षज्ञानविषयः परोक्षं ब्रह्मास्ति येन सदर्थतया वाक्यजन्यं परोक्षज्ञानं प्रमाणं भवेदित्यर्थः । अन्यत्परोक्षं ब्रह्म अन्यदिति अपरोक्षमिति बोधयत इत्यर्थः ॥ १२३ ॥

वस्त्वस्तु नित्यमपरोक्षमिदं तु वाक्यं
तद्वस्तु वक्तुमपरोक्षमशक्तमेव ॥
न ह्यस्ति शब्दजनिताऽत्र जगत्त्रयेऽपि
बुद्धिः करोति खलु या विषयापरोक्ष्यम् ॥ १२४ ॥

नन्वग्निहोत्रादिवाक्यस्य परोक्षज्ञानजनकत्वेऽपि शब्दस्य न तत्स्वभावः कल्पनीयः, दशमस्त्वमसीत्यादिवाक्यस्यापरोक्षज्ञानजनकत्वात् , अन्यथा तत्रापरोक्षोऽदशमत्वभ्रमस्ततो न निवर्ततेत्याशङ्क्य दृष्टान्तासंप्रतिपत्त्या दूषयति । वस्त्वस्त्विति । अपरोक्षं यथा स्यात्तथा तद्वस्तु वक्तुमशक्तमित्यर्थः । अदशमत्वादिभ्रमस्य तत्रेन्द्रियजन्यसाक्षात्कारादेव निवृत्तेः शब्दस्य तत्रापि परोक्षज्ञानजनकत्वमेवेति न तत्स्वभावभङ्ग इति भावः ॥ १२४ ॥

अत्राह यद्यपि किमप्युपनेयमत्र
चैतन्यवस्तुनि न संभवति प्रमाणैः ॥
अस्त्येव तत्र भवभीतिनिदानभूत-

मज्ञानमात्रमपनेयमनन्यमाने ॥ १२५ ॥

पूर्वं घटादौ चक्षुरादिप्रमाणस्य स्वप्रकाशस्फुरणाधानवच्चिदात्मनि वेदान्तानां तदसंभवान्न प्रामाण्यसंभव इत्युक्तम् , इदानीं वेदान्तजन्यवृत्त्या तत्र स्फुरणाजननेऽपि न वेदान्तानामानर्थक्यमविद्यानिवृत्तेस्तत्साध्यत्वेन तत्र वेदान्तप्रामाण्यसंभवादिति सिद्धान्तिशङ्कां दूषयितुमनुवदति । अत्राहेति । उपनेयमाधेयं स्फुरणमनन्यमाने स्वप्रकाशे तत्रास्त्येवेति संबन्धः । ज्ञानमज्ञानमात्रं निवर्तयति प्रपञ्चस्तु तन्निवृत्त्या निवर्त्तते , अथ वा प्रपञ्चोऽपि तद्विकारस्तदात्मक एवेति मात्रमित्युक्तम् ॥ १२५ ॥

नैतत्प्रमाणमपनेतृ सतो न ताव-
न्नैतन्नियोजयमसतोऽप्युपघातसिद्ध्यै ॥
नाप्यन्यदस्ति सदसद्यदनेन हेयं
तस्मात् प्रमाणमपनेतृ न कस्य चिद्वः ॥ १२६ ॥

एतद्दूषयति । नैतदिति । त्वदुक्तं नेत्यर्थः । कुतस्तत्राह । प्रमाणमिति । न तावत्प्रमाणं सतोऽज्ञानस्यापनेतृ निवर्तकं सत आत्मवदनिवर्त्यत्वात्, एतत्प्रमाणमसतोऽप्यज्ञानस्योपघातसिद्ध्यै निवृत्तिसिद्ध्यै नियोज्यं योजनीयं न, असतो निवृत्त्यनुपपत्तेः, नाप्येतत्पक्षद्वयादन्यत् सदसदात्मकमज्ञानमस्ति यदनेन प्रमाणेन हेयं स्यात्, विरोधेनैकस्य सदसदात्मकत्वायोगात् । यस्मा-

दज्ञानस्योक्तकल्पत्रयेऽपि निवृत्तिर्न संभवति तस्माद्वो युष्माकं मते प्रमाणं वेदान्तवाक्यं कस्यापि न ज्ञानद्वाराऽपनेत्रिति वेदान्तानर्थक्यं तदवस्थमेवेति भावः ॥ १२६ ॥

मानं न कारकमिति प्रथितं पृथिव्यां
स्याच्चेत्क्रियावदिदमुज्झति मानभावम् ॥
जन्यं न मानफलमित्यपि युष्मदीयाः
संविद्रते न खलु जातु चिदक्षरेऽस्मिन् ॥ १२७ ॥

किं चाविद्यानिवृत्तिरसती चेन्न प्रमाणाज्जायेत, सती चेत्तज्जनकमानस्य कारकतापत्तिः, जडक्रियापर्यवसायिनस्तन्नियमान्न च तदुपपन्नं मानस्य व्यञ्जकतयाऽकारकत्वव्याप्तिविरोधादित्यभिप्रेत्याह । मानं न कारकमिति । एवं तदाकारकस्यामानत्वं व्याप्तिविरोधं चाह । स्याच्चेदिति । कारकमित्यनुषङ्गः । क्रियावदग्निहोत्रादिक्रियावत् । अथ वा क्रियावत् क्रियाजनकं कारकमिति यावत् स्यादिति संबन्धः । इदं मानमुज्झति त्यजेदित्यर्थः । ननु चक्षुरादेः प्रमाणस्य जडज्ञानक्रियाजनकत्वं सर्वसंमतमित्याशङ्क्य तदपि न भवतां संमतमित्याह । जन्यं न मानफलमिति । संविद्रते संजानते अङ्गीकुर्वत इति यावत् । अजडाजन्याभिव्यक्तानुभवस्यैव सर्वप्रमाणफलत्वेन ब्रह्मवादिभिरङ्गीकाराज्जडवृत्तिमात्रनिष्ठं न चक्षुरादिप्रामाण्यमिति भावः । अथ वा यथा मानं न कारकमिति नियममाहुरेवं

जन्यं न मानफलमित्यपि स्वरूपानुभवस्यैव सर्वप्रमाणफलत्वमिच्छन्तो वार्तिककृत्प्रभृतयोऽङ्गीकुर्वते तदप्येवं सति विरुद्धं स्यादित्याह । जन्यं न मानफलमिति । अस्तु तर्हि घटादाविव ब्रह्मण्यभिव्यक्तं चैतन्यं प्रमाणफलमित्याशङ्क्य ब्रह्मणः फलाव्याप्यत्वान्नैतदित्याह । न खल्विति । जातु कदाचिदप्यस्मिन्नक्षरेऽभिव्यक्ता चिन्न खल्विति संबन्धः । वेदान्ताभिव्यक्तचैतन्यस्य निष्प्रपञ्चात्मस्वरूपतया तत्फलत्वासंभवादिति भावः ॥ १२७ ॥

नाद्यापि वेद्म्यहमनिर्वचनीयभाषां
सर्वप्रवादहृदयान्यपि गाहमानः ॥
तात्पर्यतो न च तथाविधमस्ति किं चि-
ल्लोकप्रसिद्धमपि यद्विषयेयमिष्टा ॥ १२८ ॥

नन्वज्ञानस्य सदादिविकल्पेनानिवर्त्यत्वमुक्तमनुपपन्नमनिर्वचनीयत्वात्तस्य ज्ञाननिवर्त्यत्वसंभवात्, न चैवं मानस्य कारकत्वप्रसङ्गोऽपि, अनिर्वाच्यस्य निवृत्तेरधिष्ठानचिन्मात्रतया तत्पर्यवसायिमानस्य व्यञ्जकतयाऽकारकत्वादित्याशङ्क्याह । नाद्यापीति । वैशेषिकादिनिखिलशास्त्राभ्यासानन्तरमपीत्यर्थः । अनिर्वचनीयभाषां सदसद्विलक्षणरूपां ताम् । तर्हि सम्यक् शास्त्रान्तरानभ्यासात्तदज्ञानं नेत्याह । सर्वेति । सर्वशास्त्रतात्पर्याणि गाहमानो विचारयन्नपीति संबन्धः । तात्पर्यतस्त-

द्गतमनसा । ततश्च तदभावादेव तदज्ञानं नान्यनिमित्तं तदिति दर्शयन् लोकेऽपि तदप्रसिद्धिं दर्शयति । न चेति । तथाविधं सदसद्विलक्षणरूपानिर्वचनीयम् । इयमनिर्वचनीयभाषा । लौकिकरजतादिभ्रमस्याप्यन्यथाख्यात्यादिरूपत्वेन लोकेऽपि तदप्रसिद्धिरिति भावः ॥ १२८ ॥

तस्मात् प्रमाणफलमत्र निरूप्यमाणं
ब्रह्मात्मवस्तुनि न संभवतीह किं चित् ॥
कृत्यं विना न च निरूपयितुं प्रमाणं
वेदान्तवाक्यमिह शक्यमनर्थकत्वात् ॥ १२९ ॥

एवं वेदान्तानामुक्तन्यायैर्ब्रह्मणि प्रामाण्यासंभवसमर्थनमुपसंहरति । तस्मादिति । अत्र स्फुरणाविद्यानिवृत्त्योर्मध्ये किंचिदपि निरूपयमाणमिह ब्रह्मात्मवस्तुनि न संभवतीति संबन्धः । चोऽवधारणे, नैव शक्यमिति संबन्धः । एतच्च पारोक्ष्यसद्वयत्वादिकृतविरोधादेरप्युपलक्षणम् ॥ १२९ ॥

कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिं
श्रोतुः प्रवर्त्तकधियं परिकल्प्य बालः ॥
चेष्टावशात् पुनरपि प्रविभज्य भागं
भागस्य वाचकमिति स्वयमेव वेत्ति ॥ १३० ॥

एवं वेदान्तानां मानान्तरविरोधादिभिर्न सिद्धोदासीनप्रत्यगभिन्ने ब्रह्मणि प्रामाण्यमित्युक्तम् , इदा-

नीं सर्वस्य वेदस्य कार्यपरत्वनियमान्न शुद्धे ब्रह्मणि प्रामाण्यम्, लोके शब्दानां कार्यव्युत्पत्तिबलेन वेदस्यापि तदर्थत्वादित्यभिप्रेत्य कार्ये सर्वशब्दशक्तिग्रहं लोके दर्शयति । कार्यान्वयेति । बालो व्युत्पित्सुर्गामानयेत्यभियुक्तवाक्यश्रवणानन्तरं प्रवर्त्तमानस्य श्रोतुर्गवानयनादिचेष्टावशात् प्रवर्तकधियं गवानयनादि कार्यमिति ज्ञानम्, विमता प्रवृत्तिरेतत्कार्यज्ञानपूर्विका एतत्प्रवृत्तित्वाद्यदेवं तदेवं यथा मम स्तनपानादिप्रवृत्तिरिति परिकल्प्य तस्य कारणमालोचयन् गामानयेत्यादिशब्दान्वयव्यतिरेकाभ्यां शब्दजन्यत्वं निश्चित्य तद्गोचरे वस्तुनि कार्ये प्रस्तुतवाक्यसामर्थ्यं स्वयमेव वेत्तीत्यनुषङ्गः । तत्किं वाक्ये प्रयुक्तसर्वपदानामविशिष्टार्थे शक्तिः, तथा सति पर्यायता स्यात्, न, वक्ष्यमाणन्यायेन पृथगर्थत्वादित्याह । पुनरपीति । संमुग्धतया वाक्यसामर्थ्यग्रहणानन्तरं वाक्यभागं पदानि प्रविभज्य तत्तत्पदं भागस्य कार्यान्विततत्तदर्थस्य वाचकमित्यपि वेत्तीत्यर्थः । लोके हि शब्दानां वृद्धव्यवहारानुसारेण सामर्थ्यमवगम्यते, वृद्धव्यवहारश्च प्रवर्तकवाक्याधीनः, अन्यस्मात्प्रवृत्तिहेतुज्ञानासंभवात्, न हि गौस्तिष्ठतीति वाक्यात्कश्चित्प्रवर्तत इति वाक्ये प्रथमं सामर्थ्यं ग्राह्यम्, प्रवर्तकं च तदसद्बुद्ध्वा प्रवर्तते, तच्च स्वस्मिन्कार्यमिति निर्णीतमतस्तज्ज्ञानमेव गामानयेति-

वाक्यश्रवणानन्तरं मध्यमवृद्धस्य गवानयनादिप्रवृत्त्यानुमीयते तच्च तस्य गवानयनादिवाक्यजन्यमिति च, ततस्तद्गोचरे विशिष्टकार्ये तद्वाक्यं समर्थमिति निश्चीयते , प्रवर्त्तकवाक्यस्य तदन्यज्ञानस्य जनकत्वासंभवेन तदशक्तत्वात्, एवं संमुग्धतया पदसमुदायस्य विशिष्टकार्ये सामर्थ्यमवगत्य पश्चाद् गाम्बधान वत्समानयेत्यादौ विभज्य तत्तत्पदप्रयोगे अन्वयव्यतिरेकाभ्यामेव कार्यान्विततत्तदर्थे तत्तत्पदं शक्तमिति वेत्तीति सर्वशब्दानां कार्यमर्थः । न च पर्यायता , कार्यविशेषस्य व्यभिचारेऽपि कार्यसामान्यस्य तदभावेन तदन्वितस्य शब्दार्थत्वोपपत्तेरिति । नन्वेवं कार्यपदस्य कथं शक्तिः,कार्यान्तराभावेन तदन्वितकार्यासंभवात्,नापि गवादौ तच्छक्तिरस्ति , न च कार्यपदं कार्यमात्रे शक्तमिति वाच्यम्,शब्दार्थस्यानेकरूपत्वप्रसङ्गादिति तत्राह। अन्वयेति । कार्यस्य योऽन्वयः संबन्धस्तदन्वयिनि तदाश्रये, कार्यस्य हि सिद्धेनान्वयः सिद्धे कार्ये च वर्तते ऽन्वयस्य द्विनिष्ठत्वादिति न शब्दशक्तिप्रयोजकरूपस्यानेकरूपत्वमिति ॥ १३० ॥

त्यक्तः कार्यान्वितार्थं वदितुमलमयं शब्द इत्येष पक्षो
नोक्तो योग्येतरार्थान्वितमिति तु पुनः पूर्वमप्येष पक्षः॥
किं तु स्यादस्य शक्तिर्निजसहजवशादन्वितार्थाभिधाने
योग्यत्वादेस्तु पश्चात्स्वयमुपनिपतत्यस्य कार्यैदमर्थ्यम्।१३१।

ननु कार्यान्वयान्वयित्वापेक्षयान्वितत्वस्य लघुशरीरत्वात्तत्रैव शक्तिरस्तु, अन्यथा गौरवात्, न चैवमतिलाघवेन तत्तदर्थमात्रे शक्तिरस्त्विति वाच्यम्, अन्वितस्यैव शब्दश्रवणानन्तरं नियमेन प्रतीतेरित्याशङ्क्य पूर्वपक्षी तदनुमोदते। त्यक्त इति। एष पक्ष इत्यनेन संबन्धः। अलं समर्थः। तर्हि किं योग्येतरान्विते शक्तिराश्रिता, तदपि न, अतिगौरवादित्यभिप्रेत्याह। नोक्त इति। अस्माभिरिति शेषः। कस्तर्हि तव शब्दार्थस्तत्राह। किंतु स्यादिति। अस्य शब्दस्य निजसहजवशान्नैसर्गिकस्वभावादन्वितार्थाभिधाने शक्तिरिति संबन्धः। तर्हि सिद्धोऽपि शब्दार्थः स्यादिति नेष्टसिद्धिस्तत्राह। योग्यत्वादेरिति। उपनिपतति आयाति आगच्छेदित्यर्थः। सिद्धपदार्थानां साध्येन कार्येणैवान्वयो न तु सिद्धेन सिद्धसाध्ययोरेवान्वये आकाङ्क्षायोग्यतासंभवादन्वितमात्रे शक्तादपि गवादिपदाद्योग्यतादिमहिम्ना गवादेः कार्यान्वय एव सिद्धेरदिति सर्वस्य शब्दस्य कार्यैदमर्थ्यं कार्यशेषत्वं कार्यप्रतिपादकत्वमिति ॥ १३१ ॥

प्रवृत्त्यभावस्य विरोधि कार्यं
कालत्रयानन्वितमाहुरेके ॥
स्वगोचरस्येप्सितसाधनत्वं
विज्ञापयत् प्रेरकमाहुरन्ये ॥ १३२ ॥

ननु किमिदं कार्यं योग्यतादिबलाद्यदन्वयः पदार्थानामुपनिपतेत्, न, तावद्धात्वर्थः, तस्य स्वर्गासाधनस्य स्वर्गकामिकार्यत्वाऽसंभवेनान्येषां तदैदमर्थ्यायोगात्, नापि नियोगरूपं तत्, लोके तदभावात्, न चोभयसाधारणकृतिसाध्यत्वविशिष्टं तदिति वाच्यम्, स्वर्गघटादेरपि नियोगवत्परम्परया तत्संभवेन तदन्वयस्यापि शब्दार्थत्वप्रसङ्गेन मतान्तरादविशेषादतो लोकवेदयोरनुगशब्दार्थताप्रयोजकं न सिध्येदित्याशङ्क्याह । प्रवृत्तीति । यन्निमित्तं पुरुषस्य कामनादियुक्तस्य नियमेन प्रवृत्त्यभावो न भवेत्तत् । रागादावतिव्याप्तिवारणाय तद्विशिनष्टि । कालत्रयेति । भूतभविष्यद्वर्त्तमानान्यतमकालान्विततयाऽप्रतीयमानम्, स्वरूपेण कार्यस्य भविष्यत्कालान्वयित्वादित्यर्थः । यत्कालत्रयानन्वितं प्रवृत्त्यभावस्य विरोधि तत्कार्यम्, रागादौ घटादिपदात्प्रतीयमानघटादौ चातिव्याप्तिवारणाय दलद्वयम् । एके गुरुमतैकदेशिनः । अन्येषां तन्मतानुसारिणां नियोगकार्यलक्षणमाह । स्वगोचरस्येति । अत्र प्रेरकं कार्यमित्युक्ते रागेऽतिव्याप्तिरत उक्तम् । स्वगोचरस्येत्यादि । तावति विज्ञापयदित्यन्त उक्ते । इष्टसाधनत्वबोधकप्रमाणेऽतिप्रसङ्गः स्यादित्यत उक्तम् । प्रेरकमिति । प्रमाणस्य बोधकत्वादेव न प्रेरकत्वमिति ततो व्यावृत्तिसिद्धिः । इदं तु लक्षणं धात्वर्थकार्यविलक्षणनियो-

गाख्यकार्यविषयम् । स्वगोचरस्येष्टसाधनत्वज्ञापकत्वनिर्देशात् । न च नित्यनियोगेऽव्याप्तिः, तद्विषयस्येप्सितसाधनत्वानङ्गीकारादिति वाच्यम् । तत्रापि नियोगस्यैव कृत्युद्देश्यतयेष्टत्वात्तत्र धात्वर्थस्यापीष्टसाधनत्वोपपत्तेस्तत्रापि लक्षणसंभवादिति द्रष्टव्यम् । एवं च सति कृतिसाध्यत्वादिना येन केनचन विशेषणेन विशिष्टतयेष्टसाधनत्वज्ञानस्य प्रेरकत्वकल्पनेऽपि न कार्यलक्षणं तत्र गच्छति । इष्टसाधनत्वज्ञापकत्वस्येष्टसाधनत्वज्ञानेऽभावादिति भावः । स्वर्गकामो यजेतेत्यादौ लिङादिना लोके कार्यव्युत्पत्त्यनुसारेण कार्यमवगम्यते, तच्च कार्यं धात्वर्थातिरिक्तमेव, काम्यमानस्वर्गसाधनस्यैव तत्कामिकार्यत्वात् यागस्य च तदभावात्, तच्च शब्दात्प्रतीयमानं कार्यं कस्य कुत्रेति नियोज्यविषयावपेक्षते, कृतिसाध्यत्वरूपेण शब्दात्प्रतीयमानस्य किमाश्रयविषयकृतिसाध्यं तदिति कृत्याश्रयविषययोः कृतिनिरूपकतयाऽपेक्षितत्वात्, तत्र स्वर्गकामः कार्यं स्वकृतिसाध्यतयावगच्छतीति नियोज्यः, धात्वर्थश्चाव्यवधानेन कृतिसाध्यः कृत्यवच्छेदद्वारा नियोगमवच्छिनत्ति यागविषयकृतिसाध्यं तदिति प्रतीतेरिति स तद्विषयः, तदुभयविशिष्टं च कार्यं स्वर्गकामो यजेतेति वाक्यार्थः, एवं च कार्यस्य धात्वर्थातिरिक्तस्य स्वतः कार्यत्वासंभवात् स्वस्य कृतिसा-

ध्यत्वनिर्वाहार्थं स्वविषयस्य धात्वर्थस्य कृतिसाध्यत्वमाक्षिपति, तच्च परम्परया काम्यस्वर्गसाधनत्वाभावेऽनुपपन्नम्, न हि कामी कश्चित्तदसाधनं करोतीति तदेव कार्यं धात्वर्थस्येप्सितसाधनत्वमप्याक्षिपत्तत्र पुरुषं प्रेरयतीति तदेत्रैके प्रेरकं कार्यमाहुरित्यर्थः ॥ १३२ ॥

या नान्यमुद्दिश्य कृतिः प्रवृत्ता
तयैव यद्व्याप्यतया प्रतीतम् ॥
तदेव कार्यं कथयन्ति केचिद्
विचक्षणाः कार्यनिरूपणायाम् । १३३ ॥

अनन्योद्दिष्टकृतिसाध्यत्वं कार्यत्वमिति तदभियुक्तसंमतं लक्षणमाह । या नान्यमिति । प्राभाकरा हि इत्थं वदन्ति कार्यमेव कृतिसाध्यस्वभावं पुरुषार्थः न तु स्वर्गादिः स्वतस्तथा तस्य कार्यं प्रत्येव तत्साध्यस्यापि गर्भदासवच्छेषत्वादतः कार्यमुद्दिश्यैव तत्कृतिः प्रवृत्तेति या नान्यमुद्दिश्येत्युक्तम् । व्याप्यतया साध्यतया ॥ १३३ ॥

भूत्वा रागः कारणं पुम्प्रवृत्ते-
र्नैवं कार्यं कार्यरूपं विहाय ॥
रूपेणान्येनेष्यतेऽस्या निमित्तं
भिन्दन्त्येवं रागकार्ये बहुज्ञाः ॥ १३४ ॥

ननु लोके राग एव धात्वर्थगोचरः प्रवर्त्तको दृष्टो न कार्यं तदतिरिक्तं किं चिद् दृष्टमस्तीत्याशङ्क्य तस्य रा

गव्यावर्त्तकं रूपं तावदाह । भूत्वेति । पूर्वक्षणे स्थित्वेत्यर्थः । कार्यरूपं कृत्युद्देश्यस्वरूपमन्येन स्वरूपेण सिद्धस्वरूपेणास्याः पुंप्रवृत्तेः । रागो हि निष्पन्नः सर्वत्र प्रवृत्तौ कारणं न ह्यसिद्धो रागः क्वचित्प्रवर्त्तयति । कार्यं तु विपरीतमसिद्धावस्थस्यैव कृत्युद्देश्यत्वात्तस्यैव च स्वसिद्ध्यर्थं पुंप्रवर्त्तकत्वात्सिद्धस्य कार्यस्य कृत्युद्देश्यत्वायोगेन तदयोगात् । न च लोके रागातिरिक्तं न प्रवर्त्तकं दृष्टमिति वाच्यम्, न तावत्फलरागस्य साक्षाद्धात्वर्थे प्रवर्त्तकत्वं भिन्नविषयत्वात्, धात्वर्थगोचरेच्छायाश्च कृतिसाध्यत्वप्रकारिकायास्तद्गोचरकर्त्तव्यताज्ञानं विनाऽसंभवात्, न च समानाकारज्ञानं विना तदाकारेच्छा भवति तस्य च कर्त्तव्यताज्ञानस्यावलम्बनान्तराभावात् । धात्वर्थ एव तदालम्बनमिति तदेव लोके कार्यमित्यभिप्रेत्याह । भिन्दन्तीति । भेदेनावगच्छन्तीत्यर्थः ॥ १३४ ॥

आवापोद्वापहेतोः पदमिदममुकस्याभिधाने समर्थं
स्वोत्पत्त्यैवेति शक्तिप्रतिनियममिमं पार्श्ववर्ती तटस्थः ॥
जानात्यालोच्य भूयो नयनिपुणमतिर्भागशः कार्ययुक्ते
वस्तुन्येतस्य हेतोरुपनिषदखिला कार्यशेषे प्रमाणम् ॥१३५॥

एवं कार्यान्विते गवादिपदगतशक्तिनिर्वाहाय लौकिकवैदिककार्यस्वरूपं निरूप्येदानीं भागं भागस्य वाचकमिति स्वयमेव वेत्तीति प्रागुक्तं कार्यान्विते तत्तदर्थ-

विशेषे गवादिपदशक्तिनियममुपपादयति । आवापोद्वापहेतोरिति । नयनिपुणमतिः नये निपुणा मतिर्यस्य सः । तटस्थः उदासीनः । पार्श्ववर्ती व्युत्पित्सुः । भूयो बहुश आलोच्यार्थादन्वयमिति सिध्यति । आवापोद्वापहेतोः, इदं गवादिपदममुकस्य गोत्वादेः कार्यान्वितस्याभिधाने कथने स्वोत्पत्त्यैव स्वभावत एव समर्थमिति भागशः प्रतिपदमिमं शक्तिप्रतिनियमं प्रतिपदार्थनियतशक्तिं कार्ययुक्ते वस्तुनि जानातीति संबन्धः । पार्श्ववर्ती व्युत्पित्सुर्हि मध्यमवृद्धस्य प्रवृत्त्या प्रवर्तकं गवाद्यानयनकार्यताज्ञानमनुमाय तत्र गामानयेत्यादिवाक्यस्यान्वयव्यतिरेकाभ्यां कारणत्वमप्यनुमाय तद्वाक्यस्य तस्मिन्प्रवर्त्तके संमुग्धतया शक्तिमवगच्छतीत्युक्तम्, तदनन्तरं गां बधानेत्यादिप्रयोगान्तरे गोपदस्यावापे प्रयोगे तदर्थं प्रागवगतं पश्यन्वत्समानयेति प्रयोगान्तरे तदभावात्तदर्थं चापश्यन्नन्वयव्यतिरेकाभ्यां गोपदं यत्किंचित्कार्यान्वितगोत्वे शक्तं कार्यसामान्यस्याव्यभिचारात् , एवमानयनादिपदमपि यत्किंचित्कारकान्वितानयनादौ, एवं कारकपदान्तरं क्रियापदान्तरमपि तत्तत्पदावापोद्वापहेतोस्तत्तत्कार्यान्वितेऽर्थे शक्तमिति प्रतिपदं शक्तिप्रतिनियमं जानाति, प्राथमिककार्यान्वयान्वितगृहीतसङ्गतिभङ्गप्रसङ्गेन केवले वस्तुनि संगतिग्रहायोगात्सोऽयं न-

यनिपुणमतिरित्यनेनोक्तो नयः, अन्योऽपि प्रवर्तकत्राकयाधीना व्युत्पत्तिः प्रवर्तकं च कार्यज्ञानमित्येवमादिर्नयो भूय अलोच्येतिदर्शितः, ततो न्यायसिद्धा गवादिपदानां कार्यान्विते शक्तिरिति वेदान्तानामपि कार्यशेष एव ब्रह्मणि प्रामाण्यमित्यर्थः ॥ १३५ ॥

आज्ञादिभेदेऽप्यनुवर्त्तमाने
प्रवृत्त्यभावस्य विरोधिमात्रे ॥
लिङादिशब्दस्य स वेत्ति शक्तिं
प्रवर्त्तकाख्याविषयत्वयोग्ये ॥ १३६ ॥

नन्वस्त्वेवं गवादिपदानां शक्तिग्रहः, कार्यपदस्य कथं शक्तिग्रहः, नियोगस्य मानान्तरागोचरतया तत्र लिङादेः शक्तिग्रहायोगात्, न च लिङादिनैवोपस्थिते तस्मिन्शक्तिग्रह इति वाच्यम्, शक्तिग्रहात्पूर्वं लिङादेस्तदुपस्थापकत्वायोगादित्याशङ्क्य प्राभाकराणां मतभेदेन लिङादिसंगतिग्रहप्रकारान्दर्शयति। तत्र तावल्लोके आज्ञादय एव प्रवर्तका वेदे तु स्थायिकार्यं प्रवर्तकम् उभयत्र च प्रवर्तकत्वसामान्यमेकमस्ति तत्र लिङादेः संगतिग्रह इति केचित्तन्मतमाह। आज्ञादीति। उत्कृष्टस्य पुरुषस्य निकृष्टपुरुषप्रेरणा आज्ञा, आदिपदेन याच्ञा निकृष्टस्य उत्कृष्टप्रेरणा समस्य समानुज्ञा च गृह्येते। प्रवर्त्तकशब्दाभिधेयत्वयोग्ये प्रवृत्त्यभावस्य विरोधिमात्रे प्रवर्त्तकत्वसामान्ये। एवं च गोत्वादिसामान्यशक्ताद्ग-

वादिपदात्तद्व्यक्तिरिव लिङादिपदादभिहितप्रवर्त्तकसामान्यापर्यवसानादाज्ञादयो नियोगश्च सिध्यतीति भावः ॥ १३६ ॥

अन्ये वदन्ति निरुपाधिनियोगरूपं
वेदे भवत्यपुरुषप्रभवे स्वतन्त्रम् ।
लोके पुनः पुरुषधीरचितेषु कार्यं
सोपाधिकं तदिति कारणतो वचःसु ॥ १३७ ॥

अन्ये त्वस्ति लोकेऽपि नियोगः स च सोपाधिको वेदे तु स स्वतन्त्र एव तत्रोभयानुगतनियोगत्वसामान्ये लिङादिसंगतिग्रह इत्याहुः, तन्मतमाह । अन्ये इति । वैदिकनियोगस्य निरुपाधित्वे युक्तिमाह । अपुरुषप्रभव इति । अपौरुषेय इत्यर्थः, अतस्तत्राज्ञाद्यसंभवान्न नियोगस्तदुपाधिक इत्यर्थः, अत एव स्वतन्त्रम् लोके तु वैपरीत्यमाह । लोक इति । पुनःशब्दो विशेषद्योती विशेषमेवाह । सोपाधिकमिति । वक्ष्यमाणोपाधियुक्तमिति तत्कार्यं वदन्तीति संबन्धः । तदुपपादनाय कारणत इत्युक्तं तदेव विवृण्वन्वचांसि विशिनष्टि । पुरुषधीरचितेष्विति । पुरुषसंबन्धाल्लौकिकवचसामित्यर्थः ॥ १३७ ॥

आज्ञायाज्ञाद्युपाधिप्रणिपतितवपुः साधनेहानुबद्धं
विज्ञातोपायभावं विषयमनुसरत् पौरुषेयीषु वाक्षु ॥
वेदे कर्तृस्थरागाद्युपधिविरहितं कर्तृशून्ये ततोऽस्मिन्
सर्वत्रैकस्वभावस्थितवपुषि भवेल्लब्धशक्तिर्लिङादिः।१३८।

लोके कोऽयमुपाधिरिति जिज्ञासायामाह । आज्ञायाज्ञादीति । माणवकादि ह्युपाध्यायाद्याज्ञादिनैव गवानयनादौ प्रवर्तते, तथा चाज्ञादिरूपो य उपाधिर्निमित्तं तस्मिन्प्रणिपतितं तेन संबद्धं वपुर्यस्याः फलसाधनेहायाः साऽनुबन्धो यस्य तत्, अथ वा वपुरन्तं साधनेहानुबद्धत्वं च पृथगेव विशेषणम्। तस्य वैदिककार्याद्वैलक्षण्यान्तरमप्याह । विज्ञातोपायभावमिति । नियोगप्रतीतेः प्रागेव यस्य हितोपायत्वमवगतं तं विषयं धात्वर्थमनुसरद्धात्वर्थो यत्फलसाधनत्वेन प्रागवगतस्तदनुसरत्तदनुकूलं न तु धात्वर्थस्य तदधीनं फलसाधनत्वमित्यर्थः , कार्यमिति पूर्वश्लोकादनुषञ्जनीयम् , भवतीति च शेषः । पौरुषेयीषु वाक्षु आज्ञायाज्ञेत्यादेः संबन्धः । वेदे निरुपाधिनियोगरूपमित्युक्तमुपपादयति । कर्तृस्थरागादीति। वेदे कर्तुराज्ञाद्युपाधिरहितमित्यर्थः । कुत इत्यत आह। कर्त्तृशून्य इति। अपौरुषेये वेदे कर्तुरभावात्तदाज्ञादिकमपि नास्ति यस्मात्तत्र तन्निरुपाधिकमित्यर्थः । नन्वेवं लोकवेदयोर्नियोगवैलक्षण्ये कथं लिङाद्यर्थत्वं तत्राह । ततोऽस्मिन्सर्वत्रेति । लोकवेदयोरेकस्वभावतया नियोगत्वरूपेण स्थितवपुषि तस्मिन्नियोयोगे नियोगत्व इति यावत् । लिङादिर्लब्धशक्तिर्भवेदिति तदैकार्थ्यं युक्तमेवेति भावः ॥ १३८ ॥

अन्ये भिन्नस्वभावं विविधमभिदधत्यानुरूप्येण कार्यं

लोके धात्वर्थरूपं श्रुतिवचसि पुनस्तन्नियोगाख्यमेव ॥
संमुग्धे तत्र शक्तिं शिशुरयमवगम्यादितो न्यायचक्षुः
पश्चाद्वेदैकवेद्यं वदति लिङिति च प्रेक्षते निश्चयेन ॥१३९॥

अभिनवगुरुमतमाह । अन्य इति । विविधमित्यस्य विवरणं भिन्नस्वभावमिति । आनुरूप्येण योग्यतामहिम्ना । वैविध्यमेवाह । लोक इति । संमुग्धे धात्वर्थनियोगस्वरूपेणाविवक्षितविशेषे । तत्र कार्यमात्रे । आदितः प्रथमतः । न्यायचक्षुः वक्ष्यमाणन्यायज्ञः ॥ १३९ ॥

धात्वर्थाख्यानशक्तो यदि भवति गुणाद्वर्त्तितुं वैदिकेऽयं
संबन्धाज्ञानहेतोरनलमथ पुनर्वैदिके शक्तिमान्स्यात् ॥
तत्संबन्धात्क्रियामप्यभिवदितुमलं लक्षणावृत्तितोऽयं
लिङ्शब्दस्तेन कार्ये श्रुतिवचनगते शक्त इत्यध्यवस्येत् ॥ १४० ॥

तमेव न्यायं दर्शयति । धात्वर्थेति । लोके हि प्रवर्त्तकत्वात्कार्ये प्रथमं लिङादेः संगतिग्रहः, कार्यं च लोकवेदयोर्विलक्षणम्, न च लिङादेरनेकार्थत्वं न्याय्यम्, न च कार्यत्वसामान्यं लिङर्थ इति नोक्तदोषस्तदपर्यवसानाच्च कार्यप्रतीतिर्गवादिपदाद्गवादेरिवोभयत्रापि भविष्यतीति वाच्यम्, वैदिकस्यापि कार्यस्य गवादिव्यक्तेरिवाशब्दार्थत्वापत्तेर्मानान्तरेणाभिधेयसामान्यसंबन्धितयावगतस्यैव गवादेरिवापर्यवसानलभ्यत्वाच्च, तस्मादेकत्र लिङ् लाक्षणिक इति कुत्र लक्षणा कुत्र शक्ति-

रिति विचारणीयम्, यदि धात्वर्थे लिङादिपदं शक्तं तदा गुणाल्लक्षणया वैदिके कार्येऽयं लिङादिर्वर्त्तितुमनलमसमर्थः कुतः संबन्धाज्ञानहेतोः, वाच्यार्थसंबन्धितया मानान्तरावगते तीरादौ गङ्गादिपदस्य लक्षणा दृष्टा न च धात्वर्थसंबन्धितया वैदिकं कार्यं मानान्तरेणावगतम्, अपूर्वरूपस्य तस्य तदयोग्यत्वात्, अतः संबन्धाज्ञानात्तस्मिन्न लिङादिपदस्य लक्षणेत्यर्थः। अथ यदि शक्तिमान्स्यादयमित्यनुषङ्गः। तत्संबन्धान्मुख्यार्थनियोगसंबन्धात्। क्रियां धात्वर्थम्। यदि लिङादिना वैदिकं कार्यमभिधीयेत तदा विषयभूतधात्वर्थसंबन्धितयैव लिङादिनाभिधानाद्वाच्यार्थसंबन्धितया ज्ञाते धात्वर्थे लक्षणा युक्ता। यद्यपि लौकिकी क्रिया न तत्संबन्धितयावगता, तथापि तत्संबन्धिधात्वर्थजातीयेति तत्रैव लक्षणा। वैदिककार्ये तु लोके संगतिग्रहणकालेऽनवगतेऽपि कामिनियोज्यसमभिव्याहाराद्वगते शक्तिरेवोचितेत्याशयेनाह। तेनेति ॥ १४० ॥

एवं शब्दान्तराणां नयनिपुणमतिः शक्तिवित्स क्रमेण
प्रक्षेपोद्धारदर्शी भवति कतिपयैर्वासरैस्तत्र तत्र ॥
तस्मात्कार्यान्वितार्थे सकलमपि पदं शक्तिमद्बुध्यमानो
भूताद्यर्थप्रतीतिं प्रति विमुखमनाश्शास्त्रतस्स्यान्मनुष्यः ॥ १४१ ॥

ननु लिङादिपदसमभिव्याहारमन्तरेणापि प्रभिन्नक-

मलोदरे मधूनि मधुकरः पिबतीत्यादौ प्रसिद्धपदसमभिव्याहारेण मधुकरादिपदानां शक्तिर्गृह्यते तत्र कुतः सर्वपदानां कार्यान्विते शक्तिरित्यत आह । एवमिति। शब्दान्तराणां भ्रमरादिशब्दानां शक्तिविद्भवतीति संबन्धः । स व्युत्पित्सुः । तत्रापि हि प्रवर्त्तकवाक्यात्कार्यान्विते गृहीतसंगतिकपदप्रयोगादेव भ्रमरादिपदानां शक्तिग्रह इत्युपजीव्यकार्यव्युत्पत्त्यनुरोधेनाध्याहृतकार्यान्वित एव तदर्थ इति जानातीति नास्ति क्वचिद्व्यभिचार इत्यर्थः । तदिदमुक्तं नयनिपुणेति । प्रक्षेपोद्धारदर्शी । भ्रमरादिपदप्रयोगस्य तत्र तदितरपदाप्रयोगस्य च दर्शीत्यर्थः । तत्रतत्र । कार्यान्वित इति शेषः । फलितमाह । तस्मादिति । भूताद्यर्थेति । भूतमतीतमादिपदाद्वर्तमानभविष्यतोर्ग्रहणम् शास्त्रतो भूताद्यर्थप्रतीतिं प्रतीति संबन्धः ॥ १४१ ॥

वाक्याद्भूतार्थनिष्ठाद्भवति न तु नृणां शब्दशक्तिप्रतीति-
र्लिङ्गं श्रोतृस्थबुद्धेर्न हि किमपि भवेदत्र बालोपलभ्यम् ॥
न ह्येतत्पुत्रजन्माद्यवगतिनियतं नित्यवन्निश्चितं नो
यद्वक्त्रादिप्रसादक्षितितललुठनादीक्ष्यते श्रोतृदेहे ॥१४२॥

ननु न प्रवर्तकवाक्याधीनः प्राथमिकसंगतिग्रहो येनैवं स्यात्किं तु पुत्रस्ते जात इत्यादिवाक्यादेरपि प्रथमं संगतिसंवेदनं स्यात्तच्छ्रवणानन्तरं पितुर्मुखप्रसादादिलिङ्गेन पार्श्वस्थश्रोतरि तद्वाक्यार्थज्ञानोन्नयनसंभ-

वात्तत्र वाक्यस्यान्वयव्यतिरेकाभ्यां कारणत्वावगमसंभवाच्चान्वित एव पदानां शक्तिरस्तु, नापि योग्यतादिमहिम्नान्विते गृहीतसंबन्धानां कार्यैदमर्थ्यमिति तत्राह । वाक्यादिति । भूतार्थनिष्ठाद्वाक्यान्नृणां शब्दशक्तिप्रतीतिर्नैव संभवति कुतो नियतलिङ्गाभावेन तदर्थज्ञानानुमानासंभवादित्याह । लिङ्गमिति । अत्र श्रोतरि लोके वा । ननूक्तं पितुर्मुखप्रसादादिलिङ्गमिति तत्राह । न ह्येतदिति । एतच्छब्दार्थमाह । यद्वक्त्रादीति । क्षितितललुठनादि शोककार्यं तच्च पुत्रस्ते मृत इत्यादिवाक्यार्थज्ञाने लिङ्गमितिवदन्तं प्रत्युक्तम् । मुखप्रसादादेर्भार्यासुखप्रसवधनप्राप्तितद्वियोगादिज्ञानादपि संभवेन पुत्रजन्माद्यवगतिनैयत्याभावेन ततस्तदनुमानासंभवान्न सिद्धान्वितः शब्दार्थ इति भावः ॥ १४२ ॥

तस्मादाध्वं निराशाः श्रुतिशिरसि न तस्यास्ति निष्पन्नरूपे
प्रामाण्यं कार्यशून्ये कथमपि च परब्रह्मणि स्वप्रधाने ॥
भूतं भव्यप्रधानं भवति हि न पुनः स्वप्रधानं कदाचिच्छास्त्रस्थाः शब्दशक्तिस्थितिनिपुणधियो विस्तरादेवमाहुः ॥ १४३ ॥

तस्माल्लोके सर्वपदानां कार्यान्वित एव संगतिग्रह इति वेदेऽपि तेषां स एवार्थो न्याय्यो लोकवेदयोः पदतदर्थभेदाभावात्, एवं च वेदान्तानामपि कार्यान्विते

ब्रह्मण्येव प्रामाण्यं वक्तव्यमिति न कार्यशून्ये स्वप्रधाने परब्रह्मणि कथमपि प्रामाण्यं संभवतीत्याह । तस्मादिति । श्रुतिशिरसि निराशा आध्वं भवतेति संबन्धः । किं च तद्भूतानां क्रियार्थेन समाम्नायः, भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति जैमिनिशबरस्वामिनोर्मतं तौ च वेदार्थनिर्णयेऽधिकृताविति तदुक्तमेव गृहीतुमुचितमित्यभिप्रेत्याह । भूतमिति । सिद्धमित्यर्थः । भव्यं साध्यं प्रधानं यस्य भव्यशेषमित्यर्थः । स्वप्रधानं भव्यानन्वयि सच्छास्त्राप्रतिपाद्यमित्यर्थः । शास्त्रस्था जैमिन्यादय एवमाहुः । एवमित्येतद्विवृतं भूतं भव्येत्यादिना । शब्दशक्तीति । वैदिकशब्दशक्तिव्यवस्थायां निपुणधियोऽबाधितमतय इति यावत् ॥ १४३ ॥

तस्मादसंगतमिदं प्रतिभाति यन्मे
वाक्यप्रमाणकमुदीरितमद्वयत्वम् ॥
इत्येवमेष मम बुद्धिपथं विरोधः
प्राप्तः प्रभो परिहरैनमनुगृहाय ॥ १४४ ॥

एवं वर्णितन्यायबलाज्जैमिन्यादिवचनबलाच्च कार्यान्विते श्रुतितात्पर्यमित्यद्वयस्वप्रधानस्य ब्रह्मणो वाक्यप्रमाणकत्वं भवदुक्तमसंगतमिति पूर्वपक्षमुपसंहरति । तस्मादसंगतमिति । इदंशब्दार्थमाह । यद्वाक्यप्रमाणकमिति । एवंविधपूर्वपक्षकरणेन स्वस्मिन्गुरूणां

व्युत्थितत्वभ्रममपनयन्प्रार्थयते। इत्येवमिति। इति यत एवमुक्तप्रकारैर्विरोधो वेदान्तानां ब्रह्मणि प्रामाण्यासंभवो मम बुद्धिपथं प्राप्तोऽतो ममैव बुद्धिदोषादसंगतमिवभवदुक्तं वाक्यप्रमाणकमद्वयं प्रतिभाति न तु भवताऽसंगतमुक्तमित्यर्थः। प्रभो इति तत्परिहारे गुरोरनायासं द्योतयति। एनं विरोधम् ॥ १४४ ॥

सत्यं यदाह गुरुमान् यदि वाक्यगम्यं
संसर्गरूपमिह वेदशिरःस्वभीष्टम् ॥
अस्त्येव तत्र पदयोरुभयोर्विरोधः
पारोक्ष्यसद्वयविरोधकृतस्तदानीम् ॥ १४५ ॥

एवं प्रत्यगभिन्नेऽद्वये स्वप्रधाने ब्रह्मणि वेदान्तप्रामाण्याऽसंभवे चोदिते, किं जीवब्रह्मणोस्तत्त्वंपदवाच्ययोरभेदो न संभवतीति चोदयसि, उत तदुभयलक्ष्ययोः,तत्राद्यमङ्गीकरोति। सत्यमिति। यदाह। भवानिति शेषः। गुरुमान् शिक्षितमतिः। अन्यस्य सूक्ष्मेऽर्थे एवंविधाक्षेपायोगात्। संसर्गरूपं मुख्यार्थयोस्तादात्म्यमङ्गीकृतमेव दर्शयति। अस्त्येवेति। तत्र वाच्यार्थाभेदे ॥ १४५ ॥

यत् कर्मकाण्डनिपुणैरुदितं पुरस्ताद्
वाक्यार्थलक्षणमदः पुनरत्र नेष्टम् ॥
भेदादिवर्जितमखण्डमुशन्ति यस्मा-
च्छ्रीबादरायणमतानुगता महान्तः ॥ १४६ ॥

ननु संसर्गो वा विशिष्टो वा वाक्यार्थ इति विद्वद्भिरङ्गीकृतमिति वेदान्तवाक्यस्यापि तदन्यतरोऽर्थः स्वीकर्तव्यः, तत्र चेत्पदतदर्थयोर्विरोधोऽङ्गीकृतस्तर्हि कथं तद्वाक्यार्थः सिद्धेयदित्याशङ्क्य वेदान्तव्यतिरिक्तानामेवार्थस्तथाभ्युपेयो न तु वेदान्तानां वेदमात्रस्य वाऽतस्तद्विरोधोऽत्र न दोषायेत्याह । यत्कर्मकाण्डनिपुणैरिति । यद्वाक्यार्थलक्षणमिति संबन्धः । पुरस्तात्पूर्वतन्त्रे । अदस्तल्लक्षणम् । अत्र वेदान्ते । वाक्यविशेषार्थलक्षणं वाक्यविशेषार्थे नाङ्गीकृतं चेन्न कापि क्षतिरिति भावः । ननु वाक्यार्थसामान्यलक्षणमेव तदस्तु, अन्यस्य सामान्यलक्षणस्यासम्भवादन्यथा वेदान्तवाक्यविशेषस्य कीदृशोऽर्थः स्यादिति लक्षणान्तरासंभवं मन्वानं प्रत्याह । भेदादीति। भेदः संसर्गः। आदिपदाद्विशिष्टग्रहणम्। अखण्डमपर्यायानेकपदप्रतिपाद्यमसंसृष्टमेकप्रातिपदिकार्थमात्रं वा उशन्ति कमनीयतया कथयन्ति यस्माद्भेदादीति संबन्धः। श्रीबादरायणमतानुगता इति। भगवद्बादरायणः खलु तत्तु समन्वयादिति सूत्रेणाखण्डैकरसे ब्रह्मणि वेदान्तप्रामाण्यं न्यरूपयत्। अतस्तन्मतानुसारिणः शङ्करभगवत्पादास्तच्छिष्याश्च तथैवोशन्तीति न वेदान्तवाक्यार्थलक्षणान्तरासंभवः। बादरायणमतानुगतानां महत्त्वं पक्षपातराहित्येन श्रुत्यर्थविचारकौशल्यम्। नापि समान्यलक्षणासंभवो वाक्यप्रति-

पाद्यत्वस्यैव हि तत्सामान्यलक्षणत्वं न संसर्गत्वादिरूपस्याननुगमादिति भावः ॥ १४६ ॥

भेदादिरूपमवबोधयितुं समर्थं
यद्वाक्यमस्ति तदखण्डविलक्षणार्थम् ॥
तल्लौकिकं भवतु वैदिकमेव वास्तु
नास्माकमत्र विषये विमतिः कदाचित् ॥ १४७ ॥

ननु उक्तवाक्यार्थलक्षणावान्तरभेदव्यवस्थायां किं मानमित्याशङ्क्य तत्तद्वाक्यार्थे तस्य तस्य वाक्यस्य तात्पर्यग्राहकमानमेव तत्र प्रमाणमिति श्लोकद्वयेनाह, तत्र प्रथमं यत्कर्मकाण्डनिपुणैरित्यनेन भेदादिवाक्यार्थस्योक्तं लक्षणं स्वीकरोति । भेदादीति । लौकिकं गामानयेत्यादि वैदिकमग्निहोत्रं जुहोतीत्यादि च, अत्रोक्तविषये भेदादिरूपे वाक्यार्थे नाऽस्माकं कदाचिदपि विमतिरस्ति, न हि व्यसनितयाऽखण्डार्थत्वं वयमिच्छाम इति भावः ॥ १४७ ॥

यद्वाक्यजातमथ वेदशिरोनिविष्टं
यद्वापि लौकिकमखण्डमपास्य नान्यत् ॥
शक्नोति वस्तु वदितुं तदशेषमेव
ब्रूयादखण्डमिति तु प्रतिपादयामः ॥ १४८ ॥

इदानीं भेदादिवर्जितमित्यनेन कथितं वेदान्तवाक्यार्थस्वरूपं सोपपत्तिकमुच्यत इत्याह । यद्वाक्येति । अथेति पक्षान्तरोपक्रमार्थः । वेदशिरोनिविष्टं सत्यं ज्ञा-

नमनन्तं ब्रह्म तत्त्वमसीत्यादिवेदान्तवाक्यं लौकिकं प्रकृष्टप्रकाशश्चन्द्रः सोऽयमित्यादिवाक्यमन्यद्वस्तु वदितुं न शक्नोति तदशेषमखण्डमेव ब्रूयादित्यनन्तरमेवोपपादयिष्यत इत्यर्थः ॥ १४८ ॥

सोऽयं पुमानिति हि मुख्यपदार्थयुक्त-
वाक्यार्थबुद्धिजननस्य न वाक्यमेतत् ॥
ईशीत वाच्यशबलस्थपदद्वयेन
संसृष्टबुद्धिजनने पदयोर्विरोधात् ॥ १४९ ॥

ब्रह्मणि वेदान्तवाक्यं द्विविधम्, एकमहंकारादिसाक्षिणः प्रत्यक्चैतन्यस्य निरतिशयानन्दाद्वयनित्यमुक्तब्रह्माभेदपरम्, यथा तत्त्वमसीत्यादि, एतच्च परमपुरुषार्थप्रत्यग्ब्रह्मैक्यनिष्ठत्वान्महावाक्यम्, अपरं तत्त्वंपदार्थस्वरूपपरम्, यथा विज्ञानमानन्दं ब्रह्म योऽयं विज्ञानमयः प्राणेष्वित्यादि, एतच्च पदार्थनिष्ठत्वादवान्तरवाक्यम्, तत्र महावाक्यस्याखण्डार्थत्वे लोके सोऽयमिति वाक्यमुदाहरणम्, इतरस्य प्रकृष्टप्रकाशश्चन्द्र इति, तत्र सोऽयमिति वाक्यस्याखण्डार्थत्वं प्रमाणाभावान्नास्तीत्याशङ्क्याह । सोऽयमिति । मुख्यपदार्थेति । तदिदंशब्दयोर्यौ मुख्यार्थौ तदेतद्देशकालवैशिष्ट्यरूपतत्तेदन्ताविशिष्टौ तद्युक्तस्तन्निरूपितो यो वाक्यार्थोऽभेदस्तद्बुद्धिजननस्यैतत्सोऽयमिति वाक्यं नेशीतेति संबन्धः । सोऽयमिति हि वाक्यं समानाधिकरणवाक्यत्वादेकार्थनिष्ठं

वाच्यम्, तत्र यदि मुख्यपदार्थयोरैक्यं तदा तदेतद्देशकालविशिष्टद्वयस्य विरोधेनाभेदासंभवादितीदं वाक्यं तत्प्रतिपादयितुमसमर्थमिति भावः। ननु देवदत्तस्तत्तेदन्ताभ्यामुक्तरूपाभ्यां संसृष्टः, देवदत्ते तत्तेदन्ते इति वा वाक्यार्थोऽस्तु न विरोध इति तत्राह। वाच्यशबलेति। वाच्यं यच्छबलं विशिष्टं तन्निष्ठपदद्वयेनेत्यर्थः। सः अयमिति पदाभ्यां तत्तेदन्तयोः पुरुषविशेषणतयोपस्थितयोः स्वातन्त्र्यासंभवेन पुरुषे च प्रथमान्तपदेनोपस्थिते सप्तम्यर्थासम्भवेन चोक्तप्रकारद्वयासंभवः। किं च देवदत्ते तत्तेदन्ते इति ज्ञानेन न भेदभ्रमनिवृत्तिः संभवति, इदं च वाक्यं तदर्थमेव वृद्धैः प्रयुज्यते, देवदत्तभेदेऽपि तत्संभवात्। न चैकस्मिन्देवदत्ते तत्तेदन्ते इति ज्ञानाद्भेदभ्रमनिवृत्तिसंभव इति वाच्यम्। समानाधिकृतपदद्वयव्यतिरेकेण तदेकत्वे प्रमाणाभावात्, तस्मादर्थान्तरासम्भवाद् वाच्यशबलस्थपदद्वयेन संसृष्टबुद्धिजननमेव वाच्यं तच्च न संभवति पदयोर्विरुद्धार्थत्वादित्यर्थः॥ १४९ ॥

एतद्धि सोऽयमिति वाक्यमखण्डनिष्ठं
वक्तव्यमत्र गतिरस्ति न काचिदन्या॥
तद्देशकालमनुकृष्य स इत्यनेन
नायंपदार्थमुपढौकयते हि नैतत्॥ १५०॥

अस्तु तर्ह्येकस्मिन्नेव पदे लक्षणा तथा च न विरो-

घः प्रतियोग्यन्तराभावात्, नाप्यखण्डार्थता देवदत्ते एकस्य विशिष्टस्यानेन तादात्म्यप्रतिपादनादित्याशङ्क्याह। एतद्धीति। अखण्डनिष्ठं पदद्वयलक्षणयेति शेषः। अत्र,अस्मिन्वाक्ये। गतिः, त्वदुक्तप्रकारावगतिः। कुत इति चेत्तत्राह। तद्देशकालमिति। स इत्यनेन स इति पदेन तद्देशकालविशिष्टमनुकृष्यादायायंपदार्थम्, अयमिति पदस्य लक्षितमर्थं नोपढौकयते प्रापयितुं न शक्नोतीत्यर्थः। सोऽयमिति। वाक्यमिति शेषः। हीति दृष्टान्तार्थम्। यथा तत्पदं स्ववाच्यमिदंपदलक्ष्यं न प्रापयति,एवमेतत्पदमपि स्ववाच्यं नोपढौकयते, तत्पदलक्ष्यमितिशेषः। एकपदलक्षितस्वरूपस्य पदान्तरवाच्यादभेदनिष्ठत्वे वाक्यस्य यावद्देवदत्तस्वरूपं तत्तद्विशिष्टमेव स्यात्, अन्यथा वर्तमानसमयस्थदेवदत्ते तद्भेदसंशयादिनिवर्त्तकतास्य वाक्यस्य न स्यान्निवर्त्तते चास्माद्वाक्यात्तत्संशयादिरिति पदद्वयलक्षणया तदेतद्देशकालद्वयवृत्तिदेवदत्ताभेदपरमितीदं वाक्यमखण्डार्थनिष्ठमेव। न चैवं तत्स्वरूपस्यैकैकपदादपि प्रतीतेरेकपदार्थज्ञानादपि तन्निवृत्तिप्रसङ्गः, वक्तव्यं वा पदार्थस्वरूपादधिकं वाक्यप्रमेयमन्यथा वाक्यादपि तदयोगादिति वाच्यम्। पदद्वयलक्ष्यवाक्यार्थयोरन्यूनानतिरिक्तत्वेऽपि वाक्यात्तदेतद्देशकालपरामर्शपूर्वमखण्डदेवदत्तस्वरूपाऽभेदप्रतिपादने भवति तज्ज्ञानं

निश्चयरूपमतस्ततः संशयादिनिवृत्तिरुपपद्यते नैवमेकैकपदलक्ष्यज्ञानमिति न ततः संशयनिवृत्तिः, एवं च सोऽयमित्यादेरर्थान्तरासंभवादबाधाच्चाखण्डार्थतैवेति भावः ॥ १५० ॥

एवं सतीदमपि तत्त्वमसीति वाक्य-
माश्रित्य लाक्षणिकवृत्तिमखण्डनिष्ठम् ।
सोऽयं पुमानिति यथा वचनं तथास्तु
नो चेत्समं हि तदलाबुनिमज्जनोक्त्या ॥ १५१ ॥

दार्ष्टान्तिकेऽपि तदाह । एवं सतीति । लोके पदद्वयलक्षणया सोऽयमितिवाक्यस्याखण्डर्थत्वे सतीत्यर्थः । तथा च नास्माकमलौकिककल्पनेति भावः । लाक्षणिकवृत्तिं पदद्वयेऽपीति शेषः । तत्त्वमसीति वाक्यमखण्डार्थनिष्ठम् अकार्यकारणद्रव्यमात्रविषयसमानाधिकरणवाक्यत्वात् यथा सोऽयं पुमानिति वचनमित्याशयेन दृष्टान्तमाह । सोऽयं पुमानिति । तथेदं तत्त्वमसीति वाक्यमखण्डार्थनिष्ठमस्त्विति संबन्धः । पदद्वयलक्षणयाऽखण्डार्थत्वानङ्गीकारे पूर्वपक्षदशायामुक्तवाक्याप्रामाण्यमाह । नो चेदिति । अतिशुष्कमच्छिद्रं केवलमलाबु अप्सु निमज्जतीतिवचनं यथाऽप्रमाणं तथेदमपि स्यादित्यर्थः । तत्त्वमसीतिवाक्यस्यापि वक्ष्यमाणविरोधेन संसर्गादिवाक्यार्थासंभवेन पदद्वयलक्षणयाऽखण्डार्थतैवोचितेति भावः । एतेन सिद्धान्तोपक्रमे

उत तदुभयलक्ष्ययोरिति द्वितीयकल्पे विरोधबीजाभावात्तच्चोद्यमनुपपन्नमित्युक्तमिति द्रष्टव्यम् ॥ १५१ ॥

मानान्तराधिगतगोचरगामिनी स्या-
च्छब्दस्य लाक्षणिकवृत्तिरिति प्रलापः ।
सिद्धत्वमात्रमिह लाक्षणिकप्रवृत्ते-
र्निर्वाहकारणमनङ्गमतोऽन्यदस्याः ॥ १५२ ॥

यत्तु पूर्वपक्षावसरे वाच्यार्थसम्बन्धितया मानान्तराधिगतिर्लक्षणाबीजमिति तथानवगते ब्रह्मणि न लक्षणा स्यादित्युक्तं तदनूद्य दूषयति । मानान्तरेति । अधिगतेति भावे निष्ठा, अधिगतिरित्यर्थः । प्रलापोऽसदभिलापः । ननु लाक्षणिकपदस्य लक्ष्येण साक्षात्संबन्धानवगमात्स्वार्थप्रनाड्यैव तदुपस्थापकत्वं वाच्यं तच्च मानान्तरेण तथावगमं विना नेति कथमयं प्रलाप इति चेत् । सत्यं मानान्तरं विनापि तदर्थसंबन्धितयावगममात्रेण सा सिध्यति स चावगमस्त्वमहमादिपदलक्ष्येऽहंकारादिसाक्षिणि स्वप्रकाशे तद्बलात्सिध्यति ब्रह्मादिपदलक्ष्यं चाद्वयं ब्रह्मादिपदवाच्यं शबलं वस्तुतः स्वसंसर्गशून्ये चैतन्ये कल्पितं शबलत्वादध्यस्तत्वाद्वा शबलान्तरवद्रजतादिवदिति तर्केण तत्संबन्धितया सिध्यतीति न मानान्तरापेक्षेत्याह । सिद्धत्वेति । ज्ञाततत्वमात्रमित्यर्थः । इह लक्ष्ये ॥ १५२ ॥

मानान्तराधिगतता हि न लक्षणायां

किंचित्करी भवति पिङ्गलतावदग्नेः ॥
धूमस्य जन्मनि हि पिङ्गलता न हेतु-
र्यद्यप्यवस्थितवती हुतभुक्शरीरे ॥ १५३ ॥

ननु तीरादेर्गङ्गादिपदलक्ष्यस्य मानान्तरेण तथाधिगतिर्नियमेन दृष्टा तत्कथं सा तत्राप्रयोजिकेति चेत्तत्राह । मानान्तराधिगततेति । हीतिद्वयं प्रसिद्धौ, किंचित्करी निमित्तं न भवतीति संबन्धः । नियमेन तत्र विद्यमानस्यापि गौरवेणाप्रयोजकत्वे दृष्टान्तमाह । पिङ्गलतावदिति । अग्ने रूपमिव किंचित्करी न भवतीति संबन्धः । दृष्टान्तं विवृणोति । धूमस्येति । न हेतुर्हीति संबन्धः । अग्नित्वमेव हि धूमजनकतायामग्नेः प्रयोजकं न तु पिङ्गलाग्नित्वमपि गौरवादिति भावः । शुक्तिरजतादेरपि इदमित्यादिपदान्तरेण लक्ष्यत्वसंभवान्मानान्तरेण तस्यावगत्यभावान्न मानान्तरगम्यत्वं तत्प्रयोजकमिति भावः ॥ १५३ ॥

शब्दस्य लाक्षणिकवृत्तिरपि त्रिधैषा
काचिज्जहाति न जहाति च वाच्यमन्या ॥
भागं जहाति न जहाति च भागमन्या
सोऽयं त्रिधा भवति लाक्षणिकप्रकारः ॥ १५४ ॥

ननु ब्रह्मादिशब्दानामन्यत्र संगत्यसंभवात्तत्रैव शक्तिः कल्पनीया, एवं च कथं तत्रैव तेषां लक्षणा, तच्छक्तपदलक्षितार्थोपादाने चेदमपि शास्त्रमनात्म-

निष्ठं स्यादित्याशङ्कां परिहर्तुं लक्षणात्रैविध्यमाह । अथ वा लोके लक्षणानेकविधा तत्र कासौ लक्षणा तत्त्वमसिवाक्ये संमतेत्याशङ्क्य तां विवेक्तुं लोके प्रसिद्धं लक्षणाभेदं मत्वाह । शब्दस्येति । एषा लाक्षणिकवृत्तिरिति संबन्धः । त्रैविध्यमेवाह । का चिदित्यादिना । का चिद्वाच्यं जहाति जहल्लक्षणेत्यर्थः । अन्या वाच्यं न जहाति अजहल्लक्षणेत्यर्थः । अन्या भागं वाच्यार्थांशं जहाति अन्यं भागं न जहाति च जहदजहल्लक्षणेत्यर्थः । तत्त्रैविध्यमुपसंहरति । सोऽयमिति ॥ १५४ ॥

गङ्गापदं हि निजमर्थमपास्य तीरे
यद्वर्त्तते भवति सा जहती प्रसिद्धा ॥
शोणः स्थितो बहिरितीहतु लक्षणा या-
मादाय शोणिमगुणं तुरगे प्रवृत्तिः ॥ १५५ ॥

लोके क्रमेण तासामुदाहरणमाह । गङ्गापदमितिद्वयेन । निजमर्थं स्ववाच्यप्रवाहमपास्य त्यक्त्वा यद्यस्माच्छोणः शोणिमगुणोऽश्वत्वनियतः ॥ १५५ ॥

सोऽयं पुमानितिवचस्युभयप्रकारा
देशादिभागपरिवर्जनतः प्रसिद्धा ॥
पुंसश्च केवलमुपात्ततया पदाभ्या-
मेवं त्रिधा भवति लाक्षणिकी प्रवृत्तिः ॥ १५६ ॥

सोऽयमिति । उभयप्रकारा जहदजहद्रूपा । तदे-

वोपपादयति । देशादीति । तदेतद्देशकालवैशिष्ट्यरूपभागवर्जनात्केवलं यथा स्यात्तथा तदिदंपदाभ्यां पुंस उपात्ततया चेत्यर्थः । उपसंहरति । एवं त्रिधेति । गङ्गायां घोष इत्यत्र हि वस्तुतो गङ्गासंबन्धि यत्तीरं घोषान्वययोग्यं तदेव लक्षणया प्रतीयते न तु गङ्गाविशिष्टतीरं तस्य तेन रूपेण घोषान्वयायोग्यत्वादतो गङ्गापदे जहल्लक्षणैव , एवं बहिः शोणस्तिष्ठतीत्यादौ निष्कृष्टद्रव्यगुणमात्रस्य बहिर्देशस्थित्यनुपपत्तेः शोणगुणविशिष्टस्यैवाश्वस्य नियमेन स्थित्यवगमात्साऽजहल्लक्षणा स्वार्थमुपादायैव तस्य द्रव्ये वृत्तेः , सोऽयमित्यादौ तु प्रागुक्तन्यायेनाभेदो विरुद्धदेशादिपदार्थभागं परित्यज्य धर्मिस्वरूपं पदार्थभागमुपादायेदं वाक्यमभेदं प्रतिपादयतीति तत्र सा जहदजहद्रूपेति लाक्षणिकी वृत्तिस्त्रिधा भवतीत्यर्थः ॥१५६॥

वेदेऽपि लाक्षणिकवृत्तिरियं त्रिधैषा
यज्ञायुधीतिवचने तु जहत्प्रवृत्तिः ॥
वैश्वानरादिवचनेष्वजहत्प्रवृत्ति-
स्तत्त्वंगिरोरुभयरूपतया प्रवृत्तिः ॥ १५७ ॥

एवं वेदेऽपि तत्त्रैविध्यमुदाहरणेनाह । वेदेऽपीति । यज्ञायुधी यजमानः स्वर्गं लोकमेतीतिवाक्येऽन्त्येष्टिप्रकरणस्थेऽग्निहोत्रकपालादिपात्रैर्विशिष्टो यजमानस्स्वर्गं गच्छतीति प्रतीयते तदनुपपन्नम् । अग्नि-

होत्रपात्राणां प्रत्यक्षेणैव दाहात्, यजमानस्याग्निहोत्रकपालादियज्ञायुधविशिष्टस्य स्वर्गगमनायोगाद्यज्ञायुधीशब्दः तस्मिन्स्वार्थं परित्यज्य वर्त्तत इति सा जहल्लक्षणा, मत्वर्थप्रत्ययस्य संबन्धमात्रनिष्ठत्वमभिप्रेत्य संबन्धिनि यजमाने जहल्लक्षणेत्युक्तम्, विशिष्टात्केवलमन्यदित्याशयेन वा। जहत्प्रवृत्तिः जहल्लक्षणा वृत्तिः। वैश्वानरादिवचनेष्विति। प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमित्यत्र वैश्वानरशब्दो जाठरेऽग्नौ रूढस्तदवच्छिन्ने आत्मनि वर्त्तते, अन्यथा आत्मानं वैश्वानरमिति सामानाधिकरण्यायोगात्, तथा च स्वार्थापरित्यागेन स आत्मनि वर्त्तत इति तस्य तत्राऽजहल्लक्षणा। आदिशब्देन सृष्टीरुपदधातीत्यत्र सृज्यसृष्टीष्टकासु वर्त्तमानः सृष्टिशब्दो गृहीतः। तत्त्वंगिरोरिति। तत्त्वमसिवाक्यस्थतत्त्वंपदयोरित्यर्थः। उभयरूपतया जहदजहद्रूपतया। पदद्वयार्थैक्यभेदविरोधिविशेषणांशपरित्यागेनापरोक्षचैतन्याद्वयानन्दे पदद्वयप्रवृत्तेः सा जहदजहल्लक्षणेत्यर्थः। एतेन ब्रह्मात्मनि शक्तब्रह्मादिपदस्य कथं तत्र लक्षणा ब्रह्मादिपदलक्ष्यस्य शास्त्रार्थत्वे इदमपि शास्त्रमनात्मनिष्ठमितिदूषणद्वयं परिहृतम् शबले ब्रह्मणि परिगृहीतसङ्गतिकस्य शुद्धे ब्रह्मात्मनि लक्षणोपपत्तेरिति॥ १८७ ॥

ब्रह्माऽज्ञाने ह्यद्वितीयत्वमेकं

ब्रह्मण्यन्यच्चाद्वितीयत्वमस्ति ॥
तत्संपर्कात्तत्र चाद्वैततान्या
व्युत्पन्नोऽयं ब्रह्मशब्दस्तु तत्र ॥ १५८ ॥

ननु कथं तर्हि ब्रह्मशब्दस्य पूर्णब्रह्मार्थत्वं ब्रह्मातिरिक्तस्य सर्वस्य परिच्छिन्नत्वेन तच्छबले पूर्णतारूपबृहत्त्वासंभवादित्याशङ्क्याह । ब्रह्माऽज्ञानेति । ब्रह्माश्रयविषयाऽज्ञान इत्यर्थः । हि यस्माद्ब्रह्माऽज्ञान एकमद्वितीयत्वमस्ति तस्य सकलप्रपञ्चविवर्त्ताश्रयतया ब्रह्मण्यध्यस्तत्वेन तदन्तर्भूततया च सजातीयादिभेदशून्यत्वात् । ब्रह्मणि शुद्धे चान्यदद्वितीयत्वमस्ति तदतिरिक्तस्य सर्वस्य मिथ्यात्वेन जीवानां च तन्मात्रत्वेन सजातीयादिभेदशून्यत्वात् । तत्संपर्कात्तयोः परस्परमधिष्ठानाध्यस्ततया तादात्म्यात्संवृत्ते तत्र तदुभयात्मके शबले अन्याऽद्वैतताऽस्ति अद्वितीयद्वयात्मकस्य तस्याप्यद्वैततानियमात् । एवं सति ब्रह्मशब्दस्य वेदान्तेषु जगत्कारणे बहुशः प्रयोगाज्जगत्कारणत्वस्य केवलेऽसंभवान् मायां तु प्रकृतिं देवात्मशक्तिमित्यादिवचनैर्बृहति शबले व्युत्पत्तिरविरुद्धेत्याह । व्युत्पन्न इति ॥ १५८ ॥

प्रत्यग्भावस्तावदेकोऽस्ति बुद्धौ
प्रत्यग्भावः कश्चिदन्यः प्रतीचि ॥
प्रत्यग्भावस्तत्कृतस्तत्र चान्यो
व्युत्पन्नोऽयं तत्र चात्मेति शब्दः ॥ १५९ ॥

एवं महावाक्यस्थब्रह्मादिपदवाच्यं शबलं तत्र शब्दस्य शक्तिं व्युत्पत्तिं च दर्शयित्वा तद्वाक्यस्थाहमादिपदवाच्यशबलं तत्राहमादिपदसंबन्धग्रहं च दर्शयति । प्रत्यग्भाव इति । आन्तरत्वमिति यावत् । बुद्धौ अन्तः करणे । शरीरेन्द्रियाद्यपेक्षया हि तदधिष्ठात्रन्तःकरणमान्तरमित्यर्थः। अन्य आपेक्षिकादन्तःकरणनिष्ठप्रत्यक्त्वादन्यः । प्रतीचि साक्षिणि । तस्य य आत्मा सर्वान्तर इति श्रुतेः सर्वान्तरत्वमन्यः प्रत्यग्भावोऽस्तीत्यर्थः । तत्कृतस्ताभ्यां प्रत्यक्त्वाभ्यां कृतस्तत्र तदुभये शबलेऽन्यः ताभ्यां प्रत्यक्त्वाभ्यामन्यः प्रत्यग्भावोऽस्तीत्यनुषङ्गः । ततः किं तत्राह । व्युत्पन्नोऽयमिति । तत्र शबले । आत्मेतिशब्दः त्वमहमादिशब्दः। यद्यप्यहमादिशब्दसङ्गतिग्रहसमये तदर्थे शबलत्वं न प्रतीयते तथापि तस्मिन्विचारकाले तत्सिद्ध्यतीति वक्ष्यति ततस्तदापि तदुभयात्मकमेवेत्येवमुक्तम् ॥१५९॥

तच्छब्दवाच्यगतमद्वयभागमेकं
प्रत्यक्त्वमात्रमविरोधमपेक्षमाणः ॥
त्वंशब्दवाच्यशबलस्थमुपाददानो
वाक्यादखण्डमथ तत्त्वमसीति विद्यात् ॥ १६० ॥

एवं पदद्वयवाच्यशबलं तत्र ब्रह्मादिपदसङ्गतिग्रहं चोक्त्वा वाक्यस्य जहदजहल्लक्षणयाऽखण्डार्थप्रतिपादनप्रकारमाह । तच्छब्दवाच्यगतमिति । वाक्यार्थे

अविरोधमपेक्षमाणोऽधिकारी तच्छब्दवाच्यशबलगतप्रविष्टमेकमद्वयभागं पारमार्थिकाद्वयभागं त्वंशब्दवाच्यशबलस्थं प्रत्यक्त्वं सर्वान्तरत्वं जहदजहल्लक्षणयोपाददानोऽनन्तरं तत्त्वमसीतिवाक्यादखण्डं विद्यादिति संबन्धः ॥ १६० ॥

आदेयांशे नाणुमात्रोऽपि भेदो
यद्यप्येवं भिन्नमादाय शब्दौ ॥
वर्तेते त्वय्यद्वयात्मप्रकाशे
बाह्यं हेतुं जामिता नास्ति तस्मात् ॥ १६१ ॥

ननु तत्त्वंपदयोरेकार्थत्वमनुपपन्नं तथा सति पर्यायतापत्तेरत्यन्तभिन्नार्थत्वे च सामानाधिकरण्यायोगादिति भेदाभेदनिष्ठं तद्वाक्यमित्याशङ्क्याह । आदेयेति । तात्पर्यविषये लक्ष्ये अपरोक्षचैतन्याद्वयभाग इत्यर्थः । अणुमात्रोऽपि ईषदपि । चैतन्यानन्दयोरत्यन्तमभेदात् । अन्यथानन्दस्याभानप्रसङ्गात् चैतन्ये वाकल्पितत्वं स्यात् अन्यथा तद्संबन्धात् । एवं चैतन्यस्याप्यानन्दभेद उपेक्षणीयतापत्तिः । भेदाभेदौ च विरुद्धाविति तदुभयमेकरसं न तु भिन्नाभिन्नमित्यर्थः । एवं चेत्कथमपर्यायता पदयोरित्याशङ्क्योक्तानुवादेन तामुपपादयति । यद्यप्येवमिति । भिन्नं परस्परमिति शेषः । शब्दौ तत्त्वमादिशब्दौ । बाह्यं वाक्यार्थाद्बहिर्भूतम् । हेतुं शब्दप्रवृत्तिनिमित्तं वाच्यमिति यावत् । जामि-

ता पर्यायता । पदद्वयलक्ष्यस्यैकरसत्वेऽपि वाच्यभेदादपर्यायतेत्यर्थः ॥ १६१ ॥

अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्वत्
प्रत्यक्तत्त्वे चाद्वयस्यापि भावः ॥
यद्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे तत्त्वमर्थोपपत्तेः । १६२ ॥

ननु जीवब्रह्मणोरत्यन्तमभेदे घटकुटशब्दवत्तत्त्वंपदसामानाधिकरण्यं न स्यात् नीलमुत्पलमित्यादावीषद्भेदे सत्येव सानाधिकरण्यदर्शनादित्याशङ्क्याह । अद्वैतेऽर्थ इति । शुद्धाद्वयानन्द इत्यर्थः । प्रत्यगर्थः केवलसाक्षी सर्वान्तरोऽस्ति तदभिन्न इति यावत् । तद्वत्प्रत्यगभिन्नाद्वयवत्प्रत्यक्तत्त्वे उक्तसाक्षिणि अद्वयस्यापि भावः अस्त्येवेति सम्बन्धः । अद्वयार्थोऽपि प्रत्यगभिन्न इत्यर्थः । यद्यपिशब्दौ सतीत्यस्यार्थे एवं सतीत्यर्थः । अतिरेकः ईषद्भेदः । अथ वाऽद्वैतेत्यादिना प्रत्यगद्वयाभेदो दर्शितः यद्यपीत्यादिना सामानाधिकरण्यनिमित्तं भेदमनूद्य दूषयति । एवमपि समानाधिकरण्यादतिरेकावकाश इति यदि तन्नेत्यर्थः । तत्र हेतुमाह । पूर्णे तत्त्व इति । तदा खलु ब्रह्म प्रतीचो व्यावर्त्तेत प्रत्यगपि ब्रह्मणः । एवं च तदर्थब्रह्मणो निरवधिकबृहत्त्वं त्वमर्थस्य च प्रतीचः सर्वान्तरत्वं न स्यात्, पूर्णे तत्त्वे सत्येव

मा

तत्त्वमर्थयोस्तदुपपत्तेरित्यर्थः ॥ १६२ ॥

न च विनिगमनायां कारणं किंचिदस्ति
स्फुटमुभयपदस्था लक्षणा शस्यतेऽतः ॥
न हि विनिगमनायां हेत्वभावे कदाचित्
क्वचिदियमुपलब्धा सोऽयमित्यादिवाक्ये॥१६३॥

नन्वेकस्मिन् वाक्ये प्रयुक्तनिखिलपदलक्षणानुपपन्ना लोके तथाऽदर्शनात् शक्तपदं विना वाक्यार्थाऽनुभवायोगाच्च तस्यैव तज्जनकत्वादिति चेन्न, न तावल्लोके तददर्शनं विषं भुंक्ष्वेत्यादौ तद्दर्शनात्, तेन हि वाक्येन शत्रुगृहान्नोदकादेर्भक्षणपानादीष्टसाधनं न भवतीति प्रतीयत इति सर्वपदलक्षणा, एवमर्थवादवाक्यस्थसर्वपदेऽपि प्राशस्त्ये लक्षणा दृष्टा, किं च तात्पर्यानुपपत्तिर्हि लक्षणाबीजं नान्वयानुपपत्तिः क्रय्येयं गौर्यतो बहुक्षीरेत्यर्थवादवाक्ये तदभावात्, एवं च यथातात्पर्यमेकस्मिन्सर्वस्मिन्वा पदे लक्षणा न विरुद्धा, अत एव सोऽयमित्यत्रापि पदद्वयलक्षणैव न्याय्या, शब्दस्य वाक्यार्थानुभवजनकत्वे चान्वीयमानोपस्थापकत्वमेव तन्त्रं न तु शक्त्या तदुपस्थापकत्वं गौरवादित्युपक्रमाद्यनुरोधेन प्रत्यगद्वयमात्रपर्यवसायितत्त्वमसिवाक्यस्थपदद्वयलक्षणा न विरुद्ध्यते, आवश्यकी च,अन्यथा श्रुतितात्पर्यानिर्वाहादितिन्यायसिद्धेऽर्थेऽविनिगमनतर्कमप्यनुग्राहकमाह ।

न च विनिगमनायामिति । चकारेणोक्तं न्यायं समुच्चिनोति । अस्मिन्नेव पदे लक्षणा नान्यत्रेति निर्धारणायामित्यर्थः । शस्यते प्रशस्यते। यतो विनिगमनायां किमपि स्फुटं कारणं नास्ति अत उभयपदस्थेत्यादिसंबन्धः । ननु तिष्ठतु कारणान्तरगवेषणं श्रोतुरिच्छैव तन्निमित्तमित्याशङ्क्य तर्हि वाक्यार्थव्यवस्था न सिद्ध्येत्सर्वेषामेकस्य वा श्रोतुर्नियतेच्छाभावादित्याशयेनाह । न हीति । इयमेकपदलक्षणा ॥ १६३ ॥

प्रथमचरमभावो निर्णये कारणं चे-
द्द्वयमपि नियमो न ह्यन्यथाप्यस्य दृष्टेः ॥
प्रथमपठितमासीत्तत्पदं सामवेदे
चरमपठितमेतद्द दृष्टमध्वर्युवेदे ॥ १६४ ॥

ननु यस्मिन्वाक्ये यत्पदं प्रथमं श्रूयते तदसंजातविरोधितया प्रबलं स्वार्थनिष्ठं तद्विरुद्धार्थं द्वितीयं तदनुकूलं लक्षयिष्यतीति तत्र कारणाभावोऽसिद्ध इत्याशङ्क्यात्रापि वाक्यार्थाव्यवस्थैव दोषः प्राथम्यादेरपि शाखाभेदेनाव्यवस्थितत्वादित्याह । प्रथमेति । निर्णये लक्षणानिर्णये । अस्य प्रथमचरमभावस्य । अन्यथादर्शनमेवाह । प्रथमेति । तत्पदमद्वयब्रह्मबोधकम् । सामवेदे तत्त्वमसिवाक्य इत्यर्थः । अध्वर्युवेदे यजुर्वेदे अहं ब्रह्मास्मीतिवाक्ये । एतत्तत्पदार्थबोधकं

ब्रह्मपदमित्यर्थः । एवं च तत्त्वमसिवाक्येन जगत्कारणत्वादिविशिष्टस्य ब्रह्मणस्त्वंपदलक्ष्यसाक्ष्यभेदः प्रतिपाद्यते , यजुर्वेदेन तु अहंकारकर्तृत्वादिविशिष्टस्य शुद्धाऽद्वयाऽभेदः प्रतिपादनीय इति सर्वेषामेकरूपं ब्रह्म न सिद्ध्येत्तच्चायुक्तमेकस्य वैरूप्यायोगाद्वस्तुनि विकल्पासंभवाच्चेति भावः ॥ १६४ ॥

सोऽयं पुमानयमसाविति पौरुषेये
वाक्ये तथा व्यतिहृतेऽत्र विशेषहेतुः ॥
पूर्वापरत्वमिति शक्यमिदं न वक्तुं
मुख्यत्वलाक्षणिकते प्रति शब्दवृत्त्योः ॥१६५ ॥

प्रथमचरमभावस्यानिर्णायकत्वं सोऽयमित्यादिलौकिकवाक्येऽप्याह । सोऽयं पुमानिति । अत्र वाक्ये तच्छब्दः पूर्वोऽयंशब्दः पश्चात्प्रयुक्तः । अयमसावितिवाक्ये तु विपरीतः प्रयोगस्तदिदमाह । व्यतिहृत इति । व्यत्यस्त इत्यर्थः । सोऽयं पुमान् तथा तथाविधे अयमसाविति च व्यतिहृतेऽत्र पौरुषेये वाक्ये शब्दवृत्त्योर्मुख्यत्वलाक्षणिकते प्रति इदं पूर्वापरत्वं विशेषहेतुर्विनिगमनाहेतुरिति वक्तुं न शक्यमिति संबन्धः । अत्रापि वाक्यप्रयोक्तृणामुच्चारणे पूर्वापरत्वनियमादर्शनादिति भावः ॥ १६५ ॥

न च भवति विरोधस्योत्थितस्यापनीतिः
पदयुगलनिविष्टां लक्षणामन्तरेण ॥

न हि भवति कदाचित् सद्द्वयस्याद्वयत्वं
न च भवति परोक्षः प्रत्यगर्थोऽपि तद्वत् ॥ १६६ ॥

एवमखण्डे ब्रह्मणि तात्पर्यानुपपत्त्या विनिगमनाभावेन च पदद्वयलक्षणेत्युक्तम्, इदानीं मुख्यार्थयोरभेदान्वयानुपपत्त्याप्यविनिगमोपोद्बलितया सा वक्तव्येत्याह । न च भवतीति । विरोधस्याभेदे विरोधस्योत्थितस्य ज्ञातस्यापनीतिर्निराकरणं पदद्वयलक्षणामन्तरेण न च नैव भवतीति संबन्धः । विरोधमेव व्यनक्ति। न हीति । तद्वत्सद्द्वयस्याद्वयाभेद इव। एतेन तदादिशब्दस्योपस्थितवाचकत्वात् शुद्धस्य च तात्पर्यविषयतयोपस्थितत्वाद्विनैव लक्षणान्ततः शुद्धोपस्थितिसंभव इति प्रत्युक्तम् । उपस्थितिविशिष्टस्य शुद्धत्वासंभवात्, तदादिपदघटितवाक्यगर्भमहावाक्यातिरिक्तावान्तरवाक्यस्य शुद्धे तात्पर्यासंभवाच्च । न हि महावाक्यतदर्थप्रतिसन्धानं विना वाक्यैकदेशस्य शुद्धे तात्पर्यनिरूपणं संभवति, महावाक्यतदर्थप्रतिसन्धानं तु तत्पदतदर्थप्रतिसन्धानमृते न भवतीति तात्पर्यनिरूपणात्प्रागेव तत्पदार्थनिर्णयो वाच्य इति सृष्ट्यादिवाक्यानुरोधेन विशिष्टमेव तत्पदार्थ इति तत्रापि लक्षणा आवश्यकीति भावः । अत्र त्वमर्थगतसद्वितीयत्वांशपरित्यागवदापरोक्ष्यस्यापि परित्यागो वक्तव्यस्तस्मिन्सत्येव विरोधस्य परिहारादुद्देश्यविशे-

षणत्वेन तस्यापि परित्याज्यत्वाच्चेति न शङ्कास्पदत्वम्। प्रत्यङ्मात्रस्य त्वंपदे लक्षणयोपादेयस्य चैतन्यमात्रस्यापरोक्ष्यस्वभावत्वात्स्वभावत्यागे च भावत्यागापत्तेः। न हि ग्रहगतमेकत्वमविवक्षितमिति ग्रहत्वमप्युद्देश्यविशेषणत्वादविवक्षितं भवति, तस्य तत्स्वभावत्वात्। न च स्वयं चात्मा परोक्षश्चेति कस्य चिदनुभवः संभाव्यते। तस्मात्पारोक्ष्यसद्वयत्वपरिहारायोभयपदे लक्षणावश्यग्राह्येति भावः॥ १६६॥

अविरुद्धविशेषणद्वय-
प्रभवत्वेऽपि विशिष्टयोर्द्वयोः॥
घटते न यदैकता तदा
नितरां तद्विपरीतरूपयोः॥ १६७॥

नन्वेकपदेऽपि लक्षणा व्यर्था, एकस्यैव ब्रह्मणो विशेषणद्वयविशिष्टतया पदद्वयवाच्यत्वेन दण्डी कुण्डलीतिप्रयोगादिवदभेदप्रतीत्युपपत्तेरिति चेन्न, विशिष्टाभ्यां तदुभयाश्रयकेवलस्वरूपस्यान्यत्वेन लक्षणां विना तत्पदाभ्यामुपस्थित्यसंभवात्, तथा हि इदानीमयं दण्डी न भवतीति हि दण्डिनो देवदत्तात्केवले तस्मिन् भेदः प्रतीयते, अभेदनिषेधस्य भेदविषयतयान्यत्र क्लृप्तस्य विशेषणमात्रसंसर्गाभावविषयत्वायोगात्, अन्यथा घटः पटो न भवतीतिप्रतीतेरपि घटत्वात्यन्ताभावविषयत्वप्रसङ्गेन क्ला-

पि भेदो न सिद्ध्येत्, न च प्राग् दण्ड्येवायमिति प्रत्यभिज्ञया तदभेदे सिद्धे निषेधधियो विशेषणाभावविषयतेति वाच्यम्, भेदबुद्ध्यनुरोधेन प्रत्यभिज्ञाया एव तज्जातीयविषयतयोपपत्तेः, आत्मैवेदं सर्वमित्यादिना सर्वाभेदसिद्धेः घटाद्यभेदनिषेधोऽपि न स्यात्, विशिष्टभेदस्तूभयत्रापि समान एव, अभेदबुद्धिरपि स्वरूपमात्राभेदविषयैवेति तयोर्भिन्नविषयतैव, एवं सति दण्डिकुण्डलिनोरपि परस्परं स्वसमानसत्ताकभेदबलात्तत्रापि लक्षणयैव तदुभयाश्रयाऽभेदसिद्धिः, एवमेकदैकत्राविरुद्धविशेषणद्वयविशिष्टयोरपि परस्परभेदेन यदैकता न घटते तदा किमु वक्तव्यं विरुद्धविशेषणद्वयविशिष्टयोर्जीवेश्वरयोरित्याह ।अविरुद्धेति । स्पष्टम् ॥ १६७ ॥

अथ केनचिदात्मनैकता
वचनेन प्रतिपाद्यते तयोः ॥
तदसुन्दरमस्तमेति हि
स्फुटमेवं त्रिविधापि लक्षणा ॥ १६८ ॥

ननु विरुद्धरूपयोरपि जीवेश्वरयोः सत्त्वादिना केन चित्स्वरूपेणैकत्वसंभवात्तत्त्वमादिवचनं कथं लक्षणां विना नैव प्रतिपादयेदिति शङ्कते । अथेति । किं तत्स्वरूपं पदेन केन चिदुपस्थापनीयम् उत न । आद्ये तद्वाचकपदाभावेन ब्रह्माहंपदयोस्तत्र लक्षणाप्रसङ्गः ।

द्वितीये शब्दानुपस्थितस्यापि वाक्यप्रतिपाद्यत्वे गङ्गासंबन्धिनस्तत्पदादनुपस्थिततीरादावपि घोषान्वयित्वप्रतीत्युपपत्तेः , एवं शोणादिना लक्षणामन्तरेणाश्वादेर्बहिःस्थित्यन्वयसंभवात् , तथा सोऽयमित्यत्रापि शुद्धस्य वाक्यार्थत्वसंभवात्प्रसिद्धलक्षणोच्छेदप्रसङ्गः। तस्मात्पदोपस्थितपदार्थयोरन्वयो वाच्य इत्यभेदयोग्यस्वरूपोपस्थितये पदद्वयलक्षणावश्यंवाच्येत्याशयेनाह । तदसुन्दरमिति। एवमेवं सति स्फुटमस्तमेतीति संबन्धः ॥ १६८ ॥

साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाहं-
शब्दोऽहंकारवाची भवति तु जहती लक्षणा तत्र पक्षे ॥
नौरेषा रौति लोहं दहति विषधरो रज्जुरग्रे तवासा-
वित्यत्रेवात्मवस्तुन्यपि भवतु जहल्लणा को विरोधः॥१६९॥

एवं ब्रह्माहंपदयोर्लोकवेदव्यवहारानुरोधेन शबलवाचकयोर्जहदजहल्लक्षणयाऽखण्डार्थत्वमुक्तम् , इदानीमज्ञानमात्रवाची ब्रह्मशब्दः मम योनिर्महद्ब्रह्मेत्यत्र केवलाज्ञाने ब्रह्मशब्दप्रयोगात् , एवमहंशब्दोऽपि व्यवहारबलेन लाघवाच्च केवलाहंकारवाची भवत्विति ताभ्यां जहल्लक्षणयैवाऽखण्डवस्तुप्रतिपत्तिरिति पक्षान्तरमाह । साभासाज्ञानेति । चिच्छायायुक्ताज्ञानवाचीत्यर्थः । यदीति निश्चयार्थे । जहल्लक्षणाया अतिप्रसिद्धतया प्रस्तुते तदौचित्यार्थं दृष्टान्तमाह । नौ-

रिति। रौति शब्दं करोति । नावः शब्दकर्तृत्वानुपपत्तेस्तया तत्स्थः पुरुषो लक्ष्यते । एवमुत्तरत्रापि लोहरज्जुशब्दाभ्यां वह्निसर्पयोर्लक्षणा। रज्जुर्विषधर इतिलोकप्रसिद्धप्रयोगानुवादत्वाद् ग्रन्थकर्त्तुर्न विलिङ्गप्रयोगदोषः । विषधरा उ इति छेदो वास्तु । विषधरपदं वा दीर्घद्रव्यलक्षकं तथा च न विलिङ्गता । दार्ष्टान्तिकमुपसंहरति । आत्मवस्तुनीति । अत्रानिश्चितार्थयदिशब्दस्वारस्येन प्रौढिवादोऽयं ग्रन्थकारस्येति केचित् । तत्र च बीजं ब्रह्मशब्दस्य जगत्कारणे प्रचुरप्रयोगानुरोधः, अज्ञाने तत्प्रयोगस्य क्वाचित्कत्वात्, एवमात्मवचनाहंशब्दस्यापि नियमेन शबल एव प्रयोग इति ॥ १६९ ॥

प्रत्यक्त्वादिगुणान्वयेन यदि वा गौण्यस्तु वृत्तिस्तयो-
र्ब्रह्माहंपदयोः परेतरदृशोर्मुख्यो विरोधो यतः ॥
मुख्यार्थानुपपत्तिहेतुकतया गौण्यस्ति वृत्तिर्यतो
लोके माणवको विभावसुरसौ सिंहः पुमानित्यपि॥१७०॥

निर्गुणे कस्यापि गुणस्याभावात्प्रौढिवादेनैव पक्षान्तरमाह । प्रत्यक्त्वादीति । आदिपदेन बृहत्त्वं गृह्यते । तयोः परेतरदृशोः, ईश्वरजीवयोरिति सप्तम्यौ । यदि प्रत्यक्त्वादिगुणान्वयेन वृत्तिस्तर्हि गौण्यस्त्विति संबन्धः । तयोर्ब्रह्माहंपदयोरिति वान्वयः । किंलक्षणयोः परेतरदृशोः परापरयोर्ब्रह्मप्रत्यगात्मनोर्दृग्ज्ञानं याभ्यां

तयोरिति विग्रहः । तत्र हेतुर्मुख्य इति । ननु लक्षणामन्तरेण गौणी काचिदमुख्यवृत्तिर्न लोके सिद्धेत्याशङ्क्याह । मुख्यार्थेति । मुख्यार्थान्वयानुपपत्तिर्हेतुर्यस्मिन्नमुख्यसंबन्धे स तथा तस्य भावस्तत्ता तयेत्यर्थः । तत्र दृष्टान्तमेव हेतुमाह । यत इति । विभावसुरग्निः । अग्निर्माणवकः सिंहो देवदत्त इत्यादौ अग्न्यादिशब्दस्य स्वार्थगुणयोगेन माणवकादावनेकत्र प्रयोगाल्लोके गौणी वृत्तिर्यतः प्रसिद्धतमेत्यर्थः ॥ १७० ॥

परशब्दवृत्तिरपरत्र भवे-
दिति यद्यपीदमुभयोः सदृशम् ॥
अनयोस्तथापि तु विभागकरं
स्फुटमस्ति लक्षणमवान्तरकम् ॥ १७१ ॥

ननु स्वार्थं विहायार्थान्तरे वृत्तिर्गौण्यप्यस्ति चेत्कस्तर्हि लक्षणागौण्योर्भेद इति शङ्कामनूद्य तयोरवान्तरभेदोऽस्तीत्याह । परशब्दवृत्तिरिति । परस्य लक्ष्यमाणादन्यस्य गङ्गादेर्माणवकादेरन्यस्य ज्वलनादेर्वाचकशब्दस्य वृत्तिरित्यर्थः । अपरत्र स्वार्थादन्यत्रोभयोर्लक्षणागौण्योः सदृशं यद्यपीति संबन्धः । अनयोरित्यादि स्पष्टम् ॥ १७१ ॥

गुणतो गुणवृत्तिरिष्यते
ह्यपरा लाक्षणिकी तु सङ्गतेः ॥

इति भेदकमस्ति लक्षणा-
गुणवृत्त्योरिति वेदवादिनः ॥ १७२ ॥

अवान्तरभेदमेव दर्शयति । गुणत इति । लक्ष्यमाणगुणयोगेन स्वार्थादन्यत्र वृत्तिर्गौणी । लाक्षणिकी तु अपराऽन्या सा संगतेः स्वार्थसंबन्धमात्राद्‌र्थान्तरे वृत्तिर्न तु गुणयोगादित्यर्थः । इत्यनेन प्रकारेण लक्षणागुणवृत्त्योर्भेदकमस्तीति वेदवादिनो मीमांसकाः । अभिधेयाऽविनाभूते प्रतीतिर्लक्षणोच्यते । लक्ष्यमाणगुणैर्योगाद् वृत्तिरिष्टा तु गौणतेत्याहुरित्यर्थः । गङ्गादिपदं हि स्वार्थान्वयानुपपत्तौ सत्यां तद्विहाय तत्संबन्धिनि वस्तुनि वर्तते न तु तद्गुणयोगमपेक्षते तीरे गङ्गासादृश्याप्रतीतेः । ज्वलनादिपदं तु स्वार्थासंबन्धिन्यपि माणवकादौ लक्षितस्वार्थे शुचित्वादिगुणयोगेन वर्तते, अत एवाग्निसदृशो माणवक इति ततः प्रतीयत इति तयोः स्फुटमस्ति भेदकमित्यर्थः ॥ १७२ ॥

नित्यः शुद्धो बुद्धमुक्तस्वभावः
सत्यः सूक्ष्मः सन् विभुश्चाद्वितीयः ॥
आनन्दाब्धिर्यः परः सोऽहमस्मि
प्रत्यग्धातुर्नात्र संशीतिरस्ति ॥ १७३ ॥

एवं जहदजहल्लक्षणया तत्त्वंपदाभ्यामुपात्तप्रत्यग्ब्रह्माभेदनिष्ठं महावाक्यमित्युक्तम्, इदानीं तदनुवदन्नुपादेयप्रत्यग्ब्रह्मणोरवान्तरश्रुतितात्पर्यगोचरस्वरू-

पमाह । नित्य इत्यादिना । वस्तुतः कालत्रयापरिच्छेद्यो नित्यः । शुद्धः अविद्याकलङ्करहितः । बुद्धः स्वप्रकाशबोधो न तु बोधविषयः । मुक्तो रागद्वेषादिबन्धरहितः । सत्यः त्रिकालाबाध्यः । सूक्ष्मः स्थौल्यरहितो दुर्विज्ञेयो वा । सन् विद्यमानो भावस्वरूप इति वा । विभुः देशापरिच्छिन्नः स्वतन्त्र इति वा । अद्वितीयः वस्त्वन्तररहितः । आनन्दाब्धिः अनवच्छिन्नानन्दः । परः परमात्मेति विशेष्यम् । एवं तत्पदलक्ष्यस्वरूपं निर्दिश्य त्वंपदलक्ष्यस्वरूपमाह । प्रत्यग्धातुरिति । अहमनुभवे प्रकाशमानोऽहंकारादिसाक्षी, प्रत्यग्धातुशब्दः स्वरूपवाची सोऽपि उक्तलक्षण एवातो न किं चिदपि तदुभयवैलक्षण्यमिति तदत्यन्तमभिन्नमेवेत्याशयेन वाक्यार्थमाह । सोऽहमस्मीति । विद्धीति शेषः । अस्यार्थस्य प्रागुपपादितत्वाच्चाग्रे चोपपादयिष्यमाणत्वात्संशयं मा कुर्वित्याशयेनाह । नात्रेति । अथ वाऽस्मीत्यविवक्षितम् य एतादृशः परमात्मा सोऽहंपदलक्ष्यप्रत्यक्चैतन्यमित्यर्थः । यथा चिदेकरसमपि ब्रह्म वस्तु स्वभावतः सत्यज्ञानादिपदैरपर्यायैस्तात्पर्येण प्रतिपादनाच्च सत्यज्ञानानन्दात्मकमित्युच्यते, एवं नित्यो नित्यानामज आत्मा महान् अत्रायं पुरुषः स्वयं ज्योतिः असङ्गो ह्ययं पुरुषः अकामं रूपं शोकान्तरम् विमुक्तश्च

विमुच्यते सत्यं ज्ञानं विभुं सर्वगतं सुसूक्ष्मं सदेव सोम्येदम् एकमेवाद्वितीयम् एषोऽस्य परम आनन्द इत्येवमादितत्तद्वाक्यस्थैरपर्यायैर्नित्यादिशब्दैस्तात्पर्यतः प्रतिपादनात्तन्नित्यशुद्धादिस्वभावमित्युच्यत इति ॥१७३॥

सच्चित्सुखाद्वयवपुः कथयन्ति के चित्
सच्चित्सुखात्मकमिति प्रथयन्ति के चित् ॥
ब्रह्मेतराणि किल नास्य वपूंषि तेषां
बुद्धौ स्फुरन्त्यपररूपनिवृत्तिभावात् ॥ १७४ ॥

नित्यत्वादीनामभावरूपाणां न भावरूपब्रह्मस्वरूपत्वमितिमन्वानानां मतभेदमाह । सच्चिदिति । सच्चिदद्वयानन्दस्वरूपं ब्रह्मेति के चित् । अद्वयत्वं च द्वयाभावोपलक्षितं भावस्वरूपम् । एतच्चानन्दपदार्थः । अपरे त्वद्वयत्वमपि मुक्त्वा सदादिकमेव ब्रह्मेति वर्णयन्ति । नित्यत्वादीनां ब्रह्मस्वरूपत्वे तेषामरुचिनिमित्तमाह । इतराणीति । अस्य ब्रह्मण इतराणि नित्यत्वादीनि वपूंषि सन्ति वपुष्ट्वेन बुद्धौ न स्फुरन्ति किल कुतः, तेषां नित्यत्वादीनामपररूपस्य कालपरिच्छेद्यत्वादेर्निवृत्तिभावादभावरूपत्वादित्यर्थः । ब्रह्मणो भावरूपत्वाद्भावरूपमेव सदानन्दादिकं स्वरूपं भवितुमर्हति न नित्यत्वादिकमप्यभावरूपम्विरोधात्, किंतु तेषां तद्धर्मत्वमेवेति तदाशयः । अत्र के चित्किलशब्दाभ्यामस्वारस्यं द्योतितम् तत्रचेदं निमित्तम् य-

था सदादिशब्दैर्लक्षणया भावरूपं ब्रह्म प्रतिपाद्यते एवं नित्यादिशब्दैरपि तत्तच्छबलशक्तैस्तदधिष्ठानं ब्रह्मैव लक्षणया प्रतिपाद्यत इति तन्नित्यादिस्वभावमिति व्यवह्रियत इति न ब्रह्मणोऽभावात्मतापत्तिः, नाप्यभावधर्मकत्वमद्वये धर्मधर्मिभावायोगादभावस्य दुर्निरूपस्य श्रुतिप्रतिपाद्यत्वानुपपत्तेश्चेति ॥ १७४ ॥

ब्रह्मेति शेषि पदमत्र हि लक्ष्यमेकं
शेषाणि लक्षणसमर्पणमस्य कुर्युः ॥
लक्ष्यार्पणेन सह लक्षणवाचि सर्वं
संगच्छतेऽरुणपदं क्रयवाचिनेव ॥ १७५ ॥

इदानीमवान्तरवाक्यस्याखण्डार्थत्वं वक्तुं सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मलक्षणावाक्ये लक्ष्यलक्षणविभागमाह । ब्रह्मेति । ब्रह्मेतिपदं शेषीति संवन्धः । शेषिणः प्रधानस्य पदमिति वा । ननु ज्ञानानन्दादेरपि ब्रह्मस्वरूपत्वात्तत्पदमपि तथाविधं किं न स्यात्तत्राह । अत्र हीति । अस्मिन्वाक्ये एकं पदं लक्ष्यं हि यतः अतः शेषाणि सत्यादिपदान्यस्य ब्रह्मणो लक्षणसमर्पणं कुर्युरित्यर्थः । एकस्मिन्वाक्ये एकमेव पदं लक्ष्यमुद्देश्यं समर्पयतीति वक्तव्यं सर्वपदार्थानामुद्देश्यत्वे तेषां परस्परानन्वयेन वाक्यमनर्थकं स्यात्, विधेयं विना सर्वोद्देशानर्थक्यात्तच्चैकं ब्रह्मपदो-

पस्थितमेव भवितुमर्हति तस्यैव ज्ञातस्य पूर्ववाक्ये ब्रह्मविदाप्नोति परमित्यत्र परमपुरुषार्थसाधनत्वदर्शनात्, यच्च पुरुषार्थसाधनं तदेवाधिकारिणा जिज्ञास्यं तदेव च लक्षणेनापि निरूप्यम् , एवं च ब्रह्मपदसामर्थ्याद्यतो वा इमानि भूतानि जायन्त इतिवाक्ये भूतसृष्टिस्थित्यादिकारणे ब्रह्मशब्दप्रयोगाच्च जगत्कारणमद्वयं ब्रह्मैव कार्यानुमानेन सामान्यतोऽवगतं विशिष्य जिज्ञास्यमिति तदेव लक्ष्यं शेषीति ज्ञानादिपदान्यस्य लक्षणं प्रतिपादयेयुरिति भावः। ततः किं तत्राह। लक्ष्यार्पणेनेति। पदेनेति शेषः। लक्षणवाचि पदमिति शेषः। संगच्छते यद्ब्रह्म तत्सत्यज्ञानाद्यात्मकमितिवाक्यभावेन संगतं भवति। ज्ञानाद्यात्मतयाऽज्ञातब्रह्मण एव तथा प्रतिपाद्यतया प्रधानत्वात्तत्पदेन लक्षणवाचिपदानां तद्गुणभूतार्थानां संबन्धो वक्तव्यः, अन्यथा प्रतिपिपादयिषितार्थासिद्धेरिति भावः। प्रधानेनेतरेषामन्वये दृष्टान्तमाह। अरुणपदमिति। अरुणया पिङ्गाक्ष्या गवा सोमं क्रीणातीत्यत्र तृतीयान्तारुणादिपदानि क्रयसाधनार्थानि क्रीणातीत्येनान्वीयन्ते आरुण्यादिविशिष्टक्रयस्यैव विधेयत्वादिति यद्वत्तद्वदित्यर्थः ॥ १९५ ॥

पृष्ठात्परस्परयुजाप्रतिपत्तिरेषा-
मेवंविधत्वमुपपादयितुं समर्था ॥

लक्ष्यस्य तस्य महतः क्रयवस्तुवत् स्यात्
सर्वस्य कारकपदस्य परस्परेण ॥ १७६ ॥

नन्वेवं सत्यारुण्यादीनां यथा प्रत्येकमेव क्रयेणान्वयः प्रत्येकं निरपेक्षकरणविभक्तिश्रवणात् , एवं यद्ब्रह्म तत्सत्यं तज् ज्ञानं तदनन्तमिति सत्यादिपदानामन्योऽन्यं निरपेक्षमेव ब्रह्मणान्वयः स्यान्न तु परस्परमेलनमिति नास्माद्वाक्यात्सत्यज्ञानात्मकं ब्रह्म सिद्ध्येत्,अनेकरूपं च तत्स्यादिति तत्राह । पृष्ठादिति । सत्यादीनां प्रत्येकं ब्रह्मान्वयप्रतिपत्तेः पश्चादेषां सत्यादीनां परस्परयुजा अन्योन्यं संबन्धः अभेद इति यावत् । एषा प्रतिपत्तिर्लक्ष्यस्य तस्य महतो ब्रह्मण एवंविधत्वं सत्यज्ञानाद्यखण्डैकरसत्वमुपपादयितुं समर्था स्यादिति संबन्धः । इममप्यर्थमुक्तदृष्टान्तेनाह । क्रयवस्तुवदिति । क्रयवस्तुन इवेत्यर्थः । कारकपदस्यारुणादिपदस्य । यथा क्रयेण प्रत्येकमन्वितारुण्यादिगुणानां साक्षात्क्रयसाधनत्वायोगादेकहायनीद्रव्यावच्छेदकत्वेनान्वीयमानानां परस्परमन्वयः प्राप्नोति, एवं निरवधिकमहत्त्वशालिब्रह्मणा लक्ष्येणाभेदानुपपत्त्यैकस्यानेकस्वरूपतानुपपत्तेश्च परस्परं मेलनादभिप्रेतब्रह्मस्वरूपसिद्धिरिति ॥ १७६ ॥

तत्त्वंपदार्थविषयो नय एव योज्यः
सत्यादिवस्तुषु न तत्र विशेषकल्पः ॥

सत्यादिशब्दविषयाः शबलास्तदर्थ-
भागेषु लाक्षणिकवृत्तिरपीह तुल्या ॥ १७७ ॥

ननु सत्यादिपदवाच्यार्थोपादाने नोक्तब्रह्मस्वरूपलाभस्तेषामवश्यं परस्परं भेदात्, सत्यादिपदलक्षणायां च तस्यासत्याद्यात्मतापत्तिरित्याशङ्क्याह । तत्त्वंपदार्थेति । सत्यादिवस्तुषु सत्यादिपदार्थेषु । ननु सत्यादिपदार्थस्य ब्रह्मपदार्थेनान्वयात्तत्र च गुणगुणिभावेन नीलोत्पलवन्मुख्यार्थस्यैवान्वयसंभवात् किं तत्त्वंपदयोरिव लक्षणया येन तद्विषयो नयोऽत्रातिदिश्येत तत्राह । न तत्रेति । सत्यादिपदार्थेषु तत्त्वंपदार्थाभ्यां सकाशादन्वये विशेषप्रकारो नेत्यर्थः । सत्यादिपदार्थानां मुख्यब्रह्मान्वयानुपपत्तेर्लक्षणावश्यं वाच्येति भावः । यदुक्तं ब्रह्मण एवं सत्यसत्याद्यात्मतापत्तिरिति तदपि तदीयन्यायान्तरातिदेशेन परिहरति । सत्यादीति । शबला इति । तांश्च शबलाननुपदमेव वक्ष्यति । सत्यादिपदानामपि तत्त्वंपदयोरिव शबले शक्तिः, ततो जहदजहल्लक्षणया च वक्ष्यमाणन्यायेन तेषामभिमतात्मनि वृत्तिरिति न त्वदुक्तदोष इत्यर्थः ॥ १७७ ॥

आकाशादौ सत्यता तावदेका
प्रत्यङ्मात्रे सत्यता काचिदन्या ॥
तत्संपर्कात्सत्या तत्रचादन्या
व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र ॥ १७८ ॥

ननु किं तत्सत्यादिवाच्यं शबलं कथं वा तत्र व्युत्पत्तिरिति जिज्ञासायां तदाह। आकाशादौ सत्यतेत्यारभ्याकाशादावस्तितेत्यन्तैः सप्तभिः श्लोकैः आकाशघटादौ सत्यता व्यावहारिकसत्यता। व्यावहारिकसत्यत्वं च परमार्थसत्यत्वात् कल्पितभेदमस्त्येव सत्यं चानृतं च सत्यमभवदितिश्रुतेः, आकाशादेरात्मकार्यस्यार्थक्रियाकारित्वदर्शनाच्च, परमार्थसत्यतातिरिक्ता वियदादिसत्यताऽस्तीत्यर्थः। प्रत्यङ् मात्रे शुद्धात्मनि। सत्यता पारमार्थिकी सत्यता। अन्याकाशादिसत्यत्वाद्विलक्षणात्यन्ताबाध्यार्थलक्षणा। व्यावहारिकसत्यमेकमाकाशाद्यस्ति परमार्थसत्यं च प्रत्यग्रूपमन्यदस्तीत्यर्थः। ततः किं तत्राह। तत्संपर्कात् तयोः सत्ययोः परस्परं तादात्म्यात्, निष्पन्नेति शेषः। तत्रेत्यनुषङ्गः। सत्यता तत्र चान्या समुदायात्मिका। ततोऽपि किं तत्राह। व्युत्पन्न इति। तत्र सति शबले प्रत्यक्षादिसिद्धे सत्यशब्दस्य व्यवहारानुरोधेन शक्तिग्रह इत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम् ॥ १७८ ॥

बुद्धेर्वृत्तौ ज्ञानता तावदेका
प्रत्यग्बोधे ज्ञानता काचिदन्या ॥
तत्संपर्काज् ज्ञानता तत्र चान्या
व्युत्पन्नोऽयं ज्ञानशब्दस्तु तत्र ॥ १७९ ॥

बुद्धेर्वृत्तौ चक्षुरादिजन्यान्तःकरणवृत्तौ। ज्ञानता चै-

तन्याभिव्यञ्जकत्वरूपा ज्ञानता । प्रत्यग्बोधे प्रत्यक्चैतन्ये । ज्ञानता स्वप्रकाशज्ञानस्वरूपता ॥ १७९ ॥

बुद्धेर्वृत्तौ तावदानन्दतैका
प्रत्यङ्मात्रे का चिदानन्दताऽन्या ॥
तत्संपर्कात्तत्र चानन्दतान्या
व्युत्पन्नोऽयं तत्र चानन्दशब्दः ॥ १८० ॥

आनन्दता आनन्दपदव्यवहारयोग्यता प्रथमा । परमप्रेमास्पदत्वयोग्यतारूपानन्दता द्वितीया ॥ १८० ॥

आकाशादौ नित्यता तावदेका
प्रत्यङ्मात्रे नित्यता काचिदन्या ॥
तत्संपर्कान्नित्यता तत्र चान्या
व्युत्पन्नोऽयं नित्यशब्दस्तु तत्र ॥ १८१ ॥

नित्यता कल्पस्थायितारूपा नित्यतेत्यर्थः । त्रिकालापरिच्छेद्यस्वरूपा द्वितीया नित्यता द्रष्टव्या ॥ १८१ ॥

आकाशादौ शुद्धता तावदेका
प्रत्यङ्मात्रे शुद्धता काचिदन्या
तत्संपर्काच्छुद्धता तत्र चान्या
व्युत्पन्नोऽयं शुद्धशब्दस्तु तत्र ॥ १८१ ॥

शुद्धता अस्पृश्यताप्रयोजकरूपरहिततारूपा पङ्कादिमलवद्द्रव्यसंबन्धराहित्यरूपा वा । प्रतीचि तु सा सर्वप्रकाराऽशुचित्वाभावोपलक्षितस्वरूपात्मिकाऽविद्याराहित्यरूपा वेत्यर्थः ॥ १८२ ॥

गोवत्सादौ मुक्तता तावदेका
प्रत्यङ्मात्रे मुक्तता काचिदन्या ॥
तत्संपर्कान् मुक्तता तत्र चान्या
व्युत्पन्नोऽयं मुक्तशब्दस्तु तत्र ॥ १८३ ॥

मुक्तता बन्धनरहिततारूपा । प्रतीचि तु संसारानर्थस्य नित्यनिवृत्तिरूपा सा ॥ १८३ ॥

आकाशादावस्तिता तावदेका
प्रत्यक्त्वे चास्तिता काचिदन्या ॥
तत्संपर्कादस्तिता तत्र चान्या
व्युत्पन्नोऽयं तत्र चास्तीति शब्दः ॥ १८४ ॥

अस्तिता विद्यमानता नञर्थानुल्लिखितधीविषयतारूपभावता वा । प्रतीचि तु सा सदितिप्रतीतियोग्यतारूपा । एवं सूक्ष्मविभ्वादिपदानां केशाकाशादिशबले व्युत्पत्तिर्द्रष्टव्या ॥ १८४ ॥

यो यः शब्दो यत्कृतेऽर्थे निरूढ-
स्तत्रैवार्थे लक्षणा वृत्तिरस्य ॥
वक्तव्या स्यात् पण्डितैरेवमेतत्
प्रत्यक् पूर्णं ब्रह्म वेदान्तवेद्यम् ॥ १८५ ॥

नन्वेवं भवतु सत्यादिवाच्यस्वरूपं तत्र च सत्यादिशब्दस्य व्युत्पत्तिः, तथापि कथं तल्लक्ष्यस्य निर्णयः तद्वाच्ये भागद्वयसत्त्वेन हेयोपादेयभागविभागासंभवादित्याशङ्क्याह । यो य इति । येन कृतं य-

त्कृतं तस्मिन्नर्थे सत्यादिशब्दे निरूढो वाचकत्वेन प्रसिद्धस्तत्रैव निमित्तभूते परमार्थसत्यादिस्वभावेऽस्य सत्यादिपदस्य लक्षणेति संबन्धः । यद्यपि सत्यादिपदवाच्यमात्मानात्मभागद्वयं कृतम्, तथापि गगनादेस्तद्वाच्यभागस्य यत्सत्यत्वाद्युक्तं तत्सत्यादिस्वभावाधिष्ठाननिरपेक्षं न भवति तदात्मनैव तस्यार्थक्रियाजनकत्वादिरूपवत्त्वादन्यथा निरात्मनस्तस्य तदयोगादेवं चात्माकाशादिस्वरूपं भूत्वैव तेन शबलितः सन्सत्यादिशब्दवाच्यतां लभत इति निरपेक्षात्कृत एव सत्यादिपदवाच्यतार्होऽर्थ इति स एव निरपेक्षः सत्यादिस्वभावो लक्षणयोपादीयत इति न तस्मिन्निर्णयकारणशून्यतेत्यर्थः । एतच्च पण्डितैरित्यनेन द्योतितम् । एवमद्वयब्रह्माभेदप्रमितिबलादपि लक्ष्यनियमसिद्धिरित्यभिप्रेत्याह । एवमेतदिति । वेदान्तवेद्यमेतत्प्रत्यग्ब्रह्म एवं सति पूर्णं स्यादित्यत्रापि संबन्धः । वियदादेर्वाच्यभागस्य ब्रह्माभेदानुपपत्तेश्च न तल्लक्षणा व्यर्था न च न ब्रह्म पूर्णं सिद्धेरदिति भावः ॥ १८५ ॥

सत्येऽप्यस्ति ज्ञानता ज्ञानतायां
सत्यत्वं च स्पष्टमस्त्येव तद्वत् ॥
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः ॥ १८६ ॥

ननु सत्यादिवाक्यस्यैकरसब्रह्मार्थत्वे तत्पदानां पर्यायतापत्तिरित्याशङ्क्य किं सत्यादिपदानामपर्यायत्वेन तदर्थभेदः सिषाधयिषितः, उत सिद्धान्ते तत्परिहारजिज्ञासामात्रमिति विकल्प्याद्येऽत्यन्तभेदवादिनं प्रत्याह । सत्येऽपीत्यादिना । सत्यपदलक्ष्येऽपीत्यर्थः । ज्ञानता ज्ञानाभेदः । तर्हि किं रजताधिष्ठानशुक्तिरिव स्वाभिन्नाद्रजतात् सत्यमपि स्वाभिन्नाज्ज्ञानाद्भिद्यते नेत्याह । ज्ञानतायामिति । ज्ञाने यथा ज्ञानं सत्याभिन्नं तथा स्पष्टं सत्यत्वं च ज्ञानाभिन्नम्, सत्यज्ञानयोरत्यन्तमभेद इत्यर्थः । ननु भवतु सत्यज्ञानयोरभेदस्तथाप्यतिरेकरूपेषद्भेदोऽपि वाच्यः । अन्यथा तत्पदद्वयसामानाधिकरण्यायोगादिति न तदुभयलक्ष्यमत्यन्ताभिन्नमिति भेदाभेदमाशङ्क्याह । सत्यप्येवमिति । एवं सत्यप्यतिरेकावकाश इति यत्तन्नेति संबन्धः । कुतस्तत्त्वे ज्ञानानन्दात्मके वस्तुनि पूर्णेऽत्यन्तमभिन्ने सति ज्ञानसत्योपपत्तेः ज्ञानस्य ज्ञानत्वं सत्यस्य सत्यत्वं चोपपद्यत इत्यर्थः । यदि सत्यं ज्ञानाद्भिन्नं स्यात्तदा तस्य दृश्यतया सत्यत्वं न स्यात्, एकदेशिमते ज्ञानाभेदोऽप्यस्तीति चेज्ज्ञानभेदस्यापि सत्वे तदपरिहारात्, अन्यथा तदस्फुरणात्, एवं ज्ञानमपि सतो भिन्नं चेदसदेवेति न ज्ञानं स्यादिति तयोरत्यन्तमभेद एव । शब्दापर्यायत्वं सामानाधिकरण्यं च ल-

क्ष्यैक्येऽपि वाच्यभेदादुपपन्नतरमिति द्वितीयकल्पोऽपि निरस्त इति भावः। एवमुत्तरश्लोकयोरपि द्रष्टव्यम्॥१८६॥

आनन्दत्वे ज्ञानता ज्ञानताया-
मानन्दत्वं विद्यते निर्विशङ्कम् ॥
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे ज्ञानसौख्योपपत्तेः ॥ १८७ ॥

आनन्दत्वे आनन्दे। ज्ञानसुखयोर्भेदे सुखस्य दृश्यत्वादिदोषो ज्ञानस्य प्रेक्षावदुपेक्ष्यतापत्तिरिति भावः ॥

आनन्दत्वे सत्यता सत्यताया-
मानन्दत्वं निर्विवादं प्रसिद्धम् ॥
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे सत्यसौख्योपपत्तेः ॥ १८८ ॥

आनन्दत्व इति श्लोकान्तरं स्पष्टम्॥ १८८ ॥

शेषेऽप्यूह्यं न्यायसाम्यादशेष-
मन्योऽन्यस्मिन्नस्तिता पूर्णता च ॥
अन्योऽन्यस्याजामिता शब्दशक्ते-
रेवं सुस्थं सर्वमुक्तोपपत्तेः ॥ १८९ ॥

ननु भवतु सत्यादीनामत्यन्तमभेद एकस्मिन्वाक्ये समानाधिकरणपदैस्तेषामुपादानात्। नित्यशुद्धत्वादीनां तु तत्रतत्र वाक्ये पृथक्पृथगुपात्तानामत्यन्ताऽभेदे न किं चित्प्रमाणमित्याशङ्क्य तेषामपि पूर्णब्रह्मभेदानुपपत्त्या परस्परभेदे तेषामशुद्ध्याद्यापत्तेश्चात्यन्ताभेद ए-

वोचित इत्याह । शेषेऽपीति । सत्यज्ञानानन्दातिरिक्तेषु नित्यादिपदार्थेषु, अशेषं सत्यादिपदार्थेषु यदुक्तं लक्ष्यैक्यादि तत्सर्वमुक्तन्यायसाम्यादूह्यम् । अशेषमित्युक्तमेव विशदयति । अन्योऽन्यस्मिन्नित्यादिना । अन्योऽन्यस्यान्योन्यस्मिन्नस्तितेति संबन्धः । चकारात्सामानाधिकरण्यं सूचयति । शब्दशक्तेरजामितेति संबन्धः । जामिता पुनरुक्तता कार्यान्तराभावेनाप्रयोजकता वा नास्तीत्यर्थः । उपसंहरति । एवं सुस्थमिति ॥ १८९ ॥

बोधात्मत्वे निर्निमित्ते प्रतीचो
बोधात्मत्वे तन्निमित्ते च बुद्धेः ॥
बोधात्मत्वे बुद्धिधर्मौ च बुद्धे-
रुक्ते साक्षाद्वेदसिद्धान्तविद्भिः ॥ १९० ॥

ननु शबलं ब्रह्मात्मादिपदानां वाच्यमित्युक्तं तदनुपपन्नं मूलग्रन्थे तथाऽदर्शनात्, अत एव प्रत्यक्त्वं बोधत्वं च बुद्धेरित्यप्ययुक्तमित्याशङ्क्य नैष्कर्म्यसिद्धावाचार्यैस्तदुभयमप्युक्तमित्याह। बोधात्मत्वे इति। निर्निमित्ते स्वाभाविके। तन्निमित्ते स्वाभाविकप्रत्यग्बोधात्मनिमित्ते बुद्धेरिति संबन्धः । बुद्धेर्बोधात्मत्वे बुद्धिधर्मावेव न त्वात्मन इव स्वरूपभूते , आत्मनो हि सर्वान्तरस्वप्रकाशस्य प्रत्यक्त्वं बोधत्वं च स्वाभाविकं बुद्धेस्तु तदध्यासात्तद्धर्मसंबन्ध इति ते स्वाभाविके नेत्यर्थः तदुक्तमाचार्यैः। कूटस्थबोधः प्रत्यक्त्वम-

निमित्तं सदात्मनः । बोद्धृताहन्तयोर्हेतुस्ताभ्यां तेनोपलक्ष्यते । बुद्धेरित्युत्तरश्लोके लभ्यते । एवं च बुद्धेरपि बोद्धृताऽहन्तयोरन्यनिमित्तयोरभिधानादात्मनश्च तदुपलक्ष्यत्वोक्तेर्वास्तवावास्तवप्रत्यक्त्वद्वयशबलस्यैवाऽहंपदवाच्यत्वं बुद्धेश्च बोधात्मत्वादिधर्मवत्त्वं तत्संमतमिति नाऽस्माभिः स्वेच्छया कल्पितमिति भावः । एवं च ब्रह्मादिपदस्यापि शबले संगतिरविरुद्धेति द्रष्टव्यम् ॥ १९० ॥

जहतीह च लक्षणा मता
गुणवृत्तिश्च तथाऽभ्युपेयते ॥
न विशेषविनिर्णयक्षमं
किमपीहास्ति विशेषकारणम् ॥ १९१ ॥

तत्त्वंपदयोरिव सत्यादिपदेष्वपि जहदहजल्लक्षणोपपादिता , इदानीं तद्वदत्रापि लक्षणान्तरं वृत्त्यन्तरं चातिदिशति । जहतीति । इह अवान्तरवाक्ये जहती लक्षणा च मतेष्टेत्यर्थः । तथा तत्त्वंपदार्थयोर्यथेत्यर्थः । तथा प्राण इतिवद्व्यवहितपरामर्शस्यापि संभवात् तथेह जहतीति योजनीयम् । यथा जहती मता तथैव वृत्त्यन्तरं चास्तु । विशेषविनिर्णयक्षमं जहदजहल्लक्षणैवसत्यादिपदेषु न वृत्त्यन्तरमिति न निर्णययोग्यमित्यर्थः । विशेषकारणं विशेषप्रमाणम् । एतदपि प्रौढयैवोक्तं वृद्धानां सत्यादिपदव्यवहारस्य गगनादि-

शबल एवानियमेन दर्शनात् । गगनं सत्यमित्यादिप्रयोगाद्धि गगने सत्यादिशब्दसंगतिग्रहो वाच्यः, स च प्रयोग आत्मानात्मसमुदायगोचरः, आत्माऽन्यस्य सत्त्वपदार्थस्यासंभवात्। यद्यपि व्यावहारिकी सत्यता गगनादावप्यस्ति तथापि सा तथा गृह्यमाणाऽऽत्मानं व्यावर्त्तयेन्न तु सत्यत्वादिरूपेण गृह्यमाणा । वक्ष्यमाणरीत्या व्युत्पत्तिकाले तस्या विविच्य ज्ञातुमशक्यत्वाद्विचारदशायामेव तत्कल्पनात् । ततश्चाधिष्ठानव्यावृत्तरूपेण गगनादिस्फुरणाभावान्न केवलतद्गोचरः शक्तिग्रहः । न चैवमपि विशिष्टादन्यस्मिन्केवले जहल्लक्षणैव पदानां युक्तेति वाच्यम्। विशिष्टस्वरूपस्य विशिष्टरूपेण स्वस्मात्कल्पितभेदेऽपि तत्त्वतस्तदभावेन विशिष्टरूपस्य केवलाभिन्नस्य त्यागासंभवेन जहदजहल्लक्षणया तस्योपादेयत्वात् । एतच्चाग्रे स्वयमेव वक्ष्यति । एवं वाक्यार्थे कस्यापि गुणस्य योगाप्रतीतेर्गौण्यपि न संभवतीति ॥ १९१ ॥

ऐश्वर्यमप्यनुभवादिवदात्मरूपं
तस्मादबोधगतमस्य च तानि कस्मात् ॥
नेष्टानि पूर्ववदिति ब्रुवतो मुखस्य
सद्यः पिधानमनुसृत्य वचांसि कुर्मः ॥ १९२ ॥

ननु यथा सत्यादिवाक्यसामर्थ्यात्तत्तत्पदेषु भागत्यागोपादानलक्षणया सदाद्यात्मकं ब्रह्मेत्यङ्गीकृतम्, ए-

वमेष सर्वेश्वर इति श्रुतिसामर्थ्यादैश्वर्यमप्यात्मस्वरूपं जहदजहल्लक्षणया किमिति नाङ्गीक्रियते तस्यापि ज्ञानाद्यविशेषादिति शङ्कते । ऐश्वर्यमिति । आत्मरूपमेकम् । तस्मात् अबोधगतं मायागतमन्यदिति शेषः, मायायामपि तत्रतत्र पुराणे दुर्गादिरूपायामीश्वरीशब्दप्रयोगात् । अस्य तदुभयशबलस्य चापरम् । तानि त्रिविधान्यैश्वर्याणि । पूर्ववत्त्रिविधसत्यत्वादिवत् । तद्दूषणं प्रतिजानीते । इति ब्रुवत इति । वचांस्यनुसृत्येति संबन्धः । तस्मै निरुत्तरमुत्तरं दद्म इत्यर्थः ॥१९२॥

ऐश्वर्यवर्णनमतिस्फुटमेव कृत्वा
नेतीत्यवादि बहुशः श्रुतिभिः प्रयत्नात् ॥
सत्यादिवस्तुनि पुनर्न तथास्ति पूर्व-
मुक्त्वा निषेधनमितीह विशेषयुक्तिः ॥ १९३ ॥

तदेव विवृणोति । ऐश्वर्यवर्णनमिति । किमैश्वर्यशब्देनानुभवादिगतनिरतिशयत्वादिविशेषः कथ्यते, किं वा स्वातन्त्र्येण निखिलजगत्सर्जनपालनादिव्यापारः । आद्येऽस्मदिष्ट एव, ज्ञानादिपदैरेव निरतिशयज्ञानादेर्लक्षितत्वेन पदान्तरेणापि तस्य प्रतिपाद्यत्वात् । न द्वितीयः, यतः सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानेष सर्वेश्वर इत्यादिवचनेन ऐश्वर्यं निरङ्कुशं तस्योक्त्वा स एष नेतिनेत्यात्मेति श्रुति-

रेव तत्प्रतिषेधति। एवमन्तर्यामिब्राह्मणेऽपि यः पृथिव्यां तिष्ठन्नित्यादिना बहुप्रकारेण तस्य निखिलजगन्नियन्तृत्वरूपमैश्वर्यमुपवर्ण्य अन्तेऽतोन्यदार्तमिति तत्प्रतिषेधति। एवं मूर्तामूर्तब्राह्मणेऽपि पञ्चमहाभूतवासनात्मकतद्रूपाण्युक्त्वा अथात आदेशो नेतिनेतीति श्रुतिस्तात्पर्येणापवदति। तदिदमाह। बहुश इति। ततः श्रुतिभिरेव तस्य निराकृतत्वान्न तदनुभवादिवदात्मरूपतया श्रुतिप्रतिपाद्यम्। सत्यादिवस्तुनि तु न तथा पूर्वं प्रतिपाद्य निषेधनमस्तीत्यस्ति तयोर्महान्विशेषः। अतः सत्यादिकमेवात्मरूपमिति भावः ॥ १९३ ॥

शब्दस्य लाक्षणिकमुख्यविभागभिन्ना
वृत्तिर्हि लौकिकवचस्युपलब्धपूर्वा ॥
यस्मादतो न घटते यदि मुख्यवृत्ति-
राश्रीयतामिह गिरश्चरमापि वृत्तिः ॥ १९४ ॥

ननु विचारेण शुद्धोपस्थितिमन्तरेण तत्र लक्षणानवतारात्साऽवश्यं वाच्या, एवं च तत्र सत्यादिपदानां शक्तिरेवास्तु किं लक्षणयेति चेन्न, सर्वपदस्य तत्र शक्तौ पदान्तरवैयर्थ्यादिदोषप्रसङ्गात्, किं च लक्षणापरिहारार्थं तत्र शक्तिः कल्पनीया, उत तत्प्रतीतये, नाद्यः, तथा सति लोकप्रसिद्धवृत्त्यन्तरविलोपप्रसङ्गात्, स चान्याय्य इत्यभिप्रेत्याह। शब्दस्येति। उपलब्धपूर्वा पूर्वं निश्चिता। साप्येवं सति न स्यात्तीरादा-

वपि गङ्गादिपदस्यैव शक्तिप्रसङ्गो यस्मादतो मुख्यत्वनिर्वाहाय लक्ष्ये न शक्तिः, कल्पनीयेति शेषः । न द्वितीयः, प्रथमक्लृप्तशक्त्यनुरोधेन मुख्यार्थासंभवे लोक इव लक्षणया तत्प्रतीत्युपपत्तेरित्याह । न घटते यदीति ॥ १९४ ॥

तस्मादखण्डमवबोधयितुं समर्थो
वेदान्तभूमिगतशब्दसमन्वयोऽतः ॥
संसर्गलक्षणमपास्य विरोधहेतो-
र्वाक्यार्थमद्वयमखण्डमिहाश्रयस्व ॥ १९५ ॥

ननु सर्वेषां पदानां यद्येकप्रातिपदिकार्थे लक्षणा तर्ह्येकपदादेव तत्प्रतीतिसंभवाल्लक्षणापक्षेऽपि पदान्तरं व्यर्थमिति शङ्कां निराकुर्वन्नुपसंहरति । तस्मादिति । शब्दसमन्वयो वाक्यम् । लक्षणायां हि सर्वमपि पदमर्थवदेव, अन्यथा यदेव पदं न प्रयुज्येत ब्रह्मणस्तदर्थात्मताकारसंशयो न निवर्त्तेत तद्भेदस्यान्यतोऽनवगमात् । एवं तदा लक्षणाबीजान्वयानुपपत्तिप्रतिसंधानाभावाल्लक्षणापि न स्यात् । न ह्येकपदप्रयोगेऽपि क्वचिल्लक्षणावतरतीति न शक्तिसाम्यमिति भावः । फलितमाह । अतः संसर्गलक्षणमिति । तादात्म्यलक्षणमित्यर्थः । विरोधहेतोः सत्यादिपदवाच्याभेदविरोधादित्यर्थः । इह ब्रह्मवाक्ये ॥ १९५ ॥

सामानाधिकरण्यमत्र भवति प्राथम्यभागन्वयः

पश्चादेष विशेषणेतरतया पश्चाद्विरोधोद्भवः ॥
उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके
वृत्तिर्लक्षणया भवत्ययमिह ज्ञेयः क्रमः सूरिभिः॥१९६॥

वेदान्तानामखण्डार्थप्रतिपादनक्रममाह । सामानाधिकरण्यमिति । सामानाधिकरण्यादीनामुत्तरश्लोके संबन्धिनः स्पष्टं निर्देक्ष्यन्ते । अत्र ब्रह्मवाक्ये सामानाधिकरण्याख्योऽन्वयः प्राथम्यभाक् प्रथमं भवति, पश्चाद्विशेषणेतरतया विशेषणविशेष्यभावेनाभेदेनेति यावत् एषः अन्वयो भवति , पश्चात्तत्र विरोधोद्भवः विरोधस्फूर्तिः, ततो विरोध उत्पन्ने ज्ञाते एकरसकेऽखण्डात्मके वस्तुनि लक्षणया वृत्तिर्भवति, ततो वाक्यार्थधीर्भवतीत्यखण्डार्थप्रतिपत्तिक्रमः सूरिभिर्ज्ञेय इत्यर्थः ॥ १९६ ॥

सामानाधिकरण्यमत्र पदयोर्ज्ञेयस्तदीयार्थयोः
संबन्धस्तु विशेषणेतरतया ताभ्यां सहास्यात्मनः ॥
संबन्धोऽप्यथ लक्ष्यलक्षणतया विज्ञेय एवं बुधै-
रेतान्यर्थपदानि बुद्धिपदवीमारोहणीयानि तु॥१९७॥

ननु कस्य सामानाधिकरण्यान्वयः कस्य वा विशेषणतादिरित्याकाङ्क्षायामाह । सामानाधिकरण्यमत्र पदयोरिति । सामानाधिकरण्यं संबन्धः पदयोर्ज्ञेयः । पदयोरिति द्विवचनं तत्त्वमस्यभिप्रायं बहूनामप्युपलक्षणम् । अपर्यायपदानामेकार्थवृत्तित्वं सामानाधिकर-

ण्यान्वय इति पदानामेव स इत्यर्थः । विशेषणेतरतया तु संबन्धस्तत्त्वंपदार्थयोः, तत्त्वमादिवाक्यश्रवणानन्तरं हि तदर्थयोरहं ब्रह्मेतिविशिष्टाभेदो ज्ञायते, अन्यथा सामानाधिकरण्यायोगात् । एतच्चोद्भिदा यजेतेत्यत्रोद्भिद्यागपदयोरप्यस्ति सामानाधिकरण्यं न चाखण्डार्थतेति तद्व्यावृत्तय उक्तम् । तथापि नीलमुत्पलमित्यादौ नाखण्डार्थता तत्राह । ताभ्यां सहेति । अत्र विरोधोद्भवे सतीति द्रष्टव्यम्, अन्यथा लक्षणानवतारात् । तत्त्वंपदार्थाभ्यां विशेषणविशेष्याभ्यामस्यात्मनो लक्ष्यलक्षणतया संबन्धो विधेयः । लक्ष्यं शुद्धात्मस्वरूपं लक्षको वाच्योऽर्थः, एतच्च पदार्थलक्षणापक्षमादायोक्तम् । उपसंहरति । एवमिति । अर्थपदान्यर्थप्रतिपत्तिसाधनानि बुद्धिपदवीमारोहणीयानि बुद्धौ धारणीयानि, तुरवधारणे, नैव विस्मर्तव्यानीत्यर्थः । यत्तु जीवपरयोरंशांशिभावेन शरीरतदवयवयोर्दीर्घबाहुर्देवदत्त इतिवत्कार्यकारणभावेन वा मृद् घट इतिवदभेदप्रतीत्युपपत्तेर्न विरोधोद्भवो न वा लक्षणेति क्वाखण्डार्थतेति । तन्न । न जायते म्रियते इत्यादिनिखिलविकारनिषेधश्रुतेः, अन्यथा जीवस्यापि घटादिवन्नाशप्रसंगात्, निष्कलं निष्क्रियमित्यादिश्रुतेश्च न वस्तुतोंऽशांशिता, अन्यथा तदंशिनो ब्रह्मणो देवदत्तवत्सावयवतयाऽनित्यत्वापत्तिः । अतोऽत्य-

त्ताभेद एव पदार्थयोर्वाक्यार्थो वक्तव्योऽस्ति तत्र चास्त्येव विरोध इति कथं न लक्षणा कथं वा वाक्यस्य नाखण्डार्थतेति । इदमिहाचार्याभिप्रेतम् । तत्त्वंपदयोरपर्याययोः समानविभक्तिकयोः परस्पराकाङ्क्षयोरर्थान्तरासंभवादेकार्थवृत्तित्वं वक्तव्यमिति प्रथममधिकारिणानुसंधेयम्, ततस्तद्बलात्तदर्थयोरत्यन्ताभेदः अन्यथा तयोः सामानाधिकरण्यायोगादिति चानुसंधेयम्, ततस्तत्र विरोधोऽपि प्रतिसंधेयः, तदनन्तरं नेदं वाक्यं प्रमत्तगीतं वाक्यान्तरतुल्यत्वान्नाप्यदृष्टार्थं तदध्ययनं दृष्टे संभवति तदयोगादिति विचारयतो लोकसिद्धमर्यादया पदद्वयलक्षणया तत्त्वमितिवाक्यमखण्डमेव ब्रह्म प्रतिपादयेत्, एवं सत्यज्ञानादिवाक्यमपीति ॥ १९७ ॥

निःसंधिबन्धनमिदं चिदचित्स्वरूपं
संकीर्णमन्तरपरिस्फुरणेन शून्यम् ॥
आचित्तशुद्धिफलतः स्फुरितोपपत्तेः
शब्दार्थसंगतिमिहैव तु गृह्णतेऽज्ञाः ॥ १९८ ॥

ननु भवतु लक्षणया वाक्यस्याखण्डार्थता तथापि जहदजहल्लक्षणेति न सम्यगिव, शबले संगतौ हि सा स्यात्सा चानुपपन्ना लाघवादेकत्रैवांशे शक्तेर्न्याय्यत्वादन्यथा गौरवात्तत्र यद्यप्यात्मांशे सा न संभवत्युक्तदोषादनात्मांशे तु शक्तौ न किं चिद्बाधकमित्याशङ्क्य सं-

गतिग्रहवेलायां लाघवाद्यनन्तताराच्छबलव्युत्पत्तौ न किंचिद्बाधकमस्तीति वक्तुमुपस्थित्यनुरोधेन शबले संगतिग्रहमाह । निःसंधिबन्धनमिति । इदं चिदचित्स्वरूपम् । आचित्तशुद्धिफलतः आङ्मर्यादायां चित्तशुद्धिफलरूपायाः स्फुरितोपपत्तेरुपपत्तिस्फुरणपर्यन्तम् । अन्तरपरिस्फुरणेन शून्यम् स्फुटभेदज्ञानशून्यम् । निःसंधिबन्धनं तादात्म्यरहितम् । तत्र हि भेदसहिष्णुरीषदभेदोऽस्तीति संधिबन्धनपदसूचितस्य तस्यात्र निषेधात्, अतः संकीर्णमध्यस्तात्यन्तिकाऽभेदेन प्रतीयमानं भवतीति शेषः । ततः किं तत्राह । शब्दार्थसंगतिमिति । इह शबले । अज्ञाः भागद्वयविवेकशून्याः । ज्ञाते हि संगतिग्रहः, ज्ञानं च प्राक् शबलस्यैव न तु तदंशयोः स्पष्टमीषद्वा विविच्य संगतिग्रहसमये ग्रहणमस्ति, इति शबल एव संगतिग्रह इति भावः ॥ १९८ ॥

शब्दार्थसंगतिविदामथ सत्त्वशुद्धे-
रुत्पन्नतर्कदृढलोहशलाकया तु ।
दृश्यं दृशं च निपुणं द्वयमन्तरेण
निक्षिप्तया दृग्दृशोः क्रियते विभागः ॥ १९९ ॥

नन्वहंकारादेर्दृश्यत्वात्तस्य स्वातिरिक्तद्रष्टृकत्वनियमात्तद्द्रष्टा ततोऽन्यस्तस्माच्च दृश्यमन्यदिति कथं तस्य विवेकग्रहासंभवः, एवमहंकारस्य कामाद्याश्रयत्वादपि दृग्रूपाद्द्रष्टुरन्यत्वं द्रष्टुरसंगस्य दृश्याश्रयत्वायोगा-

दित्यतोऽपि तद्विवेकः संभवतीति कथं तत्र संगतिग्रहो न भवेदिति चेत्,सत्यमयं विवेकोपायः, परं त्वयमहमादिशब्दार्थसंगतिं जानतः समयान्तरेऽन्तःकरणशुद्धौ सत्यां मुमुक्षोरात्मविचारे प्रवृत्तेऽवतरति न तु प्रागन्यथा वादिनामहंकाराद्यात्मत्वभ्रमो न स्यात्ततस्तत्पूर्वकालीनसंगतिग्रहः शबलगोचर एवेत्याह । शब्दार्थेति । अथ संगतिग्रहानन्तरं समयान्तरे । सत्त्वमन्तःकरणम् । उत्पन्नतर्कदृढलोहशलाकया उत्पन्नो यो वर्णितस्तर्कः स एव दृढलोहशलाका, यथा दृढलोहशलाका नीरन्ध्रसंसृष्टपाषाणादीन्वियोजयत्येवं दुर्विवेकचिदचिद्रूपाहंकारग्रन्थेर्विवेचनादबाधाच्चायं तर्को दृढलोहशलाकेत्युक्तः , तया दृश्यं दृशं च द्वयमन्तरेण दृग्दृश्ययोर्द्वयोर्मध्ये निक्षिप्तया निवेशितया दृग्दृश्यविभागविषयतया प्रयुक्तयेति यावत्, दृगदृशोरात्मानात्मनोर्विभागः क्रियते ज्ञायते । ततस्तत्पूर्वमेव शबले संगतिग्रहान्नांशमात्रं तद्गोचरः, अन्यथा प्राक् संगतिसंवेदनमन्तरेण विचारस्यानवताराद्विवेकग्रह एव न स्यादिति भावः ॥१९९॥

शुद्ध्युत्थतर्कजनितं चिदचिद्विभागं
प्राप्य स्थिताः पुनरिमां गिरमुद्गिरन्ति ॥
सत्यादिशब्दगण एष तु तत्रतत्र
व्युत्पत्तिमान् शबलवस्तुनि नो दृशीति ॥२००॥

ननु प्राग् विवेकग्रहाभावे कथं शब्दार्थस्य शबलत्वसिद्धिरितराशङ्क्य समयान्तरे तद्विवेकादेव प्रागविवेकक्लृतशबल एव संगतिग्रहात्स एव शब्दार्थ इति निश्चीयत इत्याह । शुद्ध्युत्थतर्केति । अन्तःकरणशुद्ध्यनन्तरं प्रवृत्ततर्केण जनितं चिदचिद्विभागं तद्विभागनिश्चयमुद्गिरन्ति वदन्ति । तामेव गिरं दर्शयति । सत्यादीति । अहमादेरप्युपलक्षणम् । दृशि शुद्धात्मनि । नो नेत्यर्थः ॥ २०० ॥

एकत्र शक्तिग्रहणोपपत्ता-
वनेकक्लृप्तिः क्रियते किमर्थम् ॥
इत्येतदेवं सति नास्ति चोद्यं
पुराऽस्य पुंसः परमाविवेकात् ॥ २०१ ॥

एवं सति यदुक्तं लाघवादेकत्रैव शक्तिर्न तु शबले गौरवादिति तदप्यसाधु, पूर्वं केवलोपस्थित्यभावेन लाघवादेरनवतारादित्यभिप्रेत्य तदनुवादपूर्वकमाह । एकत्रेति । अनेकक्लृप्तिः । अनेकात्मके शबले क्लृप्तिः, शब्दशक्तेरिति शेषः । पुरा असंगतिग्रहसमये । अस्यअधिकारिणः । परमाविवेकात् । अत्यन्तमविवेकात् ॥२०१॥

अत्राह वाच्यशबलान्वितवस्तुनीयं
तद्वर्त्मना भवति लाक्षणिकी प्रवृत्तिः ॥
किं वा तदन्वितविलक्षणवस्तुनि स्या-
च्छब्दस्य नोभयमपि प्रतिभाति युक्तम् ॥२०२॥

पूर्वं मानान्तराधिगतगोचरगामिनी स्याच्छब्दस्य लाक्षणिकवृत्तिरिति प्रलाप इत्यादिश्लोकेन वाच्यार्थसंबन्धितया मानान्तराधिगते लक्षणा वाच्या आत्मा च न तथेति न लक्षणासंभव इत्याशङ्का तथाधिगतिमात्रं लक्ष्यस्यापेक्षितं न तु मानान्तरेणापि, अधिगतिमात्रं चात्मन्यपि संभवतीति निरस्ता, इदानीं प्रकारान्तरेणाखण्डवाक्यार्थं दूषयितुं किं लाक्षणिकशब्दजन्यज्ञाने लक्ष्यं वाच्यार्थसंबन्धित्वेन विषयो भवति, केवलस्वरूपेण वेति विकल्पयति । अत्राहेति । लाक्षणिकी प्रवृत्तिःलक्षणाजन्यशाब्दज्ञानमित्यर्थः, तदन्वितविलक्षणवस्तुनीति । शबलान्विताद्विलक्षणं यद्वस्तु तस्मिन् शबलानन्वितवस्तुमात्र इत्यर्थः । शब्दस्य लाक्षणिकी प्रवृत्तिरिति संबन्धः । उभयत्रापि दूषणं संभावयति । नोभयमिति ॥ २०२ ॥

संबन्धिरूपं यदि वस्तु लक्ष्य-
मखण्डवाक्यार्थमतिः कुतस्त्या ॥
अनन्वितं वस्तु पदार्थलक्ष्यं
न लक्ष्यते कुत्र चिदत्र लोके ॥ २०३ ॥

दूषणमेवाह । संबन्धिरूपमिति । वाच्यार्थसंबन्धित्वविशिष्टमित्यर्थः । लोके हि गङ्गापदादिना तीरादि स्वार्थसंबन्धित्वेनैव लक्ष्यते, अन्यथा तत्र ततो नियमेन प्रवृत्त्यनुपपत्तेः, एवमिहापि तत्त्वमादि-

वाक्यजन्यं ज्ञानं शबलान्वितत्वेन यदि ब्रह्म विषयीकुर्यात्तर्ह्यखण्डार्थता तस्य कुतो भवेत्। द्वितीये तु नायं दोषः, परं तु तदेव न सिद्ध्यति लोके तथाऽदर्शनादन्यथा समुद्रतीरादेरपि गङ्गाशब्दात्प्रतीतिप्रसङ्ग इति भावः ॥ २०३ ॥

पूर्वक्षणे भवति वाच्यपदार्थभाग-
भागित्वसंगतिरिहात्मनि निर्विभागे ॥
मोहोपदर्शितवपुर्घटते ततोऽस्मि-
ञ्छब्दस्य लाक्षणिकवृत्तिरदोषदुष्टा ॥ २०४ ॥

सिद्धान्ती द्वितीयपक्षमादाय समाधत्ते । पूर्वक्षणेति । वाक्यार्थप्रतीतेः पूर्वकाल इत्यर्थः । इह निर्विभागे आत्मनि । मोहोपदर्शितवपुः, मोहेनोपदर्शितं वपुः स्वरूपं यस्याः संगतेः सा तथा । वाच्यपदार्थभागभागित्वसंगतिः, तत्प्रतीतिरिति यावत्, पूर्वक्षणेऽपेक्षिता भवतीति संबन्धः। लक्षणायाः प्रागेव लक्ष्यस्य वाच्यार्थसंबन्धित्वेन ज्ञानमपेक्षितमन्यथा तया तदुपस्थित्यसंभवान्न तु लाक्षणिकशब्दजन्यज्ञानेऽपि तत्तथा प्रतीयते मानाभावात्किं तु स्वस्वरूपेणैव। लोकेऽपि तीरादेः केवलस्यापि गङ्गादिपदादुपस्थितिः। न चैवमतिप्रसङ्गः पूर्वक्षणभाविना वाच्यार्थसंबन्धज्ञानेनैव नियततीराद्युपस्थितिसंभवेनान्यत्र तदसंभवात्। न हि समुद्रतीरादि तथोपस्थितं भवति। ततो ब्रह्म-

णि लक्षणयाऽखण्डार्थप्रतीतिरुपपद्यत इति भावः। निर्विभागात्मनि कथं भागभागित्वमिति शङ्कां निराकर्तुं मो हेत्युक्तम् ॥ २०४ ॥

संबन्धिता भवति लाक्षणिकप्रवृत्तेः
सर्वत्र कारणमितीदमभीष्टमेव ॥
संबन्धिताकरणमेव तु लाक्षणिक्या
बुद्धेरनिष्टमिह तद्व्यभिचारदृष्टेः ॥ २०५ ॥

उक्तमेवार्थं सोपपत्तिकं प्रपञ्चयति । संबन्धितेति । संबन्धिताज्ञानमित्यर्थः । सर्वत्र लोके वेदे च। संबन्धिताकरणम् वाच्यार्थसंबन्धिताकारत्वम्। कुतोऽनिष्टमित्यत आह । तद्व्यभिचारेति । तस्य संबन्धिताकारत्वस्य सर्वत्र लाक्षणिकपदजन्यज्ञानेऽभावादित्यर्थः । कुत्र तदभाव इति चेदुक्तमेव गङ्गापदजन्यज्ञानस्य शुद्धनीरविषयत्वेन तज्ज्ञाने गङ्गासंबन्धिताकारत्वाभावान्नियमेन वाच्यविशिष्टस्यैव लक्ष्यत्वे तात्पर्यगौरवप्रसङ्गात् ॥ २०५ ॥

यत्रैष काक इदमेव तु देवदत्त-
वेश्मेति लाक्षणिकवृत्तिरिहाभ्युपेता ॥
काकास्पदत्वमवधीर्य तथापि वेश्म-
मात्राकृतिर्भवति लाक्षणिकी तु बुद्धिः ॥२०६॥

व्यभिचारस्थलान्तरमाह । यत्रैष इति । देवदत्तगृहं किमिति पृच्छन्तं प्रति कश्चिदाह यत्रैष काकस्तिष्ठ-

ति इदमेव देवदत्तवेश्मेति , तत्र किं काकाधिकरणत्वविशिष्टं देवदत्तगृहमिति वाक्यार्थ उत तदुपलक्षितम्, अन्त्य आह । लाक्षणिकेति । अभ्युपेता सर्वैरिति शेषः । ततः किं तत्राह । काकास्पदत्वमिति । काकाधिकरणत्वमित्यर्थः । तथापि काकास्पदत्वमिति संबन्धः । तस्माद्धि वाक्याद् गृहविशेषमात्रमेव देवदत्तीयत्वेन प्रतीयते न तु काकाधिकरणत्वाकारेण , निर्गतेऽपि काके तद्बुद्धिदर्शनात् । एतेन प्रथमपक्षोऽपि निरस्तः । विशिष्टस्य देवदत्तीयगृहत्वे काकापसरणे गृहैकदेशभङ्गबुद्धिप्रसङ्गश्चेति ॥ २०६ ॥

सोऽयमित्यपि पदार्थरूपकं
लक्षणं यदुपलक्षणं हि तत् ॥
अंशिता यदि पदार्थलक्ष्ययो-
र्गृह्यते ननु पुनर्विरोधिता ॥ २०७ ॥

जहल्लक्षणायां लक्ष्यस्य वाच्यसंबन्धित्वेनैव लाक्षणिकपदजन्यज्ञानमिति नियमं दूषयित्वा जहदजहल्लक्षणायां तदसंभवमाह । सोऽयमिति । पदार्थरूपकम् पदार्थस्वरूपम् । लक्षणम् लक्ष्यतेनेनेति लक्षणम्, लक्षकमिति यावत् । तत्तेदन्ताविशिष्टपदार्थद्वयस्वरूपं शुद्धस्य यल्लक्षणं तदप्युपलक्षणम् । उपलक्षणं हि तटस्थलक्षणमेव, अपिशब्दात्काकवदिति सूचयति । एतावान्विशेषः, काकाधिकरणत्वमन्यदेव गृहस्वरूपं लक्षयति , इदं तु

स्वान्तर्भूतमेव देवदत्तादिरूपमिति। ततः किं तत्राह। अंशितेति। पदवाच्याभ्यां लक्ष्ययोरंशिता मुख्यार्थसंबन्धविशिष्टता यदि गृह्यते सोऽयंपदाभ्यां लक्षणया ज्ञायते तर्हि पुनर्विरोधिता नन्विति संबन्धः। यथा वाच्ययोर्विशिष्टयोरभेदे विरोधः प्रागुक्त एवं यदि वाच्यार्थलक्ष्ययोरंशांशितापि लाक्षणिकपदेन ज्ञाप्येत तदा पुनरपि सैव विरोधिता भवेत्, लक्ष्यस्वरूपे तत्तेदंतावैशिष्ट्यानपायादित्यर्थः ॥ २०७ ॥

एवं तावल्लक्षणावृत्तिहेतो-
रानीतैषाऽखण्डवाक्यार्थबुद्धिः ॥
मुक्त्वापीमां लक्षणावृत्तिमेषा
वक्तुं शक्येत्युच्यतेऽनन्तरेण ॥ २०८ ॥

एवं पदद्वयलक्षणया महावाक्यस्य सत्यादिवाक्यस्यापि समभिव्याहृतनिखिलपदलक्षणयाऽखण्डे ब्रह्मणि वृत्तिमुक्तामनूद्य विनापि लक्षणां वाक्यं परमतेऽखण्डार्थनिष्ठं यदा तदाऽस्मन्मते लक्षणया तत् किमु वक्तव्यमित्याशयेनाह। एवं तावदिति। उक्तोपपत्तिपरामर्श्येवंशब्दः। तावच्छब्दोऽपि वक्ष्यमाणपक्षात्प्राथम्यमस्य द्योतयति। अनन्तरेण ग्रन्थेनेति शेषः ॥ २०८ ॥

भिन्नाभिन्नरवौ घटादिवचसा साकं समुच्चारिता-
वन्यूनानधिके घटादिविषये तावत्प्रवृत्तौ तव ॥
नो चेद्विश्वसृजोऽपि दुष्परिहरा भेदादिमालागता

भेदादेरपि तत्र वाच्यमपरं भेदादिकं स्यादिति ॥ १०९ ॥

तदेव दर्शयति । भिन्नाभिन्नेति । खौ शब्दौ । भिन्नो घट इत्यभिन्नो घट इति घटादिपदेन सहोच्चारितौ भिन्नाभिन्नशब्दौ घटादिपदस्य यावान्विषयस्तावत्येव तव मते प्रवृत्तौ तावन्मात्रविषयाविति यावत् । परपक्षे हि भेदः स्वरूपमेव वस्तुन इति वक्तव्यम् एवं च भिन्नघटशब्दयोरेकार्थत्त्वाल्लक्षणां विनैव तावेकप्रातिपदिकार्थमात्रनिष्ठाविति तद्वाक्यमखण्डार्थम् । एवमभिन्नो घट इति वाक्यमपि । ननु भिन्न इति घटादिविशेषणतया प्रतीयमानो भेदः कथं घटादिस्वरूपं स्यादिति चेत्सत्यमस्ति तवेयमनुपपत्तिः, तथापि स्वरूपातिरिक्तो भेदस्त्वन्मते न सिद्ध्यतीत्याशयेनैवमुक्तम् । नन्वतिरिक्त एव भेदोऽभेदो वाऽस्तु तथा च तद्विशिष्टाभेद एव घटादिवाक्यार्थ इति कुतोऽखण्डार्थतेत्याशङ्क्याह । नो चेदिति । स्वरूपमेव भेदादिर्न भवति किं तु तदतिरिक्त एव चेदित्यर्थः । भेदादिमाला, भेदाभेदपरम्परेत्यर्थः । आगतेति च्छेदः । कथं तत्र भेदादिमालाऽऽगता स्यात्तत्राह । भेदादेरिति । तत्र तस्मिन्मते । भेदादेर्धर्म्यादिभ्यो भेदे भेदे धर्म्यादिभ्यो भेदान्तरमभेदे च स्वाभेदान्तरमेवं तत्रतत्रापीति भेदादिमालाप्रसङ्गः । न च भेदादेर्भेदादिः स्वरूपमेवेति वाच्यम् । तर्हि प्रथममेव तथास्तु किमतिरिक्तभेदादि-

कल्पनया। न च घटो भिन्न इत्यादिविशिष्टप्रतीतिबलाद् घटाद्व्यतिरिक्तभेदादिसिद्धौ सत्यां पश्चात्कल्प्यमानस्वरूपभेदादेः प्रथमक्लृप्तातिरिक्तभेदबाधकत्वं न युक्तकल्पनमिति वाच्यम्। भेदादिविशेषणतादिप्रतीतेर्द्धर्म्यादिभ्यस्तस्य भेदग्रहसापेक्षत्वेन प्रथममेव घटादिस्वरूपभेदादेः क्लृप्तत्वेन तद्विलक्षणभेदादिकल्पनानुपपत्तेः। न हि विशेषणविशेष्ययोर्भेदज्ञानमृते परस्परविरुद्धविशेषणविशेष्यभावप्रतीतिर्भवति। भावे वा प्रतीतेरन्यथासिद्धत्वेनातिरिक्तभेदसाधकत्वं न स्यादिति भावः॥ २०९॥

परस्पराभावमुपाददानो
निमित्तमर्थेषु हि भिन्नशब्दः॥
प्रवर्त्ततेऽन्ये तु घटादिशब्दा
निजंनिजं वाच्यमुपाददानाः॥ २१०॥

नन्वेवं भिन्नाभिन्नघटशब्दानां पर्यायतापत्तिरिति चेत्तत्किं भेदादौ भिन्नादिशब्दो न प्रवर्त्तते, प्रवर्त्तते चेत्तत्र यः परिहारः स एवान्यत्रापि तवास्तु, एवं सत्यपि परिहारान्तरमाह। परस्परेति। ननु कोऽसौ स्वरूपभेदवादे परस्पराभावः, अन्योऽन्याभाव इति चेत्किं तत्र प्रमाणम्, घटात्पटो भिन्न इत्यादिबुद्धेः स्वरूपभेदावलम्बनतयाऽन्यथासिद्धत्वात्, एतेनास्त्येव तन्मतेपि परस्पराभावः किं तूक्तदोषात्स भेदो न भव-

तीति न भेदानन्त्यमिति प्रत्युक्तम् , भेदातिरिक्तपरस्पराभावे प्रमाणाभावस्योक्तत्वादिति चेत्सत्यम् । एवं हि स्वरूपभेदवादिनो भावान्तरमभावो हि कया चित्तु व्यपेक्षयेति वदन्त आहुः , घटः पटो न भवतीति पटादिसापेक्षतया प्रतीयमानं घटादिस्वरूपं पटादिभ्यो भेदः , एवं पटादिस्वरूपमपि घटादिभ्यो भेद इति , एवं परस्परस्याभावः परस्परापेक्षस्वरूपम् । तदुपाददान इत्यर्थः । निमित्तं प्रवृत्तिनिमित्तम् । अर्थेषु घटपटादिषु । निजंनिजं स्वीयं स्वीयमन्योन्यनिरपेक्षघटत्वादिस्वरूपं वाच्यमुपाददानाः बोधयन्तः । प्रवर्त्तन्त इति विपरिणतानुषङ्गः । तत्पक्षे हि भिन्नशब्दः पटादिकमपेक्ष्य घटादिस्वरूपं बोधयति , अथ च पटादिवैशिष्ट्यं घटेन प्रतिपादयति । घटादिशब्दस्तु घटत्वादिकमेव निमित्तीकृत्य तत्र प्रवर्तते इति न तयोः पर्यायता नापि विशिष्टार्थं वाक्यमिति भावः ॥ २१० ॥

परस्पराभावविहीनभावा-
दभिन्नशब्दस्य घटे प्रवृत्तिः ॥
घटस्वरूपैकनिबन्धनात्तु
घटादिशब्दस्य घटे प्रवृत्तिः ॥ २११ ॥

एवमभिन्नशब्देऽप्याह । परस्पराभावविहीनभावादिति । भेदशब्दप्रवृत्तिनिमित्तेतरसापेक्षत्वस्या-

भावः परस्पराभावविहीनभावस्तत्सापेक्षवस्तुस्वरूपमिति यावत्, तस्मात्, तथा च तटस्थ एवाभिन्नपदप्रवृत्तिनिमित्तं स इति न घटादिपदेन तत्स्वरूपनिमित्तेन पर्यायतेति भावः ॥ २११ ॥

अबोधनाशश्चितिरित्यमुष्मिन्
पदद्वये त्वेकरसात्मनिष्ठे ॥
अगौणमेकं पदमन्यदत्र
द्वितीयवृत्तीतरसंगमाय ॥ २१२ ॥

इदानीं सिद्धान्त्येकपदलक्षणयापि तदाह । अबोधनाश इति । अज्ञाननाश इत्यर्थः । चितिः ज्ञानम् । अगौणम् मुख्यार्थम् । द्वितीयवृत्तिलक्षणावृत्तिविशिष्टम् । इतरसंगमाय पदान्तरसम्बन्धाय, तदर्थान्वययोग्यताया इत्यर्थः ॥ २१२ ॥

अज्ञाननाशपदमत्र हि मुख्यमिष्टं
विद्यानिबन्धननिवृत्तिसमर्पकत्वात् ॥
तेनान्वयापचितिवाचि पदं स्ववाच्ये
सौवं समुज्झति मतेः परिणामरूपम् ॥ २१३ ॥

ननु किं पदं तत्रागौणं किं वा लक्षणावृत्तीति तत्राह । अज्ञाननाशपदमिति । अत्रास्मिन्वाक्ये । हिरेवार्थे । अज्ञाननाशपदमेवेति सम्बन्धः । मुख्यं मुख्यार्थम् । कुत इति चेत्तत्राह । विद्यानिबन्धनेति । विद्या अविद्यानिवर्त्तकसाक्षात्काररूपा वृत्तिस्तन्निबन्धना त-

दुपहिता या निवृत्तिस्तस्याः समर्पकत्वाद्बोधकत्वादित्यर्थः । अविद्यानिवृत्तिर्हि वक्ष्यमाणन्यायेनाविद्याधिष्ठानात्मैव । अविद्यानिवृत्तिपदं च तामेव निवृत्तिमभिधत्ते । यद्यपि पूर्णात्मन्युक्तवक्ष्यमाणन्यायेन कस्यापि पदस्य वृत्तिर्न संभवति, तथापि विद्योपहितात्मरूपाऽविद्यानिवृत्तौ तत्पदं प्रवर्त्तते, पशुत्वोपहिते दृतिहरिशब्दवत्, तत्र पशुत्वमिवात्र विद्याप्युपाधितया तटस्थैवेति केवलात्मनिष्ठत्वान्मुख्यमेवेदम् । नन्वविद्यानिवृत्तिरिति नैकं पदं निवृत्तिपदं तु घटादिनिवृत्तिसाधारणेन रूपेण तां वदतीति नात्ममात्रनिष्ठमिति चेन्न । निवृत्तौ भावस्याभावस्य वा साधारणधर्मस्यासंभवेन तत्तत्स्वरूपस्यैव तत्पदाभिधेयत्वादविद्यानिवृत्तेश्चात्मैव स्वरूपमिति नोक्तदोषः । ततस्तदन्वयाय चितिवाचि पदं चितिरिति पदं स्ववाच्ये शबले मतेरन्तःकरणस्य परिणामरूपं सौवं स्वकीयं धीपरिणामांशं समुज्झति त्यजति । एतच्च भागान्तरोपादानोपलक्षणमिति मुख्यलाक्षणिकपदाभ्यामखण्डसिद्धिरिति भावः । अत्र सौवं समुज्झतीत्यनेनार्थसिद्धानुवाद इति द्रष्टव्यम् ॥ २१३ ॥

विधिपदानि हि भागसमर्पणा-
दपरभागनिराकरणादपि ॥
अविषयात्ममतिं जनयन्ति नो

न तु मृषार्थनिवृत्तिगिरस्तथा ॥ २१४ ॥

ननु विधिपदस्यात्मनि लक्षणा, अभावपदस्य तत्र शक्तिरिति महदेतच्चित्रम्, अविद्यानिवृत्तिर्वा कथमात्मा भवेत्, न हि घटनिवृत्तिर्भूतलं भवतीत्याशङ्क्य सत्यादिपदसाधारण्याच्चितिपदस्य नात्र किं चिच्चित्रमित्याशयेनाह । विधिपदानीति । भावरूपार्थवाचकपदानीत्यर्थः । निराकरणात्परिवर्ज्जनात् । अविषयात्ममतिमवाच्यात्ममतिं ब्रह्माकारां वृत्तिम् । नः अस्माकं मते । द्वितीयामाशङ्कां परिहरन्नाह । न त्विति । मृषार्थनिवृत्तिगिरस्तु तथा तद्भागत्यागापरभागाऽर्पणेनाविषयात्ममतिं न जनयन्तीत्यर्थः । मृषार्थनिवृत्तीत्यस्यायमाशयः । यत्र यदध्यस्तं तस्य ततः पृथक्सत्त्वाऽभावात्तत्र तन्निवृत्तिरत्यन्ताभावोऽधिष्ठानमेव, यथा शुक्तिरजतादेः, घटादेस्तु भूतलादावनध्यस्तत्वेन पृथक्सत्त्वान्निवृत्तिस्ततो भिद्यते । अविद्या चात्मन्यध्यस्तैवेति तन्निवृत्तिः स एव, अतो न किं चिदत्रालौकिकमिति ॥ २१४ ॥

भेदो भिन्नश्चातिरेकोऽतिरिक्तो
भेदोऽभिन्नः संविदः स्वप्रकाशाः ॥
इत्येतस्मिन्विद्यते नार्थभेदो
वेदान्तानामप्यखण्डस्तथार्थः ॥ २१५ ॥

पूर्वं भिन्नोऽभिन्नो वा घट इत्याद्युदाहरणेन मु-

ख्यवृत्त्याऽखण्डार्थतायां परसंमतिरुक्ता, तत्र धर्मभेदवादिनोऽसंप्रतिपत्तिं मत्वा तत्संमतोदाहरणेन तामाह । भेदो भिन्न इत्यादिना । एकदेशिनं प्रत्याह । अतिरेकोऽतिरिक्त इति । जीवब्रह्मणोर्भेदाऽभेदसंपादकः कश्चिद्धर्मोऽतिरेकः । प्राभाकरं प्रत्याह । संविदः स्वप्रकाशा इति । इत्येतस्मिन्नीदृशेऽस्मिन्वाक्य इत्यर्थः । येषां मते भेदो घटादेर्भिद्यते तेषामपि भेदस्य भेदाद्भेदानङ्गीकारात्तत्स्वरूपमेवेति मुख्यार्थयोरपि पदयोरेकार्थत्वम् । एवमतिरेकाद्युदाहरणेऽपि द्रष्टव्यम् । तथा स्वप्रकाशत्वमपि संवित्स्वरूपमेव । तस्य ततो भेदे तेनान्येन वा संबन्धाऽसंभवेनाऽसिद्धिप्रसङ्गः, मानान्तरग्राह्यत्वे च संविदोऽपि तत्प्रसङ्गेन स्वप्रकाशत्वाऽयोगादित्यभिप्रेत्य दार्ष्टान्तिकमाह । वेदान्तानामिति ॥२१५॥

एवं तावदखण्डवस्तुविषयः शब्दान्वयो दर्शितो
लोके दृष्टनयेन पाणिनिवचोऽप्यस्यैव संसूचकम् ॥
येनायं स्मरति प्रकृत्यभिहिते वृक्षादिके केवले
तन्मात्रे प्रथमेतिसूत्रवचसैवाद्यां विभक्तिं मुनिः ॥२१६॥

एवं न्यायबलाल्लोकवादिप्रसिद्धेः सोऽयमित्यादिदृष्टान्तेन च वेदान्तानामखण्डवस्तुसमन्वयं दर्शितमनुवदन्समस्ततीर्थकाराणां संप्रतिपन्नाप्तभावपाणिनिवचनादप्यखण्डार्थत्वसिद्धेर्वेदान्तेषु तदविरुद्धमित्याशयेनाह । एवं तावदिति । येन वचसा पाणिनिना-

ऽखण्डविषयशब्दसमन्वयः सूचितस्तत्सूत्रैकदेशं संक्षिप्य तदर्थकथनपूर्वकमुदाहरति । येनेति । अयं मुनिर्येन सूत्रवचसैव स्मरति तत्पाणिनिवच एवास्य संसूचकमिति संबन्धः । प्रकृत्यभिहिते वृक्षादिपदस्य प्रकृत्यंशाभिहिते । अनेन प्रातिपदिकार्थेति पदं व्याख्यातम् । केवल इति सौत्रमात्रपदार्थस्योक्तिस्तन्मात्रे प्रथमेति सूत्रैकदेशोदाहरणम् । आद्यां प्रथमाम् । पाणिनिः खलु भगवान्प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेति सूत्रे प्रातिपदिकार्थमात्रे प्रथमां विभक्तिं स्मरन्नपर्याययोर्वृक्षादिप्रातिपदिकप्रथमाविभक्त्योरेकार्थत्वं दर्शयति । एतदेव च वाक्यस्याऽखण्डार्थत्वमिति तत्संमतमिति भावः ॥ २१६ ॥

सामानाधिकरण्यमन्वयगिरां हेतुं वदत्यादरात्
तस्यैवाथ विशेषणं समिति च व्यावृत्तये गृह्यते ॥
गौणान्मुख्यमयं भिनत्ति भगवान्व्यावर्त्तकेनामुना
नीलेनोत्पलवस्तुवत्स्फुटतरं द्वैविध्यसद्भावतः ॥ २१७ ॥

श्रुतितन्मूलन्यायसिद्धं सूचयता भगवता बादरायणेन तत्तु समन्वयादिति सूत्रेण तदिति वेदान्तगम्यत्वेन प्रतिज्ञाते निरतिशयानन्दाऽद्वये ब्रह्मणि स्वप्रकाशे समन्वयादिति हेतुरुक्तः , तत्र यद्यपि व्यधिकरणान्वयोपि लोके वेदे च दृश्यते, तथापि तस्य संबन्धादिनिष्ठतया प्रतिज्ञातब्रह्मनिष्ठत्वासंभवाद्ध योग्यतया

सामानाधिकरण्यान्वय एव तेन विवक्षित इति समन्वयादिति सौत्रोक्तिबलाद्वेदान्तानामखण्डे पर्यवसानमित्याह । सामानाधिकरण्यमिति । अन्वयगिरां समन्वयसूत्र इति शेषः । वदति भगवानित्यनुषङ्गः । आदरादिति तस्य श्रुतिन्यायसूचकत्वं दर्शयति । भवतु तर्हि नीलोत्पलवद् गुणगुणिभावनिष्ठतया मृद्घटवत्कार्यकारणभावनिष्ठतया वा समानाधिकरण्यमित्याशङ्क्याह । तस्यैवेति । अथेति पूरणार्थे । समितिविशेषणं च गृह्यत इति संबन्धः । तत्किं रूपवान्घट इति रूपवत्तेव घटस्यान्वयस्य समितिविशेषणं नेत्याह । व्यावृत्तय इति । विशेषणस्योत्सर्गतो व्यावृत्त्यर्थत्वात्संभवन्त्यां च व्यावृत्तौ रूपवत्ताया इव न स्वरूपमात्रनिष्ठतेति भावः । गृह्यते भगवतेति विपरिणतानुषङ्गः । कुतो व्यावर्त्तयति विशेषणमिति जिज्ञासायां तद्दर्शयन्व्यावृत्तिसंभावनामपि दर्शयति । गौणादिति । अयं भगवान्स्फुटतरं सामानाधिकरण्यद्वैविध्यस्य सद्भावतो व्यावर्त्तकेनामुना समितिविशेषणेन गौणात्सामानाधिकरण्यान्मुख्यं नीलेनोत्पलवस्तुवद्भिनत्तीति संबन्धः । सूत्रकारो ह्यन्वयस्य समितिविशेषणं प्रयच्छति तच्च व्यावृत्तिपरमिति गौणात्सामानाधिकरण्यादस्य व्यावृत्तिसिद्धौ मुख्यत्वं सिद्ध्यतीति तद्वाक्यमखण्डपर्यवसायीति वक्ष्यमाणन्यायेन निश्चीयत इति भा-

वः ॥ २१७ ॥

तद्धि द्विधैकाधिकरण्यमुक्तं
गौणं च मुख्यं च विविच्य सद्भिः ॥
संसर्गरूपार्थनिवेशि गौणं
मुख्यं त्वखण्डार्थनिविष्टमाहुः ॥ २१८ ॥

द्वैविध्यसद्भावमेव दर्शयति । तद्धीति । हिरवधारणे । सद्भिस्तदैकाधिकरण्यं गौणं च मुख्यं चेति द्विधा विविच्य तत्रतत्रोक्तमेवेति संबन्धः । गौणमुख्ययोः क्रमेण स्वरूपमाह । संसर्गेति । गुणगुण्यादिसंसर्गरूपेऽर्थे निवेशि तत्पर्यवसायि यत्सामानाधिकरण्यं तद् गौणम्, मुख्यं तु नैवं किं त्वखण्डार्थनिष्ठमिति सन्त आहुरिति संबन्धः ॥ २१८ ॥

आदाय नानाविधकारणानि
गिरामथैकत्र तु या प्रवृत्तिः ॥
तामाहुरैकाधिकरण्यनाम्ना
विपश्चितो वेदशिरःसु विप्राः ॥ २१९ ॥

इदानीं मुख्यस्याखण्डे पर्यवसानं दर्शयिष्यंस्तदुभयसाधारणरूपमाह । आदायेति । कारणानि प्रवृत्तिनिमित्तानि । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकत्रैवार्थे या वृत्तिः तां वेदशिरःसु विपश्चितो विवेकिनो विप्रा ऐकाधिकरण्यनाम्ना आहुरिति संबन्धः । अत्र पर्यायपदेषु राज्ञः पुरुष इत्यादिषु चातिप्रसङ्गवारणा-

य भिन्नप्रवृत्तिनिमित्तानामेकत्रेति च द्वयमुपात्तम् । तत्त्वमस्यादिवाक्यार्थनिरूपणं सामानाधिकरण्यायत्तमिति वेदान्तिभिस्तदवश्यं निरूपणीयमिति द्योतयितुं वेदशिरःसु विपश्चित इत्युक्तम् ॥ २१९ ॥

नीलं सुगन्धि महदुत्पलमम्बुशायी-
त्येवंप्रकारमिह गौणमुशन्ति सन्तः ॥
सोऽयं पुमानुदशरावगतो विवस्वा-
नाकाशगो रविरसाविति मुख्यमाहुः ॥ २२० ॥

उभयोः क्रमेणोदाहरणमाह । नीलमित्यादिना । उत्पलमिति विशेष्यमुक्तम् । उदशरावगतः जलभाजने प्रतिबिम्बितो विवस्वानाकाशगोऽसौ रविरिति सामानाधिकरण्यं मुख्यमाहुः । बिम्बप्रतिबिम्बयोरेकरसत्वादित्यर्थः ॥ २२० ॥

एकत्र वृत्तिरिति लक्षणमत्र मुख्यं
संसर्गवस्तुनि पुनर्न हि तद् घटेत ॥
नानारसे हि विषये वचसां प्रवृत्ति-
र्नीलं सुगन्धि महदुत्पलमित्यमीषाम् ॥ २२१ ॥

अस्त्वेवं तद्द्वैविध्यं कथमेतावता मुख्यसामानाधिकरण्यस्याऽखण्डपर्यवसानं तत्राह । एकत्रेति । लक्षणं लक्षणांशः । अत्र अखण्डे । अखण्डे हि वस्तुनि पर्यवसन्नानामपर्यायपदानामेकत्र वृत्तित्वं मुख्यमनुपचरितम् । नीलोत्पलादिविशिष्टवस्तुनि पुन-

स्तन्मुख्यमेकनिष्ठत्वं न हि घटेत । तत्र लोकप्रसिद्धिमेव हेतुमाह । नानारसेति । अमीषां वचसां नानारसे विषये प्रवृत्तिः प्रसिद्धेति संबन्धः ॥ २२१ ॥

नानाविधैर्बहुभिरेव निमित्तभेदै-
र्भिन्नेषु वस्तुषु गिरामथ या प्रवृत्तिः ॥
सर्वत्र वैयधिकरण्यमिति प्रसिद्धा
सा शब्दवृत्तिकुशलव्यवहारभूमौ ॥ २२२ ॥

इदानीमेकत्र वृत्तिरित्येतद्व्यावर्त्यव्यधिकरणाऽन्वयस्वरूपमाह । नानाविधैरिति । अत्र बहुत्वमविवक्षितं द्वयोरपि तद्दर्शनात् । निमित्तभेदैः स्वस्वार्थे प्रवर्त्तमानानामिति शेषः । तासां भिन्नेषु गुणप्रधानभूतानेकपदार्थेषु, तन्निरूपितार्थेष्विति यावत् । तत्र या वृत्तिः सा वैयधिकरण्यमित्यन्वयः । सामानाधिकरण्यव्यावृत्तये भिन्नेष्विति । अत्यन्तभिन्नेष्वित्यर्थः । नानाव्यक्तिनिष्ठपर्यायव्यावृत्तये निमित्तभेदैरिति । शेषं स्वरूपकथनम् । शब्दवृत्तीति । शब्दवृत्तिविवेचने ये कुशलास्तेषां व्यवहारस्थल इत्यर्थः ॥ २२२ ॥

अभिन्नहेतुर्विषये समाने
विभिन्नवाचामथ या प्रवृत्तिः ॥
पर्यायनाम्नाऽभिवदन्ति धीराः
प्रवृत्तिमेतां वचसां बहूनाम् ॥ २२३ ॥

इदानीं नानाविधकारणानीत्येतद्व्यावर्त्यपर्यायस्वरू-

पमाह । अभिन्नहेतुरिति । एकप्रवृत्तिनिमित्तेत्यर्थः । समाने एकस्मिन्नभिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिः पर्यायता इत्यर्थः ॥ २२३ ॥

कुड्यं गृहस्य सरसोऽम्बुजमस्य वस्त्र-
मित्यत्र वैयधिकरण्यमिति प्रसिद्धम् ॥
एवं मुखं वदनमाननमित्यमीषां
पर्यायतापि विदितैव पुरोक्तहेतोः ॥ २२४ ॥

व्यधिकरणाऽन्वयपर्याययोः क्रमेणोदाहरणमाह । कुड्यमित्यादिना । अस्य देवदत्तादेः । पुरोक्तहेतोः निमित्तभेदैः, अभिन्नहेतुरित्यत्र चोक्तहेतोः ॥ २२४ ॥

पर्यायता न खलु तत्त्वमसीति वाक्ये
नापीह संभवति भेदकभेद्यभावः ॥
तत्त्वंपदार्थगतमेकरसैकभागं
तत्त्वंपदे समुपलक्षयतो विरोधात् ॥ २२५ ॥

एवं लोकप्रसिद्धान्वयस्वरूपभेदमुक्त्वेदानीं तत्त्वमसीति वाक्ये अन्येषामसंभवान्मुख्यमेव सामानाधिकरण्यमखण्डनिष्ठं सिद्ध्यतीत्याह । पर्यायतेति । न संभवतीत्यनुषङ्गः । तत्त्वमसीति सत्यादेरुपलक्षणम्, प्रवृत्तिनिमित्तभेदादिति शेषः । पर्यायत्वे सह प्रयोगायोगाच्च । तदुक्तम्, पर्यायाणां प्रयोगो हि यौगपद्येन नेष्यते इति । भेदकभेद्यभावः कुड्यं गृहस्य नीलमुत्पलमित्यादाविव तदर्थयोर्विशेषणविशेष्यभावोऽपि न संभव-

ति तस्य तत्र बाधितत्वान्मुख्यार्थयोर्विरोधादित्यर्थः । अविरोधादिति वा तदर्थमित्यर्थः । अतोऽबाधितं मुख्यमेव सामानाधिकरण्यं तत्र समन्वयो भवतीति तदखण्डार्थमिति । फलितमाह । तत्त्वंपदार्थगतमिति । एकरसश्चासावेकभागस्तं चिदेकरसमित्यर्थः ॥ २२५ ॥

प्रकृष्टप्रकाशध्वनी व्यक्तिमेकां
यथा लक्षणावर्त्मनोपाक्षिपेताम् ॥
शशाङ्कादिशब्दार्थसंकीर्तने स-
च्चिदानन्दशब्दाः परं ब्रह्म तद्वत् ॥ २२६ ॥

एवं महावाक्यस्याऽखण्डे वृत्तिं तत्र दृष्टान्ततया सोऽयमिति वाक्येऽपि लोके तां दर्शयित्वा इदानीं ब्रह्मलक्षणसत्यादिवाक्यस्याऽखण्डार्थत्वोदाहरणे प्रकृष्टप्रकाशश्चन्द्र इति चन्द्रलक्षणवाक्येऽप्यखण्डार्थतां दर्शयन्दार्ष्टान्तिकेऽपि न्यायसिद्धान्तामनुवदति । प्रकृष्टप्रकाशध्वनी इति । ध्वनी शब्दौ । व्यक्तिं चन्द्रव्यक्तिम् । उपाक्षिपेतां प्रतिपादयतः । ननु किमिति प्रकृष्टप्रकाशशब्दयोश्चन्द्रे स्वार्थसंसर्गमविरुद्धं विहाय लक्षणया तत्स्वरूपबोधकत्वं मुख्ये संभवति लक्षणाया अन्याय्यत्वादिति तत्राह । शशाङ्कादीति । आदीति गवादिशब्दं दर्शयति । संकीर्तने उद्देश्य इति शेषः । वक्ष्यमाणरीत्या शशाङ्कादिशब्दार्थसंकीर्तनं ह्यनेन वाक्येन क्रियते, प्रकृष्टप्रकाशादिवैशिष्ट्यं च न तदर्थस्व-

रूपमिति तद्विहाय विवक्षितशशाङ्कस्वरूपमेव पदद्वयं लक्षणया प्रतिपादयतीत्यर्थः । तद्वत्प्रकृष्टादिशब्दवल्लक्षयतीत्यर्थः ॥ २२६ ॥

न नीलोत्पलाद्या गिरो व्यक्तिनिष्ठाः
स्ववाच्यार्थसंसर्गमात्राभिधानात् ॥
विरोधे हि वाच्यच्युतिर्नाऽविरोधे
गिरां लक्षणात्रापि चेदस्तु साम्यम् ॥ २२७ ॥

ननु संभवन्मुख्यार्थप्रयोगस्यापि लक्षणयाऽखण्डार्थत्वे नीलोत्पलादिवाक्यस्यापि तत्किमिति न भवेदित्याशङ्क्याह । न नीलोत्पलाद्या इति । कुतस्तत्राह । स्ववाच्येति । तत्र गुणगुण्यादिसंसर्गमात्रस्यैव ताभ्यामभिधानादित्यर्थः । ननु तदेव कुतः प्रकृष्टप्रकाशपदयोरिव तयोरपि द्रव्यमात्रनिष्ठतैव किं न स्यात्तत्राह । विरोधे हीति । मुख्यार्थानां गिरां तात्पर्यविषयीभूतार्थबाधे मुख्यार्थच्युतिर्नाविरोधेऽपि । यद्यविरोधेऽपि तत्र लक्षणाभ्युपगम्येत तर्हि नीलोत्पलादेरपि प्रकृष्टप्रकाशादिसाम्यमस्तु किं नश्छिन्नमित्याह । लक्षणेति ॥ २२७ ॥

न नीलत्वजात्याश्रयव्यक्तितः स्याद्
विभिन्नोत्पलत्वाश्रयव्यक्तिरेषा ॥
तथैवोत्पलत्वाश्रयव्यक्तितः स्या-
न्न नीलत्वजात्याश्रयव्यक्तिरन्या ॥ २२८ ॥

तत्र साम्यमेवोपपादयति । न नीलत्वेति । उत्पलत्वस्याश्रय आश्रयत्वं यस्यां सा तथोक्ता, न विभिन्ना स्यादिति संबन्धः । एवं द्रव्यस्यापि गुणादभेदमाह । तथैवेति । गुणगुणिनोरभेदादित्यर्थः । नीलत्वोत्पलत्वादिजातिवाचकशब्दाभ्यां लक्षितव्यक्त्योरभेदात्तदप्यखण्डार्थमस्त्विति प्रौढयाभ्युपगमः ॥ २२८ ॥

न नीलोत्पलादिप्रदेशेषु किंचिद्
गिरां लक्षणाकारणं तेन तत्र ॥
न नीलोत्पलत्वादिकव्यक्तिनिष्ठा
गिरस्ता भवेयुः प्रमाणादृते नः ॥ २२९ ॥

एवं नीलोत्पलवाक्ये लक्षणामखण्डार्थत्वं चाभ्युपेत्योक्त्वेदानीं तदुभयं परित्यजति । न नीलोत्पलादीतिद्वयेन । इदमुपेत्य किमप्युदितमित्युत्तरश्लोकस्थमत्रादौ द्रष्टव्यम् । लक्षणाया अपि तत्राभ्युपगमेनोक्ताया अत्र परित्यागात्प्रदेशेषु वाक्येषु नीलोत्पलाद्यर्थेषु वा लक्षणाकारणं किमपि नेति संबन्धः । न तावदन्वयानुपपत्तिस्तत्रास्ति निमित्तं तदन्वयस्य सत्त्वात्, नापि तात्पर्यानुपपत्तिः गुणगुणित्वसंसर्गस्यैव तत्राभिप्रेतत्वात्, न चान्यल्लक्षणानिमित्तं प्रसिद्धमस्ति निर्बीजलक्षणायां चातिप्रसङ्ग इत्याशयेनाह । तेन तत्रेत्यादिना । नो मते नीलोत्पलत्वादिजातेर्या व्यक्तिस्तन्निष्ठास्ता गिरो न भवेयुः, प्रमाणाभावादित्यर्थः ॥ २२९ ॥

इदमुपेत्य किमप्युदितं मया
न तु तयोरभिदा परमार्थतः ॥
गुणगुणित्वकृतोऽतिशयस्तयो-
र्भवति लक्षणयापि गृहीतयोः ॥ २३० ॥

लक्षणायामपि तस्य वाक्यस्य नाखण्डार्थता लक्ष्यव्यक्त्योरेकरसत्वाभावादित्याह । इदमुपेत्येति । किमपि अनभिप्रेतमपि । तयोः नीलोत्पलव्यक्त्योः । अभिदा परमार्थतोऽत्यन्तमभेदस्तस्यैव परमार्थत्वादित्यर्थः । कुतो नाभिदा तत्राह । गुणगुणित्वेति । अतिशय ईषद्भेदः । अत्यन्ताभेदे गुणगुणित्वायोगान्नैल्योत्पलयोश्च गुणगुणित्वेन प्रसिद्धत्वादत्यन्तभेदाभावेऽपीषद्भेदोऽस्तीति न तदखण्डार्थमित्यर्थः ॥ २३० ॥

प्रकृष्टप्रकाशत्वजाती हि लोके
प्रकृष्टप्रकाशाभिधानाभिधेये ॥
तयोरन्वये कीर्त्त्यमाने तु ताभ्यां
शशाङ्काभिधानाभिधेयं न लभ्यम् ॥ २३१ ॥

तर्हि तद्वदेव प्रकृष्टप्रकाशादिवाक्यमपि चन्द्रे बाधितस्वार्थसंसर्गपरमस्त्वित्याशङ्क्याह । प्रकृष्टप्रकाशेति । प्रकृष्टत्वप्रकाशत्वजाती इत्यर्थः । हिरवधारणे । प्रकृष्टप्रकाश इत्यभिधानयोः शब्दयोरभिधेये भवत इति शेषः । ततः किं तत्राह । तयोरिति । आक्षिप्तव्यक्तिद्वारा तयोर्जात्योरन्वये ताभ्यां पदाभ्यां प्रतिपाद्यमाने सति,

तुरवधारणे। शशाङ्काभिधानाभिधेयं न लभ्यमेव । जातिद्वयतदाश्रयचन्द्रवैशिष्ट्यस्य चन्द्रपदाभिधेयत्वाभावादितिभावः ॥ २३१ ॥

शशाङ्काभिधानाभिधेये हि पृष्टे
तदेवोत्तरेणापि निर्णेयमत्र ॥
प्रकृष्टप्रकाशत्वजात्यन्वयोऽयं
तदाक्षिप्ततद्व्यञ्जकव्यक्तिनिष्ठः ॥ २३२ ॥

ननु प्रकृष्टप्रकाशविशिष्टस्यैव चन्द्रत्वाद्यः प्रकृष्टप्रकाशः स चन्द्र इति वचनव्यक्त्या किमिति शशाङ्काभिधानाभिधेयं न लभ्यमिति तत्राह । शशाङ्काभिधानेति । तदेव न गुणादिवैशिष्ट्यमित्यर्थः । उत्तरेण प्रकृष्टप्रकाशश्चन्द्र इति प्रत्युत्तरवचनेन । अत्र लोके । ननु तदेवोक्तवचनव्यक्त्यापि निर्णीयते। प्रकृष्टप्रकाशाश्रयस्यैव तथापि चन्द्रत्वप्रतिपादनाच्चन्द्रत्वाश्रयस्यैव तदभिधानाभिधेयत्वादिति तत्राह । प्रकृष्टप्रकाशत्वेति । तदानीं हि तत्पदद्वयेन मुख्यवृत्त्योपस्थितप्रकृष्टत्वप्रकाशत्वजात्योरन्योऽन्यमन्वयो वाच्यः, पदार्थयोस्तन्नियमात्,स च साक्षान्न संभवतीत्ययं जात्यन्वयस्तदुभयाक्षिप्ततदभिव्यञ्जकतद्व्यक्तिनिष्ठ इति न केवलचन्द्रव्यक्तिलाभ इति भावः ॥ २३२ ॥

शशाङ्काभिधानाभिधेयो म चेष्टः
शशाङ्कस्य तेजोविशेषत्वहेतोः ॥

ततश्चोपपन्ना जहल्लक्षणातः
पुरोक्ता पदाभ्यामखण्डार्थसिद्धिः ॥ २३३ ॥

ननु स एव शशाङ्क इत्युक्तमिति चेत्सत्यं शशाङ्कस्यासाधारणो धर्मः सः न तु तत्स्वरूपमित्याशयेनाह । शशाङ्काभिधानाभिधेयो न चेष्ट इति । चोऽवधारणे नैवेष्टः सिद्ध्यतीति शेषः । कुतः शशाङ्कस्य तेजोविशेषत्वहेतोस्तेजोविशेषमात्रस्यैव तत्स्वरूपत्वान्न जातिद्वयविशिष्टव्यक्तिद्वयतादात्म्यं तत्स्वरूपमिति न ततस्तत्सिद्ध्यतीर्थः । इदमिह विवक्षितम् । अस्ति तावल्लोके चन्द्रस्वरूपेऽयं चन्द्रोऽयं वेति संशयः, अस्ति च तदपनयायास्मिन्ज्योतिर्मण्डले कश्चन्द्र इति प्रश्नः, तदुभयं चन्द्रस्वरूपमात्रविषयं तदन्यस्य तद्विषयस्याभावात् । ननु चन्द्रस्यासाधारणो धर्मः क इति प्रश्नोऽस्त्विति चेन्न । प्रश्नवाक्ये तत्पदाभावात् । लक्षणायां च न निमित्तमस्ति प्रकृष्टप्रकाशस्य प्रत्यक्षेण निर्णीतस्य स्वरूपेण कः प्रकृष्टप्रकाश इति संशयाभावात् । चन्द्रज्ञानं विना तस्य चन्द्रधर्मत्वज्ञानायोगेन प्रकृष्टः प्रकाशः किं चन्द्रस्यान्यस्य वेति प्रश्नासंभवाच्च । यद्यपि चन्द्रमपि प्रत्यक्षेण पश्यति, तथापि तत्संशयानुरोधेन तज्ज्ञानस्यापातज्ञानतया तदज्ञाने नाविरोधः । नैवं प्रकृष्टप्रकाशेऽनिश्चयस्तज्ज्ञानम् । अत एव चन्द्रपदवाच्यत्वादिः प्रश्नविषय इति प्रत्युक्तम् । चन्द्र एव

चन्द्रपदवाच्य इति सामान्यतश्चन्द्रे तस्यापि निर्णीतत्वात् । व्यक्तिविशेषे तदज्ञानस्य पूर्ववच्चन्द्रस्वरूपज्ञानाभावेऽसंभवात् । अतः संशयप्रश्नावज्ञातचन्द्रप्रातिपदिकार्थमात्रनिष्ठौ । अत एव प्रकृष्टप्रकाश इति वचनमपि तन्मात्रगोचरं न तु प्रकाशविशेषवैशिष्ट्यादिगोचरमन्यथास्यप्रश्ने कोविदारोत्तरवत्प्रश्नव्यधिककरणप्रतिवचनस्यानवधेयतापत्तेः । यत्तु अपृष्टमपि प्रकाशवैशिष्ट्यं पृष्टार्थनिर्णयोपयोगितया वाक्यं प्रतिपादयति, अन्यथा यः कश्चिच्चन्द्र इत्युत्तरार्थप्रसङ्गेन तदनिर्णयादिति । तन्न । व्यक्तिमात्रतात्पर्ये लाघवेन वाक्यस्य निश्चिते गुणवैशिष्ट्यस्यावाक्यार्थत्वेऽपि लक्षणया नियतव्यक्त्युपस्थित्यर्थत्वेन नियतव्यक्तिविषयतया व्यक्तिमात्रविषयप्रतिवचनेनापि तन्निर्णयोपपत्तेः । गङ्गापदाल्लक्षणया जातं ज्ञानं तीरविशेषे निर्णयः, अतः प्रकृष्टप्रकाशवैशिष्ट्यस्य तत्राबाधितस्यापि तात्पर्यागोचरतया वाक्यं चन्द्रप्रातिपदिकार्थमात्रनिष्ठं तदिदमुक्तं तदेवोत्तरेणेति । तच्च प्रकृष्टप्रकाशपदाभ्यां मुख्यार्थनिष्ठाभ्यां न शक्यं निर्णेतुमिति पृष्टोऽर्थो नैव सिद्ध्यति चन्द्रस्य तेजोविशेषमात्रतया विशिष्टस्वरूपमात्रत्वादिति । फलितमाह । ततश्चेति । लक्षणात इत्येकं पदम् ॥ २३३ ॥

प्रकर्षः प्रकाशातिरक्तो न चात्र
प्रकाशः प्रकर्षातिरिक्तो न चात्र ॥

बहिश्चन्द्रमस्ति स्वरूपातिरेक-
स्तयोश्चन्द्रमस्येकतैवातिमात्रम् ॥ २३४ ॥

ननु लक्षणयापि ताभ्यां पदाभ्यां स्वाभिधेयव्यक्तिद्वयमेव लक्षणीयं मुख्यार्थसंबन्धान्न तु चन्द्रव्यक्तिरसंबन्धात्ततः कथं ताभ्यां तल्लाभ इत्याशङ्क्याह । प्रकर्ष इति । अत्र चन्द्रे प्रकर्षप्रकाशव्यक्त्योश्चन्द्रव्यक्त्या परस्परं चाभेदान्नोक्तदोष इति भावः । ननु खद्योते प्रकाशे सत्यपि न प्रकर्षोऽस्ति तमआदौ प्रकर्षे सत्यपि न प्रकाश इति तयोर्भेदो वाच्यः । एवं च चन्द्रेऽपि तयोर्भेद एवेत्याशङ्क्याह । बहिश्चन्द्रमिति । चन्द्रादन्यत्रेत्यर्थः । तयोः प्रकर्षप्रकाशयोः । अतिमात्रमत्यन्तम् ॥ २३४ ॥

न चन्द्रप्रकाशप्रकर्षं प्रकाशा-
त्तदीयात्पृथक्कश्चिदुत्पश्यतीह ॥
तथास्य प्रकर्षप्रकाशं प्रकर्षा-
त्ततो नानयोरस्ति भेदे प्रमाणम् ॥ २३५ ॥

तत्रानुभवप्रमाणमाह । न चन्द्रप्रकाशेति । तदीयाच्चन्द्रसंबन्धिनः प्रकाशादिति संबन्धः । पृथग्भिन्नम् । उत्पश्यति स्पष्टं पश्यति । इह चन्द्रे । यद्यपि खद्योते तमसि च प्रकाशप्रकर्षौ पृथगनुभूयेते, तथापि चन्द्रे तयोः परस्परं चन्द्राच्च भेदं कोऽपि नानुभवति । न चापर्यायशब्दप्रतिपाद्यतया तत्रापि भेदोऽस्तीति वाच्यम् । वाच्यभेदे सत्यपि लक्षितव्यक्तीनामभेदात् । यथा घटतज्ज्ञा-

नयोः पृथक्प्रवृत्तसत्यज्ञानपदाभ्यां ब्रह्मणि लक्षितव्यक्त्योरभेदः, एवं च खद्योतमन्धकारं च व्यावर्त्य प्रकृष्टप्रकाशपदाभ्यां चन्द्रस्वरूपप्रकाशविशेषो जहल्लक्षणया प्रतिपाद्यत इति तद्वाक्यमखण्डार्थमेवं गवादिलक्षणवाक्यमपि द्रष्टव्यम् । तस्यापि तत्तल्लक्ष्यस्वरूपनिश्चयाय प्रवृत्तस्य तदन्यार्थत्वायोगात्। तथा च सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्यमखण्डार्थं लक्षणवाक्यत्वात्प्रकृष्टप्रकाशादिवाक्यवत् । न चाप्रयोजकत्वं चन्द्रस्वरूपमात्रप्रश्नवदिह ब्रह्ममात्रप्रश्नादर्शनेन प्रकृष्टादिवाक्यस्येवास्याखण्डार्थत्वाभावे बाधकाभावादिति वाच्यम् । यतो ब्रह्मविदाप्नोति परमिति निरतिशयबृहदात्मकब्रह्मज्ञानस्य परमपुरुषार्थसाधनत्वं संकीर्त्तितं तच्च तज्जिज्ञासामूलप्रश्नार्थमेव अन्यथा साधनात्फलनिष्पत्तेस्तत्संकीर्त्तनवैयर्थ्यादिति यावन्मात्रज्ञानात्फलं श्रावयति तावन्मात्रनिर्णयाय प्रवृत्तमिदमपि वाक्यं तावन्मात्रार्थमेवेति कथमप्रयोजकता ब्रह्मातिरिक्तवैशिष्ट्यस्य ब्रह्मपदार्थेऽसंभवाच्च । नापि लक्षणवाक्यत्वं धर्मधर्मिभावं विनानुपपन्नमसाधारणधर्मस्यैव लक्षणत्वादिति विरुद्धमिति वाच्यम् । यतो न लक्षणमसाधारणो धर्म इति नियमोऽस्ति, अन्त्यविशेषलक्षणे तदभावात् । किंतु यद्विषयं सज् ज्ञानं सजातीयादिभ्यः स्वविषयं व्यावर्त्तयति तल्लक्षणम् । तच्च धर्मो धर्मी वा यथा प्रमाण-

मस्त्विति सर्वमेव लक्षणवाक्यमखण्डार्थमिति ब्रह्मलक्षणसत्यादिवाक्यमप्यखण्डार्थमिति भावः ॥२३५॥

यथा सच्चिदानन्दशब्दास्तदर्थं
तथा तत्त्वमावात्मनो ब्रह्मभावम् ॥
विरोधान्मिथो लक्षणावर्त्मनेमौ
किमर्थं न संभूय वक्तुं समर्थौ ॥ २३६ ॥

एवं तत्त्वमस्यादिवाक्यस्य वाक्यत्वेन ज्योतिष्टोमादिवाक्यवद्विशिष्टार्थत्वानुमाने व्यभिचारादिना दूषिते तदखण्डार्थमुपाधितो भिन्नयोरभेदवाक्यत्वाद्बिम्बप्रतिबिम्बाभेदवाक्यवद्ब्रह्मपरवाक्यत्वाद्वा सत्यज्ञानादिवाक्यवदित्यभिप्रेत्योपसंहरति। यथेति। तदर्थं महावाक्यस्थतत्पदलक्ष्यं लक्षणया बोधयन्तीति शेषः। तत्त्वमौ तत्त्वंशब्दौ मिथो विरोधादित्यन्वयः। मुख्यार्थयोः परस्परमभेदे विरोधाद्धेतोरित्यर्थः। लक्षणावर्त्मना लक्षणामार्गेण लक्षणयेति यावत्। इमौ तत्त्वमाविति संबन्धः। किमर्थं न संभूय वक्तुं समर्थौ समर्थावेवेत्यर्थः ॥ २३६ ॥

प्रत्यक्तत्त्वं लक्षयेत्त्वंपदार्थ-
स्तच्छब्दार्थो लक्षयेदद्वितीयम् ॥
एवं पूर्णं प्रत्यगात्मानमेतौ
शब्दौ ब्रूतो लक्षणावर्त्मनैव ॥२३७ ॥

पदेन कीदृशोऽर्थो लक्ष्यते येन तदर्थयोर्विरो-

धः परिह्रियेतेत्याशङ्क्य प्रागुक्तमर्थमुपसंहारे स्मारयति । प्रत्यक्तत्त्वमिति । अहङ्कारादिसाक्षिसर्वान्तरचैतन्यमात्रमित्यर्थः । त्वंपदार्थ इति । पदार्थस्य लक्षकत्वमाश्रित्योक्तम् । एवमग्रेऽपि । सर्वान्तरस्य साक्षिणः सर्वव्याप्यद्वयाभेदे तत्त्वंपदसामानाधिकरण्येन सिद्धे निरतिशयबृहत्त्वशालि ब्रह्म सिद्ध्यतीत्याशयेनाह । एवं पूर्णमिति । एवकारेण वृत्त्यन्तरं व्यावर्त्तयति । अत एव गौण्युक्तिर्ग्रन्थकारस्य प्रौढेयति प्रागवादिषम् ॥ २३७ ॥

पारोक्ष्यं च ब्रह्मणि प्रत्यगर्थे
दुःखित्वं च ध्वान्तसम्भूतमाहुः ॥
सम्यग्ज्ञानध्वस्तमोहस्य पुंसः
प्रध्वंसेतेऽहेत्वभावेऽफलत्वात् ॥ २३८ ॥

नन्वेवमपि कथं पूर्णवस्तुलाभः परापरयोः पारोक्ष्यदुःखित्वादेरनपायादित्याशङ्क्याह । पारोक्ष्यं चेति । ब्रह्मणि पारोक्ष्यं चेति जगत्कारणत्वादि समुच्चिनोति । दुःखित्वं चेति । सुखित्वादि समुच्चिनोति । तयोरविद्यासंभूतत्वे किं सिद्धं तदाह । सम्यगिति । प्रध्वंसेते पारोक्ष्यं दुःखित्वं चेत्यनुषङ्गः । तत्र सामान्यन्यायमाह । हेत्वभाव इति । अफलत्वादिति छेदः । कारणाभावे कार्याभावादित्यर्थः ॥ २३८ ॥

षष्ठी जातिगुणक्रियादिरहिते सर्वस्य विज्ञातरि
प्रत्यक्षे परिवर्जिताखिलजगद्द्वैतप्रपञ्चे दृशौ ॥

सन्त्यक्तव्यवधानके परमके विष्णोः पदे शाश्वते
त्वय्यज्ञानविजृम्भिता न हि गिरो मुख्यप्रवृत्तिक्षमाः २३१।

एवं वेदान्तानां सर्वपदलक्षणयाऽखण्डैकरसे ब्रह्मणि पर्यवसानं न्यायत उपपादितम्, ननु सर्वपदलक्षणानुपपन्ना लोके लक्ष्यस्य पदान्तरवाच्यत्वनियमदर्शनात्, अन्यथा लाक्षणिकपदैरेव लक्ष्यप्रश्नोत्तरदाने तत्रापि लक्ष्यप्रश्ने लाक्षणिकपदप्रयोगानवस्थानप्रसङ्गादिति चेन्न, तेन विनापि वाच्यसंबन्धितया विचारादिनावगतात्मतत्त्वस्य योग्यतादिमहिम्ना स्वत एव लक्ष्यज्ञानसंभवेन लक्ष्यप्रश्नोत्तरानन्त्याप्रसङ्गात्, न हि तीरादिपदसंगतिग्रहात्पूर्वं प्रवाहादिसंबन्धितया विचारादवगते तीरादौ गङ्गादिपदलक्षणा नावतरति, किं चेक्षुक्षीरादिमाधुर्यविशेषेऽनुभवसिद्धे कस्यापि पदस्य शक्त्यसंभवान्माधुर्यविशेषादिः सामान्यशब्देन लक्षणयैव प्रतिपादनीयः स इति पदान्तरवाच्यमेव लक्ष्यमिति न नियमो लोकेऽपि वक्तुं शक्यः, किं च सत्यज्ञानानन्दैकरसे ब्रह्मणि गवादाविव गवादिशब्दः किं जातिनिमित्तो वाचकः शब्दः प्रवर्त्तते, किं वा दण्डयादिशब्द इव संबन्धेन सनिमित्तः, अथवा गुणवचनेभ्यो मतुपो लोपानुशासनात् शुक्लादिशब्द इव पटादौ गुणयोगेन सनिमित्तः, यद्वा याजकादिशब्दवत् क्रियानिमित्तः, उद्भिदादिशब्दवत्स्वरूपमात्रनिमित्तो वा न सर्वथापीत्याह। षष्ठीत्यादिना। संबन्धः

षष्ठी ब्रह्मणि तेषामन्यतमस्याप्यसंभवादित्यर्थः । तत्र हेतुमाह । सर्वस्य विज्ञातरीति । सर्वावभासक इत्यर्थः । ननु स्वावभासकत्वे तस्य स्वात्मनि वृत्तिविरोध इति कथं सर्वस्य विज्ञातेति चेन्न,तस्य स्वप्रकाशतया स्वत एव नित्यापरोक्षत्वादित्याह । प्रत्यक्ष इति । तदुपपादनाय दृशावित्युक्तम् । तथा चावभास्यघटादेरवभासकेऽभाव इव चेतनाचेतनात्मकद्विविधप्रपञ्चशून्यत्वात्तस्मिन्न षष्ठ्यादिसंभव इत्याह । परि वर्जितेति । जगदिति चतुर्विधचेतनप्रपञ्चो निर्दिष्टः ।द्वैतशब्देन तदितरः,वैपरीत्येन वेति विवेक्तव्यम् । ननु दृग्रूपमपि पुरुषान्तरसंवेदनं न प्रत्यक्षं तद्वद्ब्रह्मापि किं न स्यादित्याशङ्क्य तस्योपाध्यन्तरेण व्यवधानात्तथात्वं न निरुपाधिब्रह्मणस्तदित्याशयेनाह ।सन्त्यक्तव्यवधानक इति । ननु निखिलप्रपञ्चकारणस्य कथं परिवर्जितेत्याद्युक्तमिति चेन्न मायाशबलात्मना तस्य तथात्वेऽपि स्वस्वरूपेण परिशुद्धत्वादित्यभिप्रेत्याह । परमके विष्णोः पद इति । शाश्वते निर्विकार इति गुणक्रियाराहित्ये हेत्वन्तरमुक्तम् । शिष्येणैवंभूते ब्रह्मणि प्रत्यगभेदबुद्धिः कर्तव्येति शिक्षयन्नाह । त्वयीति । किञ्चाज्ञानकार्याणां गिरां तादृशेनैवार्थेन संबन्धो युक्तः समस्वभावयोरेव लोके संबन्धदर्शनात्तन्नामरूपाभ्यामेव व्याक्रियतेति शब्दतदभिधेययोराविद्यकत्वश्रवणाच्च न त्वज्ञानतत्कार्यविरुद्धेन दृग्रूपेण प्रत्य-

गात्मनेत्याशयेनाह । अज्ञानविजृम्भिता इति । एवं च कोऽपि शब्दस्तत्र प्रवर्त्तितुं नार्हतीति सर्वपदलक्षणैवोचितेति भावः ॥ २३९ ॥

आस्तामत्र वचःप्रवृत्तिविरहः प्रत्यक्त्वहेतोर्दृशि
व्यापाराय मनोऽपि न प्रभवति भ्राम्यत्पराग्भूमिषु ॥
एवं चेदखिलप्रमापणदवीः षोढा विभिन्ना भवा-
नुल्लङ्घ्य व्यवतिष्ठते त्वयि गिरःस्यान्मुख्यवृत्तिः कथम्
॥ २४० ॥

एवं कस्यापि प्रवृत्तिनिमित्तस्य निष्कले आत्मन्यसंभवान्नैकस्यापि शब्दस्य तत्राभिधा वृत्तिः संभवतीत्युक्तम्, इदानीं तत्र संगतिग्रहासंभवादपि नाभिधा संभवतीत्याह । आस्तामिति । तिष्ठत्वित्यर्थः । अत्र निष्कलात्मनि प्रवृत्तिनिमित्ताभावादत्र वचसो मुख्यप्रवृत्तिविरह आस्तां नैतावन्मात्रमिहेति भावः । किं तर्ह्यन्यत्तदाह । प्रत्यक्त्वहेतोरिति । द्रष्टृत्वाद्धेतोरित्यर्थः । व्यापाराय ज्ञानाय । मनोऽपीत्यपिशब्देन सकलार्थावभासकतया सूक्ष्मवस्तुनिर्धारकतया वा चक्षुरादिभ्योऽतिशयं तस्य द्योतयति । न प्रभवति न शक्नोति । मनश्चेदात्मनि ज्ञानं जनयेत्तर्हि मनसा करणेन द्रष्टा स एवान्यो वा । अन्यश्चेत्स एवात्मा न विषयः विषयस्यानात्मत्वनियमात्, एकत्र भोक्तृद्वयायोगाच्च । अत एव स एवेत्यप्यनुपपन्नम् । कर्तृकर्मविरोधोऽपि

स्यादिति न द्रष्टरि मनोव्यापारः संभवतीत्याशयेनाह । भ्राम्यदिति । पराग्भूमिषु बाह्यविषयेष्वनिच्छयापि पुनःपुनः प्रवर्त्तमानमित्यर्थः । पराग्विषयेष्वित्यनेन ज्ञानविषयस्य पराक्त्वं ज्ञात्रन्यत्वरूपम्, भ्रमतीत्यनेन पराग्विषयप्रवृत्तिशीलत्वं च मनसो दर्शितम् । तथा च श्रुतिः । तस्मात्पराङ् पश्यति नान्तरात्मन्निति । ततः किं तत्राह । एवं चेदिति । मन आत्मग्रहायोग्यं चेत्प्रत्यक्षादिषट्प्रकारेण भिन्नास्तदधीनव्यापारनिखिलप्रमाणानां पदवीर्मार्गानुल्लङ्घ्य भवान्व्यवतिष्ठते, मनोऽधीनव्यापारार्हाणि हि चक्षुरादिप्रमाणानि तदगोचरे आत्मनि न प्रवर्त्तितुमर्हन्तीति भवांस्तदविषय इत्यर्थः । ततोऽपि किं तत्राह । त्वयि गिर इति । भवान् त्वयीत्यादिशब्दा अधिकारिणाहमेवंविध इति प्रतिपत्तव्यमितिसूचनायेत्युक्तम् । एवमग्रेऽपि प्रमाणान्तरेण हि शब्दस्य संगतिग्रहो वाच्यः । आत्मनि च मनोव्यापारागोचरे न प्रमाणान्तरप्रवृत्तिरिति न तदधीनः शब्दार्थसंगतिग्रहः संभवतीति भावः ॥ २४० ॥

आत्मानं न तु कर्मतामुपनयञ्छब्दो वदेल्लक्षणा-
मार्गेणापि यतः पराग्विषयवन्नास्येष्यते कर्मता ॥
प्रत्यक्त्वा हि विरुध्यते यदि भवेदस्यात्मनः कर्मता
यद्यत्कर्म न तस्यतस्य भवति प्रत्यक्स्वभावो यतः ॥२४१॥

नन्वेवं लक्षणयापि कथमात्मानं वेदान्तः प्रतिपाद-

येत्, तस्य विषयतयानात्मत्वप्रसंगादिति चेत्,किं फलव्याप्यतारूपविषयत्वेन तस्यानात्मत्वम्, किं वा वृत्तिव्याप्यत्वेन, आद्ये तथैव तत्, अत एव नास्माभिरपि तथा वर्ण्यत इत्याशयेनाह । आत्मानमिति । कर्मतां फलव्याप्यतामुपनयन्प्रापयञ्छब्द आत्मानं लक्षणावृत्त्यापि कर्मतामुपनयन्नैव वदेदिति संबन्धः । ननु वेदान्तानामात्मन्यपरोक्षज्ञानजनकत्वादिन्द्रियवत् कथं तत्र न फलाधायकत्वमित्याशङ्क्याह । यत इति । पराग्विषयवत् । घटादेरिवेत्यर्थः । घटादेर्हि जड़त्वात् प्रमाणाधीनस्फुरणाश्रयत्वं विना न स्फुटता संभवति । आत्मनस्तु स्वत एव स्फुटत्वात्तदतिरिक्तस्फुरणासंभवाच्च न प्रमाणाधेयस्फुरणाश्रयत्वमिति न फलव्याप्यतेत्यर्थः।न द्वितीयः। तंत्त्वौपनिषदमिति श्रुत्यात्मन्यपि तत्सिद्धेः । न चैवमन्यदेव तद्विदितादितिश्रुतिविरोधः । तस्याः फलव्याप्यत्वमात्रनिषेधपरत्वात् । अन्यथानन्यथासिद्धवर्णितश्रुतिविरोधः स्यादित्याशयेनाह । प्रत्यक्त्वेति । हिरवधारणे । अस्यात्मनो यदि कर्मता भवेत्तर्ह्येव प्रत्यक्ता विरुद्ध्यत इति संबन्धः । एवं च वृत्तिव्याप्यत्वे न दोष इति भावः । तथैव नियममाह । यद्यादिति । यतो यद्यादिति सम्बन्धः ॥२४१॥

वागादेः खलु बाह्यवस्तुविषयो नात्मा यतो नात्मनि
व्यापारं करणस्य कस्य चिदपि प्रेक्षामहे न्यायतः॥

यत्किं चित्करणं जगत्त्रयगतं तत्प्रत्यगात्मेक्षितं
बाह्ये वस्तुनि वर्त्ततेऽनुभवनं तत्र प्रमाणं मतम् ॥२४२॥

एवं प्रत्यक्षादिसर्वप्रमाणागोचरत्वमुक्त्वा तेनैव चक्षुराद्यगोचरत्वमपि सिद्धवत्कृत्य, अग्राह्यमित्यादिश्रुत्यनुरोधेन न्यूनतापरिहाराय च कर्मेन्द्रियागोचरत्वमप्याह । वागादेरिति । आदिपदेन पाण्यादिग्रहणम् । खल्विति सकलवादिप्रसिद्धिमाह । बाह्यवस्त्विति । वक्तव्यादिरूपशब्दादीत्यर्थः । आत्मा विषयो नेत्यनुषङ्गः । कुतस्तत्राह । यत इति । यतो न्यायत आत्मनि कस्य चित्करणस्य वागादिमध्ये कस्यापि करणस्य व्यापारं न प्रेक्षामह इति संबन्धः । किं वागादिः स्वस्य प्रसिद्धप्रवचनादिव्यापारेणात्मानं विषयीकरोति, उत व्यापारान्तरेण । नाद्यस्तस्यात्मन्यसंभवात्, न हि शब्दादिविलक्षणे वागादेर्वचनादानादिगोचरत्वं संभवति । न द्वितीयस्तेन विनानुपपत्त्यभावेन तदसिद्धेरित्यर्थः । किं च जगति यावत् किं चित्करणमस्ति तस्य सर्वस्य नात्मा गोचरः, सर्वं हि करणं प्रत्यगात्माधिष्ठितं बाह्यमेव विषयीकरोतीति सर्वेषामनुभवसिद्धमित्याह । यत्किं चिदिति । ईक्षितम् अधिष्ठितम् । तत्र । तस्मिन्नर्थे ॥ २४२ ॥

प्रत्यग्रूपमतो न शब्दविषयो बुद्धेरवेद्यं यतो
बुद्धिर्यत्र हि विद्यते स विषयः शब्दस्य नात्मन्यसौ ॥

तेनात्मानमसौ न गोचरयितुं शब्दः क्षमो मुख्यया
वृत्त्या वेतरयापि तेन न तया तस्यात्मनः कर्मता ॥२४३॥

मनोव्यापारागोचरत्वेन तदधीनव्यापारनिखिलप्रमाणागोचरे आत्मनि संगतिग्रहासंभवात्प्रवृत्तिनिमित्ताभावाच्च न मुख्यवृत्त्या शब्दप्रवृत्तिरित्युपपादितमुपसंहरति । प्रत्यग्रूपमिति । प्रत्यग्रूपं यतो बुद्धेर्मनसोऽवेद्यं ततः शब्दविषयो नेतिसंबन्धः । बुद्ध्यविषयोऽपि शब्दविषयः किं न स्यादित्याशङ्क्याह । बुद्धिरिति । शब्दस्य बुद्धिवृत्तिकरणत्वात्तद्गोचर एव वृत्तिरित्यर्थः । ततः किं तत्राह । नात्मनीति । असौ बुद्धिः । ततोऽपि किं तत्राह । तेनेति । येन बुद्धिरात्मनि न प्रवर्त्तते तेनोक्तन्यायेन संगतिग्रहासंभवादसौ शब्द आत्मानं मुख्यया वृत्त्येतरया लक्षणया वा गोचरयितुं न क्षम इति संबन्धः । लक्षणया तद्गोचरत्वनिषेधश्चात्मनः फलव्याप्यत्वाभावाशयेन, तमेवाह । तेनेति । येनात्मनः सर्वप्रमाणफलरूपत्वान्न फलव्याप्यता तेनेत्यर्थः ॥ २४३ ॥

नन्वज्ञेयमिदं भवेद्यदि मम प्रत्यक्स्वरूपं ततः
प्रामाण्यं कथमस्य वेदशिरसस्तत्र प्रतिज्ञायते ॥
यन्मेयं न भवेत्कदाचिदपि तद्वेदान्तवेद्यं भवे-
दित्येतद्वचनं पराहतपदं वक्तुं न युक्तं बुधैः ॥ २४४ ॥

नन्वात्मनः फलव्याप्यत्वाभावे शास्त्रजन्यज्ञानविष-

यत्वं नास्तीत्यज्ञेयं ब्रह्म स्यात् एवं च तं त्वौपनिषदमिति श्रौती शास्त्रयोनित्वादिति सौत्री च तस्य शास्त्रप्रमाणकत्वप्रतिज्ञा न सिद्ध्येदिति उक्तां व्यवस्थां दृढीकर्त्तुं शङ्कते । नन्विति । चोद्ये इदं प्राङ्निर्धारितस्वभावं ममेदं प्रत्यक्स्वरूपमिति सम्बन्धः । ततस्तर्हि । तत्र इत्थंभूते मम स्वरूपे । प्रतिज्ञायते श्रुतिसूत्रकाराभ्यामिति शेषः । कथंशब्दसूचितं दूषणमेव व्यनक्ति । यन्मेयमित्यादिना । अथ वा फलाव्याप्यत्वेऽपि ब्रह्मणो वृत्तिव्याप्यत्वान्न प्रतिज्ञाबाध इत्याशङ्क्य तर्हि धर्मादिवच्छास्त्रोत्थवृत्तिचैतन्यविषयत्वं स्यादन्यथा चिदचित्संवलितप्रमाविषयत्वाभावाद्ब्रह्म मेयं न भवेदिति तत्र प्रामाण्यप्रतिज्ञा कथं न व्याहन्येतेत्याह । यन्मेयं न भवेदिति । कदाचिदपि यन्मेयं नेति संबन्धः । पराहतान्यन्योऽन्यं विरुद्धानि पदानि यस्मिंस्तत्तथा ॥ २४४ ॥

नैतद्वस्तुनि कल्पितस्य जगतो वाक्यप्रसूतप्रमा
बुद्धिर्मूलधगिष्यते तव निजस्वाकारमात्रग्रहात् ॥
कर्मत्वं न करोति वाक्यजनिता बुद्धिस्वरूपे तव
स्वाकारग्रहणेन केवलमियं संसारमूलं दहेत् ॥ २४५ ॥

ब्रह्मणः स्वप्रकाशतया चिदन्तराभावाच्च चैतन्याविषयत्वेऽपि शास्त्रस्य तत्र प्रामाण्यप्रतिज्ञा न विरुद्ध्यत इति परिहरति । नैतदिति । त्वदुक्तं दूषणं नेत्य-

र्थः । कुतः यतो वाक्यप्रसूतप्रमारूपा बुद्धिर्वस्तुनि कल्पितस्य जगतो यन्मूलमज्ञानं तद्दहति नाशयतीति मूलधगिष्यते, ततश्च निवर्त्तकत्वेन तत्र शास्त्रप्रामाण्यमुपपद्यत इति भावः । ननु बुद्धिरूपाया अपि प्रमायाः स्वगोचरविषयाज्ञानादिनिवर्त्तकस्वभावत्वाद्ब्रह्मणः शास्त्रीयप्रमाविषयत्वाभावे कथं तस्यास्तन्निवर्त्तकत्वमिति चेन्न । अस्त्येव हि ब्रह्मणो घटादिवद् वृत्तिविषयत्वं स्वप्रकाशस्याप्यसजातीयविषयत्वस्येच्छाविषयत्ववत् प्रदीपादेर्ज्ञानविषयत्ववच्चाविरोच्चैतन्यांशविषयत्वं तु स्वप्रकाशे विरुद्धमेव । न च तत्र तन्मानमस्ति तथापि प्रकृते न काचित्क्षतिरविद्याविषयस्य पूर्णचैतन्यस्यैव प्रकाशमानस्याविद्यानिवर्त्तकत्वोपपत्तेस्तदाकारसाक्षात्कारवृत्त्या ह्यनभिव्यक्तिरूपावरणनिवृत्तौ प्रकाशमानचैतन्यस्यैव सर्वत्राविद्यादिनिवर्त्तकत्वमिति वृत्तौ तदाकारतामात्रमपेक्षितं तच्चेहास्तीत्याह । तव निजेति । निजो यः स्वस्वभावभूतश्चैतन्याद्वयानन्दघन आत्मा तदाकारमात्रग्रहादित्यर्थः, मात्रपदेनाहङ्कारादि व्यावर्त्तयति । नन्वज्ञानस्य घटादौ स्वगोचरकर्मकज्ञानान्निवृत्तेरिहाप्यज्ञानत्वेनावृतब्रह्मगोचरज्ञाननिवर्त्यत्वमनुमीयत इत्याशङ्क्य जड़गोचरत्वं तत्रोपाधिरित्याशयेनाह । कर्मत्वं न करोतीति । किं चाविद्यानिवृत्तेर-

रविद्याविषयस्य प्रकाशमात्रेण तदाकारवृत्त्यभिव्यक्तेनोपपत्तौ न कर्मत्वं तत्प्रयोजकमित्यप्रयोजकत्वं हेतोरित्यभिप्रेत्याह । तव स्वाकारग्रहणेनेति । केवलं कर्मत्वरहितं यथा स्यात्तथेयं तव स्वाकारग्रहणेनेति संबन्धः । एवं च वेदान्तादिजन्यवृत्त्याकारमात्रतया ब्रह्म वृत्तिव्याप्यमेव न तु घटादिवत्फलव्याप्यं नापि धर्मवद्वृत्तिचैतन्यविषय इति भावः ॥ २४५ ॥

संविद्व्युत्पादकं यद्वचनमभिमतं कर्ममीमांसकानां
तत्कर्मत्वं न तावत्क्षिपति घटपटाद्यर्थसंवित्स्वरूपे ॥
किं त्वज्ञानापनुत्त्या फलवदभिमतं तत्र शिष्यस्य तद्वत्
सर्वं वेदान्तवाक्यं फलवदिदमपि प्रत्यगात्मस्वरूपे ॥२४६

ननु तदाकारवृत्तिव्यक्तचैतन्यविषयत्वं विनाऽविद्यादिनिवृत्तिमात्रेण परीक्षकाणां न प्रामाण्यं संमतमित्याशङ्क्य मीमांसकानां तावत्तत्संमतमित्याह । संविद्व्युत्पादकमिति । कर्ममीमांसकानां तावत्संविद्व्युत्पादकं तत्स्वरूपज्ञापकं वचनं ज्ञानं ज्ञातता वा स्वप्रकाशमित्यादिवाक्यमभिमतं तद्घटपटाद्यर्थस्य या संवित्तत्स्वरूपे कर्मत्वं ज्ञाततां तद्विषयज्ञानं वा न क्षिपति न जनयति । ज्ञातताया ज्ञानस्य च स्वयंप्रकाशत्वेन तत्र ज्ञाततान्तरस्य ज्ञानान्तरस्य वाऽयोगात् । ज्ञानस्य परोक्षज्ञानविषयत्वोपगमे वाऽपरोक्षविषयत्वे च तत्स्वप्रकाशत्वविरोधादित्यर्थः । किं तर्हि तत्र प्रमाणकृत्यमिति तत्राह ।

किंत्वित्यादिना । तत्र शिष्यस्य तदाकारज्ञानजननद्वारा ज्ञानस्य स्वप्रकाशत्वादिसंशयादेरपनुत्त्या निवृत्त्या फलवदभिमतमिति यद्वत्तद्वदिति संबन्धः ॥ २४६ ॥

अकार्यस्वरूपस्य कार्यत्वमिष्टं
यथा कारकैर्मूर्तमुत्सारयद्भिः ॥
तथैवाप्रमेयस्य मेयत्वमिष्टं
प्रमाणैस्तमस्तद्वदुत्सारयद्भिः ॥ २४७ ॥

लोकेऽप्याह । अकार्येति । यथा ऽसाध्यस्वरूपस्य कूपगगनादेस्तिरोधायकमृत्पाषाणाद्युत्सारयद्भिरपसारयद्भिः कारकैः कर्तृकरणादिभिः कार्यत्वं साध्यत्वमिष्टं तथैवाप्रमेयस्येति संबन्धः । लोके हि देवदत्तादिकर्तृभिः कुद्दालादिभिः कूपः साध्यते । कूपश्चावच्छिन्नं नभ एव तदन्यस्यानिरूपणात् । न च नभसः स्वरूपेणपाधिद्वारा वा साध्यता संभवति । मूर्त्तद्रव्योत्सारणव्यतिरेकेण प्रयत्नसाध्यस्यान्यस्यात्रासंभवात् । एवं च यथा तावतैव कूपाकाशस्य साध्यतावगमः एवमस्याप्रमेयस्याप्यात्मनः प्रमाणैरज्ञानतत्कार्यविलोपात्प्रमेयत्वव्यवहार इति भावः ॥ २४७ ॥

वाक्योत्थापितबुद्धिवृत्तिरमला यज्ञादिभिर्निश्चला
वेदान्तश्रवणादिभिः स्फटिकवत्स्वच्छा सती तावकम्॥,
रूपं दर्पणवद्बिभर्ति परमं विष्णोः पदं संनिधे-
रेतस्मादिह कारणादथ भवेत्संसारबीजक्षयः ॥ २४८ ॥

नन्वेवं साङ्गाध्ययनादेवोत्पन्नात्मज्ञानादप्यविद्यानिवृत्तिः स्यादित्याशङ्क्य, दृष्टादृष्टप्रतिबन्धरहितवृत्त्यभिव्यक्तपूर्णचैतन्यस्यैवाविद्यानिवर्त्तकत्वान्नैवमित्याशयेनाह । वाक्योत्थापितेति । अमला प्रक्षीणदुरिता । यज्ञादिभिरमलेति संबन्धः । निर्म्मला संशयादिरहिता । अत एव स्वच्छा । सन्निधेः सन्निधानादेव । विष्णोः पदं बिभर्ति । तत्प्रतिबिम्बं गृह्णातीत्येतस्माज् ज्ञानात्सविलासाज्ञाननिवृत्तिरित्यर्थः ॥ २४८ ॥

एवं वेदशिरः प्रमाणमुदितं प्रत्यक्स्वरूपे तव
कर्मत्वं विरहय्य तत्र न हि नो बाध्यः प्रतिज्ञागिरः ॥
कर्मत्वं न करोति बोधयति च स्पष्टं वचो वैदिकं
रूपं तावकमेवमस्य भवति प्रामाण्यमत्रात्मनि ॥ २४९ ॥

आर्थक्रमानुरोधेन द्वितीयं पद्यमवतार्यते, एवं फलाव्याप्ये चैतन्याविषये चात्मनि विधिरूपवेदान्तप्रामाण्यमुपपादितमुपसंहरति । एवं वेदशिर इति । तावता च श्रुतिसूत्रयोः शास्त्रप्रमाणकत्वप्रतिज्ञापि न विरुध्यत इत्याह । तत्रेति । प्रतिज्ञाविलोपमेव विवृणोति । कर्मत्वं न करोतीत्यादिना ॥ २४९ ॥

पृष्ठेन पूर्णवपुषा क्रियते प्रतीति-
र्नेतीतिवाक्यजनिता जगतो निषेद्धधी ॥
प्राधान्यमस्तु विधिना सममेव तस्मा-
त्तस्याथ वा भवतु तद्वचनं प्रधानम् ॥ २५० ॥

एवं सर्वेषां विधिमुखप्रवृत्तवेदान्तानाम् आत्मा वा इदमेक एवाग्र आसीदित्यादिसर्ववेदस्थनिर्विशेषात्मोपक्रमोपसंहारैक्यादिनोदरमन्तरं कुरुत, इत्यादिभेदमात्रनिन्दावचनेन एकधैवानुद्रष्टव्यं तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथेत्यात्मप्रातिपदिकार्थमात्रज्ञेयत्वतदितरपरिहार्यत्ववचनेन च वर्णितन्यायोपोद्बलितेनाखण्डैकरसे तात्पर्यं निरूपितम्,इदानीं निषेधवाक्यमपि पदार्थशोधनद्वारा तत्त्वमस्याद्यनुग्राहकतया तत्रैव पर्यवसन्नमिति वक्तुं प्रथमं नेतिनेत्यस्थूलादिवाक्यमपि तत्त्वमस्यादिना समप्रधानं तदेव वा प्रधानमिति भेदेन केषां चिन्मतमुत्थापयति । पृष्ठेनेति । स एष नेतिनेत्यात्मेत्यादिवाक्यजनिताप्रपञ्चनिषेद्धृधी प्रतीतिः पृष्ठेन पश्चान्निखिलभेदनिषेधानुपपत्त्या पूर्णवपुषा क्रियते,पूर्णं ब्रह्माऽहमस्मीत्येवमाकारा भवति यस्मात्तस्मात्तस्य निषेधवाक्यस्य विधिना विधिमुखप्रवृत्तेन तत्त्वमादिना समं प्राधान्यमस्तु। अथ वा तद्वचनमेव प्रधानं भवत्विति संबन्धः ॥ २५० ॥

अद्वैतीकरणं निषेधवचनादुत्पन्नबुद्धेरपि
तुल्यं तत्त्वमसीतिवाक्यजनितप्रत्यक्प्रतीत्या सह ॥
आर्थं शाब्दमथापि वा भवतु तत्किं तेन यद्वा विधिर्नाकर्तुं शबलार्थगोचरतया निर्भेदमर्थं क्षमः ॥ २५१॥

उक्तमेवार्थद्वयं विवृणोति । अद्वैतीकरणमिति । प्र-

त्यग्ब्रह्मैक्याकारतेत्यर्थः । अध्यस्तसकलप्रपञ्चनिषेधान्यथानुपपत्त्या तदधिष्ठानमद्वयं ब्रह्माहमेवेत्यर्थात्, प्रतीतिर्भवेत्, यथा तत्त्वमसीतिवाक्यादित्यर्थः । ननु निषेधवाक्यार्थानुपपत्त्यैकत्राद्वयात्माकारं ज्ञानं भवति, अपरत्र शब्दादेवेति कथमनयोः साम्यमित्याशङ्क्य भवत्वेवं विशेषः अविद्यानिवृत्तौ तु तदाकारतामात्रं नस्यापेक्ष्यते तच्चोभयत्रापि सममेवेति किं शाब्दत्वार्थत्वविशेषेणेत्याह। आर्थं शाब्दमिति । अथापि वा अथवेत्यर्थः । द्वितीयपक्षमुपपादयति। यद्वेति । निर्भेदमर्थमाकर्तुं तदाकारज्ञानं जनयितुं न क्षमः । कुतः शबलार्थगोचरतयेति । तत्त्वमस्यादेः शबलार्थत्वान्नाखण्डार्थज्ञानं ततः संभवतीति न ततोऽविद्यानिवृत्तिः संभवति । तत उक्तविधया निषेवाक्यमेव फलवत्प्रधानमिति भावः ॥ २५१ ॥

संबन्धजातविरहान्न च लक्षणास्मिन्
संभाव्यते परिहृताखिलदृश्यराशौ ॥
ब्रह्मात्मवस्तुनि ततः प्रतिषेधवाक्य-
शेषत्वमेतु विधिरित्यपि के चिदन्ये ॥ २५२ ॥

ननु शबलार्थस्यापि प्रागुक्तप्रकारेण तत्त्वमस्यादेर्लक्षणयाऽखण्डार्थत्वमस्त्येवेत्याशङ्क्याऽसङ्गेऽद्वये वाच्यार्थसंबन्धासंभवान्न लक्षणा संभवतीत्यभिमानेनाह । संबन्धजातविरहादिति। संयोगसमवायतादात्म्यकार्य-

कारणतादिसंबन्धासंभवादित्यर्थः । ब्रह्मात्मवस्तुनि संबन्धजातविरहादस्मिंस्तत्त्वमादिवाक्ये लक्षणा च न संभाव्यते । संबन्धाभावसिद्ध्यर्थं ब्रह्म विशिनष्टि । परिहृतेति । इति यतस्तत इति सम्बन्धः। शेषत्वं शबलार्थतत्त्वमादेरपि निषेध्यभेदाभेदोपस्थापकतया निषेधवाक्यशेषत्वमेतु प्राप्नोतु, अपिना पूर्वोक्तपक्षसमुच्चयं द्योतयति । केचिदन्य इति । वक्तृभेदव्यपदेश उक्तमतभेदाभिप्रायः। अन्य इत्युत्तरार्थौ वा ॥ २५२ ॥

वाक्यं मुक्तिफलां धियं जनयति स्पष्टं विधिव्यापृतं
साक्षादेव तत्र स्वरूपकथनान्नैवं निषेधात्मकम् ॥
अध्यारोपितरूपभेदविलयव्यापारनिष्ठं तव
स्वाकारग्रहणक्षमां नहि धियं कर्तुं समर्थं यतः ॥२५३॥

उच्यते । संबन्धजातविरहादित्यसिद्धम्, असंगेऽद्वयेऽप्याध्यासिकनिखिलसम्बन्धस्य यथानुभवं सत्त्वात्, किं चैवं सत्यादिवाक्यात्सत्यज्ञानाद्यात्मकब्रह्मासिद्ध्या स एष नेतिनेत्यादिवाक्येन तत्परामर्शेन निषेधोऽपि न स्यात्, अवान्तरवाक्यस्य तत्र लक्षणाभ्युपगमे च किमपराद्धंमहावाक्येन तेनेत्याशयेनाह। वाक्यमिति। विधिमुखेन बोधकं तत्त्वमादिवाक्यमेव भागत्यागलक्षणया तत्र शुद्धचैतन्यस्वरूपानुवादेनाद्वयब्रह्मप्रतिपादनान्मुक्तिफलां धियं स्पष्टं यथा स्यादपरोक्षरूपामिति यावत् साक्षाज्जनयति नैवं निषेधात्मकमिति संबन्धः। सा-

क्षात्तव स्वरूपेति वा योजना, अध्यस्ताहंकारस्वरूपव्यावृत्तये च साक्षादित्युक्तम्। ननु मा भूत्ततः साक्षान्मुक्तिफलज्ञानजन्म, अर्थाद्भविष्यतीति चेन्न। अधीतिविधिपरिगृहीतोपनिषद्भ्य एव साक्षादुत्पन्नज्ञानस्य मुक्तिसाधनत्वे संभवत्यार्थिकस्य तदयोगात्। औपनिषदमितिश्रुत्या ब्रह्मणि प्रमाणान्तरस्य निषिद्धत्वाच्च। किं चार्थादपि किमहं ब्रह्मेतिज्ञानं मुक्तिसाधनं ततो जायते, किंवाऽद्वयं ब्रह्मेति, नाद्यः अस्मिन्पक्षे हि तत्त्वमादिना निषेधवाक्येन वा तज्ज्ञानं भवतीति तयोर्वैकल्पिकं साधनत्वं वाच्यमेवं च निषेधस्य तत्त्वमादिवाक्यानपेक्षत्वाज्जीवमपि प्रपञ्चवत्तन्निराकुर्यात्। जीवस्वरूपशोधकवाक्यानां त्वंपदशेषाणामपि तेनानपेक्षितत्वात्ततोऽहं ब्रह्मेत्याकारा धीर्निषेधमात्रपर्यवसिता न भवेदित्याशयेनाह। अध्यारोपितेति। आत्मन्यारोपितसप्रपञ्चतारूपभेदस्य विलये निवृत्तौ यो व्यापारस्तन्निष्ठमित्यर्थः। प्रपञ्चाभावमात्रबोधकमिति यावत्। स्वाकारग्रहणक्षमाम् अहं ब्रह्मेत्याकाराम्॥२५३॥

अस्थूलादिवचःसमुत्थितमतिर्नाकारमादास्यते
साक्षादद्वयवस्तुनस्तत्र विभोरज्ञानविच्छेदिनः॥
अज्ञातस्य हि वस्तुनो न हि धिया स्वाकारसंवेदनं
मुक्त्वा तद्विषयस्य विभ्रमकृतो ध्वान्तस्य विध्वंसनम्॥२५४॥

नापि द्वितीय इत्याह। अस्थूलादिवच इति। अस्थू-

लमनणवह्रस्वमदीर्घमित्यादिसमस्तद्वैतनिषेधवचनादुत्पन्नं ज्ञानमित्यर्थः । साक्षादित्यर्थादित्यस्याप्युपलक्षणम् । अस्थूलादिवचःसमुत्थितमतिरज्ञानविच्छेदिनो विभोरद्वयवस्तुनस्तवाकारं साक्षाद्वा अर्थाद्वा नादास्यते न ग्रहीष्यतीत्यर्थः । वृत्तिव्यक्तस्वरूपस्यैवाज्ञाननिवर्त्तकत्वमित्याशयेनाज्ञानविच्छेदिन इत्युक्तम् । मा भूत्तदादानमित्याशङ्क्येष्टसिद्धिस्तदा न स्यादिति सामान्यन्यायेनाह । अज्ञातस्यहीति । हि यतोऽज्ञातस्य वस्तुनो धियान्तःकरणवृत्त्या स्वाकारसंवेदनम्, आवृतस्वरूपविशेषस्फुरणं मुक्त्वा तद्विषयस्य वस्तुविषयस्य विभ्रमकृतो विभ्रमहेतोर्ध्वान्तस्याज्ञानस्य विध्वंसनं निवृत्तिर्न हि भवति । अज्ञानं हि स्वविषयस्फुरणान्निवर्त्तते न त्वन्यस्फुरणात्, स्फुरणमन्तरेण वा निषेधमात्रादति प्रसङ्गात्, स्फुरणं च प्रमाणजन्यवृत्त्यधीनमित्यावृतगोचरप्रमाणवृत्तिरावश्यकीति भावः ॥ २५४ ॥

रज्ज्वज्ञानविजृम्भितस्य फणिनो रज्जुप्रकाशक्षमं
विज्ञानं विरहय्य न प्रशमनं दृष्टं निषेधे कृते ॥
तद्वत्प्रत्यगविद्यया विरचितं संसारदुःखं न तत्
संवित्तिं विरहय्य शाम्यति धिया नेतीति शब्दोत्थया ॥ २५५ ॥

ततः किमित्याशङ्क्योक्तन्यायस्य विशिष्टं दृष्टान्तं दर्शयन्दार्ष्टान्तिके तदभावे दुःखोपशमो न स्यादित्याह । रज्ज्वज्ञानेति । रज्ज्वज्ञानादारोपितस्य सर्पस्य

नायं सर्प इति निषेधे कृतेऽपि रज्जुरियमिति तदधिष्ठानावृतविशेषज्ञानं विना तदज्ञानस्य प्रशमनं न दृष्टं नास्ति यद्वत्तद्वदिति संबन्धः। जीवस्य नित्यमुक्ताद्वयब्रह्मैक्याज्ञानात्संसार इति तत्प्रकाशं विना तदज्ञानतन्मूलसंसारनिवृत्तिर्न भवेदिति नाद्वयं ब्रह्मेति ज्ञानं मुक्तिसाधनं ततो निषेधस्य न तत्त्वमादिसाम्यम्। एतेन तदेव प्रधानमिति पक्षोऽपि निरस्तो वेदितव्यः॥२५५॥

अस्थूलादिवचो निषेधकतया भेदस्य संशोधनाद्
वाक्यार्थान्वयसिद्धये तु घटते वाच्यार्थलक्ष्यार्थयोः॥
एवं तत्त्वमसीतिवाक्यगतयोस्तत्त्वंपदोक्तार्थयोः
संशुद्धैव तु नेतिनेति वचनं मोक्षाय साक्षान्न तु॥२५६

किं तर्ह्यस्थूलादिवचःकृत्यं मुक्तिसाधनज्ञानस्य विधिवाक्यादेव सिद्धत्वादित्याशङ्क्य पदार्थशोधकतया तस्य तत्त्वमादिवाक्यशेषत्वमाह। अस्थूलादिवचो निषेधकतयेति। भेदस्य निषेधकतया वाच्यार्थलक्ष्यार्थयोः संशोधनादस्थूलादिवचो वाक्यार्थान्वयसिद्धये अखण्डवाक्यार्थसिद्धये घटते व्याप्रियत इति संबन्धः। वाच्यार्थाभ्यां लक्ष्यौ यावर्थौ प्रत्यग्ब्रह्मस्वरूपभूतौ तयोः संशोधनादित्यर्थः। तत्संशोधनं च चैतन्यानन्दैकरसस्य विनिश्चयः। वाच्यार्थश्च लक्ष्यार्थश्च तयोरिति वा। वाच्यार्थे न वाक्यतात्पर्यमपि तु लक्ष्यमात्र इति निश्चय एव तयोः संशोधनम्। एवं च निषेध-

वाक्यं विधिवाक्यशेषमेव न विपरीतम्,न वा निषेधवाक्यमपि प्रधानमित्याशयेनाह। एवमिति । मोक्षाय भवतीति शेषः । साक्षान्न तु साक्षान्मोक्षाय नैव भवतीत्यर्थः ॥ २५७ ॥

अन्ये पुनर्विधिवचोजनितात्मबुद्धि-
सामर्थ्यसिद्धमनुवक्ति निषेधवाक्यम् ॥
द्वैतोपमर्द्दमिति शासति शिष्यवर्गं
तच्च प्रशस्तमनवद्यमभीष्टमेव ॥ २५७ ॥

एवं निषेधवाक्यस्याज्ञानप्रपञ्चनिषेधप्रतिपादनद्वारा तत्त्वमस्याद्यन्तर्भावो दर्शितः , अन्ये तु तत्त्वमस्यादिवाक्यार्थज्ञानसामर्थ्यसिद्धद्वैतनिषेधस्यानुवादविधया द्वैतनिषेधवाक्यं महावाक्यानुग्राहकम्, द्वैतनिषेधानुवादादपि महावाक्यस्याऽद्वैततात्पर्यसिद्धेरित्याहुस्तदप्यनुमोदते। अन्य इति। सामर्थ्यसिद्धमिति । तत्त्वमस्यादिवाक्येनाहमद्वयानन्दं ब्रह्मेति वाक्यार्थबोधे जाते अहं चेदित्थंभूतस्तर्हि कालत्रयेऽपि मयि द्वैतं नास्तीति द्वैताभावो निश्चीयत इति तमनुवदति निषेधवाक्यं न तु तं प्रतिपादयतीत्यर्थः। तत्प्रशासनम्। निषेधवाक्यस्य तत्पक्षे पृथक् तात्पर्याभावेन तात्पर्यलाघवात्प्रशस्तं समीचीनम् । अबाधितत्वाच्चानवद्यं प्रपञ्चनिषेधमन्तरेणापि दृश्यत्वादिना सिद्धतन्मिथ्यात्वमात्रेण वाक्यस्याद्वयब्रह्मप्रतिपादकत्वोपपत्तेः। अत एवाभीष्टमेवे-

त्यर्थः ॥ २५७ ॥

दृष्टश्च रज्जुविधिनावगतार्थवस्तु-
सामर्थ्यसिद्धभुजगप्रशमानुवादः ॥
रज्जुस्तवाग्रत इयं न भुजङ्गमोऽय-
मित्यत्र तद्वदिह योजयितव्यमेतत् ॥ २५८ ॥

विधिसामर्थ्यसिद्धनिषेधानुवादं लौकिकदृष्टान्तेनाप्याह। दृष्टश्चेति। रज्जुविधिना इयं रज्जुरितिवाक्येन। वस्त्विति स्वरूपपरम्, तवाग्रे स्थितेयं रज्जुर्नायं भुजङ्गम इत्याप्तवाक्य इयं रज्जुरिति वाक्यसामर्थ्यसिद्धभुजङ्गाभावस्य नायं भुजङ्गम इत्यनुवादो यद्वत्तद्वदिहापीत्यर्थः ॥ २५८ ॥

अस्यैव तत्त्वविनिवेदनशक्तिभाजः
संसारमूलविनिवृत्तिफलप्रसूतौ ॥
सामर्थ्यमस्ति पटुभिः परिबृंहितत्वा-
द्वेदान्तभूमिगतपञ्चविधार्थवादैः ॥२५९ ॥

एवं निषेधवाक्यस्य निर्विशेषे महावाक्यतात्पर्यप्रमित्यनुकूलतया तच्छेषत्वं मुक्तिफलज्ञानप्रसवस्तु तत्त्वमादेरेवेत्युक्तम्, अत्रैवोपपत्त्यन्तरमाह। अस्यैवेति। तत्त्वमादेरेवेत्यर्थः। तत्त्वविनिवेदनशक्तिभाजः तत्त्वंपरमार्थसद्वस्तु तद्धर्मशबलनिवेदनशक्तिभाज इत्यर्थः। संसारमूलस्य विनिवृत्तिः फलं यस्य ज्ञानस्य तत्प्रसूतावित्यर्थः। अस्यैव तत्सामर्थ्ये युक्तिमाह। पटुभिरि-

ति । समर्थैरित्यर्थः । परिबृंहितत्वात् । उपोद्बलितत्वात् । वेदान्तभूमिषु गताः अवगताः पठिता इति यावत् पञ्चविधा ये अर्थवादा भूतार्थवादास्तैरित्यर्थः । अर्थवादानां हि विधिनैवान्वय इति प्रसिद्धं वेदान्तभागे च सन्ति वक्ष्यमाणाः पञ्चविधार्थवादास्तैश्च तत्त्वमस्यादिवाक्यस्यैवाज्ञातज्ञापकतया विधिस्थानीयस्योपोद्बलनं दृश्यते न तु निषेधवाक्यस्येति तत्त्वमादेरेवार्थवादान्वितस्य फलवत्प्रमितिजनकत्वमित्यर्थः ॥२५९ ॥

सृष्टिस्थितिप्रलयसंयमनप्रवेश
व्यापारजातकथनच्छलतः प्रवृत्तैः ॥
सानुग्रहादवगतिः खलु तत्त्वमादे-
र्वाक्यात्परस्य घटते न ततोऽपरस्मात् ॥ २६० ॥

तानेवार्थवादान्दर्शयंस्तत्त्वमादेस्तदनुग्रहात्पुरुषार्थसाधनज्ञानहेतुत्वं युज्यते न तु निषेधस्येत्याह । सृष्टिस्थितीति । सृष्टिर्वियदादेः सर्जनम्,स्थितिस्तस्य तत्रैव स्थितिस्तत्पालनमिति यावत् , प्रलयस्तस्य तत्रैव लयस्तत्संहरणमिति यावत्, संयमनं नियन्तृत्वम्, प्रवेशो जीवरूपेण प्रतिफलनम्, त एव व्यापारास्तेषां जातं समूहस्तत्कथनच्छलतस्तद्व्याजेन प्रवृत्तैरर्थवादैः कृतो योऽनुग्रहस्तत्सहितात्तत्त्वमादेर्वाक्यादिति योजना । वेदान्तेषु हि यतो वा इमानि भूतानि जायन्ते येन

जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः स एष इह प्रविष्ट आनखाग्रेभ्य इत्यादयः श्रूयन्ते, ते चार्थवादा एव, निर्गुणब्रह्मप्रकरणगतत्वात्, स्वतः प्रयोजनशून्यतया वेदान्तार्थशेषत्वाच्च, तत्र सृष्ट्यादित्रयेण कारणस्य ब्रह्मणः प्रपञ्चभेदनिषेधः कार्यकारणानन्यत्वन्यायेन सिद्ध्यति। नियमेन नियन्तुः कारणस्य चैतन्यप्रवेशेन तस्य जीवानन्यत्वमित्येभिरद्वयचैतन्यात्मकप्रत्यग्ब्रह्माभेदपरतत्त्वमादेरेवार्थदृढीकरणात्तस्यैव तत्कृतोपकारभाक्त्वं न तु निषेधवचनस्य कथमपि तत्र सृष्टिस्थित्योः कथं चित्तत्र निषेध्यप्रसञ्जकतया तदनुग्राहकत्वेऽपि प्रलयादीनां तदनुपयोग एव। एवं संयमनादिविशेषोपन्यासस्येति तत्त्वमादेरेव वाक्यात्तदर्थस्याद्वयब्रह्मणोऽवगतिर्घटते न ततोऽपरस्मान्निषेधादित्यर्थः ॥ २६० ॥

सूत्रं तत्तु समन्वयादिति विधिव्यापारनिष्ठं वचो
मोक्षायेति निवेदनाय कृतवान् वेदान्तवेदी मुनिः ॥
न्यायेनाकलयन्नशेषवचनव्यापारमूरीकृत-
स्वातन्त्र्यः सकलेऽपि वेदशिरसि स्वैरं चरन्नीश्वरः॥२६१॥

एवं सूत्रकारस्याशयादपि विधिवाक्यस्यैव प्राधान्यं निश्चीयत इत्याह। सूत्रमिति। वेदान्तवेदी वेदान्तानां सम्यगर्थवेदनशीलः, अनेनास्य तद्विषयेऽज्ञानादिराहि-

त्यं सूचितम्, मुनिर्बादरायणः तत्तु समन्वयादितिसूत्रं कृतवानिति संबन्धः। किमर्थमिति तदाह। विधीत्यादि निवेदनायेत्यन्तम्। स हि भगवांस्तत्तु समन्वयादिति सूत्रे तत्पदेन निर्विशेषाद्वयं सत्यज्ञानानन्दात्मकं ब्रह्म शास्त्रप्रमाणकं प्रतिज्ञाय तत्र समन्वयादिति हेतुं दर्शयति न तु निषेधादिति। न हि निषेधवाक्यसमन्वयमात्रात्सत्यज्ञानानन्तानन्दं ब्रह्म सिद्ध्यतीतिविधिव्यापारमेव वचनं ब्रह्मणि प्रमाणमिति दर्शितवानित्यर्थः। ननु स च केन बलेनैवमुक्तवानित्याशङ्क्योक्तन्यायेनेत्याह। न्यायेनेति। आकलयन्नशेषवाक्यार्थं निश्चिन्वन्, तस्याप्यखिलवचनव्यापाराकलने सामर्थ्यमाह। ऊरीकृतस्वातन्त्र्यः स्वतः स्वीकृस्वातन्त्र्यः, अत एव तस्येश्वरत्वं स्मर्यते। को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत् इति। अत एव सकलेऽपि वेदशिरसि सर्ववेदान्तार्थे स्वैरं चरन् स्वत एवावगच्छन्नशेषवचनेति पूर्वेण संम्बन्धः॥ २६१॥

ख्य

वाक्यार्थान्वयितत्पदार्थकथने नेतीति वाक्यं पुनः
साक्षात्सूचयति स्म सूत्रकृदतस्तत्तत्परं निश्चितम्॥
एवं हस्ततलार्पितामलकवत् तात्पर्यसंवेदने
सत्यन्यादृगुदीरयन्ति यदि तत्क्षान्तुं कथं शक्नुमः॥२६२॥

एवं वाक्यतात्पर्यनिरूपकसमन्वयसूत्रबलाद्विधिप्राधान्यमुक्तम्, संप्रति तत्पदार्थशोधनप्रस्तावे एव सू-

त्रकारस्य प्रकृतैतावत्त्वं हि प्रतिषेधति, ततो ब्रवीति च भूय इत्यादिसूत्रेण निषेधवाक्यविचारादपि निषेधवचनं विधिशेष एवेत्याह । वाक्यार्थेति । पुनरपि सूत्रकृन्नेतीति वाक्यं साक्षात्तत्त्वमस्यादिवाक्यार्थोऽन्वयी यस्तत्पदार्थस्तत्कथने तच्छोधनार्थं प्रतिषेधतीत्यनेन सूचयति स्म यतोऽतस्तन्निषेधवाक्यं तत्परं तत्पदार्थपरं न तु वाक्यार्थपरमित्यर्थः । सूत्रकारो ह्युदाहृतसूत्रेण अथात आदेशो नेतिनेतीति वचनं मूर्त्तादिकं कारणब्रह्मस्वरूपमेव प्रतिषेधति न तु रूपि ब्रह्मेतिप्रतिपादयंस्तत्पदार्थमेव शोधयामासेति न तत्प्रधानमिति भावः । ननु विधिर्वा प्रधानमस्तु निषेधो वा किं तत इत्याशङ्क्य निषेधप्राधान्येऽपसिद्धान्तः स्यादित्याशयेनोपसंहरति । एवमिति स्पष्टम् ॥ २६२ ॥

सत्यं ज्ञानमनन्तमित्यभिहिते संभावनाऽऽनीयते
नाऽस्थूलादिवचःसमुद्भवधिया द्वैतोपमर्दं विना ॥
तेनावान्तरवाक्यलक्ष्यविषयां बुद्धिं दृढीकुर्वता
सर्वद्वैतनिषेधकेन वचसा वाक्यार्थधीर्जन्यते ॥२६३॥

ननु तत्पदार्थसंशोधनस्य सत्यं ज्ञानमनन्तं ब्रह्मेत्याद्यवान्तरवाक्यैरेव सिद्धत्वात्किं तदर्थं निषेधवाक्यविचारेणेत्याशङ्क्याऽनन्तपदार्थदृढीकरणाय तदपेक्षितमित्याह । सत्यं ज्ञानमनन्तमिति । सत्यादिरूपेणाभिहितेपि न संभावनाऽऽनीयत इति संबन्धः। आनीय-

त इति पदम्। अनन्तमाकाशमितिवदन्यथासिद्धिशङ्कासंभवादित्यर्थः। अस्थूलादिविनान्तमादौ योजनीयम्। फलितमाह। तेनेति। येन निषेधवाक्यानां सत्यादिवाक्यार्थानन्त्यसंभवबुद्धिहेतुत्वं तेनेत्यर्थः। अवान्तरवाक्येन सत्यादिवाक्येन या लक्ष्याऽनन्तब्रह्मविषया बुद्धिस्तां दृढीकुर्वता वाक्यार्थधीः तत्त्वमा-
वा. दिवैक्यार्थधीः परंपरया जन्यत इत्यर्थः॥ २६३॥

अस्थूलादिवचोनिरस्तनिखिलद्वैतप्रपञ्चं परं
जाग्रत्स्वप्नसुषुप्तिवर्जितमिदं प्रत्यक्स्वरूपं तथा॥
एकीकृत्य परस्परेण पदयोरर्थद्वयं तत्त्वतः
प्रत्यक्चाद्वयमद्वयं च तदिति प्रेक्षस्व निःसंशयम्॥२६४॥

नन्वेवं तत्पदार्थसंशुद्धावप्यवस्थात्रयतद्धर्मकलुषीकृतजीवस्वरूपस्य कथमखण्डवाक्यार्थप्रवेश इत्याशङ्क्य शुद्धं तत्पदार्थमनुवदंस्तस्याऽपि ज्योतिर्ब्राह्मणतात्पर्येण जाग्रदाद्यवस्थातद्धर्मकामकर्तृत्वादिरहिताऽसंगज्ञप्तिमात्रतया सिद्धत्वादखण्डमात्मतत्त्ववाक्यादवेहीत्याह। अस्थूलादिवच इति। परं परमात्मतत्त्वम्। तथेति समुच्चये। पदार्थद्वयशोधनफलमाह। एकीकृत्येति। परस्परेण परस्परम्। पदयोस्तत्त्वंपदयोः। एकीकरणप्रकारमेवाह। तत्त्वत इत्यादिना। निःसंशयं यथा स्यात्तथेत्यर्थः॥ २६४॥

अद्वैतं परिशोधितं भगवतो विष्णोः परं सत्पदं

तच्छब्देन समर्पितं परिगृहीतादेयमात्मप्रभम् ॥
यच्चोपाधिविवर्जितं तव निजं साक्षात्स्वरूपं तयो-
रेकत्वं परिवर्जितव्यवधिकं प्रत्यक्षमीक्षस्व भोः ॥२६५

नन्वस्तु शुद्धमपि पदार्थद्वयं पृथगेव तत्कथं निःसंशयं प्रेक्षणं स्यादित्याशङ्क्य पदद्वयलक्ष्ये भेदकाभावात् कथमपि भेदो न संभवतीति कथं न निःसंशयं प्रेक्षणमित्याशयेनाह । अद्वैतमिति । भगवतो विष्णोर्यत्परं पदं परिशोधितं सत्यादिवाक्येनेति शेषः । तदेव भागलक्षणया तत्पदेनोपादेयमित्याशयेनाह । परिगृहीतादेयमिति । परिगृहीतमादेयमुपादेयांशो यथा स्यात्तथा समर्पितमित्यर्थः । उपाधिवर्जितमहंकारादिरहितमत एव साक्षादित्युक्तम् । परिवर्जितव्यवधिकं निरस्तपरस्परभेदकम् । एतच्चैकत्वविशेषणमत्यन्ताभेदाभिप्रायम् ॥ २६५ ॥

अनृतजडविभक्तदुःखतुच्छा-
सहनवपुः परमं पदं मुरारेः ॥
परिहृतसकलप्रपञ्चमात्मा
तव तदवेहि तमो निरस्य वाक्यात् ॥ २६६ ॥

परिगृहीतादेयमित्यनेन सूचितं सत्याद्यवान्तरवाक्यसिद्धं परमं पदं तत्र सत्यादिपदानामनृतादिव्यवच्छेद एव प्रातिस्विकं प्रयोजनमिति दर्शयन्ननृतादिव्यावृत्तिमुखमखण्डवाक्यार्थप्रपञ्चनमुपसंहरति । अनृतजडे-

ति । विभक्तेत्यनन्तपदव्यवच्छेद्यं परिच्छिन्नमुक्तम्, तुच्छेति सत्पदव्योवर्त्यम् । एताननृतादीन्न सहत इत्यसहनम् एतद्विलक्षणमिति यावत्, एवंविधं वपुर्यस्य तदित्यर्थः । तमः पदार्थाविवेकं तद्विवेचनेन निरस्य यत्सत्यज्ञानानन्तानन्दसद्रूपं परिहृतसकलप्रपञ्चमद्वयं मुरारेः परमं पदं तत्त्वमात्मेति तत्त्वमादिवाक्यादवेहीति संबन्धः ॥ २६६ ॥

श्रद्धत्स्व सोम्येति हि शास्ति शास्त्रं
श्रद्धाधनत्वश्रुतिरस्ति चान्या ॥
श्रद्धा तु यस्येत्यपरं च वाक्य-
मधीयते संशयकुत्सनाय ॥ २६७ ॥

एवमखण्डवाक्यार्थं निरूप्य तस्यातिसूक्ष्मतया पुनः सन्दिहानं प्रत्युपससाद चतुष्टयसाधन इत्यनेन साधनसंपन्मध्यस्थतयोक्तायामपि श्रद्धायां तस्याः प्राधान्येन कर्त्तव्यतामभिप्रेत्य तत्र प्रमाणमाह । श्रद्धत्स्वेति । छान्दोग्ये यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येत्यतिसूक्ष्मस्य जगन्मूलस्य ब्रह्मणो दुर्विज्ञेयतया तद्विज्ञानसाधनं श्रद्धामिदं वाक्यं विधत्ते । तथा बृहदारण्यके श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्येदित्याह । तदिदमाह । श्रद्धाधनत्वश्रुतिरिति । एवं यस्य स्याद्धा न विचिकित्सा-

स्तीति संशयनिवृत्तयेऽपरमपि वाक्यं छन्दोगा अधीयते । ततस्त्वं वर्णितेऽखण्डवाक्यार्थे संशयनिवृत्तये श्रद्धां कुर्वित्यर्थः ॥ २६७ ॥

अज्ञो विनश्यति पुमानतिमूढभावा-
दश्रद्धयोपहतबुद्धिरतोऽपि कष्टः ॥
कष्टाच्च कष्टतर एव तु संशयात्मा
दुःखी सदेति भगवानपि वासुदेवः ॥ २६८ ॥

एवं तमो निरस्येत्यज्ञानस्य संशयकुत्सनायेति संशयस्य च निवृत्तिं सूचयता तयोरनर्थहेतुत्वं सूचितं श्रद्धायाश्चानुष्ठेयत्वं सूचयता तदभावस्यापि तत्सूचितं तत्त्रितयं भगवतोऽपि संमतमित्याह । अज्ञो विनश्यतीति । अविवेकी परमपुरुषार्थाद्भ्रश्यतीत्यर्थः । अतिमूढभावात्त्वंपदार्थाविवेकात् । अज्ञोऽपि यदि वैदिकं कर्म श्रद्दध्यात्तस्य कदाचिद्भवेदपि पुरुषार्थो न त्वश्रद्दधानस्य, तस्य नास्तिक्यप्रसङ्गेनानर्थसम्भवाद्धित्याह । अश्रद्धयोपहतबुद्धिरिति । बुद्धिर्वैदिकी । कष्टः अतिदुःखीत्यर्थः । यदि कश्चिच्छ्रद्धामपि संपाद्य विवेकादिसाधनचतुष्टयो भूत्वा संन्यस्यानिश्चयरूपापातज्ञानेन कृतार्थं मन्यमानः श्रवणादिकं नानुतिष्ठति, असावन्ततः सन्दिग्धात्मोभयपुरुषार्थसाधनशून्यत्वात् सर्वथा भ्रष्ट एवेत्याह । कष्टाच्चेति । अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।

नायं लोकोऽस्ति न परो न सुखं संशयात्मन इति श्रीभगवान्वासुदेव आहेत्यर्थः ॥ २६८ ॥

रूपं तावकमुज्झितद्वयमभूदद्वैतमेवाञ्जसा
तच्चाद्वैतमपास्य मोहजनितं पारोक्ष्यमात्मा ह्यभूत् ॥
एवं वेदशिरःपदान्वयवशादेकत्वमेकान्ततः
सिद्धं प्रत्यगनन्तयोरिति तव श्रेयः समाप्तिं गतम् ॥२६९॥

नन्वग्निहोत्रादिवाक्यार्थनिश्चयानन्तरमिवाद्वैतवाक्यार्थसाक्षात्कारानन्तरमपि किं कर्तव्यतान्तरमस्तीति शङ्कमानं प्रति तदनन्तरमेवाद्वयं निरतिशयानन्दं ब्रह्म प्राप्तस्य कर्तृकरणादिसाधनाभावात्तदधिकश्रेयसो भावाच्च नैवास्तीत्याह । रूपं तावकमिति । तावकं रूपं स्वरूपमुज्झितद्वयं परित्यक्ताहङ्कारतद्धर्मादिद्वैतं यथा स्यात्तथाञ्जसा स्वभावतो द्वैतमेव पूर्णं ब्रह्मैवाभूत्तच्चाद्वैतं मोहजनितं पारोक्ष्यमपास्याञ्जसा तदात्माभूद्धीति संबन्धः । हीति वैदिकप्रसिद्धौ । एवं च सति तत्त्वमस्यादिवाक्यादहं ब्रह्मास्मीति साक्षात्कार उदिते पूर्णपुरुषार्थलाभ इत्याह । एवं वेदशिर इति । तव श्रेय इति । तावतैवेति शेषः । समाप्तिं गतं निरवशेषं प्राप्तमित्यर्थः । प्रतीचः परमानन्दाद्वयब्रह्मप्राप्तिरेव श्रेयःसमाप्तित्वात् । सा काष्ठा सा परा गतिरितिश्रुतेः । आत्मलाभान्न परं विद्यते एतद् बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारतेति स्मृतेश्च । अग्निहोत्रादिज्ञानमात्रात्तु नैवंविधपुरुषार्थ-

लाभ इति तत्रानुष्ठानापेक्षेति भावः ॥ २६९ ॥

संबन्धः समवाय इत्यपि पदे वैशेषिकोच्चारिते
नाखण्डव्यतिरिक्तवस्तु वदितुं शक्तोऽनवस्थाभयात् ॥
पञ्चानां समवायितेति वचनव्याघातभीतेरपि
संबन्धान्तरमस्य नाभिमनुते वैशेषिकः कातरः ॥२७०॥

एवं वेदान्तानामखण्डे ब्रह्मणि समन्वयो दर्शितः, अखण्डार्थतायाश्च वाक्यस्य लोकवादिप्रसिद्धिर्दर्शिता, इदानीमन्तेऽपि तत्रादार्ढ्यार्थं वादिप्रसिद्धिं दर्शयति, तत्रादावेकपदलक्षणया वैशेषिकमते तामाह । संबन्ध इति । संबन्ध्यविशिष्ट इत्यर्थः । समवायपदेन वैशेषिकप्रसिद्धो नित्यः संबन्धः कथितः । कुतो न शक्तस्तत्राह । अनवस्थाभयादिति । वैशेषिकैर्ह्यवयवावयव्यादिसंबन्धः समवाय इत्युच्यते तत्र समवायस्यासंबद्धत्वान्न तत्कृतावयवादिविशिष्टबुद्धिः स्यात् । न च समवायस्यापि समवायान्नासंबद्धत्वमिति वाच्यम् । स्वस्य स्वस्मिँस्तदसंभवेन समवायान्तराभ्युपगमे तस्यतस्यापि समवायान्तरमभ्युपेयमित्यनवस्था स्यादिति चोद्यपरिहाराय स्वरूपसंबन्धाभिप्रायेण संबद्धः समवाय इत्युच्येत । तत्र संबद्धपदं समवायस्वरूपमात्रे लक्षणया वर्तते समवायपदमपि तत्रैवेति कथं नाखण्डार्थता तदभ्युपेयेति भावः । न केवलं समवायान्तराभ्युपगमेऽनवस्था किं तु तेषामभ्युपगमविरोधोऽपि

स्यादित्याह । पञ्चानामिति । वचनस्य स्ववचनस्य व्याघातभयादित्यर्थः । अस्य समवायस्यावयवावयविगुणगुणिक्रियाक्रियावज्जातिव्यक्तिविशेषनित्यद्रव्याणां पञ्चयुग्मानामेव समवाय इति हि ते वदन्ति तस्यैवं व्याघातः स्यात् तत्परिहाराय समवाये समवायान्तरं कातरः स्वसिद्धान्तसंरक्षाव्याकुलचित्तो वैशेषिकः कथमङ्गीकुर्यादित्यर्थः ॥ २७० ॥

शब्दो गकार इति लौकिकमस्ति वाक्यं
विस्पष्टमस्ति च पदद्वयमत्र वाक्ये ॥
प्राभाकरे च समये न गकारमात्रा-
दन्यत्पदद्वयनिगद्यमभीष्टमस्मिन् ॥ २७१ ॥

प्राभाकरमतेऽप्यखण्डार्थताप्रसिद्धिमाह । शब्दो गकार इति । अस्त्वेवंविधवाक्यस्य लोकप्रसिद्धिस्तस्यापि संसृष्टार्थतैव किं न स्यात् तत्राह । प्राभाकरे चेति । प्राभाकरे समये चास्मिन्वाक्ये पदद्वयनिगद्यं शब्दो गकार इति पदद्वयप्रतिपाद्यमन्यन्नाभीष्टमिति संबन्धः । अस्मिन्पदद्वयात्मकएतद्वाक्ये शब्दो गकार इति वाक्ये हि प्रयुक्तपदद्वयेन प्राभाकरैर्गकारव्यक्तिमात्रमभिधेयमित्यङ्गीकृतमितीदं वाक्यमखण्डार्थमभ्युपेयमिति भावः ॥ २७१ ॥

शब्दत्वजातिवचनो न हि शब्दशब्दः
श्रोत्रोपलम्भनतया तु निबन्धनेन ॥
वर्णान्ब्रवीति न हि जातिरिहाभ्युपेता

साक्षाद्गकारमयमाह गकारशब्दः ॥ २७२ ॥

ननु द्रव्यं घट इतिवाक्यमिव शब्दो गकार इतिवाक्यमपि परापरजातिद्वयविशिष्टाभेदं प्रतिपादयिष्यतीति नाखण्डार्थमिति तत्राह । शब्दत्वजातिवचन इति । गत्वजातेरप्युपलक्षणम् । शब्दशब्दः शब्द इति शब्दः, एतद्ग गशब्दस्याप्युपलक्षणम् । शब्दशब्दस्य जातिवचनत्वाभावे व्यक्तिष्वानन्त्यव्यभिचाराभ्यां कथं वृत्तिरित्यत आह । श्रोत्रोपलम्भनतयेति । श्रोत्रोपलभ्यत्वेन तटस्थेनोपाधिनेत्यर्थः । निबन्धनेन निमित्तेन । ननूपाध्यपेक्षया जातिर्लघीयसीति सत्यं किं तु जातेः संस्थानव्यङ्ग्यत्वनियमेनाद्रव्ये शब्दे तदसंभव इत्याह । न हि जातिरिति । अत एव गत्वमपि न जातिरिति गकारशब्दोऽपि साक्षाद्ग गकारव्यक्तिमेवाह । सा च व्यक्तिरेका संभवतीति नानन्त्यव्यभिचारदोषोपीत्याशयेनाह । साक्षाद्ग गकारमिति। प्रभाकरैरद्रव्यवृत्तिजात्यनभ्युपगमाच्छ्रोत्रग्राह्यत्वस्य शब्दप्रवृत्तिनिमित्तस्य तच्छब्दादप्रतीतेर्गकारशब्दस्य चैकगकारमात्रनिष्ठत्वादधिकार्थाभावात्तस्याखण्डार्थतैव वक्तव्येति भावः ॥२७२ ॥

तस्मादखण्डविषये वचने विवादं
प्राभाकराः परिहरन्तु न चेदशक्यम् ॥
निर्वोढुमेतदिह वाक्यमितोऽन्यथा चे-

दस्यार्थकल्पनमभीप्सितमिष्टहानिः ॥२७३ ॥

प्राभाकरं प्रत्यखण्डार्थप्रसिद्धिसमर्थनमुपसंहरति । तस्मादिति । यस्मादुक्तविधयाऽखण्डार्थता तैरभ्युपेया तस्मादित्यर्थः । परिहरन्तु त्यजन्तु । न चेद्यदि न परिहरेयुः, इह तर्ह्येतदुदाहृतवाक्यं निर्वोढुमुपपादयितुमशक्यम् । यदि परापरजातिनिबन्धनं पदद्वयसामानाधिकरण्यं तैरभ्युपगम्येत तर्हि तत्सिद्धान्तक्षतिरित्याह । इत इति । उक्तप्रकारादित्यर्थः । अस्य प्रस्तुतवाक्यस्येतोऽन्यथार्थकल्पनमभीप्सितं चेदिष्टहानिरिति संबन्धः ॥ २७३ ॥

प्रातिपदिकान्यनतिरिक्तविषयाणि
प्राह भगवान्प्रथमशब्दितविभक्त्या ॥
पाणिनिरतः सकलतर्कसमयज्ञो
वष्टि वचसोरनतिरिक्तविषयत्वम् ॥ २७४ ॥

अखण्डार्थत्वे प्रागुदाहृतामपि पाणिनिसंमतिमन्ते पुनरप्युदाहरति तस्याऽन्यथासिद्धत्वशङ्कानिरासाय । प्रातिपदिकेति । भगवान्पाणिनिः प्रातिपदिकानि विभक्तिवर्जितवृक्षादिशब्दान् प्रथमशब्दितविभक्त्या प्रथमेत्युक्त्या विभक्त्या स्वादिरूपयाऽनतिरिक्तविषयाण्येकार्थविषयाणीति प्राहेति संबन्धः । पाणिनिः खलु प्रातिपदिकार्थमात्रे प्रथमेति तदर्थे प्रथमां विभक्तिं विधत्त इति प्रकृतिप्रत्ययात्मकं तद्वाक्यमखण्डार्थम् । न

चैवं विभक्तेस्तत्पर्यायत्वं तत्सिद्धानुवादत्वं चेति न तयोर्वाक्यतेति वाच्यम्। तया सहैव प्रातिपदिकस्य प्रयोगनियमेन स्वार्थप्रतिपादकत्वेन च तदुभयाभावात्। यस्मादयं पाणिनिः प्रातिपदिकप्रथमयोरेकार्थत्वमाहातोऽयं सकलन्यायाऽभिज्ञोऽन्यत्राऽप्यपर्यायपदयोस्ताद्दृशपदानां चानतिरिक्तविषयत्वं वष्टीच्छतीत्युपसंहरति। अत इति॥ २७४॥

इयं घटव्यक्तिरितीदृशेषु च
प्रसिद्धमेवैकरसार्थगोचरम्॥
पदद्वयं लोकवचःसु तेन च
प्रशस्यते नात्र विवादसंग्रहः॥ २७५॥

किं च लोकेऽपर्यायपदवद्वाक्यप्रयोगस्यैकार्थे दर्शनान्नात्र वादिभिर्विवादः कार्य इत्युपसंहरन्नाह। इयं घटव्यक्तिरिति। इयं घटव्यक्तिरित्येवमादिषु लोकवचःसु पदद्वयमेकरसार्थगोचरमेवेति प्रसिद्धं येन तेनात्रास्मिन्नर्थे विवादसंग्रहो नैव प्रशस्यते न युज्यते वादिनामिति शेषः। इयमिति पुरःस्थितवस्तुमात्रं परामृश्य तस्य घटव्यक्त्यभेदमात्रं विवक्षितमिदं वाक्यं प्रतिपादयतीति तदेकरसार्थमित्यर्थः॥ २७५॥

न च प्रमाणान्तरयोग्यतायां
प्रयोजकं स्यात्परिनिष्ठितत्वम्॥
यतः प्रमाणान्तरयोग्यतायां

प्रयोजकं रूपरसादिमत्त्वम् ॥ २७६ ॥

एवं वेदान्तानामखण्डैकरसे श्रुतिन्यायाभ्यां तात्पर्यं निरूपितम् , इदानीं किं न प्रमान्तरमपेक्ष्य गिरः प्रवृत्तिः सिद्धेषु वस्तुषु जगत्युपलब्धपूर्वेत्यनेन सिद्धवस्तुविषयवाक्यस्य मानान्तरसंवादायत्तार्थवत्त्वनियम्यतया वेदान्ता यदि सिद्धब्रह्मपराः स्युस्तर्हि मानान्तरसापेक्षाः स्युर्लौकिकसिद्धवाक्यवदिति यदुक्तं तन्न मानान्तरयोग्यार्थत्वोपाधेः , न च तदपि सिद्धार्थत्वेन वेदान्तेष्वनुमेयमिति साधनव्यापकतोपाधेरिति वाच्यम् , यतो न यत्परिनिष्ठितं तत्प्रमाणान्तरयोग्यमिति नियमोऽस्ति येन तत्प्रमाणवेदान्ते मानान्तरसापेक्षता स्यादित्याशयेनाह । न च प्रमाणान्तरेति । प्रयोजकं गमकं व्याप्यमिति यावत् । परिनिष्ठितत्वं सिद्धत्वम् । कुत इत्यत आह । यत इति । रसः आदिर्यस्य स्पर्शादेः सः, रूपं च रसादिश्च रूपरसादी, तावस्य स्तः स रूपरसादिमान् तस्य भावस्तत्त्वमित्यतद्गुणसंविज्ञानो बहुव्रीहिः । रूपादिविशेषो हि द्रव्ये प्रत्यक्षप्रमाणस्य प्रवृत्तौ मूलं व्याप्त्यादिविशेषश्चानुमानादेरित्यर्थः ॥ २७६ ॥

ततस्तु रूपादिविहीनरूपे
प्रमान्तराऽगोचरचित्स्वरूपे ॥
वचः प्रमाणान्तरनिस्पृहं सत्
प्रमाणमत्रात्मनि निर्विवादम् ॥ २७७ ॥

फलितमाह । तत इति । यतो रूपादिमत्त्वमेव शब्दातिरिक्तप्रमाणप्रवृत्तौ मूलं ततस्तद्रहिते अत एव प्रमाणान्तराऽयोग्येऽस्मिन् चैतन्यात्मनि सापेक्षत्वानुमानस्योक्तोपाधिदुष्टत्वेन वेदान्तवाक्यं प्रमाणान्तरनिरपेक्षं सन्निःसंदिग्धं प्रमाणं भवतीत्यर्थः ॥ २७७ ॥

लोकप्रसिद्धपदगोचरतानिमित्त-
मन्यप्रमाणविषयत्वमिह प्रसिद्धम् ॥
लोकप्रसिद्धपदगोचरता न चास्मिन्
ब्रह्मात्मनीति च तदत्र निवारणीयम् ॥२७८॥

किं च लोके मानान्तरस्याऽन्यथासिद्धत्वान्न तत्सिद्धार्थशब्दप्रामाण्यनिमित्तमित्याह । लोकप्रसिद्धेति । लौकिकमानसिद्धा या पदगोचरता तन्निमित्तं तद्व्यापकमित्यर्थः । ततः किं तत्राह । लोकप्रसिद्धपदेति । अस्मिन्निर्विशेषे वेदान्तलक्ष्ये । फलितमाह । इति चेति । तदन्यप्रमाणविषयत्वं सर्वपदलक्ष्ये ब्रह्मणि संगतिग्रहस्यानपेक्षत्वान्न तन्निमित्तमानान्तरापेक्षा तत्र शब्दस्येति भावः ॥ २७८ ॥

लोकप्रयुक्तपदगोचरताऽस्ति कार्ये
तेनाऽस्तु कार्यपरवाक्यमशेषतस्ते ॥
मानान्तरेषु परतन्त्रतयाऽप्रमाणं
स्वार्थे न दूषणमिदं श्रुतिमस्तकेषु ॥ २७९ ॥

एवं स्वपक्षे शब्दस्य लक्ष्ये ब्रह्मणि मानान्तरनिरपेक्षं

प्रामाण्यमुपपाद्य येषां वादिनां कार्यमेव वेदार्थस्तच्च लिङाद्यभिधेयमिति मतं तेषामिदं सापेक्षत्वदूषणं दुष्परिहरमित्याशयेनाह । लोकप्रयुक्तेति । मानान्तरसिद्ध एव संगतिग्रहो वक्तव्य इति कार्ये लोकप्रयुक्तपदगोचरताऽस्तीत्युक्तम् । फलितमाह । तेनेति । लोकप्रयुक्तपदगोचरत्वेन ते सापेक्षत्वप्रसङ्गेन सिद्धे वेदाप्रामाण्यमभ्युपेत्य कार्ये तत्प्रामाण्याभ्युपगन्तुस्तवाशेषतोऽशेषेषु मानान्तरेषु परतन्त्रतया मानान्तरापेक्षया स्वार्थेऽप्रमाणमस्तु स्यादिति संबन्धः । अप्रमाणमिति पदच्छेदः । स्वपक्षे चोक्तविधया नेदं दूषणमस्तीत्याह । न दूषणमिति । मानान्तरायत्तं स्वार्थे प्रामाण्यमित्येवंरूपमिदं दूषणं श्रुतिमस्तकेषु वेदशिरस्सु न ब्रह्मपदस्य लिङादिपदवल्लौकिकपदत्वाभावादित्यर्थः ॥ २७९ ॥

न च क्रियाकारितसंहतीनि
पदानि लोके नियमेन वक्तुम् ॥
समीहते पक्वमतिः पदानां
क्रियां विनाप्यन्वयदर्शनेन ॥ २८० ॥

यत्पुनरुक्तं किं च क्रियापदमपेक्ष्य पदानि वाक्यभावेन सम्यगिह संगतिमाप्नुवन्तीत्यादिना वेदान्तेषु क्रियापदाभावान्न तन्निमित्तः पदानां परस्परं समन्वय इति कुतस्ततो वाक्यार्थप्रमितिस्तत्राह । न च क्रिया-

कारितेति । क्रिया तिङन्तं पदं तन्निमित्ता संहतिः समन्वयो येषां पदानां तानि, समीहते इच्छति, वक्तुं न समीहत इति सम्बन्धः । पक्कमतिः लौकिकन्यायाभिज्ञः । कुत इत्यत आह । पदानामिति ॥ २८० ॥

महीभुजोऽयं पुरुषो मनस्वी
वनस्पतेस्तत्फलमित्यपाह ॥
क्रियां विनाप्यन्वयवन्ति लोके
पदानि दृष्टानि बहूनि वक्तुः ॥ २८१ ॥

तदेव दर्शनमुदाहरति । महीभुजोऽयमिति । कस्यायं पुरुषः कस्येदं फलमिति तत्सम्बन्धिविशेषमात्रजिज्ञासायामयं मनस्वी पुरुषो महीभुज इत्यादिना सम्बन्धिविशेषमात्रनिष्ठोऽयं प्रयोग इति क्रियापदापेक्षाभावान्न तन्निमित्तस्तत्पदसमन्वयः, लोके वक्तुः पदानि वक्त्रा प्रयुक्तानि बहूनि पदानीति संबन्धः । आकाङ्क्षायोग्यतासंनिधिमत्त्वं हि पदानां परस्परान्वये निमित्तं न क्रियापदं न वा तद्विशेषः । तस्याप्याकाङ्क्षादियुक्तस्यैवाऽन्वयित्वेन लाघवेन तावन्मात्रस्यैव तत्प्रयोजकत्वादतो वेदान्तपदानां परस्परान्वये न किंचिद्बाधकमिति भावः ॥ २८१ ॥

क्रियापदं वेदशिरःस्वपीष्यते
विवक्षितार्थानुगुणं तु तन्मतम् ॥
विवक्षितार्थप्रतिपत्तिघाति तु

क्रियापदं स्वीकृतमप्यनर्थकम् ॥ २८२ ॥

एवं तात्त्विकं परिहारमुक्त्वा तदभ्युपगम्याप्याह । क्रियापदमिति । न चैवं वेदान्तानामपि क्रियानिष्ठत्वप्रसङ्ग इत्याह । विवक्षितार्थेति । परं तु तत्क्रियापदं वेदान्तेन प्रतिपिपादयिषितोऽर्थोऽखण्डैकरसं ब्रह्म तदनुगुणं तत्र वेदान्तप्रामाण्याविरोधीत्यर्थः । अनुगुणपदव्यावर्त्यमाह । विवक्षितार्थप्रतिपत्तीति । उपासीतेत्यादि क्रियापदं स्वीकृतं पठितमपि तत्रानर्थकमित्यर्थः ॥ २८२ ॥

अस्त्यस्म्यसीति च पदं प्रचुरं क्रियाया
वेदान्तवाक्यगतमादरतः पठन्ति ॥
तन्मात्रतः सकलवेदशिरःपदानां
संघातसिद्धिरिति वेदशिरोनिषण्णाः ॥ २८३ ॥

विवक्षितार्थानुगुणं क्रियापदं वेदान्ते किमस्तीत्यपेक्षायामाह । अस्त्यस्म्यसीति । अस्ति ब्रह्मेति चेद्वेदाहं ब्रह्मास्मि तत्त्वमसीत्यादौ क्रियायाः पदमस्तीत्यादितिङन्तपदमित्यर्थः । प्रचुरमनेकमिति पदविशेषणम् । तस्यावेदत्वशङ्कानिवृत्तये आदरत इत्युक्तम् । फलितमाह । तन्मात्रत इति । वेदशिरोनिषण्णाः समन्वयसूत्रकृद्बादरायणभगवत्पादप्रभृतयः ॥ २८३ ॥

यत्तु प्रमाणमनुभूतिरिति प्रमाण-
सामान्यलक्षणमनूद्य पुनर्वदन्ति ॥

सत्ताप्रमाणघटनां प्रति योग्यताऽतो
नास्त्यर्थनिष्ठवचनेष्वनपेक्षतेति ॥ २८४ ॥

नन्वेवं वेदान्तानामस्त्यर्थनिष्ठत्वेन सैव मानान्तरसापेक्षता स्यात्, अस्त्यर्थो हि सत्ता सा च प्रमाणविषयत्वमेव न तदतिरिक्तसत्ता जात्यादि सत्तादेरसत्त्वप्रसङ्गात्, ततश्च सदात्मकब्रह्मणो मानान्तरविषयत्वमावश्यकमिति प्रभाकराः, तदनुवदति। यत्त्विति। तदुक्तविधया तन्मतमनुपपन्नमिति दूषयितुं तदुक्तं प्रकारमाह। प्रमाणमनुभूतिरिति। अनुभूतिः प्रमाणमिति प्रमाणसामान्यलक्षणमुक्त्वा पश्चात्प्रमाणविषयतां प्रति योग्यता सत्तेति यद्वदन्ति तद् दुर्घटमित्यग्रिमेण सम्बन्धः। तेषामेव वदतामाशयमाह। अतो नेति। अनपेक्षता न स्यादिति संबन्धः ॥ २८४ ॥

तद् दुर्घटं न खलु संविदियं स्वयोग्या
न ह्यात्मनि स्थितिमुपैष्यति योग्यताऽस्याः ॥
वस्त्वन्तरोपनिहितस्वपदत्वहेतो-
र्न ह्यात्मरूपदहने दहनस्य शक्तिः ॥ २८५ ॥

दुर्घटत्वमेवाह। न खल्विति। किं संविद्विषयत्वं सत्त्वमुत तद्योग्यता। नाद्यः, तत्पूर्वमर्थस्यासत्त्वप्रसङ्गात्। द्वितीये च संविदि सास्ति वा न वा। आद्ये किं स्वविषयत्वस्य योग्यता किं वा संविदन्तरविषयत्वस्य। द्वितीये संविदोऽस्वप्रकाशत्वापत्तिरित्यभिप्रेत्याद्याभा-

वे हेतुमाह । न हीति । अस्याः संविदो योग्यता एतन्निरूपितविषयत्वस्य योग्यता आत्मनि स्वस्मिन् स्थितिं नोपैष्यति न युज्यत इत्यर्थः । कुतो न युज्यते तत्राह । वस्त्वन्तरेति । स्वस्मादन्यस्मिन्नेव घटादावुपनिहितमुपक्षिप्तं यत्स्वपदत्वं स्वविषयत्वं तस्माद्धेतोरित्यर्थः । संविद्विषयत्वस्य तदन्यवृत्तित्वनियमात्तस्यां तन्न संभवतीत्यर्थः । संविदः स्वगोचरत्वाभावे दृष्टान्तमाह । न हीति । आत्मरूपदहने स्वभस्मीकरण इत्यर्थः ॥ २८५ ॥

संवित्प्रमाणघटनां प्रतियोग्यतां चे-
न्नेयं बिभर्त्ति न सती भवितुं समर्था ॥
तद्योग्यतैव यदि मातृघटादिसत्ता
तस्याप्यसत्त्वमिति शून्यमुपाजिहीथाः ॥ २८६ ॥

संविदि सा योग्यता नेति द्वितीयं पक्षमनूद्य प्रतिक्षिपति । संवित्प्रमाणेति । घटनां संबन्धं विषयत्वमिति यावत् । संविदि प्रमाणविषयत्वयोग्यताभावे इयं सती न स्यात् । प्रमाणविषयत्वयोग्यताया एव त्वन्मते वस्तुनः सत्तारूपत्वादित्यर्थः । अस्तु तर्ह्यसती सेति चेन्न । तदनुभवप्रसङ्गात् । किं चैवं तदधीनसत्त्वं सर्वमेवासत्स्यादित्याह । तद्योग्यतैवेति । शून्यमुपाजिहीथाः शून्यमागच्छेः, त्वमपि शून्यवादी भविष्यसीत्यर्थः ॥ २८६ ॥

वस्तुस्वभाव इति सत्त्वमतो गृहाण
तच्च द्विधेति वितथाऽवितथत्वभेदात् ॥
सत्त्वं द्विरूपमितरेतरसंकरेण
सच्छब्दवाच्यमिति च व्यवहारकाले ॥ २८७ ॥

यतो मानयोग्यता न सत्त्वम् अत इत्युपसंहरति । वस्तुस्वभाव इति । बाधायोग्यवस्तुस्वभाव इत्यर्थः । अतः सत्त्वं वस्तुस्वभाव इति गृहाणाङ्गीकुर्विति संबन्धः । ननु किमात्मवस्तुनः स्वभावः किं वा प्रपञ्चस्योतोभयस्य वा । नाद्यद्वितीयौ प्रपञ्चात्मनोस्तदभावप्रसङ्गात्, तृतीये तु द्वैतापात इत्याशङ्क्याकाशादावस्तितेत्यादावुक्तमनुस्मारयन्नाह । तच्च द्विधेति । गृहाणेत्यनुषङ्गः । द्वैविध्यमेवाह । वितथेति । वितथमसत्यं वस्तुतो व्यवहारकाले सदवितथं परमार्थसदितिभेदादित्यर्थः । नन्वेवमस्तिशब्दस्यानेकार्थतापत्तिरित्याशङ्क्याह । इतरेतरेति । संकरेण मिश्रेण । तृतीयेत्थंभावे । शबलात्मना तत्सच्छब्दवाच्यमिति गृहाण अतो नोक्तदोष इत्यर्थः ॥ २८७ ॥

उत्सृज्य तत्र वितथांशमथेतरस्मिन्
संवित्स्वरूपपरमार्थसति स्वरूपे ॥
बुद्धिं कुरु प्रणिदधत्प्रणयेन भूम्नि
ब्रह्माहमस्मि परमार्थसदित्यजस्रम् ॥ २८८ ॥

तर्ह्यस्त्यर्थ आत्मा द्विरूपः स्यादित्याशङ्क्य प्रागुक्त-

मेवार्थं स्मारयति। उत्सृज्येति। तत्र वाच्ये इतरस्मिन्स्वरूप इति संबन्धः। तत्स्वरूपमाह। संवित्स्वरूपेति। एतच्च परमार्थत्वे हेतुतयोक्तम्। एवंभूतस्वरूपे भूम्नि प्रणयेन श्रद्धया प्रणिदधत् चित्तं प्रत्यक्प्रवणं कुर्वन् परमार्थसद्ब्रह्माहमस्मीति बुद्धिमजस्रं कुर्विति संबन्धः। तथा च नोक्तदूषणमिति भावः ॥ २८८ ॥

ब्रह्म स्वयंप्रभमतः शबलेषु तस्य
मानान्तरानधिगतेष्वपि शब्दशक्तिः ॥
रूपेषु वृद्धजनसंव्यवहारहेतोः
शक्याग्रहीतुमुदितेन यथानभिज्ञैः ॥ २८९ ॥

यच्चोक्तं मानान्तरं यदि न चेत्कृति शब्दशक्तेस्तत्र ग्रहः कथमिति प्रतिपादनीयमिति तत्राह। ब्रह्म स्वयंप्रभमिति। ततः किं तत्राह। अतः शबलेष्विति। एतच्चाहमादिशब्दवाच्यसाक्षिभास्याहंकारतद्वृत्तिशबलाभिप्रायम्, सदादिवाच्यघटादिशबलं तु चक्षुरादिग्राह्यम्, ब्रह्मपदवाच्यं च कार्यलिङ्गाख्यतर्केण ब्रह्मपदावयवव्युत्पत्त्या चोपस्थितमेव, तदभिप्रायेणापि शब्दो मानान्तरानधिगतेषु शबलेषु तस्य रूपेष्विति संबन्धः। उदितेन प्रागुक्तेन मार्गेणानभिज्ञैरविवेकिभिर्यद्यपि वाक्यतात्पर्यगम्ये ब्रह्मणि किमपि मानं न प्रवर्त्तते तथापि तस्य शबलेषु यथा प्रमाणं यथानुभवं च संगतिर्ग्रहीतुं शक्यत इति न तदर्थमपेक्षितप्रमाणेन वेदा-

न्तानामनुवादता न वा संगतिग्रहविरह इति भावः॥२८९॥

लोकप्रसिद्धार्थपदान्तराणां
समीपसंकीर्तनतोऽपि शक्तिः ॥
ब्रह्मादिशब्दस्य सुखावसेया
यथा हि यूपादिगिरस्तथैव ॥ २९० ॥

ब्रह्मादिपदव्युत्पत्तावुपायान्तरं सदृष्टान्तमाह । लोकप्रसिद्धेति । यतो वा इमानि भूतानि जायन्त इत्यादि तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्ये ब्रह्मपदव्यतिरिक्तानां यतो वेत्यादिपदानां लोकप्रसिद्धार्थानां समीपे संकीर्त्तनेनापि तर्कविधयोपस्थिते जगत्कारणरूपेऽद्वयेऽर्थे ब्रह्मादिशब्दस्य शक्तिः सुखावसेया भवति । यथा यूपं तक्षति यूपमष्टास्त्री करोतीत्यादिप्रसिद्धार्थतक्षणादिवाचकपदसमभिव्याहारसामर्थ्यात्तक्षणादिसंस्कारविशिष्टो यूपशब्दार्थः । एवमाहवनीयमादधातीत्यादिवाक्य आधानसंस्कारवानग्निराहवनीयशब्दार्थ इति निश्चीयते तथैवेत्यर्थः ॥ २९० ॥

विनापि शक्तिग्रहणं पदानां
परात्मनोर्वाचकभावभाजाम् ॥
भवेत्परब्रह्मणि वेदवाक्यात्
प्रतीतिरन्यप्रतिषेधनेन ॥ २९१ ॥

इदानीं ब्रह्मादिपदानां शक्तिग्रहाभावेऽपि निखिलप्रपञ्चनिवारकनिषेधवाक्यसामर्थ्यान्निष्प्रपञ्चं ब्रह्म सि-

ध्यतीति स्वासंमतमपि पक्षमाह । विनापीति । परः परमात्मा आत्मा च तयोर्वाचकभावभाजां वाचकत्वयुक्तानां पदानामिति संबन्धः । अन्यस्य ब्रह्मातिरिक्तप्रपञ्चस्य । नेह नानेत्यादिप्रतिषेधनेनेत्यर्थः ॥ २९१ ॥

नञः प्रपञ्चप्रतिपादकस्य च
प्रतीत्य शक्तिं व्यवहारतः स्थितः ॥
पदस्य शक्नोति परं समीक्षितुं
श्रुतेः प्रपञ्चप्रतिषेधमार्गतः ॥ २९२ ॥

ननु न तावद्ब्रह्मणि प्रमाणान्तरेण प्रतिषेधः सम्भवति शब्दस्तु शक्तिग्रहमपेक्षत इति कथं विनापि शक्तिग्रहणमित्युक्तमित्याशङ्क्य नञादिपदानां लोकप्रसिद्धार्थत्वेन विनापि ब्रह्मणि पदशक्तिग्रहं तदुपपद्यत इत्याह । नञः प्रपञ्चप्रतिपादकस्येति । स्थितः पुमान् नञः पदस्य नाना किं च नेत्यादिनिषेध्यप्रपञ्चप्रतिपादकस्य च पदस्य व्यवहारतः शक्तिं प्रतीत्येति सम्बन्धः । स्थित इति । अर्थाद्व्यवहारभूमाविति लभ्यते । परं परमात्मतत्त्वं श्रुतेर्वेदान्तवाक्यात्प्रपञ्चप्रतिषेधमार्गतः समीक्षितुं शक्नोतीति योजना । अत्र यदि परमात्मनि शक्तिग्रहो नापेक्ष्यते तर्हीह एष इत्यादिपदैः परमात्मानमनूद्य तत्र कथं प्रपञ्चो निषिध्येत न हि निरधिष्ठानो निषेधः पर्यवस्यति ततो वा कथमात्मा सिध्येत् । नन्वात्मा स्वप्रकाश इति चेत्तर्हि किं प्रप-

ञ्चनिषेधेनापि तस्य निष्प्रपञ्चतासिद्धये तन्निषेध इति चेन्न । तदनूद्य निषेधाभावे कथं तस्य तदपि सिध्येत्। इहेत्यादिपदस्य तत्र सङ्गतिग्रहे च किमपराद्धं ब्रह्मात्मादिपदैः,सत्यादिपदलक्षणां विना वर्णितब्रह्मस्वरूपासिद्धेश्चेत्येतन्मतं न ग्रन्थकर्तृसम्मतमिति द्रष्टव्यम्॥२१२॥

ब्रह्मास्मीति वचोनिविष्टपदयोर्मानं भवेदन्वयः
साक्षादद्वयवस्तु तस्य च भवेन्मेयं ततस्तद्गतेः ॥
यद्यत्र प्रमितिं करोति भवति प्रामाण्यमत्रास्य च
स्पष्टं दृष्टमिदं हि युक्तिघटितं रूपे यथा चक्षुषः॥२१३॥

एवमात्मस्वभावस्यैव सत्त्वात्तस्य चोक्तविधया मानान्तरायोग्यत्वात्तच्छ्रुबले ब्रह्मादिपदसंगतिग्रहस्यापि सुकरत्वात्प्रत्यग्ब्रह्मणि वेदान्तप्रामाण्यमबाधितमिति तयोर्मानमेयभावसिद्धिरित्याह । ब्रह्मास्मीति । ब्रह्मास्मीतिपदयोरन्वय इति सम्बन्धः । मानंमितिजननयोग्यः । साक्षादपरोक्षं प्रत्यगभिन्नमिति यावत्। तस्य च ब्रह्मास्मीति वचनस्य, चोऽवधारणे भवेदेवेति सम्बन्धः। मेयमिति । विषयतायोग्यम् उभयत्र प्रमाणमाह। तत इति। तस्माद्वचस इत्यर्थः। तस्याद्वयवस्तुनः । गतेरवगतेरित्यर्थः । ततश्चायोग्यात् फलानिष्पत्तेः तदुभयं तद्योग्यमित्यर्थः । एतस्याप्रमाणे व्यभिचारमाशङ्क्य प्रमाणसामान्यलक्षणं कथयन्तं परिहरति । यद्यत्रेति । यत्करणं यस्मिन्नर्थे प्रमितिमबाधिताज्ञाता-

र्थावबोधं करोत्यत्रार्थे ऽस्य प्रामाण्यं प्रमाजननयोग्यत्वं भवत्येव इदं हि स्पष्टं दृष्टं युक्तिघटितं च । एतदेवोदाहरणविशेषे दर्शयति । रूपे यथा चक्षुष इति । यदनधिगतमबाधितं येन निश्चीयते तत्र तत्प्रमाणमिति हि प्रमाणसामान्यलक्षणं यथा तादृशरूपादौ चक्षुरादि, नैवमप्रमाणमिति भावः ॥ २१३ ॥

मानान्तरानधिगतं परिनिष्ठितं यद्
वेदः समर्पयति चेतसि तत्परः सन् ॥
तत्तथ्यमेव भवतीति समाश्रयस्व
श्रेयस्करो विधिगिरोऽवगतो यथैव ॥ २१४ ॥

प्रमाणसामान्यलक्षणं प्रकृते दर्शयन्फलमाह । मानान्तरानधिगतमिति । यद्ब्रह्म तदन्यद्वा वेदस्तत्तात्पर्यवान् भूत्वा मानान्तरानधिगतं परिनिष्ठितमपि यच्चेतसि समर्पयति बोधयति तत्तथ्यमेवाबाध्यमेव भवतीति समाश्रयस्व यथैव विधिवाक्यादवगतो धर्म इति सम्बन्धः । अत्रोपास्यगुणसंसर्गस्य व्यावृत्तये तत्पर इत्युक्तम् । वेदतात्पर्यगोचरविपरीतग्राहिण एवामानत्वात्तदर्थोऽबाधित एवेति वेदस्तत्र प्रमाणमेवेति भावः ॥ २१४ ॥

निष्पन्नमेव यदि वा पुरुषप्रयत्न-
निष्पाद्यमस्तु तदनङ्गमिह प्रमेये ॥
एवं विधिर्भवतु शब्दसमन्वयो वा

प्रामाण्यकारणमिदं न वदन्ति सन्तः ॥ २९५ ॥

ननु कार्ये कार्यवाक्यवद्ब्रह्मवाक्यं तत्र कथं प्रमाणं स्यात्,कार्यत्वस्य शब्दमेयत्वे तद्वचनत्वस्य शब्दप्रमाणत्वे च प्रयोजकत्वात्, न चाकार्यत्वमेव वेदार्थत्वे प्रयोजकमेवं वेदस्य प्रमाणत्वेऽपि तद्वचनत्वमेव प्रयोजकमस्तु न कार्यत्वादीति वाच्यम्, प्रयोजकगौरवापातादिति चेन्न, त्वन्मतेऽपि महाजनाश्रितवेदान्तप्रामाण्यतदर्थबाधप्रसङ्गान्नोभयमपि प्रयोजकं किं त्वदन्यदेवेत्यभिप्रेत्याह । निष्पन्नमिति । यदि यदित्यर्थः । वाशब्दश्चार्थे । अस्तु स्यात् । यन्निष्पन्नं स्याद्यच्च पुरुषप्रयत्ननिष्पाद्यं तदुभयमिह वेदप्रमेयत्वेऽनङ्गमप्रयोजकम् । एवं विधिर्वा भवतु शब्दसमन्वयः सिद्धवाक्यं वा इदमुभयं प्रामाण्यकारणमिति सन्तो न वदन्ति । अबाधितानधिगतनिश्चायकशब्दत्वस्यैव तत्प्रयोजकत्वादिति भावः । अथ वा चोदनासूत्रबलात् कार्यमेव वेदार्थः, चोदनैव प्रमाणमिति सिद्धं तत्कथं सिद्धवाक्यमपि प्रमाणं तदर्थोऽपि वेदार्थ इत्याशङ्क्याह । निष्पन्नमिति । निष्पन्नत्वमित्यर्थः, निपातानामनेकार्थत्वाद्यदि वेतीवार्थे, यथा निष्पन्नत्वं वेदप्रमेयत्वेऽनङ्गं तथा तत्पुरुषप्रयत्ननिष्पाद्यत्वमस्त्विति सम्बन्धः । वेत्यपि दृष्टान्तार्थे, शब्दसमन्वयत्वं वेदप्रामाण्यकारणमिति यथा सन्तो न वदन्त्येवमिदं त्वदुक्त-

मपि न भवतु । इदंशब्दार्थमाह । विधिरिति । विधित्वमित्यर्थः । यद्वा चोदनासूत्रबलात्कार्यत्वादेरेव वेदप्रमेयत्वादौ न प्रयोजकं किं तु वक्ष्यमाणमेवाबाध्यत्वादि युक्तं प्रमेयम्, प्रमाणमपि तादृगर्थनिश्चायकमेव तच्च सिद्धं कार्यं वा भवतु न सिद्धत्वादिमात्रं प्रमेयत्वनिमित्तम्, न वा विधित्वादि प्रामाण्यप्रयोजकमित्याशयः । अत्रानङ्गमेवेति सम्बन्धः । तन्निष्पन्नमेवमित्यनन्तरं तादृगर्थनिश्चायक इति शेषः। तस्मादबाधितानधिगतश्रोतृसमीहितमेव वेदतात्पर्यगम्यं तादृगर्थनिश्चायकत्वेनैव वेदोऽपि प्रमाणम् । अन्यथा भोजनादिकार्येण विषभक्षणादिना वा तुल्यस्य त्वदभिमतकार्यस्य तद्वाक्यतुल्यचोदनायाश्च प्रमेयत्वाद्यनिर्वाहात् एवं च लाघवादुक्तमेव वेदप्रमेयत्वादौ प्रयोजकं चोदनासूत्राशयस्तूपरिष्टात् द्रष्टव्य इति ॥ २१५ ॥

नीलैकगोचरतया नियतं न चक्षु-
र्नाप्यस्य पीतविषये नियमोऽस्ति शक्तेः ॥
तद्वन्न वेदवचसामपि शक्तियोगः ।
कार्यादिवस्तुषु कथं चन पक्षपाती ॥२१६॥

यद्यपि वेदः सिद्धं कार्यं च बोधयति तथापि सिद्धत्वादि वेदबोध्यत्वे न प्रयोजकं न वा तदन्यतरबोधकत्वं वेदस्य प्रामाण्ये प्रयोजकमिति न्यायत उक्तं दृष्टान्तेनाप्याह । नीलैकगोचरतयेति । अस्य चक्षुषः।

पक्षपाती कार्यमात्रगोचरः सिद्धमात्रगोचरो वा नेति सम्बन्धः ॥ २९६ ॥

यद्बादरायणमतं परिगृह्य पूर्वं
श्रेयस्करेऽनधिगते खलु चोदनायाः ॥
प्रामाण्यमुक्तमिदमस्य समन्वयस्य
वस्तुस्वरूपकथनेऽप्यविशिष्टमस्ति ॥ २९७ ॥

उक्तमर्थं जैमिनीयन्यायबलादपि द्रढयति । यद्बादरायणमिति । परिगृह्याश्रित्य पूर्वं पूर्वतन्त्रेऽस्य समन्वयस्य प्रस्तुतवेदान्तवाक्यस्य पूर्वं बादरायणमतमाश्रित्यानधिगते धर्मे चोदनाया यत्प्रामाण्यमुक्तमिदमस्य समन्वयस्य वस्तुस्वरूपकथनेऽप्यविशिष्टमस्ति खल्विति सम्बन्धः । पूर्वतन्त्रे हि जैमिनिनाऽनुपलब्धेऽर्थे तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति सूत्रांशेनानपेक्षत्वेनैव वेदप्रामाण्यं बादरायणसम्मतमित्याश्रित्य धर्मेऽप्युपदेशस्य तथैव प्रामाण्यं व्यवस्थापितं तदिहालौकिकार्थापौरुषेयवेदान्तेष्वप्यस्तीति कथं न ते ब्रह्मणि प्रमाणम् । चोदनासूत्रं तु स्वस्य विचार्यतया प्रतिज्ञातकर्मवाक्याशयेनैवेति वेदान्तानां ब्रह्मणि प्रामाण्यं जैमिनेरपि सम्मतमन्यथा धर्मेऽपि तन्न निर्वहेदिति भावः ॥ २९७ ॥

मानान्तरानधिगतं त्ववगम्यमानं
मेयं भवेदिति हि मेयविदो वदन्ति ॥

मानान्तरानधिगते विषयेऽवबोधं
कुर्वत्प्रमाणमिति मानविदां प्रसिद्धिः ॥ २९८ ॥

तस्मात्सकलप्रमाणप्रमेयसाधारणमेव रूपं वेदतदर्थयोरप्याश्रयणीयं तच्चात्राप्यस्त्येवेत्याशयेन सर्वप्रमाणप्रमेयसाधारणरूपमुक्तं भट्टाचार्यप्रभृतीनां सम्मतमित्याह । मानान्तरेति ॥ २९८ ॥

एवं सतीह यदि वेदशिरो न मानं
श्रेयस्करे विधिगिरोऽपि न मानता स्यात् ॥
श्रेयस्करे विधिगिरो यदि मानता स्याद्
वस्तुस्वरूपकथनेऽपि समन्वयस्य ॥ २९९ ॥

एवं प्रमाणप्रमेयत्वप्रयोजकरूपे सत्यपि यदि वेदान्तो ब्रह्मणि न प्रमाणं ब्रह्म च न प्रमेयं स्यात्तर्हि चोदनाधर्मयोरपि न तदुभयं स्यादिति ब्रह्मणि वेदान्तप्रामाण्यं बाधकमुखेनोपसंहरति । एवं सतीति । प्रामाण्यप्रयोजकरूपे सतीत्यर्थः । इह ब्रह्मणि न मानता स्यात्ततः प्रयोजकरूपान्तराभावादित्यर्थः । यदि मानता स्यादिति । तेनैव रूपेणेति शेषः । समन्वयस्य मानता स्यादित्यनुषङ्गः ॥ २९९ ॥

वस्तुस्वरूपकथने ननु नास्ति पुंसः
किं चित्फलं विधिवचःसु पुनः प्रवृत्तिः ॥
सम्भाव्यते फलमतः किल वस्तुनिष्ठं
वाक्यं विधिस्तुतिपरं त्विति जैमिनीयाः ॥ ३०० ॥

एवं सिद्धपरत्वेऽपि वेदान्तानां न सापेक्षत्वप्रसङ्ग इत्युक्तम्, नन्वेवमपि सिद्धवस्तुज्ञानेन प्रयोजनासम्भवादध्ययनविध्युपात्तवेदान्तानां कथं तत्र पर्यवसानं स्यादिति शङ्कते। वस्तुस्वरूपकथन इति। नन्विति। चोद्ये पुंसोऽध्येतुः कथं तर्हि फलपर्यवसानमित्याशङ्क्य विध्येकवाक्यत्वेन तत्सिध्यतीत्याशयेन विधीनांस्वतः फलं सम्भावयति। विधिवचःस्विति। प्रवृत्तिरर्थभावना। फलं शब्दभावनाभाव्यम्। ततश्च तस्याःपुरुषार्थभाव्यनिष्ठत्वाद्विधीनां फलवत्त्वमित्यर्थः। कथं तर्हि वेदान्तानां तदेकवाक्यतासिद्धे ब्रह्मणि विध्यसम्भवात्तस्य भावार्थैकगोचरत्वनियमादित्याशङ्क्य कर्मविधिनार्थवादानामिव कर्त्रादिस्तावकतया तदेकवाक्यतामाह। अतः किलेति। यतो वेदान्ताः स्वतोऽफलाः विधिश्च फलवानत इत्यर्थः। तुरवधारणे। परमेवेत्यर्थः। ततश्च सिद्धे ब्रह्मणि प्रमाणाभावान्न तत्सिध्यतीति भावः॥ ३००॥

स्यादेतदेवमनवद्यपुमर्थसिद्धि-
र्वेदान्तवेद्यविषयावगतौ न चेत्स्यात ॥
स्वाराज्यमत्र कवलीकृतभोगभूमि
संपूर्णमस्य विदुषो भवतीति दृष्टम् ॥ ३०१ ॥

मैवं वेदान्तानां स्वातन्त्र्येणैव निरस्तनिखिलदुःखनिरतिशयानन्दब्रह्मावाप्तिफलसत्त्वादिति परिहरति। स्या-

देतदिति। वेदान्तवेद्यविषयावगतौ सत्यामनवद्यपुमर्थसिद्धिः साक्षान्न स्याच्चेदेवं त्वदुक्तविधयैतत्कर्मशेषत्वं स्यान्न चैतदस्तीत्यर्थः। ननु सिद्धज्ञानात्प्रवृत्त्याद्यसंभवात्फलमात्रं न संभवति कुतोऽनवद्यपुमर्थलाभस्तत्राह। स्वाराज्यमिति। स्वस्वरूपसौख्यमित्यर्थः। अत्र सिद्धब्रह्मसाक्षात्कारे सति। तस्य निरतिशयत्वमाह। कवलीकृतेति। ब्रह्मादीनां या भोगभूमयो भोगा इति यावत्। ताः कवलीकृताः स्वान्तर्गमिता येन स्वाराज्येन तत्तथा। अत एव संपूर्णमनवच्छिन्नम्। दृष्टं स एको ब्रह्मण आनन्द इत्यादिश्रुताविति शेषः, ब्रह्मविद्भिरिति वा। एवं च वेदान्तानां फलप्रतिलम्भार्थं न प्रवृत्त्याद्यपेक्षेति न विध्येकवाक्यत्वं न वाऽद्वैतब्रह्मणो विमानत्वमिति भावः॥ ३०१॥

यस्यापि विप्रुषि कृतार्थतया निषण्णाः
शक्रादयो जलचरा इव सागरस्य॥
प्रत्यक्त्वभावकमपास्तसमस्तदुःखं
तद्वैष्णवं सुखमवाप्नवतः किमन्यत्॥ ३०२॥

नन्वाज्यावेक्षणादिवदात्मज्ञानमपि ज्ञानत्वात्पराङ्गं वाच्यं तत्कुतस्तावन्मात्रात्पुमर्थलाभस्तत्राह। यस्यापीति। यस्य ब्रह्मसुखस्य विप्रुषि अतिक्षुद्रांशेऽपि शक्रादयस्त्रिलोकीश्वरप्रभृतयः कृतार्थतया निषण्णाः स्वरूपानन्दैकलेशभूतं त्रिलोकीशासनादिसंभवं सुखं

प्राप्य वयं कृतार्था इति मन्यमाना नान्यदपेक्षन्त इत्यर्थः । तत्प्रत्यक्त्वभावकत्वादिविशिष्टं वैष्णवं विष्णोः परमं पदं सुखमवाप्तवतो विदुषः किमन्यत्कर्तव्यं स्यात्, आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनु संज्वरेदिति श्रुतेः, आज्यावेक्षणं तु क्रतुप्रकरणे विहितमिति पराङ्गं नैवमात्मज्ञानं तत्प्रकरणे विहितमिति स्वतन्त्रम् एतच्च भट्टपादानामपि संमतम्, सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते पराङ्गं चात्मविज्ञानादन्यत्रेत्यवधारितमिति तदुक्तेरिति भावः । तेषां सुखैकलेशप्राप्तिमात्रेण कार्तार्थ्ये दृष्टान्तमाह । जलचरा इति । सागरस्य विप्लुषि कृतार्थतया निषण्णा जलचरा इवेत्यर्थः ॥ ३०२ ॥

अज्ञानमात्मविषयं भवहेतुभूतं
प्रच्छादकं च परमात्मसुखस्य तूर्णम् ॥
त्रय्यन्तवाक्यजनितात्ममतिर्विपाक-
मासाद्य हन्ति यदि तत्र किमर्थनीयम् ॥ ३०३ ॥

नन्वात्मेत्थं सुखरूपश्चेत्किमित्यस्माभिस्तथा नानुभूयत इत्याशङ्क्याज्ञानेनावृतत्वात् अस्माभिर्नानुभूयते, विदुषस्तु विद्योत्पत्तिमात्रेणाऽज्ञाननिवृत्तेः पूर्णसुखानुभव उपपद्यत इत्याशयेनाह । अज्ञानमिति । तत्र मानमाह । आत्मेति । आत्मविषयं साक्षिसिद्धम् ।

तस्यानर्थहेतुत्वमाह । भवहेतुभूतमिति । भवः संसारस्तद्धेतुमित्यर्थः । पुरुषाऽर्थप्रतिबन्धकत्वमाह । प्रच्छादकं चेति । परमात्मसुखस्य प्रच्छादकं चेति संबन्धः । त्रय्यन्तो वेदान्तः । तूर्णं झटिति हन्तीति संबन्धः । आपातज्ञानं व्यवच्छेत्तुमाह । विपाकमिति । श्रवणादिनिमित्तां स्वविषयप्रतिष्ठामित्यर्थः । तथा च ज्ञानमात्रेण कृतकृत्यतेति भावः ॥३०३ ॥

करमुष्टिनिविष्टमुत्तमं
कनकं प्रस्मरणादलब्धवत् ॥
प्रतिभाति तदाप्तवाक्यतः
प्रतिपत्त्या लभते यथा जनः ॥ ३०४ ॥

ननु सर्वत्र साध्यस्यैव पुरुषार्थत्वं दृष्टं न तु प्राक्सिद्धस्य ब्रह्मसुखं च नित्यसिद्धमिति कथं तस्य प्रेक्षावदभिलाषास्पदत्वमित्याशङ्क्य लोके प्राक्सिद्धस्याप्यज्ञातस्य प्रेक्षाविषयत्वं दृश्यते, ज्ञानेन तदज्ञाननिवृत्तौ चेष्टं प्राप्तमित्यनुभवोऽपि, एवं प्राप्तेऽप्यज्ञाते ब्रह्मसुखे प्रेक्षावतां प्रेप्सातन्निवृत्तौ कार्तार्थ्यं चोपपद्यत इति श्लोकद्वयेनाह । करमुष्टिनिविष्टमित्यादिना । मुष्टौ कृतमित्यर्थः । प्रस्मरणाद्विस्मरणादाप्तवाक्यतो मुष्टिं विमुच्य पश्येत्याप्तवचनात् प्रतिपत्त्या तल्लभत इति संबन्धः ॥ ३०४ ॥

परमात्मपदं पराकृत-

द्वितयं प्राप्तमपि स्वभावतः ॥
अनवाप्तवदेव लिप्सते
लभते चैवमयं प्रमाणतः ॥ ३०५ ॥

परमात्मपदमित्यादि दार्ष्टान्तिकमेवमित्यादौ योजनीयम्, स्वभावतः प्राप्तमपीति संबन्धः । अनवाप्तवत् अप्राप्तहिरण्यवस्त्रादिवत् । लिप्सते आप्तुमिच्छति । प्रमाणतः ब्रह्मसाक्षात्कारात् । न हि सुखस्य कृतिसाध्यत्वमपि पुरुषार्थत्वप्रयोजकं गौरवात्तस्य दुःखादिसाधारणत्वाच्च किं तु स्वस्य प्रकाशमानसुखत्वं तच्च नित्यसिद्धात्मसुखेऽप्यस्ति, न च ज्ञानवैयर्थ्यं तदावरणनिवृत्तये तदपेक्षणादिति भावः ॥ ३०५ ॥

न स्वाध्यायवदाप्यता न च पुनस्त्रेताग्निवज्जन्यता
न व्रीह्यादिवदस्य संस्कृतियुज नो सोमवद्विक्रिया ॥
पाठाधानजलोक्षणाभिषवणैः कूटस्थरूपं हि तद्
ब्रह्मापास्तविकारजन्ममरणं निःश्रेयसं साधनैः ॥३०६॥

एवमबाधितानधिगतब्रह्मप्रतिपादकानामनतिशयानन्दब्रह्मप्राप्तिपर्यवसायिनां वेदान्तानां धर्म इव चोदनाया ब्रह्मणि प्रामाण्यमनपवादमित्युपपादितम्, ननु सत्यमीदृशं ब्रह्म वेदान्तेभ्योऽवगम्यते परं तु कार्यपरेभ्यस्तेभ्यो न तु केवलसिद्धपरेभ्यः, लोके शब्दानां सिद्धे सङ्गतिग्रहासंभवेन वेदस्याप्यतदर्थत्वात् कार्ये च सङ्गतिग्रहस्योक्तत्वात्, आत्मेत्येवोपासीतेति ह्या-

त्मोपासनं विधीयते, तत्र च रात्रिसत्रन्यायेन ब्रह्मवेद ब्रह्मैव भवतीत्याद्यर्थवादादवगतब्रह्मभवनकामो नियोज्यः कल्प्यते, ब्रह्मभवनकामस्य च कर्त्तव्यतयाऽवगत उपासनाविषयनियोगः स्वस्य साक्षात्कर्तव्यत्वायोगात्स्वसिद्ध्यर्थं स्वविषयोपासनस्यानुष्ठानमाक्षिपति , तच्चाज्ञातं नानुष्ठातुं शक्यमिति तज्ज्ञानाय विषयतया तन्निरूपकमद्वैतात्मानमप्युपासनानियोगोऽपेक्षते, ततः कोऽसावात्मेति तदाकाङ्क्षायां सत्यादिवाक्यमुपासनानियोगपर्यवसाय्येव मन्त्रा इव विधिपरा देवताविग्रहमात्मानं बोधयतीति तस्य कार्यपरवेदान्तात्सिद्धिरिति, मैवम्, सिद्धेऽपि शब्दानां संबन्धग्रहस्य वक्ष्यमाणत्वान्मोक्षकामं प्रत्युपासनाविध्यसंभवात् , तथा हि, किमुपासनं प्रधानकर्मतया विधीयते, गुणकर्मतया वा, आद्ये उपासनाजन्यापूर्वस्य क्वोपयोग इति चिन्तनीयम्, न तावद् ब्रह्मैकत्वे तस्योपयोगः, तस्य नित्यसिद्धस्य तदसाध्यत्वात्, नाप्यविद्यानिवृत्तौ तस्या अपि ज्ञानैकफलत्वात् , नाप्यात्मसाक्षात्कारे तस्य श्रवणादिविधिफलतया तदफलत्वात् , अन्वयव्यतिरेकाभ्यां तत्साधनत्वसिद्ध्या तत्र प्रवृत्तिसंभवाद्विधिवैयर्थ्याच्च , अवघातादौ च नियमापूर्वमस्तीति न विधिवैयर्थ्यं प्रकृतेऽपि तथास्त्विति चेत्तर्ह्युपासनाया अपूर्वद्वारा मुक्तिफलता न स्यादिति न प्रधान-

कर्मता, किं तु सिद्धान्त इव निदिध्यासनस्यात्मज्ञानार्थतयात्मशेषतैव स्यात्, अत एव न गुणकर्मतयापि तद्विधिः, किं च गुणकर्मणः फलं प्राप्तिरुत्पत्तिर्वा संस्कारो विकारो वा स्यात्, न चैषामन्यतमोऽपि ब्रह्मण्युपासनया संभवतीति व्यतिरेकदृष्टान्तेन सह दर्शयति । न स्वाध्यायेत्यादिना । अस्य ब्रह्मणः साधनैर्न स्वाध्यायोऽध्येतव्य इति विहितस्वशाखाध्ययनेन स्वाध्यायस्यैवाप्यता प्राप्तिः संभवति । स्वाध्याये च सा अध्येत्रधीनोच्चारणक्षमता । नापि वसन्ते ब्राह्मणोऽग्नीनादधीतेति विहिताधानेन गार्हपत्याहवनीयदक्षिणाग्निरूपाग्नित्रयस्यैवोत्पत्तिः । नापि व्रीहीन्प्रोक्षतीत्यादिना विहितप्रोक्षणेन व्रीह्युलूखलादेरिव संस्कृतिः संस्कारस्तत्कृतातीन्द्रियातिशयस्तया युजा संबन्धः । नापि सोममभिषुणोतीति विहितेन कुट्टनरूपाभिषवणेन सोमस्यैव विक्रियाऽन्यथाभावः । पाठोऽध्ययनम् । उक्षणं प्रोक्षणम् । एषां चतुर्णां पाठादीनां यथाक्रमं स्वाध्यायाद्याप्यतादिभिः संबन्धः । अत्र साधनैरिति बहुत्वं पूर्वपक्षे मनोमयादिब्रह्मोपासनाद्यभिप्रायेण । कुतो ब्रह्मणि तदसंभव इत्यत आह । कूटस्थेति । हिर्हेतौ । यतो ब्रह्म कूटस्थादिरूपमत आप्यताद्यस्य नेति संबन्धः । कूटस्थपदसूचितं निर्विकारत्वमजन्यत्वं चापास्तेति दर्शितम् । अ-

न्येऽपि भावविकारा निरस्ता इति सूचयितुं मरणग्रहणम् । ब्रह्मपदेन तस्य सर्वात्मत्वं दर्शयता आप्यत्वं निरस्तम् । निःश्रेयसमिति परमप्रयोजनरूपतयोपयुक्तोपयोक्ष्यमाणताऽभावात्संस्कार्यत्वं निरस्तमिति द्रष्टव्यम् ॥ ३०६ ॥

ब्रह्मैव सन्निति वचः प्रथमश्रुतत्वा-
दप्येतिशब्दमुपसंहरणस्थमुच्चैः ॥
प्रच्यावयत्स्वविषयादुचिताद्बलीयो
ब्रह्मात्मनोरनतिरेकमसाध्यमाह ॥ ३०७ ॥

ननु ब्रह्मैव सन् ब्रह्माप्येतीति तस्याप्यत्वं श्रूयते, न च ब्रह्मैव सन्निति तस्य प्रागपि सत्त्वान्नाप्तिक्रियासाध्यत्वमिति वाच्यम्, क्रियापदानुरोधेन ब्रह्मैवेत्यस्य भाविपरत्वकल्पनात, न चैवमपि तस्य सर्वगतस्य घटेनाकाशस्येव न क्रिययाप्यत्वमिति वाच्यम्, अथ यदतः परो दिवो ज्योतिर्दीप्यत इतिश्रुतिसिद्धाविकृतब्रह्मप्रदेशस्याप्यत्वोपपत्तेरित्याशङ्क्याह । ब्रह्मैव सन्निति । उपसंहरणस्थमेतद्वाक्यान्ते श्रूयमाणं प्रच्यावयद् भ्रंशयदुचितान्मुख्याद् ब्रह्मैव सन्निति सावधारणं प्रथमश्रुतत्वात्तथैव बुद्धिमुत्पादयदसंजातविरोधितया बलीयो भूत्वाऽन्ते श्रुतमप्येतिशब्दं मुख्यार्थात् प्रच्यावयति, एकस्मिन्वाक्य उपक्रमानुरोधेनोपसंहारस्य नेतव्यत्वात्, यथा त्रयो

वेदा अजायन्तेत्यर्थवादोपक्रमगतवेदशब्दानुरोधेनोच्चैर्ऋचा क्रियत इति चरमपठितं विध्युद्देशगतमपि मन्त्रवाचि ऋगादिपदं वेदपरतया नीतमतो ब्रह्मात्मनोरत्यन्तमभेद इति नानया श्रुत्या तदाप्यत्वसिद्धिरित्यविद्यानिवृत्त्याऽप्राप्तत्वभ्रान्तिध्वंस एव तथोपचर्यते । अविकृतं ब्रह्म च सर्वत्र सदाऽस्त्येवासङ्गत्वेन तस्य सर्वविक्रियाशून्यत्वादत एव श्रुतिरत्र ब्रह्म समश्नुत इति । तस्योर्द्ध्वदेशस्थत्वश्रवणं तूपासनार्थमिति ॥ ३०७ ॥

आग्नेय इत्याद्यपि तद्धितान्त-
मष्टाकपालादिसमन्वितं सत् ॥
आख्यातशब्दस्य धुरं बिभर्ति
भव्यार्थसंवित्तिनिबन्धनत्वात् ॥ ३०८ ॥

ननु नामपदमाख्यातान्तपदं प्रति गुणभूतं भूतार्थस्य भव्यशेषत्वेन तत्पदयोरपि तथाभावस्य वक्तव्यत्वात्, एवं गुणे त्वन्याय्यकल्पनेति ब्रह्मैव सन्निहितनामपद एव लक्षणोचिता न त्वाख्यातान्तेऽप्येतिपद इत्याशङ्क्य नामपदमपि विधेयसमर्पकं क्रियापदकार्यं कुर्वन्क्रियापदमेवेति न नामत्वं गुणत्वनिमित्तम्, एवमविधेयार्थक्रियापदमप्यर्थान्नामैवेति न प्रधानत्वनिमित्तमित्याशयेन दृष्टान्तं सार्द्धश्लोकेनाह । आग्नेय इत्यादिना । आग्नेयोऽष्टाकपालो भवति,

अग्नीषोमीयमेकादशकपालमित्यादिवाक्येऽग्निर्देवतास्येत्यादिव्युत्पत्त्याग्न्यादिदेवतासंबन्धिद्रव्याभिधायकमाग्नेय इत्यादितद्धितान्तं पदमष्टसु कपालेषु संस्कृतः पुरोडाश इत्यादिव्युत्पत्त्याऽष्टाकपालादिसंयुक्तपुरोडाशवाचकाष्टाकपालादिपदेन हविर्विशेषबोधकेनान्वितं सदाख्यातशब्दस्य विधेयबोधकस्य धुरं कार्यं बिभर्त्ति करोति । कुतस्तत्राह । भव्यार्थेति । साध्यार्थस्य संवित्तिजनकत्वादित्यर्थः । आग्नेयादिपदं हि देवतार्थतद्धितान्तं द्रव्यदेवतासंबन्धमभिधत्ते स च संबन्धो यागनिष्पाद्य इति यागोऽपि तेन प्रतीयत इति तदेवाख्यातेन विधीयतेऽतस्तत्प्रधानमित्यर्थः ॥ ३०८ ॥

आख्यातमेव सदिदं भवतीति नाम
भव्येतरार्थमपि जन्मनिबन्धनत्वात् ॥
अप्येतिशब्दमपि तद्वदिमं प्रतीमो
भव्येतरार्थगतबुद्धिनिबन्धनत्वात् ॥ ३०९ ॥

एवं तस्मिन्नेव वाक्ये भवतीतीदं पदं क्रियापदमेव सदर्थतो नाम । तत्र हेतुर्भव्येतरेति । भवत्यर्थस्य सत्ताया अविधेयत्वात् तन्नामसदृशमेवेति न प्रधानमिति भावः । दार्ष्टान्तिकमाह । अप्येतीति । अप्येतिशब्देऽपि न भव्यार्थः संभवति, ब्रह्मभावस्य जीवे साध्यत्वेऽनित्यत्वेनामृतत्वानुपपत्तेर्ब्रह्मातिरिक्ततद्भावस्याऽसंभवाद् ब्रह्मणश्चानाद्यनन्तत्वादतो न

प्रधानम् । ब्रह्म तु सकलशेषीति तत्पदमेव प्रधानम् । भूतभव्यन्यायोऽपि प्रकृते नावतरति । उक्तन्यायेन प्रकृते भव्याऽसंभवादित्याशयः ॥ ३०९ ॥

ब्रह्मैव सन्नितिगिरं प्रति शेषितायै
नाप्येतिगीरियमलं कथितोपपत्तेः ॥
आख्यातमेव खलु नामपदस्य शेषि
नाख्यातमेतदनृतत्वनिवेदकत्वात् ॥ ३१० ॥

अप्येतिशब्दस्याऽभव्यार्थत्वे सिद्धमाह । ब्रह्मैव सन्नितीति । शेषितायै नालमिति योजना । शेषिता प्राधान्यम् । अत्र हेतुमाह । कथितोपपत्तेरिति । भव्यार्थत्वासंभवादित्युक्तोपपत्तेरित्यर्थः । परोक्तं शेषिताप्रयोजकमनुवदन्नत्र तन्नास्तीत्याह । आख्यातमेवेति । एतदप्येतिपदम् ॥ ३१० ॥

ब्रह्मैव सन्निति ततः प्रथमश्रुतं स-
दप्येति शब्दमपसारयति स्ववाच्यात् ॥
अस्याङ्गभावविरहादमुना सहाऽतो
ब्रह्मात्मनोरनतिरेकमुशन्ति धीराः ॥ ३११ ॥

प्रकृतमुपसंहरति । ब्रह्मैव सन्निति । तत इति । अस्य ब्रह्मेतिशब्दस्यामुनापेयतिशब्देन सहाऽङ्गभावस्य शेषत्वस्य विरहादित्यर्थः । फलितमाह । अतो ब्रह्मात्मनोरिति । अनतिरेकमभेदम् । उशन्ति इच्छन्ति । धीरा भेदनादिभिर्बहुधाभिभूयमाना अपि श्रुतिप्रामा-

ण्यातिदार्ढ्याद् ब्रह्मैकनिष्ठाः ॥ ३११ ॥

भव्याय भूतमिति किं च विधिप्रधाने
काण्डे नयोऽयमिह तद्विपरीतमाहुः ॥
भूताय भव्यमिति भूतपरं हि सर्वं
वेदावसानमिति सूत्रकृदाचचक्षे ॥ ३१२ ॥

भव्यार्थत्वासंभवादपेयतिशब्दस्य नात्र भूतभव्यन्यायावतार इत्युक्तम्, किं चायं न्यायः कर्मसमभिव्याहृतभूतविषयो न तु सिद्धब्रह्मविषयोऽपि, प्रत्युत विपरीतं विविदिषावाक्यानुसारेण सर्वापेक्षा च यज्ञादिश्रुतेरिति सौत्रन्यायेन च कर्मण एव ब्रह्मशेषत्वावगमादित्याशयेनाह । भव्याय भूतमिति । विधिः प्रधानं प्रतिपिपादयिषितो यस्मिन्काण्डे तस्मिन् । इह ब्रह्मकाण्डे । तद्विपरीतं भूतभव्यन्यायविपरीतम् । तद्वैपरीत्यमेवाह । भूताय भव्यमिति । हिर्हेतौ । यतो भूतपरं सत्यसिद्धब्रह्मपरं वेदावसानं वेदान्तं सूत्रकृदाचचक्षे समन्वयसूत्रप्रमुखैः सूत्रैरुक्तवानतो भाष्यकारादय एवमाहुरित्यर्थः ॥ ३१२ ॥

ब्रह्मैव सन्निति ततोऽपि बलिष्ठमेत-
दपेयति शब्दमवसानगतं व्यपेक्ष्य ॥
तस्मादमुष्य परिपीडकमेतदेव
ब्रह्मैव सन्निति पदं गुणकल्पनायै ॥ ३१३ ॥

भव्यस्य भूतशेषत्वे सिद्धमाह । ब्रह्मैव सन्निति ।

ततोऽपीति । ततोऽपि भूताय भव्यमित्युक्तन्यायादपि एतद् ब्रह्मैव सन्निति पदमवसानगतमप्येत्तिशब्दमपेक्ष्य बलिष्ठमिति संबन्धः । ततः किं तत्राह । तस्मादिति । अमुष्यापेरतिशब्दस्य गौणत्वकल्पनायै एतद् ब्रह्मैव सन्निति पदमेव परिपीड़कं मुख्यार्थभ्रंशकरं स्यादिति शेषः ॥ ३१३ ॥

निःश्रेयसं न खलु साध्यमतः क्रियाभि-
र्ज्ञानेन वा द्वयसमुच्चयवर्त्मना त्रा ॥
उत्पत्तिराप्तिविकृती न च संस्कृतिश्च
यस्मान्न संभवति वर्णितवर्त्मनेह ॥ ३१४ ॥

तस्माद् ब्रह्मभावस्यासाध्यत्वादुपासनादिक्रियासाध्यत्वं न संभवतीति न पराभिमतसमुच्चयस्यापि तत्राऽवकाश इत्याह । निःश्रेयसमिति । अत उक्तयुक्तिभिः । क्रियाभिः केवलोपास्त्यादिक्रियाभिः । ज्ञानसाध्यत्वमपि नित्यसिद्धत्वात्तस्य न संभवति किमु वक्तव्यं क्रियासाध्यत्वं न संभवतीत्याशयेनाह । ज्ञानेन वेति । द्वयसमुच्चयवर्त्मना ज्ञानक्रियासमुच्चयरूपोपायेन । तत्र प्राक्सूचितमेव फलाऽसंभवं दर्शयति । उत्पत्तिरित्यादिना । उत्पत्तिर्न संभवतीत्यनुषङ्गः । आप्तिविकृती न संभवत इत्यर्थः । एतच्च न स्वाध्यायवदाप्यतेति श्लोके दर्शितमित्याह । वर्णितवर्त्मनेति ॥ ३१४ ॥

तस्मात्प्रवृत्तिविनिवृत्तिविवर्जितत्वं

ब्रह्मात्मवस्तुविषयावगते र्न दोषः ॥
सर्वप्रवर्त्तकनिवर्त्तकमूलदाहात्
स्वाराज्यहेतुरिति भूषणमेव तन्नः ॥ ३१५ ॥

एवं किं च प्रवृत्तिविनिवृत्तिविहीनवस्तुतत्त्वप्रतीतिजननादित्यादिना यत्सिद्धवस्तुज्ञानात्प्रवृत्त्याद्यसंभवात्तन्निष्ठवेदान्तानां न फल पर्यवसानमित्युक्तम् । तत्र प्रवृत्त्याद्यभावेऽपि निरतिशयपुरुषार्थपर्यवसानं तेषामुपपादितम्, इदानीं प्रवृत्त्यादिराहित्यमात्रस्यादोषत्वमुपसंहरन्न केवलं तदभावस्यादोषता अपि तु अनुष्ठानजन्यायासाभावात्स गुण एवेत्याह । तस्मात्प्रवृत्तीत्यादिना । सर्वे ये प्रवर्त्तका रागादयो निवर्त्तकाश्च द्वेषादयस्तेषां मूलमज्ञानं तदाश्रितवासनादि च तन्निवृत्तेरित्यर्थः । तत् प्रवृत्त्यादिविवर्जितत्वम् । नोऽस्माकं कृतकृत्यानाम् ॥ ३१५ ॥

अज्ञाततापि घटतेऽत्र दृशोऽनुभूते-
र्जानामि नाहमिति दृश्यपि दृश्यते हि ॥
अज्ञातताऽनुभवनं न च वास्तवं त-
दज्ञाततोद्वहति कल्पिततां हि तस्याः ॥ ३१६ ॥

ननु वेदान्तानामनवगतार्थबोधकत्वमेव न संभवति यद्बलात्सिद्धेऽपि तेषां प्रामाण्यं भवेत्, स्वप्रकाशेऽज्ञातताया एवासंभवादित्याशङ्क्याह । अज्ञाततेति । अत्रास्मन्मते तद्विषयाज्ञाने वेदान्तवेद्यमात्मानं

न जानामीत्यनुभवं प्रमाणमाह । अनुभूतेरिति । अज्ञाने प्रमाणव्यापाराभावात्तदनुभवासिद्धिमाशङ्क्याह । जानामीति । दृग्रूपेऽप्यात्मनि नाहं जानामीत्यज्ञातताऽनुभवनं दृश्यते हीति संबन्धः । अस्ति खलु सर्वेषामहमिदं न जानाम्यात्मानं न जानामीति चाज्ञानापरोक्षानुभवः, स च न प्रमाणजन्यः, लिङ्गादेरपरोक्षज्ञानासंभवात्, चक्षुरादेश्चान्तरज्ञानायोगात्, मनसश्च प्रमातृतयाऽप्रमाणत्वात्, मनोव्यापारविरहदशायामपि तदनुभवाच्च तत्साक्षिमात्रभास्यमित्यर्थः । साक्षिसाध्यत्वसाधनफलमाह । अथ वेतोऽपि तत्साक्षिभास्यमेवेत्याह । न च वास्तवमिति । तदज्ञाततानुभवनं वास्तवं प्रमाणं न भवति अतः शुक्तिरजताद्यनुभववदज्ञानानुभवनमपि साक्षिरूपमित्यर्थः । ननु विषयबाधं विना कथमनुभवस्याप्रमाणत्वमित्याशङ्क्याह । अज्ञाततेति । तस्या दृशोऽज्ञातता स्वस्यां कल्पिततामुद्वहति प्रापयतीति संबन्धः । अज्ञानस्यापि शुक्तिरजतादिवद् दृश्यत्वात्स्वप्रकाशात्मनि वस्तुतोऽयोगाच्च सा कल्पिता भवतीत्यर्थः ॥ ३१६ ॥

अज्ञानमित्यजडबोधतिरस्क्रियात्मा
जाड्यं च मौढ्यमिति च प्रकृतिः प्रसिद्धा ॥
सा चातिदुस्थितवपुर्दृशमद्वितीया-
मालिङ्गति स्म घृतपिण्डमिवाग्निसिद्धम् ॥ ३१७ ॥

नन्वात्मानं न जानामीत्यनुभवः सिद्धान्तेऽनुपपन्नः, तस्य हि ज्ञानाभावो विषयः, न चात्मनि स्वप्रकाशतया स्वसत्तानिश्चये ज्ञानाभावः संभवति, आत्मनो नित्यत्वात्, न च तद्गोचरवृत्त्यभावोऽस्तीति वाच्यम्, तथापि तज्ज्ञानाभावासंभवात्, न हि वृत्तिर्ज्ञानं न वात्मा तदधीनप्रकाशो येन तदभावादात्मनोऽस्फुरणमज्ञानं भवेत्, अन्यथा वृत्तिं विना नित्यं प्रकाशमाने साक्षिणि शुक्तिरजतादौ च न जानामीत्यनुभवप्रसङ्गः, तस्मादात्मनि सिद्धान्ते न जानामीत्यनुभवो न संभवतीति न तद्बलादज्ञानसिद्धिरिति चेत्, सत्यम्, अस्ति तावदात्मन्यप्यनुभवः सर्वजनप्रसिद्धः स च त्वदुक्तविधयाऽभावविषयो न भवतीति स्वप्रकाशात्मावरणरूपं तद्गोचराज्ञानमनुभवबलादभ्युपगन्तव्यम्, अन्यथा सुषुप्त्यादावात्मनोऽस्फुरणं न स्यात्, किं च वियदादिसमानस्वभावा तत्प्रकृतिः का चिदभ्युपेया, सा च न पराभिमतप्रधानादिः, अद्वयात्मपरोपनिषद्विरोधादित्यात्मन्यध्यस्तैव वाच्या सैवात्मप्रकाशावरणं तदन्यस्मिंस्तस्मिन् गौरवात् प्रमाणाभावाच्च, अज्ञानमप्यावरणस्वभावमिति सैव प्रकृतिरज्ञानमित्यपि सिद्ध्यतीत्याशयेनाह। अज्ञानमित्यजडबोधेति। याऽजडबोधस्य तिरस्क्रियात्मावरणस्वरूपा प्रकृतिः साऽज्ञानमिति प्रसिद्धेति संबन्धः। एवं चात्मनि न जानामीत्यनुभवे ना-

नुपपत्तिरिति भावः । ननु नञर्थतयाऽनुभूयमानमज्ञानं कथं भावरूपं स्यादिति चेन्न । आत्मन्युक्तविधयाऽभावासंभवेन ज्ञानविरोधिभावरूपमेवाज्ञानमित्यभ्युपगन्तव्यत्वात्, यथा पापमधर्म इत्यभ्युपगम्यते । ननु तत्र पापशब्देन महाजनव्यवहाराद्भावत्वं तस्य निश्चितमिति चेत्तर्हि इहापि भावार्थतया सकलप्रसिद्धजाड्यमौढ्यव्यवहाराभ्यां भावत्वं निश्चीयतामित्याशयेनाह। जाड्यं चेति । प्रकाशविरोधिस्वरूपविशेष इत्यर्थः । न च ज्ञानान्यत्वं ज्ञात्रन्यत्वं वा जाड्यमिति न तद्भावरूपमिति वाच्यम् । अन्यत्वस्यानुगतस्यैकस्यासंभवेन वक्ष्यमाणजडानुगतबुद्धेरयोगात् । यद्यप्यज्ञानं जडमेव तथापि जडप्रपञ्चानुगततया जाड्यमिति तद्व्यवहार उपपद्यते, मौढ्यमिति च पुरुषगतं मोहात्मकज्ञानमेव व्यवह्रियत इति तद्भावरूपमिति भावः । नन्वजडबोधतिरस्क्रियात्मेत्ययुक्तं न हि प्रकाशमानस्याद्वयस्य द्वितीयेनाप्रकाशमानता संभवतीति चेत्। किं वस्तुभूतेन द्वितीयेन वस्तुसदप्रकाशमानत्वं न संभवतीति वदसि, किं वाऽनिर्वचनीयेनानिर्वचनीयम् । आद्ये मदिष्टसिद्धिः । द्वितीयेऽनुभवविरोधः । अनुभवसिद्धमप्यनुपपन्नमिति चेत् । अत एवानिर्वचनीयम्, उपपन्नत्वेऽनिर्वचनीयत्वायोगादित्याशयेनाह । सा चेति । अतिदुस्थितवपुः दुर्निरूपस्वरूपाऽनिर्वचनी-

येति यावत्। यतोऽद्वितीयां दृशमालिङ्गति, आश्रित्यावृणोति स्मेति तदुभयस्य दुर्घटत्वं द्योतयति। न ह्यद्वितीये द्वितीयं प्रकाशमाने अप्रकाशमानत्वं च वस्तुसद्भवतीति भावः। स्वविरोध्याश्रयणमतिदुस्थितमित्यत्र दृष्टान्तमाह। घृतपिण्ड इति। इद्धं दीप्तं ज्वलन्तमिति यावत्॥ ३१७॥

चिद्वस्तुनश्चिति भवेत्तिमिरं तमिस्रं
तामिस्रमन्धतमसं जड़िमा तमिस्रा ॥
माया जगत्प्रकृतिरच्युतशक्तिरान्ध्यं
निद्रा सुषुप्तिरनृतं प्रलयो गुणैक्यम् ॥ ३१८ ॥

ननु यद्यज्ञानस्यात्माश्रयस्तदा तद्विषयोऽन्यो वाच्य इत्यात्मावरणं तन्न स्यात्, घटादिज्ञानादावाश्रयविषययोर्भेददर्शनादज्ञानेऽपि तस्य वक्तव्यत्वात्, अन्यथात्मा तदाश्रयो न स्यादित्याशङ्क्य तमस्त्वाद्बाह्यतमोवत्तदेकाश्रयविषयम्, तमस्त्वं च तस्य श्रुतिपुराणादौ तमःशब्दतत्पर्यायैर्व्यवहारात्सिद्ध्यतीत्याशयेनाह। चिद्वस्तुन इति। चिद्रूपं यद्वस्तु परमार्थसत्तस्य या स्वरूपभूता चित् तस्यां तिमिरं भवेदिति योजना। चितीति। विषयाभेदेन यसप्तमी चिद्विषयमित्यर्थः। लौकिकात्मज्ञानादावाश्रयविषयाभेदेन भेदेन सविषयत्वस्य व्यभिचारादज्ञानमेकाश्रयविषयं भवेदिति भावः। ननु मायात्माश्रयात्मविषया च श्रुत्यादौ प्रसिद्धा सा किमेतस्मा-

दज्ञानादन्या नेत्याह। मायेति। एवं प्रकृतिर्विष्णुशक्तिरिति च श्रुतमज्ञानमेवेत्याह। जगत्प्रकृतिरच्युतशक्तिरिति। आन्ध्यमिति। प्रकाशतिरोधायकत्वादज्ञानमुच्यते। निद्रेति। विविधप्रपञ्चहेत्वज्ञानं प्रकर्षेण लीयन्ते सर्वाणि कार्याण्यस्मिन्निति प्रलयः सत्त्वरजस्तमसां गुणानां समुदायरूपं गुणैक्यं च तदेवेत्यर्थः ॥ ३१८ ॥

आश्रयत्वविषयत्वभागिनी
निर्विभागचितिरेव केवला ॥
पूर्वसिद्धतमसो हि पश्चिमो
नाश्रयो भवति नापि गोचरः ॥ ३१९ ॥

नन्वहमज्ञ इति जीवाश्रयं तदनुभूयते एवं विषयोऽपि ब्रह्म न जानामीत्यनुभवात्तस्य ब्रह्मैव तत्कथं चिद्वस्तुनाश्रिति भवेदित्युक्तं तत्राह। आश्रयत्वविषयत्वेति। अज्ञानस्येति शेषः। अज्ञानस्याश्रयत्वं विषयत्वं च भजत इत्याश्रयत्वविषयत्वभागिनी। केवला अद्वितीयैव अत एव निर्विभागा जीवेश्वरविभागरहिता। न चैवं प्रदर्शितानुभवविरोधस्तस्यान्यथासिद्धत्वादन्यथान्योऽन्याश्रयः स्यादित्याशयेनाह। पूर्वसिद्धेति। स्वसत्ताप्रयोजकाज्ञानस्येत्यर्थः। हिर्हेतौ। यतो जीवेश्वरविभागसत्त्वप्रयोजकमज्ञानं ततः पश्चिमस्तत्प्रयोज्यो ब्रह्माविभक्तो जीवस्तद्विभक्तं ब्रह्म च यथाक्रमं नाश्रयो भवति नापि गोचरः। यद्यपि

जीवेश्वरविभागादिरनादिस्तथापि स न वास्तवः, मायिकस्तु सोऽद्वयब्रह्मानवभासदशायामेव भवतीति तदज्ञानाधीनसत्ताक एव। अज्ञानं तु स्वसत्तायां विभागादिसत्त्वं नापेक्षत इति न तत्प्रयोज्यम्। एवं चानादिभूतोपि जीवब्रह्मविभागोऽज्ञानविकार एव। एतदभिप्रेत्य पूर्वसिद्धेत्याद्युक्तम्। ततश्चात्मन्यज्ञानसत्त्वसिद्धौ जीवेश्वरविभागसत्त्वम्, अज्ञानस्य विभक्तजीवचैतन्याश्रयत्वे तदधीनं सत्त्वमित्यन्योन्याश्रयः। अहमज्ञ इत्यादिप्रतीतिस्त्वज्ञानाश्रयपूर्णचैतन्यस्यैवाहंकाराद्युपहिततया तत्रापि तत्संभवादुपपद्यते। अत एवैतदनुभवादहंकाराश्रयं ब्रह्मविषयं तदिति प्रत्युक्तम्। अज्ञानस्य केवलजडवृत्तित्वानुपपत्तेश्च। एवं विषयोऽपि पूर्णं ब्रह्मैवेति वक्ष्यत इति चिद्वस्तुनश्चितीत्युपपन्नमिति भावः॥ ३१९॥

नाभावताऽस्य घटते वरणात्मकत्वा-
न्नाभावमावरणमाहुरभावशौण्डाः॥
अज्ञानमावरणमाह च वासुदेव-
स्तद्भावरूपमिति तेन वयं प्रतीमः॥ ३२०॥

एवं स्वतः स्फुरणरूपात्मनि ज्ञानाभावासंभवात्तदावरणस्वभावमज्ञानं स न संभवतीत्युक्तम्, इदानीं लोकेऽप्यज्ञानमनुभूयमानं स न संभवति। यद्यपि वृत्त्यधीनप्रकाशस्य घटादेर्वृत्त्यभावेनास्फुरणं संभवति

तथापि तस्यानावरणत्वादावरणविषयस्य न जानामीत्यनुभवस्य स विषयो न भवितुमर्हतीत्याशयेनाह । नाभावतेति । अस्याज्ञानस्य । तत्र हेतुर्वरणात्मकत्वादिति । आवरणस्वभावत्वादित्यर्थः । नन्वभावस्याप्यावरणत्वं किं न स्यात्तत्राह । नाभावमिति । अभावशौण्डाः अभावपदार्थनिरूपणे समर्था वैशेषिकादयः, तेऽपि ह्यभावं नावरणमाहुः । आवरणत्वस्य भावधर्मत्वनियमात् ज्ञानाभावस्तु विशेषतो नावरणम् । यत आवरणस्य ज्ञानाभावो न प्रयोजकः अतस्तत्प्रयोजकमन्यदेवावरणं वक्तव्यमित्यर्थः । ननु मा भूदज्ञानमावरणमिति चेन्न । तन्न जानामीत्यनुभवविरोधात् । किं चाज्ञानेनावृतं ज्ञानमित्यादिभगवद्वचनमपि तदा विरुद्धेयतेत्याह । अज्ञानमावरणमिति । ततश्चावरणत्वात् प्रसिद्धमेघाद्यावरणवदज्ञानं भावरूपमिति निगमयति । तद्भावरूपमिति ॥ ३२० ॥

एकः शत्रुर्न द्वितीयोऽस्ति शत्रु-
रज्ञानतुल्यः पुरुषस्य राजन् ॥
येनावृतः कुरुते संप्रमत्तो
घोराणि कर्माणि सुदारुणानि ॥ ३२१ ॥

भगवद्व्यासवचनेनापि तस्यावरकत्वमाह । एकः शत्रुरिति । येनाज्ञानेनावृत इत्येतत्पदमत्रोपजीव्यम् । घोराण्यतिगर्हितानि पापादीनि, सुदारुणानि दीनदरि-

द्रस्वापहरणादीनि ॥ ३२१ ॥

जाड्यं जगत्यनुगतं खलु भावरूपं
मौढ्यं च पुंगतमिति प्रतिभाति तादृक् ॥
जाड्यं च मौढ्यमिति चानुभवप्रसिद्ध-
मज्ञानमाहुरपवर्गपिधानदक्षम् ॥ ३२२ ॥

एवमजड़बोधतिरस्क्रियात्मत्वं नाभावस्य संभवतीति भावरूपाज्ञानस्यैव तदित्युपपादितम्, इदानीं जाड्यं च मौढ्यमिति चेत्युक्तं जाड्यमौढ्यात्मकत्वमपि तस्योपपादयति। जाड्यं जगतीति। यद् घटपटादिजड़प्रपञ्चे इदं जड़मिदं जडमित्यनुगतव्यवहारास्पदं जाड्यं तद्भावरूपं चेतनान्यत्वादेर्भावाभावनिखिलजड़ानुगतस्यैकस्यासंभवात् । एवं मौढ्यमपि जीवनिकायानुगतं भावरूपम् । ततः किमित्यत आह । जाड्यं चेति । कारणतया जगत्यनुगताज्ञानव्यतिरिक्तानुगतजाड्यकल्पने जीवत्वाद्युपाधितया निखिलजीवसम्बन्ध्यज्ञानान्यमौढ्यकल्पने च प्रमाणाभावादनुभवसिद्धमज्ञानमेव तदुभयमिति तदात्मकमज्ञानं भावरूपमित्यर्थः ॥ ३२२ ॥

साभासमेतदुपजीव्य चिदद्वितीया
संसारकारणमिति प्रवदन्ति धीराः ॥
साभासमेतदिति संसृतिकारणत्वे
द्वारं परं भवति कारणतादृशस्तु ॥ ३२३ ॥

इदानीं प्रकृतिरिति प्रागुक्तमज्ञानस्य जगत्प्रकृतित्वमुपपादयितुं प्रक्रमते, तत्रेयं शङ्का, ननु सूत्रकारेण प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्रेण ब्रह्मैव जगत्प्रकृतिर्वेदान्तार्थ इति निरूपितं तत्कथमज्ञानं प्रकृतिरिति तत्राह । साभासमिति । चैतन्यच्छायायुक्तमित्यर्थः । एतदज्ञानमुपजीव्य घटकतयाश्रित्य संसारस्य वियदादिप्रपञ्चस्य कारणम् । धीराः कूटस्थब्रह्मनिष्ठाः । ब्रह्म हि स्वस्य निष्प्रपञ्चतारूपां शुद्धिमपरित्यजदेव संसारकारणमिति वक्तव्यं कूटस्थमचलं ध्रुवं निष्कलं निष्क्रियमित्यादि श्रवणात् तादृश, कारणत्वं प्रपञ्चविभ्रमाधिष्ठानतयैव निर्वहति, सर्पाधिष्ठानरज्ज्वादेस्तदानीमपि स्वरूपास्थितिदर्शनात्, विभ्रमाधिष्ठानत्वं च विवर्त्तमानाज्ञानमनुपजीव्य न सिद्ध्यति स्वस्यैव तथा परिणामे पूर्वरूपनाशप्रसङ्ग इति ब्रह्मकारणतासिद्ध्यर्थमज्ञानमपि जगत्प्रकृतिरिति स्वीकर्त्तव्यमिति भावः । नन्वज्ञानं चेज्जगत्प्रकृतिस्तर्हि तदेव जगदुपादानमस्तु ब्रह्मकारणताश्रुतिस्तु तस्य निमित्ततयाऽप्युपपद्यत इत्याशङ्क्य किं स्वतन्त्रमज्ञानं प्रपञ्चनिदानं स्यात्किं वातमन्यध्यस्तम्, नाद्यः, जडस्य स्वातन्त्र्यायोगात्, तत्तत्कार्ययोः सत्तास्फूर्त्यभावप्रसङ्गाच्चेत्यभिप्रेत्य द्वितीये आह । साभासमेतादिति । आ समन्ताद्भासत इत्याभासं स्वप्रकाशमनवच्छिन्नं ब्रह्म

तत्सहितं तत्तादात्म्यापन्नं साभासमज्ञानमित्यर्थः । अध्यस्तस्य हि अधिष्ठानमेव स्वरूपमिति तत्ततो निष्कृष्टं कारणं न भवितुमर्हति किं तु दृशः संसृतिकारणत्वे विवर्त्ताधिष्ठानत्वे परं केवलं द्वारमुक्तविधया घटकं भवति श्रुतिमृत्कारणता तु दृश एवेति भावः ॥ ३२३ ॥

यावद् दृशोन्यदिह संसृतिकारणं तद्
बेदान्तवादिसमये न मतं जड़त्वात् ॥
यद्यज्जड़ं भवति संसृतिकारणं त-
न्नेति स्फुटं वदति सूत्रकृदत्र यस्मात् ॥३२४॥

ननु सांख्यादिभिः साधर्म्यादिना जड़मेव जगत्कारणमनुमानादङ्गीकृतं तद्वत्त्वयाप्यङ्गीकर्त्तुमुचितमित्याशङ्क्य तदैक्षत बहु स्यां प्रजायेयेतीक्षितुरेवोपादानत्वविषयश्रुतिमाश्रित्य बादरायणेन सांख्यवैशेषिकादिपक्षस्य निरस्तत्वान्नैवमित्याह । यावद् दृशोऽन्यदिति । इह जगति दृशोऽन्यद् यावत्तद्वेदान्तवादिसमये संसृतिकारणं मतमिष्टं न, कुतो जड़त्वाद्रज्जुसर्पवत्, न चाप्रयोजकम्, श्रुतिन्यायवित्सूत्रकारेणोक्तत्वादित्याशयेनोक्तश्रुतेरनुग्राहकन्यायमूलं व्याप्तिमाह । यद्यज्जड़मिति । स्फुटं वदतीति । ईक्षतेर्नाशब्दमित्यादिसूत्रैरिति शेषः । अत्र वेदान्तशास्त्रे । अत्र जगति यद्यज्जड़मिति वा संबन्धः ॥ ३२४ ॥

अजड़कारणभावनिबन्धनं

सकलमेव जडं न तु कारणम् ॥
इति हि वेदशिरस्सु विचक्षणाः
कपिलपक्षनिराकरणे जगुः ॥ ३२५ ॥

किं च रचनानुपपत्तेश्च नानुमानमित्यादिना सूत्रकारेण प्राधान्येन जडकारणत्वनिराकरणादपि चेतनं ब्रह्मैवोपादानमुपेयमित्याह । अजडकारणेति । अजडकारणस्य भावः सत्ता तया निबद्धस्त उत्पाद्यत इत्यजडकारणभावनिबन्धनमित्यर्थः । यद्वा ऽजडस्य चिदात्मनः कारणभावे कारणत्वव्यवहारयोग्यत्वे निबन्धनं द्वारं सकलमेव जडमविद्यादि न तु तत्कारणं स्वयमिति शेषः । कपिलादिपक्षनिराकरण उद्दिश्य इत्यर्थः ॥ ३२५ ॥

शबलमात्मपदेन निगद्यते
सकलमात्मजमित्यपि च श्रुतिः ॥
शबलमात्मपदं जगतस्ततः
प्रकृतिरित्यपरे तु जना जगुः ॥ ३२६ ॥

एवं शुद्धमद्वयं ब्रह्मैवाविद्यातद्विवर्त्ताधिष्ठानतया श्रुतिसंमतं जगन्निदानमविद्या तु तद्घटकतयैव जगत्प्रकृतिरिति वेदान्ततन्निष्णातानां मतमुक्त्वा मतान्तरमनुवदति । शबलमात्मपदेनेति । आत्मन आकाशः संभूत इत्यादिवाक्ये आत्मादिपदेनाविद्याशबलं वस्तु निगद्यतेऽभिधीयते । ततः किं तत्राह । सकलमात्मज-

मिति। वियदादिसमस्तमात्मजमात्मनः संभूतमित्यपि च श्रुतिर्दर्शयतीति शेषः। ततोऽपि किं तत्राह। शबलमात्मपदमिति। शबलात्मस्वरूपमित्यर्थः। यतः श्रुतिः सकलमात्मपदनिगद्याच्छबलात्संभूतमिति दर्शयति ततः शबलमात्मपदं प्रकृतिरिति संबन्धः॥ ३२६॥

सुकृतदुष्कृतकर्मणि कर्त्तृतां
मतिगतात्मचिति प्रतिबिम्बकम्॥
व्रजति तद्वददः परमात्मनो
जगति याति तमःप्रतिबिम्बकम्॥ ३२७॥

एवं शबलस्य जगत्प्रकृतित्वमुक्त्वा तन्मत एव तत्कर्तुस्ततो विशेषं सदृष्टान्तमाह। सुकृतदुष्कृतेति। पुण्ये विहिते कर्मणि दुष्कृते प्रतिषिद्धे चेत्यर्थः, मतिरन्तःकरणं तत्र यदात्मचैतन्यप्रतिबिम्बकं जीवभावमापन्नमित्यर्थः, कर्तृतां व्रजति यद्वत्तद्वदिति संबन्धः। अदस्तद्याति कर्तृतामित्यनुषङ्गः, तमोऽज्ञानं तत्र प्रतिबिम्बकम्, यथा पुण्यपापयोर्जीवभावमापन्नमन्तःकरणे प्रतिबिम्बचैतन्यमेव कर्तृ कर्त्ता शास्त्रार्थवत्त्वादित्यादिन्यायान्न तच्छबलमिति तन्मतम्, तद्वज्जगतोऽपि तमःप्रतिबिम्बकं चैतन्यमेवेश्वराभिधानं कर्तृ भवति न तमोविशिष्टमित्यर्थः॥ ३२७॥

सुकृतदुष्कृतयोः शबला यथा
भवति कारणमात्मचितिस्तथा॥

गगनवायुपुरःसरकारणं
परमचेतनताशबलाकृतिः ॥ ३२८ ॥

उक्तदृष्टान्तेनैव शबलोपादानत्वमपि द्रढयति । सुकृतदुष्कृतयोरिति । शबलाऽन्तःकरणशबलात्मचितिरिति संबन्धः । कारणं भवतीत्यनुषङ्गः । परमचेतनता परमात्मचैतन्यम् ॥ ३२८ ॥

शबलताकवलीकृततावशात
परमचेतनतैव निगद्यते ॥
शबलमात्मपदेन न कथ्यते
शबलमात्मनिवृत्तिनिबन्धनम् ॥ ३२९ ॥

यद्यपि सृष्ट्यादिवाक्यगतात्मादिपदेनौचित्येन शबलमेवाभिधीयते तथापि लक्षणया शुद्धं परमेव तद्वाच्यमिति न ततः शबलस्य कारणता सिद्ध्यतीति समाधत्ते । शबलताकवलीकृतेति । शबलतया शबलस्वरूपेण कवलीकृतता अवच्छिन्नता या तद्वशाच्छबलसम्बन्धवशादिति यावत् । परमचेतनता सर्वोपाधिविवर्जितं चैतन्यं तदेव तत्र जिज्ञास्यत्वान्निगद्यते लक्षणया ज्ञाप्यते । आत्मपदेन न शबलं कथ्यते तात्पर्येणेति शेषः । शबलस्य वस्तुतोऽनात्मत्वादित्यर्थः । तर्हि शबलाभिधानस्य किं प्रयोजनमित्याशङ्क्य लक्षणासिद्धिरेवेत्याह । शबलमात्मनीति । आत्मादिपदस्येति शेषः ॥ ३२९ ॥

शबलतापरिधानसमन्वयात्
परमचेतनतात्मगिरः पदम् ॥
भवति तेन जनस्य तु विभ्रमः
शबलमात्मगिरः पदमित्ययम् ॥ ३३० ॥

यत एतस्मिन्वाक्ये आत्मादिपदैरात्मलक्षणार्थं शबलमुपस्थाप्यते ततः शबलमेव तदर्थ इति तेषां भ्रमो न तु वस्तुतत्त्वमित्युक्तानुवादपूर्वकमाह । शबलतापरिधानेति । एतदुक्तं भवति । सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्ये ह्यानन्त्यं ब्रह्मणः प्रतिज्ञातम्, यो वेद निहितं गुहायामित्युत्तरवाक्ये गुहाप्रवेशेन तस्य प्रत्यग्भावं दर्शयन्त्या श्रुत्यानन्त्योपपादनायात्मनो नानात्वं निरस्तम्, ततस्तस्य विजातीयगगनादेर्भेदापनिनीषया सृष्टिरुपन्यस्यते तदा खलु कार्यकारणानन्यत्वन्यायेन कार्यस्य वस्तुतः कारणमात्रत्वं सिद्ध्यतीत्युपपन्नं तदानन्त्यमेवं च यत आकाशादि सम्भूतं तत्तस्मादेतस्मादात्मन इति प्रत्यगभिन्नानन्दमिति दर्शयन्ती श्रुतिरद्वैतमात्मानमेवाभिप्रैतीति न ततः शबलकारणता सिद्ध्यतीति ॥ ३३० ॥

बहु निगद्य किमत्र वदाम्यहं
शृणुत संग्रहमद्वयशासने ॥
सकलवाङ्मनसातिगता चितिः
सकलवाङ्मनसव्यवहारभाक् ॥ ३३१ ॥

नन्वेवं सति प्रत्यक्षादिदृष्टं मृत्सुवर्णादेर्घटकुण्डलादिकारणत्वमपि त्वत्पक्षे न स्यादिति चेत्, सत्यम्, सर्वत्रापि मृदाद्यधिष्ठानं सर्वकार्यानुगतं सत्तत्त्वं मृदादिशबलद्वारा घटादिकारणं न तु केवलमृदादिस्तस्याधिष्ठानात्मतया ततः पृथग्भूय कारणत्वायोगादित्याशयेनाह । बहु निगद्येति । अत्रास्मिन्नर्थे बहुभाषणेन किं प्रयोजनमद्वयशास्त्रेऽहं सिद्धान्तसंग्रहं वदामितं शृणुतेति सम्बन्धः । तत्संग्रहमेव निर्गुणसगुणभेदेनाह । सकलेति । स्पष्टम् ॥ ३३१ ॥

चित्रायागः पशुफल इति श्रूयमाणेऽपि चित्रा-
ऽपूर्वं द्वारं पशुफलतयाक्षिप्यते तत्र तद्वत् ॥
चैतन्यात्मा जगदुदयकृच्छ्रूयतेऽत्रापि पश्चा-
न्मायादीनां भवति जगति द्वारभावः फलेऽस्मिन् ॥३३२॥

ननु यदि मायाशबलस्य कारणतां श्रुतिर्न प्रतिपादयति कुतस्तर्हि मायाप्रकृतित्वसिद्धिस्तत्राह । चित्रायाग इति । चित्रया यजेत पशुकाम इति पशुफले यागे श्रूयमाणेऽपि श्रुतेऽपि क्षणिकस्य यागस्य कालान्तरभाविपशुसाधनतानुपपत्त्या चित्रासंज्ञितयागजन्यं पशुफलसाधनतयाऽपूर्वं तत्र कर्मकाण्डे यद्वदाक्षिप्यते कल्प्यते, तद्वदत्रापि काण्डे चैतन्यात्मा जगदुदयकृदिति श्रूयते श्रुतेऽपि तस्य निर्विकारस्य जगत्कारणत्वानुपपत्त्या पश्चादस्मिन्जगति फले कार्ये मायादीनां

द्वारभावो भवति भवेदिति कल्प्यते । कूटस्थब्रह्मणः श्रुतिप्रदर्शितकारणत्वादिसंरक्षणार्थं जड़प्रपञ्चोपादानतयानुमितमज्ञानं तद्घटकतयाश्रितमिति न तदसिद्धिरिति भावः ॥ ३३२ ॥

कारणत्वमुपलक्षणं चिते-
र्ब्रह्मणो न खलु तद्विशेषणम् ॥
इत्यपीदमुपपद्यते तदा
चेतना भवति कारणं यदा ॥ ३३३ ॥

शबलकारणत्वं न श्रुतिसम्मतमित्यत्र ब्रह्मविदामभ्युपगमं लिङ्गमाह । कारणत्वमिति । जगत्कारणत्वं हि चिद्रूपब्रह्मणो गृहस्येव काकसम्बन्ध उपलक्षणं तटस्थलक्षणं न खलु तद्विशेषणमिति यद्ब्रह्मविद्भिरुपेतमिदमपि तदोपपद्यते यदा चेतनात्मा कारणं भवेदिति सम्बन्धः ॥ ३३३ ॥

अन्यदेव यदि कारणं भवेत्
कारणत्वमुपलक्षणं कथम् ॥
चेतनस्य घटतेऽन्यगामिना
वस्तु नान्यदुपलक्ष्यते यतः ॥ ३३४ ॥

ननु शबलकारणत्वमपि तदुपलक्षणं किमिति न भवेदित्याशङ्क्यालक्ष्यवृत्तिधर्मस्य तदनुपपत्तेरित्याह । अन्यदेवेति । शुद्धब्रह्मणोऽन्यच्छबलमेवेत्यर्थः । चेतनस्य ब्राह्मणः कथं घटत इति संबन्धः कुत इत्यत आ-

ह । अन्यगामिनेति । लोकेऽलक्ष्यवृत्तिधर्मस्य लक्षकत्वादर्शनात् । शुद्धं ब्रह्म शबलवृत्तिधर्मेण लक्षितुं न शक्यते यतस्ततो ब्रह्मैव श्रुतिसंमतमुपादानं मायायास्त्वार्थिकं तच्छ्रुत्यानूद्यते ततो भावरूपैव सेति भावः ॥ ३३४ ॥

अनवबुद्धमतः श्रुतिमस्तकै-
र्विषयतामुपपादयितुं क्षमम् ॥
अनुभवात्मपदं तमसा यतः
पिहितमेतदिह प्रतिभासते ॥ ३३५ ॥

एवं प्रसङ्गान्मायाप्रकृतित्वचिन्तां परिसमाप्य प्रकृतमनवगतार्थविषयतया सिद्धेऽपि वेदान्तप्रामाण्यसमर्थनमुपसंहरति । अनवबुद्धमिति । यतः अनुभवात्मस्वरूपमुक्तविधया तमसा पिहितं मामहं न जानामीति प्रत्यक्षतोऽपि इह साक्षिणि प्रतिभासतेऽतोऽनवबुद्धमेतत् श्रुतिमस्तकैर्विषयतामुपपादयितुं क्षममिति संबन्धः ॥ ३३५ ॥

अज्ञानकल्पितमनिर्वचनीयमस्मि-
न्नाबालवृद्धमविवादपदं प्रसिद्धम् ॥
स्वप्नो तथा च भगवानपि वक्ष्यतीदं
सन्ध्येऽस्ति सृष्टिरिति पक्षनिरासासिद्ध्यै ॥३३६॥

यदुक्तं प्रागज्ञानकल्पितमनिर्वचनीयमित्यादिनाना निर्वचनीयं किं चिद्वस्त्वस्तीति तदिदानीमाशङ्क्य नि-

राक्रियते। ननु स्वप्रकाशब्रह्मणः कथमनवबुद्धत्वं विरोधात्, न च तत्कल्पितमनिर्वचनीयमिति न विरोध इति वाच्यम्, तस्यैव गगनकमलप्रायत्वादित्याशङ्क्य लोके सर्वानुभवसिद्धत्वान्मैवमित्याह। अज्ञानकलुषितमिति। अस्मिन् लोके आबालवृद्धं बालवृद्धमभिव्याप्य सर्वेषामित्यर्थः। शुक्त्यादौ रजतादिर्हि लोके सर्वैरनुभूयते स न तावज् ज्ञानद्वयं ततो रजतार्थिप्रवृत्त्यनुपपत्तेर्ज्ञानस्य स्वविषय एव प्रवर्तकत्वादिति भ्रमसिद्धौ वक्ष्यमाणविधया सोऽनिर्वचनीयविषय इति भावः। किं च सूत्रकारोऽपि स्वप्ने प्रतीयमानस्य रथादेः सत्यत्वनिरासायाऽनिर्वचनीयत्वं वक्ष्यतीति तत्सिद्धिरित्याशयेनाह। स्वप्न इति। यथा लोके प्रसिद्धं तथैवेत्यर्थः। वक्ष्यति पदार्थपाद इति शेषः। इदमनिर्वचनीयत्वम्। सन्ध्येऽस्ति सृष्टिरित्यनेन सन्ध्ये सृष्टिराह हीति सूत्रमुपलक्षयति। सन्ध्ये स्वप्ने सृष्टिः सृज्यमानो रथादिरस्ति सती, यतोऽथ रथान् रथयोगानिति श्रुतिः सृष्टिमाहेति सूत्रेण कृतपूर्वपक्षस्य निरासार्थं मायामात्रमित्यादिसूत्रेणाऽनिर्वचनीया सेत्युक्तवानित्यर्थः॥३३६॥

मिथ्याशुषिः सवितृमण्डलमध्यवर्त्ती
प्रत्यक्षदृष्टिपथमापतितोऽचिरेण॥
द्रष्टुः शरीरकरणप्रविभागरूपं
मृत्युं निवेदयति सत्यमिति प्रसिद्धम्॥ ३३७॥

ननु गुरुवेदान्तादेरन्यस्य वा प्रपञ्चस्य मिथ्यात्वे कथं ततोऽद्वैतब्रह्मावगमोऽन्यद्वा विचित्रं कार्यं भवेदिति चेन्न, स्वप्ने तथाभूतादपि सत्यविचित्रकार्यदर्शनादेवं जाग्रत्यपि तत्प्रसिद्धमित्याह । मिथ्याशुषिरिति । शुषिश्छिद्रम् आपतितः प्राप्तः सवितरि रथनाभिच्छिद्रवत्कलूपितं शुषिरं प्रत्यक्षदृष्टिविषयोऽचिरेण द्रष्टुर्मृत्युं मरणं निवेदयति । मृत्युमेवाह । शरीरेति । स्थूलशरीरात्करणसमूहस्य लिङ्गशरीरस्य प्रविभागरूपम् उत्क्रमणरूपम् । सोऽपि तर्हि मिथ्येत्याशङ्क्य व्यावहारिक इत्याह । सत्यमिति । एतच्च ऐतरेयकब्राह्मणेन चिरमिव जीविष्यतीति विद्यादित्युपक्रम्य छिद्र इवादित्यो दृश्यते इति श्रुतिप्रसिद्धमनुभवसिद्धं च, नात्र विमतिरिति भावः। वस्तुनः कारणत्वे कार्यत्वे च सर्वसंप्रतिपन्नासद्विलक्षणः स्वरूपविशेष एवापेक्षितस्तावतैवानन्यथासिद्धत्वादेः कारणत्वशरीरस्योपपत्तेः, न त्वबाध्यत्वमप्यपेक्षितम्, तदृतेऽनुपपत्त्यभावादस्माकं प्रपञ्चे तदसंप्रतिपत्तेश्च । आत्मा तु कूटस्थो न वस्तुतः कस्यापि कारणम्, अपूर्वमनपरमिति श्रुतेः । मिथ्याकारणत्वं तु प्रपञ्चमिथ्यात्वं विना न सिद्ध्यतीति न सत्त्वं कारणस्य क्वचिदपि क्लृप्तमिति सवितृशुष्यादेर्मृषावस्तुनोऽपि मरणादिनिवेदकत्वमुपपद्यते । ननु तच्छुषिरज्ञानमेव तत्सूचकं न तु तदि-

ति चेत्तर्हि सर्वत्रापि ज्ञानमेव कारणं तच्च जीवस्येश्वरस्य वास्तु न वस्त्विति स्यात्। ज्ञानमात्रस्याऽतिप्रसक्तस्य कारणत्वानुपपत्त्या विषयमिश्रितस्यैव कारणत्वाच्च सोऽपि कारणमिति भावः ॥ ३३७ ॥

स्वप्नः शुभाशुभफलागमसूचकः स्यान्
मिथ्यापि सन्निति च सूत्रकृदाह यत्नात् ॥
गुर्वादि सर्वमिदमद्वयबुद्धिहेतु-
र्मायानिबन्धनमिति प्रतिपादनाय ॥ ३३८ ॥

किं च सूत्रकारोऽप्युक्तन्यायं यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयादित्यादिश्रुतिं च पश्यन्मिथ्या सन्नपि स्त्रीदर्शनकुञ्जरारोहणसुरापानादिदर्शनरूपः स्वप्नः शुभाशुभफलयोरागमस्य प्राप्तेः सूचकः स्यादिति सूचकश्च हि श्रुतेरित्यादिसूत्रेणाहेति तस्यापि संमतमेवेदमित्याह। स्वप्नः शुभाशुभेति। यत्नोऽत्र उक्तन्यायाद्यनुसंधानम्। ननु ब्रह्मविचारमध्ये किमिदं सूत्रकारस्य स्वप्नफलनिरूपणमित्याशङ्क्य तदाशयमाह। गुर्वादीति। मायानिबन्धनमपीदं गुर्वादि अद्वयबुद्धिहेतुरिति प्रतिपादनायेति संबन्धः ॥ ३३८ ॥

भ्रान्तिप्रतीतिविषयो न च सन्न चास-
न्नाकाशतत्कुसुमयोर्न हि सास्ति नापि ॥
तस्या भवेत्सदसदात्मकगोचरत्वं

न ह्यस्ति तत्किमपि यत्सदसत्स्वरूपम् ॥३३९॥

ननु स्वप्नादिविषयस्य मृषात्वमसंप्रतिपन्नमिति चेन्न शुक्त्यादौ रजताद्यर्थिप्रवृत्त्यादिबलाद् भ्रान्तिस्तावदस्तीत्युक्तम् । तत्र भ्रान्तिर्नाम रजताद्याकाराऽविद्यावृत्तिः, तदवच्छिन्नं साक्षिचैतन्यं भ्रान्तिप्रतीतिः । सा किं सविषया निर्विषया वा, आद्ये तद्विषयः किं सन्नुतासन्नुतोभयात्मकः, आद्येऽपि किं तत्रैव सन्नन्यत्र वा । नान्त्यः अन्यत्र सतोऽत्रापरोक्षप्रतीत्यसंभावात्तद्धेतोरिन्द्रियसन्निकर्षस्य संयोगादेरसंभवात् । न प्रथमः । नेदं रजतमित्यादिरूपेण बाधायोगात् । नाप्यसन्,असतोऽपरोक्षप्रतीत्यनुपपत्तेः । नापि तृतीयः । विरोधेनैकस्य सदसदात्मकत्वासंभवादित्याशयेनाह । भ्रान्तिप्रतीतीति । सदसदेकैकत्रिषयत्वे भ्रान्तिरपि सा न स्यादित्याह । आकाशेति । यतः सा भ्रान्तिराकाशतत्कुसुमयोर्नास्ति अतो भ्रान्तिप्रतीतिविषयो न च सन्न चासन्निति पदयोजना । पररीत्याकाशेत्युक्तं न ह्याकाशे सति आकाश इति ज्ञानं तत्कुसुमेऽत्यन्तासत्यसदिति ज्ञानं भ्रमो भवतीत्यर्थः । तृतीयेऽपि एकस्य सदसद्विषयत्वानपायाद् भ्रान्तित्वानुपपत्तिस्तुल्येत्यभिप्रेत्याह । नापीति । भ्रान्तेः सदसदात्मकविषयत्वाभावे विषयाऽसंभवमपि हेतुमाह । न ह्यस्तीति । विरुद्धसमुच्चयस्य क्वाप्यदृष्टत्वादिति भावः ॥ ३३९ ॥

आलम्बनं च विरहय्य न विभ्रमस्य
ज्ञानात्मनो भवति जन्म कदा चिदत्र ॥
सिद्धं ततः सदसती व्यतिरिच्य किं चि-
दालम्बनं भ्रमधियः सकलप्रवादे ॥ ३४० ॥

इदानीं भ्रान्तिरविषयेति पक्षं प्रतिक्षिपति । आलम्बनमिति । विरहय्य वर्जयित्वा । भ्रमस्य निर्विषयत्वाभावे हेतुतया तं विशिनष्टि । ज्ञानात्मन इति । अत्र लोके । तथा च ज्ञानस्य सविषयत्वनियमाद् भ्रमज्ञानस्याविषयत्वमनुपपन्नमिति भावः । अतः परिशेषाद् भ्रान्तिविषयोऽनिर्वचनीय एव सर्वैरप्यभ्युपगन्तव्य इत्युपसंहरन्नाह । सिद्धं तत इति । व्यतिरिच्य विहाय । किं चित् सदसद्विलक्षणमनिर्वचनीयम् । तदालम्बनं सिद्धमित्यर्थः । विषयस्यानिर्वचनीयत्वेन विषयिणोऽप्यनिर्वचनीयत्वमर्थसिद्धमन्यथा तद्विषयत्वायोगादिति भावः । न च सदसत्त्वसमुच्चयवत्तद्वैलक्षण्यसमुच्चयरूपमनिर्वचयीत्वमपि विरुद्धमिति वाच्यम् । अनिर्वचनीयत्वस्याप्यनिर्वचनीयत्वेन विरोधस्यालङ्कारत्वादिति भावः ॥ ३४० ॥

ब्रह्मात्मवस्तु निरवद्यचिदेकरूपं
वन्ह्युष्णतावदपरोक्षवपुः स्वभावात् ॥
निर्दोषवेदशिरसो वचनादतोऽस्मिन्
ब्रह्मात्मवस्तुनि भवेदपरोक्षबुद्धिः ॥ ३४१ ॥

यत्तु वाक्यप्रसूतमतिरिन्द्रियजन्यधीवन्नार्थापरोक्ष्यजननी भवितुं समर्थेत्यादिना वेदान्तवाक्यस्य ब्रह्मण्यपरोक्षज्ञानजनकत्वायोगादपरोक्षे ब्रह्मणि परोक्षज्ञानस्य प्रमात्वायोगाच्च न तत्र तत्प्रामाण्यमित्युदक्तं तद्दूषयति। ब्रह्मात्मवस्त्विति। अवद्यं तदापरोक्ष्यप्रतिबन्धको वास्तवो मलस्तद्रहितमित्यर्थः। चिद्रूपमपि द्रव्यांशसंबलितं चेत्स्यादपि कदा चित्परोक्षमित्यत एकेतिविशेषणम्। वन्हेरौष्ण्यं यथा स्वभावस्तथा। यथा स्वभावाद्वह्निरुष्णस्तथा स्वभावादपरोक्षवपुरित्यर्थः। ततः किं तत्राह। निर्दोषेति। अनेन वेदान्तेभ्यः भ्रमासंभवात्तज्जन्यज्ञानस्य भ्रान्तित्वमिष्टमिति न मन्तव्यमिति दर्शितम्। अपौरुषेये वेदान्ते भ्रान्त्यादिमूलत्वाभावान्निर्दोषत्वं च सर्वसंप्रतिपन्नमेव यतो निरवद्यचिदेकरूपं ब्रह्मात्मवस्तु स्वभावादपरोक्षवपुस्ततोऽस्मिन् ब्रह्मात्मवस्तुनि निर्दोषवेदशिरसोऽपरोक्षबुद्धिर्भवेदिति संबन्धः। ज्ञानापरोक्षत्वं ह्यपरोक्षविषयत्वेनैव न त्विन्द्रियजन्यत्वेन सुखादिज्ञानस्य नित्यसाक्षिरूपस्यापरोक्षस्यापीन्द्रियजन्यत्वाभावेनापरोक्षविषयत्वस्यैव तत्र तत्प्रयोजकत्वात्। प्रत्यगभिन्नं ब्रह्म चापरोक्षचिन्मात्रत्वाद्यत्साक्षादपरोक्षादिति श्रुतेश्च नित्यापरोक्षमेवेति तत्र वेदान्ताज्जातं ज्ञानं शब्दप्रसूतमपि विषयमहिम्नाऽपरोक्षमेव भवेदिति

नोक्तदूषणमिति भावः ॥ ३४१ ॥

सा चोपनेयरहिते विषयिण्यनन्ते-
ऽनिर्वाच्यमग्रहणमात्रमपाकरोति ॥
स्वोत्पत्तिलब्धनिजवस्तुबलेन तत्र
तापत्रयं समुपशाम्यति निर्निमित्तम् ॥ ३४२ ॥

यच्चोक्तं नैतत्प्रमाणमपनेतु सतो न तावदित्यादिना स्वप्रकाशे ब्रह्मणि यथा भावरूपं प्रमाणाधेयं स्फुरणं न संभवत्येवं सदादिस्वभावस्याविद्यादेर्निवृत्तिरपि न संभवतीति व्यर्थं तत्र वेदान्तप्रामाण्यमिति तदप्येवं सत्यनवकाशमिति तद् दूषयति । सा चेति । अपरोक्षबुद्धिरित्यर्थः । उपनेयं प्रमाणाधेयं स्फुरणं तद्रहित इत्यर्थः । विषयिणि चैतन्ये । अनन्त अपरिच्छिन्ने । एतदपि तदभावे हेत्वन्तरम् । अनिर्वाच्यमिति च्छेदः । अग्रहणं ग्रहणविरोध्यज्ञानम् । अज्ञानतत्कार्यप्रपञ्चस्य प्रागुक्तन्यायेनानिर्वचनीयत्वात्तस्य च लोके ज्ञानान्निवृत्तिदर्शनाद्वेदान्तजन्यब्रह्मसाक्षात्कारान्निवृत्तिरुपपद्यत इति भावः । अज्ञानमात्रं ज्ञाननिवर्त्यं प्रपञ्चस्तु तन्नाशेनैव नश्यतीति मतेन मात्रमित्युक्तम् । ननु वेदान्तजन्यजडवृत्तेः कथमज्ञाननिवर्तकत्वमिति तत्राह । स्वोत्पत्तीति । स्वोत्पत्त्या लब्धमभिव्यक्तं यन्निजवस्तु स्वरूपं चैतन्यं तद्बलेनेत्यर्थः । नन्वविद्यानिवृत्तिः पुरुषेण नार्थ्यते सुषुप्त्यादावनर्थं विना तिष्ठन्त्यास्तस्याः साक्षा-

त्परम्परया वानर्थत्वाभावादित्याशङ्क्य सुषुप्त्यादौ ततोऽनर्थाभावेऽपि समयान्तरे तत्संभवात्तन्निवृत्तिरप्यात्यन्तिकानर्थनिवृत्तिमिच्छद्भिरर्थनीयेति तन्निवृत्तावात्मन्याध्यात्मिकादित्रिविधदुःखस्य विनैव पुंव्यापारमन्यद्वा निमित्तमुपशान्तिर्भवतीति सफलैवात्मनि वेदान्तव्यापृतिरित्याह । तत्रेति । अविद्यानिवृत्तौ सत्यां स्वात्मनि वा ॥ ३४२ ॥

वाक्यात्प्रवर्त्तकनिवर्त्तकरूपभाजः
पुंसः प्रवृत्तिमुपलभ्य धियोऽनुमानात् ॥
कार्यान्विते शिशुरवैति पदस्य शक्ति-
मित्युच्यते यदि तु तत्र वयं वदामः ॥ ३४३ ॥

यदप्युक्तं लोके शब्दानां संगतिग्रहात्तस्य च प्रवर्त्तकवाक्याधीनत्वात्प्रवर्त्तककार्यान्वित एव गवादिपदसंगतिग्रह इति वेदोऽपि कार्यपर एव न सिद्धब्रह्ममात्रपर इति, तद् दूषयितुमनुवदति । वाक्यादिति । प्रवर्त्तकनिवर्त्तकरूपं प्रवर्त्तकनिवर्त्तकस्वरूपं कार्यं तद्भाजस्तद्गोचरादित्यर्थः । गामानय परिहर सर्पमित्यादिप्रयोजकवृद्धवाक्यात्पुंसः प्रयोज्यवृद्धस्य प्रवृत्तिं निवृत्तिं चोपलभ्य पश्चाद्धियः कार्यधियोऽनुमानात्कार्यान्विते पदस्य शक्तिं शिशुर्व्युत्पित्सुरवैति अवगच्छतीति योजना । तुरवधारणे । कार्यान्विते एवेति संबन्धः । सिद्धान्ती तद्दूषणं प्रतिजानीते । तत्रेति । दूष-

णमिति शेषः ॥ ३४३ ॥

योग्येतरान्वितपदार्थनिवेदने तु
शब्दस्य शक्तिरिह वृद्धजनप्रयोगे ॥
विज्ञायते न खलु कार्यसमन्वितेऽर्थे
कार्याभिधायिषु पदेष्वपि तत्प्रसङ्गात् ॥३४४॥

कार्यान्वितसंगतिवादिना किं योग्येतरत्वमपि तद्विशेषणमाश्रयणीयमुत न, अन्त्य अन्वय एव न संभवति कुतः कार्यान्वय इत्यभिप्रेत्याद्ये योग्येतरान्वित एवावश्यापेक्षिते शब्दस्य वृद्धप्रयोगेशक्तिर्गृह्यतां किं कार्यत्वेनापि विशेषणेनेत्याशयेनाह। योग्येतरेति । अन्वययोग्यं यदितरत् तदन्वितस्य पदार्थस्य निवेदने ज्ञापन इत्यर्थः । योग्यता तु सिद्धस्य कार्येण कार्यस्य च सिद्धेन । तुरवधारणे । कार्यसमन्वितेऽर्थे शब्दस्य शक्तिरित्यनुषङ्गः । नन्वव्यभिचारात्कार्यान्वय्येव शब्दार्थ इत्याशङ्क्यासिद्धो हेतुरित्याशयेनाह । कार्याभिधायिष्विति । कार्यवाचकलिङ्लोड़ादिपदेष्वपि कार्यान्विते शक्तिप्रसङ्गादित्यर्थः ॥ ३४४ ॥

कार्यान्वितार्थविषया यदि शब्दशक्तिः
कार्यार्थवाचिषु लिङादिषु कार्यमन्यत् ॥
वक्तव्यमापतति तत्र च तत्र चान्यद्
वक्तव्यमेव भवतीत्यनवस्थितिः स्यात् ॥३४५॥

नन्वेतदिष्टप्रसञ्जनमित्याशङ्क्य सप्रसञ्जकं प्रसङ्गम-

नुवदन्नस्यानिष्टपर्यवसानमाह । कार्यान्वितार्थेति । अस्त्वेवमिति चेत्तत्राह । तत्र च तत्र चान्यदिति । येन कार्येणान्विते कार्ये लिङादिपदस्य शक्तिस्तस्यापि कार्यस्य लिङाद्यन्तरगम्यत्वे तत्रापि कार्यान्तरान्विते तस्य शक्तिर्वाच्येति लिङादिपदस्य तदभिधेयकार्यस्य चानन्त्यप्रसङ्गः । एकस्मिन्वाक्ये लिङादिनानात्वं चासंभवि । प्रकृतलिङादिनैव कार्यान्तरस्याप्यभिधाने तस्यापि कार्यस्याभिधानार्थं कार्यान्तरं वाच्यमिति तदानन्त्यं स्यात्, एकस्यानेकार्थत्वायोगाच्च । न च शब्दानभिधेयकार्यान्विते लिङादेः शक्तिरिति नोक्तदोष इति वाच्यम् । तदियत्ताऽभावेनानन्तकार्यान्विताभिधानप्रसङ्गात् । न च धात्वर्थकार्यान्वितं लिङाद्यभिधेयं कार्यमिति न कोऽपि दोषः स्यादिति वाच्यम् । धात्वर्थकार्यतायास्तन्मते प्रत्ययार्थकार्योपस्थित्यधीनावगमतयाऽन्योन्याश्रयात् । तस्माल्लिङादेः कार्यान्विते शक्तिरसङ्गतेति भावः ॥ ३४५ ॥

सिद्धान्वितं यदि लिङादिपदानि कार्यं
ब्रूयुर्विनश्यति तदा नियमस्त्वदीयः ॥
यो वर्णितः सकलमेव पदं स्वमर्थं
कार्यान्वितं वदति नान्यदिति स्वशास्त्रे ॥३४६॥

एवं सर्वेषां पदानां कार्यान्विते शक्तिरिति पक्षे दूषितेऽस्तु तर्हि लिङादिव्यतिरिक्तानां कार्यान्विते

शक्तिरित्याशङ्क्य तर्हि किं कार्यपदस्यानन्विते कार्ये शक्तिः, किं वा सिद्धान्विते । आद्ये अन्वितकार्यप्रतीतिराकस्मिकी स्यादित्यभिप्रेत्य द्वितीयमनूद्य प्रत्याह । सिद्धान्वितमिति । यस्यैवं नाशप्रसङ्गस्तमेव तदीयं नियममाह । यो वर्णित इति । अन्यत्सिद्धान्वितम् । प्राभाकरा हि स्वशास्त्रे सर्वमेव हि पदं कार्यान्वितमेव स्वार्थं वदति न सिद्धान्वितमिति वर्णयन्ति । तल्लिङादेः सिद्धान्वितार्थे शक्त्यभ्युपगमे बाधितं स्यात् । किं चैवं पदान्तराणामपि सिद्धान्विते शक्तिप्रसङ्ग इति योग्येतरान्विते पदशक्तिरित्यस्मदुक्तमेव स्यात् । अन्यथा शब्दशक्तिप्रयोजकद्वैविध्यप्रसङ्ग इति भावः ॥ ३४६ ॥

योग्येतरान्वितनिमित्तकशब्दशक्ति-
व्युत्पत्तिरेव यदि संभवभागिनी स्यात् ॥
आश्रीयते किमिति कार्यसमन्वितेऽर्थे
शब्दस्य शक्तिरसदर्थविशेषणेन ॥ ३४७ ॥

पूर्वं योग्येतरान्विते पदशक्तिरित्ययमेव पक्षः साधुः न तु योग्येतरकार्यान्वित इति तत्र कार्यत्वविशेषणस्य गौरवाद्दुष्टत्वादित्युक्तमिदानीमुपयोगाभावाच्चैवमेवेत्याह । योग्येतरान्वितेति । भावपरोऽयं निर्देशः,योग्येतरान्वितत्वं निमित्तं प्रयोजकं निरूपकमिति यावत् यस्याः शब्दशक्तेस्तद्व्युत्पत्तिरित्यर्थः । योग्येतरा-

न्विते शक्तिग्रह इति यावत्। संभवभागिनी स्यात्। अबाधिता भवेत्। अनेन कार्यान्वितस्य विशेषणस्य वैयर्थ्यं द्योतितम्। तदेवाह। असदर्थविशेषणेति। असन्नविद्यमानोऽर्थः प्रयोजनं यस्य तादृशं विशेषणमभिमतं यस्य वादिनस्तेनेत्यर्थः। संभवे व्यभिचारे च स्याद्विशेषणमर्थवदिति न्यायेन सर्वस्यापि विशेषणस्य व्यावृत्तिप्रयोजनत्वात्तच्छून्यं विशेषणं न युक्तमिति भावः ॥ ३४७ ॥

यत्राविशेषितनिमित्तकताऽविरोधे
किं चिन्निवारकमुदीक्षितमस्तु तत्र ॥
किं चिद्विशेषणविशिष्टमभीष्टशक्ते-
र्वस्तु प्रयोजकमिदं पुनरत्र नास्ति ॥ ३४८ ॥

सर्वत्र विशेषणोपादाननिमित्तं दर्शयन्कार्यान्वयित्वस्यासदर्थविशेषणत्वमुपपादयति। यत्रेति। यत्राविशेषितमविशिष्टं निमित्तं यस्य तदविशेषितनिमित्तकं तस्य भावस्तत्ता तस्या ऽविरोधे अतिप्रसङ्गादिरूपे बाधे प्रसक्ते सति यदि तन्निवारकं विशेषणमीक्षितं तत्संभवतीत्यर्थः। एतावता संभवे व्यभिचारे च स्याद्विशेषणमर्थवदित्युक्तं विशेषणोपादानप्रयोजकं दर्शितम्, तत्र किं चिद्विशेषणविशिष्टं वस्त्वस्तु, निमित्तमितिशेषः। यत्र हि प्रवृत्त्यादौ केवलेष्टसाधनताज्ञानादेर्निमित्तत्वे प्रवृत्त्यतिप्रसङ्गो बाधकोऽस्ति तत्र तत्परिहारा-

य यत्कृतिसाध्यत्वविशिष्टेष्टसाधनताज्ञानादि प्रवृत्तिकारणमिति तत्तादृशस्थले विशेषणमुपादीयत इत्यर्थः । ततः किं तत्राह । अभीष्टेति । अत्र शब्दे,अभीष्टशक्तेर्योग्येतरान्वितगोचरशक्तेः पुनरिदमुक्तम् प्रयोजकं कार्यान्वयित्वविशेषणोपादाने निमित्तं बाधकं किं चिदपि नास्तीति संबन्धः । शब्दशक्तेर्योग्येतरान्वयिविषयत्वे बाधकाभावान्न कार्यान्वयित्वमपि तद्गोचरविशेषणं कल्पनीयमित्यर्थः ॥ ३४८ ॥

कार्यान्वयान्वयिनि वस्तुनि शब्दशक्ति-
रित्युच्यते यदि तदापि समानमेतत् ॥
अन्वीयमानवचनत्वमतोपपत्तौ
कार्यान्वयान्वयिविशेषणगीर्वृथेति ॥ ३४९ ॥

यदुक्तं प्राक्कार्यान्वयान्वयिनि वस्तुनि शब्दशक्तिरिति नानेककार्यापत्तिरिति तत्रापीदं गौरवं दूषणमस्त्येवेत्याह । कार्यान्वयान्वयिनीति । एतद्गौरवम् । साम्यमेवाह । अन्वीयमानेति । शब्दस्येति शेषः । यस्मिन्मते शब्दस्यान्वीयमानवचनत्वं तस्योपपत्तावित्यर्थः । इतिर्हेतौ यस्मादेवं कार्यान्वयित्वविशेषणगीर्वृथा तस्मादेतत्समानमित्यधस्तात्संबन्धः ॥ ३४९ ॥

वक्तृज्ञानविवक्षयोरपि भवेच्छब्दार्थता तावके
पक्षे शब्दमनु प्रतीतिरुभयोरस्त्येव यस्मात्तयोः ।
यस्माच्छब्दमनु प्रतीतिपदवीमारोहदुत्प्रेक्ष्यते

तत्तद्वाच्यमिति स्थितौ नहि तयोः शब्दार्थतावर्जनम् ३५०

ननु गामानयेत्यादिवाक्यान्नियमेन कार्यान्वयितया गवादिपदार्थप्रतीतेः कार्यान्वय्येव शब्दार्थ इति चेत्तर्हि लौकिकं वाक्यं वक्तृज्ञानविवक्षागोचरतयाऽनुमानसिद्धार्थानुवादकमिति वदतस्तव वाक्यश्रवणानन्तरं तयोरपि नियमेन प्रतीतेर्वक्तव्यत्वाद्वक्तृज्ञातविवक्षितकार्यान्वयिनः शब्दार्थतापत्तिः, गौरवान्न तथेति चेत्कार्यान्वयित्वमपि तत एव न तथेत्याशयेनाह । वक्तृज्ञानविवक्षयोरिति । शब्दमनु प्रतीतिः, शब्दं निमित्तीकृत्य प्रतीतिरस्त्येवेति । अन्यथा तद्विषयतया वाक्यार्थस्य सिद्धरभावेन वाक्यस्यानुवादकत्वायोगादित्यर्थः । नन्वेतावता कथं तयोरस्मत्पक्षे शब्दार्थतापत्तिरित्याशङ्क्य प्रतीतिबलादेव कार्यान्वयिनः शब्दार्थत्वमिच्छतस्तव मते कथं तयोः शब्दार्थतावर्जनं स्यादित्याह । यद्यच्छब्दमिति । पदवीं विषयताम् । उत्प्रेक्ष्यते दृश्यते । यद्यच्छब्दानन्तरं प्रतीयत इत्यर्थः । स्थितौ मते । तयोर्वक्तृज्ञानविवक्षयोः । प्राभाकरा हि गामानयेत्यादि लौकिकवाक्यं प्रथमं तात्पर्यज्ञानाभावाद् गवानयनादिसंसर्गं न प्रतिपादयति, किं तु तत एवमयं वेद विवक्षति चेति वक्तृज्ञानादिप्रतीतौ तद्विषयतया ऽर्थेऽपि ज्ञाते वाक्यं पश्चात्तमनुवदतीति वदन्ति । तत्र कथमुक्तविधया तयोरपि शब्दार्थता न स्या-

त् । न च मानान्तरात्प्रयोगानुपपत्तिरूपाद्वक्तृज्ञानादेः प्रतीतिरित्यन्यलभ्ययोर्न शब्दार्थतेति वाच्यम् । कार्यतदन्वययोरपि लिङ्लोडादिबलात्प्रतीयमानतया न गवादिशब्दार्थतेति तुल्यमेवेति भावः ॥ ३५० ॥

वेदे वक्तुरभावतस्तदुभयं नास्तीह यस्मादतः
शब्दो वाचकशक्तिमुज्झति निजान्तत्र स्ववाच्यं विना ॥
वाच्ये वाचकशक्तिमिच्छति भवान्नान्यत्र तत्र श्रुते
रप्रामाण्यमिति स्फुटं तव भवेद्बुद्धेरनुत्पत्तितः ॥ ३५१ ॥

नन्वेवमस्त्विति चेत्तर्हि वेदप्रामाण्यहानिरपौरुषेयतया वेदस्य वक्तुरभावेन तेन ज्ञातविवक्षितकार्यरूपार्थासंभवादित्याशयेनाह । वेदे वक्तुरभावत इति । तदुभयं वक्तृज्ञानं विवक्षा च इह अस्मिन्मते तत्र वेदे स्ववाच्यं विना तदभावात् शब्दो निजां वाचकशक्तिमुज्झतीति संबन्धः । ननु लोके लिङाद्यर्थतया गृहीतकार्याभावेऽपि वैदिकलिङादेर्यथा प्रामाण्यं तथा वक्तृज्ञानाद्यभावेऽपि वेदप्रामाण्यं किं न स्यादित्यत आह । वाच्य इति । लोकप्रसिद्ध इति शेषः । वाचकशक्तिं वैदिकशब्दस्यापीति शेषः । अन्यत्र लोकाप्रसिद्धे । प्राभाकरोऽपि वेदे शब्दार्थौ लौकिकावेवेति मन्यते लिङादेरपि लोकावगतकार्यशक्त्यनुरोधेन वेदे धात्वर्थस्य कार्यत्वायोगात्तदतिरिक्तकार्य एव शक्तिं कल्पयति न त्वर्थान्तरे इत्येकरूप एवार्थे लौकिकवैदिकविधिप्रामाण्यं वदति । वक्तृज्ञानविवक्ष-

योस्तु सर्वथा वेदेऽसंभवाद्वेदस्याबोधकतारूपाप्रामाण्यमेव स्यादित्याह । तत्रेति । लोकवेदयोः शब्दार्थैकरूप्ये सतीत्यर्थः । इत्येवं तव मत इति शेषः । तत्र तव मते श्रुतेरतिस्फुटमप्रामाण्यं भवेदिति संबन्धः । तत्र हेतुः बुद्धेरनुत्पत्तित इति, वक्तृज्ञातविवक्षितकार्यान्वयिबुद्धेरसंभवादित्यर्थः ॥ ३५१ ॥

न च सोमयागपदयोरुभयो-
रपरस्परेण घटतेऽत्र युजा ॥
पदजातमेतदखिलं हि निजं
विषयं समर्पयति कार्ययुतम् ॥ ३५२ ॥

किं च कार्यान्वयी शब्दार्थ इति मते सोमादिविशिष्टविधिविलोपापत्तिः, सोमेन यजेतेत्यत्र हि सोमविशिष्टयागो विधीयत इति तेऽपि मतं स तव न संभवति त्वन्मते सोमयागशब्दयोः परस्परसंबन्धाभावेन सोमविशिष्टयागप्रतीतयभावान्न चाप्रतीतस्य विधिः संभवतीत्याशयेनाह । न च सोमयागपदयोरिति । अत्र भवन्मते । युजा संबन्धः । कुतस्तयोः संबन्धासंभवस्तत्राह । पदजातमिति । निजं विषयं स्वाभियधेम् । सर्वेषां सोमादिपदानां लिङर्थकार्यान्वितस्वार्थबोधकत्वात् परस्परमन्योन्यं न संबन्धो युज्यत इत्यर्थः । न च शब्दाभिहितं कार्यमेव यागसोमयोः क्रियाकारकभावेन संबन्धं घटयतीति वाच्यम् । वि-

षयान्वितस्यैव तस्य लिङ्गादिप्रतिपाद्यतया विशिष्टविषयज्ञानमन्तरेण प्रतीतस्य वैशिष्ट्याक्षेपकत्वायोगात् । एवमन्योऽपि भिन्नपदार्थविशिष्टविधिर्न संभवतीति भावः ॥ ३५२ ॥

कार्यान्वयान्वयिनि शक्तिरिति स्थितौ च
कार्यान्वयान्वितमतिर्न परस्परेण
संबन्धितामतिरतश्च न सिद्धिमेति
सर्वो विशिष्टविधिरित्यपि दूषणं वः ॥ ३५३ ॥

कार्यान्वयान्वयि शब्दार्थ इति मतेप्युक्तं दूषणमतिदिशति । कार्यान्वयान्वयिनीति । वो युष्माकं कार्यान्वयान्वयिनीति संबन्धः । स्थितौ पक्षे । अपिरवधारणे । कार्यान्वयान्वितमतिरेव स्यादिति शेषः । न परस्परेण संबन्धितामतिः स्यात्, पदार्थविषयेति शेषः । अत्र सर्वशब्दः पृथगुपात्तविशेषणविशेष्याभिप्रायो द्रष्टव्यः । पूर्वोक्तादिदं मतान्तरमित्येतावतैव तत्रोक्तदूषणस्यातिदेशः । न च तदप्राप्तिशङ्काबीजनिराकरणायेति द्रष्टव्यम् ॥ ३५३ ॥

योग्येतरान्वितपदार्थगतैव शब्द-
शक्तिः स्थिता यदि पुनर्घटते तदाऽयम् ॥
सर्वो विशिष्टविधिरस्तु तथैव तस्माद्
युक्तं तदेतरदितीदमपीह भाष्यम् ॥ ३५४ ॥

स्वमते नायं दोष इत्याह । योग्यतरान्वितेति । यो-

ग्येनेतरेणान्वितो यः पदार्थस्तद्गोचरेत्यर्थः । स्थिता आश्रिता । उक्तदोषाभावे फलित माह । तस्मादिति । तथैव योग्येतरान्वितशक्तिरेवास्त्विति न केवलं विशिष्टविधिरेवास्मिन्पक्षे युज्यते यदैकस्मादपूर्वं तदेतरत्तदर्थमिति शबरभाष्यमप्यस्मत्पक्षे युक्तमेवेत्याह । युक्तमिति । इहास्मिन्पक्षे ॥ ३५४ ॥

शब्दः प्रवृत्तिजनको न तु बोधकश्चे-
न्नैतत्प्रवर्तकधियो जनकत्वहेतोः ॥
इष्टाभ्युपायमतिजन्मनिमित्तभूतः
शब्दः प्रवर्तयति नैष पुनः पुमांसम् ॥३५५॥

ननु विधिश्रुतेः प्रवर्तनालक्षणमेव प्रामाण्यं विशेषतो विशिष्टविधेर्न तु बोधकतालक्षणं तस्य त्वदुक्तविधया विशिष्टविधिप्रतिपादनासंभवादिति न विशिष्टविधेरप्रामाण्यमित्याशङ्कते । शब्द इति । लिङादिरित्यर्थः । किं ज्ञानद्वारा प्रवृत्तिं जनयति नेत्याह । न त्विति । नैवेत्यर्थः । दूषयति । नैतदिति । त्वदुक्तं नेत्यर्थः । यथा प्रत्यक्षादीनां बोधकत्वेन प्रामाण्यं यथा वा शब्दान्तरस्यैवमेव विधेरपि युज्यते । प्रवर्तकबोधजनकत्वमात्रेण प्रवर्तनालक्षणं प्रामाण्यमितिव्यवहारस्याप्यबाधादित्याशयेनाह । प्रवर्तकधिय इति । कथं तर्हि विशिष्टविधेर्बोधकतया प्रामाण्यमित्याशङ्क्य, कार्यमेव लिङर्थ इति पक्षेपि योग्येतरान्वितेति-

श्लोकोक्तविधया तदुपपत्तिरित्याशयेन सर्वविधिसाधारणप्रकारमाह । इष्टाभ्युपायेति । इष्टसाधनत्वमतिजन्मनिमित्तत्वान्न साक्षाच्छब्दः प्रवर्तक इत्युपसंहरति । प्रवर्तयतीति ॥ ३५५ ॥

तस्मादसंगतमिदं यदुशन्ति के चित्
कार्यान्वितार्थविषयैव तु शब्दशक्तिः ॥
तत्र प्रयोगमभिवीक्ष्य तथा प्रतीतिः
कल्प्येति वर्णितनिजेष्टविघातहेतोः ॥ ३५६ ॥

गौरवाद्विशिष्टविधिविलोपप्रसङ्गाच्च कार्यान्वितादि शब्दार्थ इतिमतमसंगतमिति प्रकृतमुपसंहरति । तस्मादिति । इदंशब्दार्थमाह । यदुशन्तीति । के चित्प्राभाकराः । शब्दशक्तिः कल्प्येतियदुशन्तीति सम्बन्धः । तदुक्तं तत्र शब्दशक्तिकल्पनाप्रकारमप्याह । तत्रेति । कार्य इत्यर्थः । प्रयोगमुत्तमवृद्धस्येति शेषः । तथा प्रतीतिः कार्यान्विते शक्तिरिति प्रतीतिः,स्यादिति शेषः । असङ्गतमित्यत्र प्रागुक्तमेव त्वदिष्टविशिष्टविधिलोपप्रसङ्गादिति हेतुमाह । वर्णितेति ॥ ३५६ ॥

वेदैकगम्यमिति कार्यमभीष्टमस्मिञ्
छक्तिग्रहोऽपि न यदस्य समञ्जसोऽयम् ॥
शक्तिग्रहं च परिहृत्य न बोधकत्वं
शब्दस्य शक्यमिह वक्तुमशङ्कितेन ॥ ३५७ ॥

किं च वेदे न लोकवद्वृद्धात्वर्थकार्यान्वितं शब्दार्थः,

त्वया तदनभ्युपगमात्, तदतिरिक्तं तु कार्यमपूर्वतया शब्दैकप्रमाणयोग्यमिति तवेष्टमित्यज्ञाते तस्मिन्वैदिकलिङादेः शक्तिग्रहासंभव इत्याशयेनाह । वेदैकगम्यमिति । कार्यमपूर्वलक्षणं कार्यम् । न समञ्जसः युक्तो न भवति । ननु यद्यग्निहोत्रादि धात्वर्थातिरिक्तं कालान्तरभाविस्वर्गानुकूलं स्वर्गकामिकार्यं न स्यात्तर्हि स्वर्गकामपदसमभिव्याहारो न स्यादिति तत्समभिव्याहारानुपपत्त्योपस्थिते तस्मिन्संगतिग्रहोऽस्त्विति चेन्नेत्याह । अयमपि न समञ्जस इति । उक्तोऽपि सङ्गतिग्रहोपायः सम्यङ् नेत्यर्थः । विधिवाक्यार्थावगमात्प्राग्लोकेऽपि सुखविशेषतत्साधनयोः स्वर्गपदप्रयोगादनिश्चितामुष्मिकार्थतया स्वर्गपदस्य तत्समभिव्याहारमात्रेणालौकिककार्योपस्थित्ययोगात् तत्रापि धात्वर्थस्य कार्यत्वे सिद्धे तदनुकूलस्य स्वर्गस्य तदर्थवादेनापि वक्तव्यत्वात्, उक्तार्थापत्तिगम्यत्वे तस्यापूर्वत्वव्याहतेश्च, नोक्तोपायेन व्युत्पत्तिरिति भावः । शक्तिग्रहासंभवोपपादनफलमाह । शक्तिग्रहमिति । शब्दस्य लिङादेः । इह वेदे । अशङ्कितेन धृष्टेनापि ॥ ३५७ ॥

शश्वत्स्वयंप्रभममलुप्तचिदात्मभूतं
विष्णोः परं पदममुत्र तु शब्दशक्तिः ॥
शक्या ग्रहीतुमतिबुद्धिमनस्यपीति
शास्त्रप्रमाणकमदः प्रवदन्ति सन्तः ॥ ३५८ ॥

ननु भवन्मते सर्वप्रमाणायोग्यमपि ब्रह्म यथा शास्त्रप्रतिपाद्यमेवमस्मन्मते कार्यमपि शास्त्रार्थोऽस्त्वित्याशङ्क्य वैषम्यमाह । शश्वत्स्वयंप्रभमिति । सदा स्वयंप्रकाशमित्यर्थः । बुद्धिर्निश्चयात्मकवृत्तिमदन्तःकरणम्, संकल्पविकल्परूपवृत्तिमत्तदेव मनस्तदुभयमतीत्य तिष्ठतीत्यतिबुद्धिमनस्तस्मिन्, वाङ्मनसागोचरस्यापि स्वप्रकाशब्रह्मणोऽहंकारादिशबलस्य साक्षिणा, सत्यादिशबलस्य च प्रत्यक्षादिनोपस्थितिसंभवेन तत्र गृहीतसङ्गतिकैर्वेदान्तैर्लक्षणया पूर्णब्रह्मणः प्रतिपादनात्तस्य शास्त्रप्रमाणकत्वं युज्यते, न तथा त्वदभिमतकार्यस्य । न च तदपि लिङादिलक्ष्यमस्त्विति वाच्यम् । तथा त्वयानभ्युपगमात् । वाच्यार्थसंबन्धितया मानान्तरानधिगतस्य जडत्वेन स्वतोऽप्यनुपस्थितस्य तस्य त्वन्मते लक्ष्यत्वायोगाच्च । अस्मन्मते लक्ष्यस्य ब्रह्मणो मानान्तरादनुपस्थितस्यापि स्वप्रकाशत्वेनोपस्थितत्वाद्युज्यत एव लक्ष्यत्वमिति भावः । ब्रह्मादिपदार्थशबलस्य परोक्षत्वादमुत्रेत्युक्तम् । शबले शक्तिग्रहसंभवस्य फलमाह । इति शास्त्रेति । इति हेतोरदःपदं शास्त्रप्रमाणकं सन्तो बादरायणादयः शास्त्रयोनित्वादित्यादिना वदन्तीत्यर्थः ॥ ३५८ ॥

जातः सुतः सकलवंशविवर्द्धनस्ते
विप्रेति वाक्यसमनन्तरमस्य शुद्धिः ॥

श्रोतुर्मुखाकृतिवशेन तु पुत्रजन्म-
वस्तुन्यवश्यमनुमीयत एव बालैः ॥ ३५९ ॥

एवं प्रवर्त्तकवाक्याधीनामेव प्राथमिकीं व्युत्पत्तिमभ्युपेत्य लाघवाद्योग्येतरान्वित एव शब्दार्थो न तु तादृशकार्यान्वित इत्युक्तमिदानीं सिद्धार्थकवाक्यादपि प्रथमव्युत्पत्तेः संभवान्न प्रवर्त्तकवाक्याधीना सा, तत्र च कार्योपस्थित्यभावान्न कार्यान्वयी सर्वशब्दार्थ इत्याशयेनाह । जातः सुत इति । वाक्यसमनन्तरं वाक्यश्रवणानन्तरम्, अस्य श्रोतुर्विप्रस्य मुखाकृतिर्मुखविकासादिस्तद्वशेन तेनैव लिङ्गेन, तुरवधारणे, पुत्रजन्मवस्तुनि पुत्रजन्मरूपवस्तुविषया बुद्धिरनुमीयत इति सम्बन्धः । पुत्रस्ते जात इतिवाक्यश्रवणान्तरं पितुर्मुखविकासं दृष्ट्वा ज्ञातपुत्रादिपदार्थस्तटस्थोऽयमिदानीमिष्टज्ञानवान्प्रसन्नवक्त्रत्वात्संमतवदिति तस्येष्टविषयं ज्ञानमनुमिनोति । तच्चेष्टं वस्तु पुत्रजन्मैवेति पुत्रजन्मवस्तुनीत्युक्तम् । एवं च न सिद्धवाक्यात्परस्मिन् ज्ञानजन्मानुमानं संभवति लिङ्गाभावादित्यसदितिभावः ॥ ३५९ ॥

भूतार्थनिष्ठवचनादपि शब्दशक्तिः
शक्या ग्रहीतुमुदितेन यथाऽनभिज्ञैः ॥
तत्र प्रवर्त्तकनिवर्त्तकवाक्यमूल-
शक्तिग्रहैकनियमस्य न हेतुरस्ति ॥ ३६० ॥

एवमपि कथं पुत्रजन्मादिज्ञानासिद्धिस्तत्राह । भूता-

र्थनिष्ठेति । उदितेन यथा उक्तेन मुखविकासाद्युपायेन पूर्वोक्तलिङ्गेनेष्टज्ञानानुमानानन्तरं किं तदिष्टमितिजिज्ञासमानः पुत्रस्ते जात इति वक्त्रैव प्रदर्शितेन तत्पदानुलिप्तकुङ्कुमाद्यङ्कितवाससा तर्केण स्वस्मिन्सुखनिमित्ततयावगतं पुत्रजन्मैव तन्नान्यत्प्रियासुखप्रसवादीति निश्चितयेदं पुत्रजन्मज्ञानं कुतोऽस्याभवदिति तत्कारणमालोचयन्प्रस्तुतवाक्यश्रवणानन्तरमेव तज्जन्मदर्शनात्तद्वाक्यमेव पुत्रजन्मज्ञाने निमित्तमिति निश्चित्य सिद्धार्थवाक्यादपि शब्दशक्तिर्ग्रहीतुं शक्यत इति । तत्र लोके । प्रवर्त्तकनिवर्त्तकवाक्यं मूलं यस्य शक्तिग्रहस्य स प्रवर्त्तकनिवर्त्तकवाक्यमूलशक्तिग्रहः केवलं तद्गोचरस्य नियमस्य न हेतुरस्तीत्यर्थः ॥ ३६० ॥

सामान्यतः प्रथममेष पदार्थपिण्डो
वाच्योऽस्य वाचकमिदं पदपिण्डरूपम् ॥
इत्याकलय्य पुनरेष विशेषतोऽपि
शब्दार्थसंगतिमवैति जनस्तटस्थः ॥ ॥ ३६१ ॥

नन्वेवं पुत्राद्यनेकपदार्थसंसर्गरूपवाक्यार्थज्ञानस्य पुत्रादिपदसमुदायात्मकवाक्यजन्यत्वनिश्चयेऽप्यस्य पदस्यास्मिन्नर्थे शक्तिरिति कथं प्रवृत्त्या विना निश्चेतुं शक्यत इत्याशङ्क्याह । सामान्यत इति । संमुग्धाकारेण पदार्थपिण्डः पदार्थसमूहः पदार्थसंसर्ग इति यावत् । अस्य प्रकृतवाक्यस्य । वाचकमस्य वाक्यार्थस्येति

शेषः । पुनः सामान्यतो वाक्यतदर्थज्ञानयोर्हेतुहेतुमत्त्वग्रहानन्तरम् । एष व्युत्पित्सुः । विशेषतोऽपि शब्दार्थसङ्गतिं पुत्रादिपदस्य तत्तदर्थविशेषे संगतिम् । अवैति अवगच्छति । सामान्यतोऽर्थसमूहे पदसमूहस्य गृहीतसङ्गतिको हि बालः स्वात्मन्यवगतपुत्रार्त्त्यनिष्टसाधनभावः प्रतिपन्नदेवदत्तपुत्रार्तिर्देवदत्त तव पुत्र आर्त्त इति वाक्यश्रवणानन्तरं तस्मिन्नतिमलिनं मुखादि दृष्ट्वा पूर्ववदनिष्टज्ञानमनुमाय तस्य च वाक्यजन्यत्वं निश्चित्य सुताद्यर्थविशेषे पुत्रादिपदस्य योग्येतरान्विते पृथक्पृथक् संगतिमवगच्छति, अतः प्रथमव्युत्पत्तेः प्रवर्त्तकवाक्याधीनत्वनियमोक्तिः परस्य भ्रान्तिमूलेति भावः ॥ ३६१ ॥

काष्ठैः स्थाल्यां पचति विविधैरोदनं पूर्णिकेति
श्रुत्वा बालः सपदि मनुते काष्ठशब्दस्य शक्तिम् ॥
दृष्ट्वा तस्मिन्पचनकरणं प्रज्वलत्काष्ठजातं
न्यायोपायादितरवचसां शक्तिषु प्राक् प्रवीणः ॥ ३६२ ॥

एवं प्रसिद्धपदसमभिव्याहारादप्यप्रसिद्धपदस्य विनैव कार्यान्वयप्रतीतिं योग्येतरान्विते संगतिग्रहणादपि न शब्दार्थस्य कार्यान्वयित्वनियमः, न च तत्रापि पदान्तरस्य कार्यान्विते प्रथमावगतशक्त्यनुरोधेन कार्यपदाध्याहारोऽस्त्विति वाच्यम्, योग्येतरान्वित एव प्रथमं संगतिग्रहोपपादनादित्याशयेनाह । काष्ठैः

स्थाल्यामिति । पूर्णिका दासी । इतरवचसां काष्ठपदव्यतिरिक्तपदानाम् । शक्तिषु अमत्रादिविषयास्विति शेषः । प्रागेतस्मात्प्रयोगात्पूर्वं प्रवीणो निपुणो विद्वान्बालः पूर्णिका विविधैः काष्ठैः स्थाल्यामोदनं पचतीति श्रुत्वा पचनकरणं प्रज्वलत्काष्ठजातं च दृष्ट्वा तस्मिन्काष्ठे न्यायोपायान्न्यायबलेन तत्तदर्थविशेषे स्थाल्यादिपदानां शक्तेर्निश्चयात्परिशेषादिन्यायेन काष्ठशब्दस्य शक्तिं सपदि मनुत इति संबन्धः ॥ ३६२ ॥

न च किमपि नः कार्यं नाम प्रमाणपथानुगं
यदिह तु पुनर्लिङ्लोडादेरुपैष्यति वाच्यताम् ॥
न खलु तदितो धात्वर्थादेः पृथग्व्यवसीयते
व्रजतु तदिह श्रेयोहेतुर्लिङादिपदार्थताम् ॥ ३६३ ॥

इदानीं प्रथमव्युत्पत्तेः प्रवर्तकवाक्याधीनत्वनियमेऽपि न कार्यान्विते शक्तिः क्रियातिरिक्तकार्यस्यैव लोकेऽप्रसिद्धत्वादित्याह । न च किमपीति । नः प्रमाणपथानुगमिति संबन्धः । न तावल्लोके धात्वर्थातिरिक्तं कार्यमस्ति । नापि धात्वर्थ एव तत्, तस्य धातुनैवाभिहितत्वेन लिङादिनाप्यभिधानायोगात्, अनन्यलभ्यस्यैव शब्दार्थत्वात् । न च कार्यत्वाकारेण तस्य लिङर्थत्वमिति वाच्यम् । कार्यत्वस्य कृतिसाध्यतारूपत्वे तस्या अति प्रसक्तत्वेनाऽप्रवर्तकत्वात् प्रवर्तकाभिधायिलिङर्थत्वायोगात् । तस्मात्कार्यं दुर्निरूप-

मित्यर्थः । ननु शब्दार्थनिरूपणप्रस्तावे किमिदं कार्यखण्डनं तत्राह । यदिहेति । तुरवधारणे यदेवेत्यर्थः । कार्यस्य लिङर्थत्वं न संभवतीति वक्तुं तदिति नासंगतमित्यर्थः । पुनःशब्दोऽलङ्कारार्थः । ननु मयेदं कर्त्तव्यमिति कार्यमेवानुभूयते इति कथं तदप्रमाणकमित्याशङ्क्य कृतिसाध्यतया धात्वर्थस्तदिच्छा वा तदाकारा चिकीर्षाख्या तथाऽनुभूयते न तदतिरिक्तं किंचिदित्याह । न खल्विति । धात्वर्थः क्रिया, आदिपदात् कारकादिग्रहः । कटः कर्तव्यः तृप्तिः कार्येति कारकफलयोरपि कर्तव्यत्वप्रतीतेरितः प्रसिद्धाद्धात्वर्थादेः पृथग् न खलु तत्कार्यं व्यवसीयत इत्यन्वयः । ननु कस्तर्हि प्रवर्त्तको यो लिङादिनोच्यते शब्दभावनादेर्बालादिव्यवहाराहेतुत्वेन मध्यमवृद्धप्रवृत्त्याऽननुमितस्य लिङर्थत्वकल्पनायोगादित्याशङ्क्य सत्यं श्रेयःसाधनत्वमेव ज्ञायमानं बालादिप्रवृत्तौ करणतया क्लृप्तं प्रकृते लिङाद्यभिधेयं कल्प्यमित्याह । व्रजत्विति । इह लोके । श्रेयोहेतुरिष्टसाधनम् । भावप्रधानो निर्देशः ॥ ३६३ ॥

न खलु जगति श्रेयोहेतुप्रतीत्युदयादृते
पुरुषवचनात् क्वापि प्राज्ञः प्रवर्त्तितुमर्हति
पुरुषवचनाच्छ्रेयोहेतुप्रतीत्युदयात् पुन-
स्तदनुवशगो रागोत्पत्तौ ततः स हि चेष्टते ॥ ३६४ ॥

ननु समिधमाहरेत्याचार्यवचनेन माणवकः प्रवर्त्तते न च तस्य किंचित्त इष्टं लभ्यते प्रत्युत दुःखमेव महद्भवति तत्कथं श्रेयोहेतुत्वं प्रवर्त्तकं येन तल्लिङर्थो भवेदिति तत्राह । न खलु जगतीति । पुरुषवचनात् आचार्यादिवचनात् । प्राज्ञः प्रेक्षावान् । माणवकस्यापि बलवच्छ्रेयस्करमाचार्याज्ञापालनमदृष्टं वा तादृशमस्त्येव श्रेय इति तत्साधनत्वमेव तत्रापि प्रवर्त्तकं यदि तदुभयार्थी माणवको न स्यात्तर्हि न प्रवर्त्ततैव, दृश्यन्ते हि दुष्टाः शिष्यास्तथाविधा इति भावः । अस्तु तर्ह्यव्यवधानाद्राग एव प्रवर्तक इत्याशङ्क्याह । पुरुषवचनाच्छ्रेयोहेत्विति । सत्यं चिकीर्षारूपो धात्वर्थरागः प्रवृत्त्यव्यवहितप्राक्कालेऽस्ति, परं त्वाचार्यादिवचनादिष्टसाधनत्वज्ञानोदयात्पुनः पश्चाद्रागोत्पत्तिः, ततस्तदनुवशगो रागाधीनः स माणवकादिः प्रवर्त्तत इत्यर्थः । तथा च चिकीर्षाया यन्निमित्तमिष्टसाधनताज्ञानं तदेव बाह्यचेष्टायामपि कारणमित्यर्थः । ननु श्रेयःसाधनत्वमतीतादिसाधारणं कथं प्रवर्त्तकमिति चेन्न । कृतियोग्येष्टसाधनत्वस्य प्रवर्त्तकत्वेनातिप्रसङ्गाभावादित्युक्तत्वादिति ॥ ३६४ ॥

नयनिपुणधीर्बालश्चेष्टां समीक्ष्य समीहितुः
कृततदुचितव्याप्तिज्ञानः पुरा निज आत्मनि ॥
परतनुगतं श्रेयोहेतुप्रतीत्युदयोत्थितं

चरितविषये रागं तस्य प्रवर्त्तकमिङ्गति ॥ ३६५ ॥

एवमिष्टसाधनताज्ञानस्य मतद्वयसंप्रतिपन्नस्य प्रवृत्तिकारणत्वमुपपाद्य तत्र लिङादेः संगतिग्रहं वक्तुं प्रथमं प्रवृत्तिं प्रत्यव्यवहितप्राक्कालीनचिकीर्षानुमानं तद्धेत्विष्टसाधनताज्ञानानुमानं च व्युत्पित्सोराह । नयनिपुणधीरिति। अनुमाने कुशलधीरित्यर्थः । समीहितुः प्रवर्त्तमानस्य । कृतं तस्यानुमानस्योचितं व्याप्तिज्ञानं येन स कृततदुचितव्याप्तिज्ञानः । निज आत्मनि स्वात्मनि । परस्य प्रवर्त्तमानस्य तनुगतं श्रेयोहेतुप्रतीत्युदयात्कृतिसाध्येष्टसाधनताज्ञानोत्पत्तेः रुत्पन्नात्तज्ज्ञानादुत्थितमुत्पन्नं चरितविषये तादृशेष्टसाधनतयाऽवगतधात्वर्थे तस्य प्रवर्त्तमानस्य रागमिङ्गत्यनुमिनोति । गामानयेत्यादिलिङादिसमभिव्याहृतं वाक्यं श्रुत्वा प्रवर्त्तमानवृद्धस्य गवानयनादिचेष्टां दृष्ट्वा बालः पूर्वं स्वात्मनि प्रवृत्तेश्चिकीर्षाजन्यत्वेन व्याप्तिनिश्चयवान् विमता प्रवृत्तिश्चिकीर्षाजन्या प्रेक्षावत्प्रवृत्तित्वान्मदीयभोजनादिप्रवृत्तिवदिति, मध्यमवृद्धे चिकीर्षामनुमाय, सापि वर्णितश्रेयःसाधनताज्ञानजन्या चिकीर्षात्वान्मम भोजनादिचिकीर्षावदिति कृतिसाध्येष्टसाधनताज्ञानं चानुमिनोतीत्यर्थः ॥ ३६५ ॥

प्रवर्त्तकोत्थाननिबन्धने ततः
समीहितोपायविशेषवस्तुनि ॥

गिरोऽनुमाय प्रतिपत्तिहेतुतां
विशेषसिद्धौ तु समीहते पुनः ॥ ३६६ ॥

ततः किं तत्राह । प्रवर्तकोत्थानेति । ततः परतनुगतरागानुमानानन्तरं प्रवर्त्तकस्य गवानयनादिप्रवृत्तिजनकस्य गवानयनादि कर्त्तव्यमिति रागस्योत्थानमुत्पत्तिर्येन तस्य श्रेयःसाधनताविशेषज्ञानस्य निबन्धने विषये समीहितोपायविशेषवस्तुनि कृतिसाध्यत्वविशिष्टेष्टसाधने प्रतिपत्तिहेतुतां गिरो लिङादिमद्वाक्यस्यानुमाय पुनर्विशेषसिद्ध्यै तु लिङादिपदविशेषस्यार्थविशेषे शक्तिसिद्ध्यै च समीहते वक्ष्यमाणप्रकारेण फलवान्भवतीत्यर्थः ॥ ३६६ ॥

पदान्तरस्यागमनादिहान्यत-
स्तथा पदस्योद्धरणादितो गिरः ॥
विशेषसिद्धिं लभते प्रयत्नवान्
पदार्थसंबन्धगतां विचक्षणः ॥ ३६७ ॥

नन्वेवमपि किमाख्यातमात्रस्य तत्र शक्तिः किं वा लिङ्लोडादेस्तद्विषयस्यैवेति कथं विवेक्तव्यमित्याशङ्क्य तमेव यत्नविशेषं दर्शयितुमादौ गवादिपदसाधारणं तद्विवेकोपायमाह । पदान्तरस्येति । अन्यतो वाक्यान्तरात्पदस्य प्रयुक्तवाक्ये श्रुतस्य पदस्य । इतो गिरोऽस्माद् वाक्यादुद्धरणात्त्यागाद्विशेषस्य सिद्धिं निश्चयं लभते । प्रयत्नवान् प्रयुक्तपदविशेषस्योद्धारे यस्यार्थवि-

शेषस्य ज्ञानं न भवति अन्यत आनीतपदविशेषज्ञानाच्च यस्यार्थविशेषस्य ज्ञानं भवति तयोः पदविशेषयोस्तावेवार्थौ भवतस्तज्ज्ञानस्य तदन्वयाद्यनुविधानादिति न्यायानुसन्धानयत्नवानित्यर्थः । अत एव विचक्षणो मेधावी । पदार्थसंबन्धगतां पदतदर्थसंबन्धस्तच्छक्तिस्तद्विषयां विशेषसिद्धिमिति संबन्धः ॥ ३६७ ॥

लड़ादिशब्देऽपगते लिङादौ
प्रत्यागतेऽभीप्सितसाधनत्वम् ॥
प्रतीयते तेन लिङादिशब्द-
स्तदर्थवाचीति स वेत्ति बालः ॥ ३६८ ॥

उक्तेन सामान्यन्यायेन लिङादिविशेषस्य श्रेयःसाधनतारूपेऽर्थे संबन्धं साधयति । लड़ादिशब्द इति । येन गामानयतीति प्रयुक्ताद्वाक्यात्तदानयनस्य नेष्टसाधनत्वं प्रतीयते यदा पुनर्लड़ादि परित्यज्य तत्रैव वाक्ये आनयेत्यादि विधिपदं प्रयुज्यते तदा तत्प्रतीयते तेन स बालो लिङादिशब्दस्तदर्थवाचीति वेत्तीति संबन्धः । एवं च न लिङादिर्लड़ादिसाधारणाख्यातत्वरूपेण श्रेयःसाधनत्ववाची किं तु लिङ्त्वादिनैवेति भावः ॥ ३६८ ॥

योग्येतरान्विततया न च वाच्यताऽस्य
कार्यान्विततत्ववपुषा सुतरां न चेष्टा ॥
किं त्वन्विततत्ववपुषा न विशेषणस्य

किं चित्प्रयोजकमिहास्ति निरुपणायाम् ॥३६१॥

एवं योग्येतरान्विते गवादिपदानां शक्तिः, कृतियोग्येष्टसाधनताज्ञानं प्रवर्त्तकं तत्रैव लिङादेः शक्तिर्न तु कार्ये न वा गवादिपदस्य योग्येतरकार्यान्वये गौरवादित्युक्तम्, नन्वेवमतिलाघवादन्वित एव शक्तिरस्तु न योग्येतरान्वित इत्याशङ्क्येष्टमेव तदस्माकं सिद्धार्थवादिनामित्याह । योग्येतरेति । वाच्यता गवादिपदवाच्यता । अस्य गवादेः । तत्किं कार्यान्विते शक्तिरिष्टा न तस्यातिगौरवदुष्टत्वादित्याह । कार्यान्वितत्वेति । तर्हि किं शुद्धे पदार्थे शक्तिः तदपि न अन्वयंप्रतीतेराकस्मिकत्वप्रसङ्गादित्याशयेनाकाङ्क्षापूर्वकमाह । किं त्वन्वितत्वेति । नन्वयोग्येनानितरेणान्वयो न संभवतीति तदपि तत्र विशेषणमिति चेत्सत्यं तेन विना नान्वयप्रतीतिरस्ति तथापि शब्दार्थतायां तन्न प्रयोजकं तेन विनाप्यन्वयमात्रस्य शब्दार्थत्वे तद्विशेषणस्य प्रयोजकत्वे नानिरूपणादित्योशयेनाह । न विशेषणस्येति । कार्यत्वस्य वा योग्येतरत्वस्य वेत्यर्थः । प्रयोजकं तदभावे बाधकम् । इह शब्दाभिधेये । ननु यत्किंचिदन्विते गवादौ किं गवादिपदस्य शक्तिरुतानयनादिपदाभिहितान्विते । नाद्यः । वाक्यार्थानियमप्रसङ्गेन कदाचिद्गामानयेति वाक्यादश्वमानय गां वारयेत्यनुभवप्रसङ्गात् । न द्वितीयः । परस्पराश्रयाप-

त्तेः, आनयनपदेन गोपदाभिहितान्विताभिधाने तदर्थान्वितां गां गोपदमभिदध्यादेवमानयनपदमपीति चेन्न। गवादिपदेन हि स्वस्वार्थे स्मृतिस्तत्संस्कारोद्बोधो वाधीयत इति वक्तव्यम्, अन्यथा प्रमुष्टसंस्काराणामपि वाक्यार्थानुभवप्रसङ्गात्, संस्कारोद्बोध एव पदाधेय इति तत्त्वम्, अन्यथा पदार्थस्मृतिः संस्कारोद्बोधश्च पदजन्याविति गौरवात्, स्मृतेराशुविनाशित्वेन तत्तत्पदजन्यपदार्थस्मृतिव्यतिरिक्तसकलपदार्थविषयस्मृत्यन्तरप्रसङ्गाद्वाक्यार्थानुभवसामग्र्या तत्प्रतिबन्धाच्च, संस्कारोद्बोधस्तु यावत्कार्यभावीति नोद्बोधान्तरप्रसङ्गः, यदर्थसंस्कारः पदेनोद्बोध्यते स आसन्न इत्युच्यते, एवमाकाङ्क्षितयोग्यसन्निहितान्वितं पदान्यभिदधतीति न परस्पराश्रयः। वाक्योत्थानुभवस्यैवैवंविधपदार्थान्वयविषयत्वनियमात्तत्तत्पदोद्बोधितसंस्कारगोचरार्थविशेषनिरूपितान्वयस्य सामान्यान्वयशक्तैरपि पदैरभिधानाद्वाक्यार्थविशेषसिद्धिश्चेति भावः ॥ ३६९ ॥

यत्केचिदाहुरभिधाय निजान्पदार्था-
नेतावतोपरतवन्ति पदानि तेभ्यः ॥
पश्चाद्विशेषणविशेष्यतया तु तेषां
संसर्गबुद्धिरपराऽवतरिष्यतीति ॥ ३७० ॥

अभिहितान्वयवादिनां मतमिदानीं दूषयितुमनुवदति। यत्केचिदिति। यदाहुरिति संबन्धः। तदुक्तिमे-

आह । अभिधायेति । पदार्थाननन्वितानिति शेषः । एतावता पदार्थमात्राभिधानेन तूपरतवन्ति पर्यवसन्नानि सन्ति न वाक्यार्थानुभवं जनयन्तीत्यर्थः । कथं तर्हि वाक्यार्थबोधस्तेन विना वा कथं श्रोतुः प्रवृत्त्यादिरित्यत आह । तेभ्य इति । पदाभिहितपदार्थेभ्य इत्यर्थः । पश्चात्पदव्यापारोपरमानन्तरम् । तुरवधारणे तेभ्यस्त्वति संबन्धः । तेषां पदार्थानां विशेषणविशेष्यतया संसर्गबुद्धिरिति संबन्धः । अपरा पदजन्यप्रतीतेरन्या । अवतरिष्यति उत्पत्स्यत इत्यर्थः । पदानां हि पदार्थबोधेनैव पर्यवसानमन्यथा विरम्य व्यापारप्रसङ्गात् । पदाभिहिताश्च पदार्था विशेषणविशेष्यतया परस्परं संसृष्टं स्वस्वात्मानं बोधयन्तीति न वाक्यार्थानुभवस्यानुपपत्तिः, न वा श्रोतृप्रवृत्तेः । न चाविद्यमानानामतीताद्यर्थानां कथमनुभावकत्वमिति वाच्यम् । परमते तादृशपदादेरिव ज्ञायमानतयातीतादेरपि ज्ञानकारणत्वोपपत्तेरन्यथा पदेष्वपि तदनुपपत्तेर्दुष्परिहरत्वात्तथा चात्यन्तलाघवाच्छुद्धार्थ एव पदानां शक्तिरिति भावः ॥ ३७० ॥

तद्दुर्घटं न खलु किंञ्चिदपि प्रमाण-
मस्याः प्रसाधकमुदीरितकल्पनायाः ॥
येनोपलब्धिविषयत्वमुपागतानि
संसृष्टमेव तु पदानि पदार्थमाहुः ॥ ३७१॥

सत्यमनन्वितार्थशक्तावतिलाघवं तथापि शब्दाद्विशिष्टानुभवस्यानुभवादप्रामाणिकीयं त्वत्कल्पनेत्याह। तद्ध दुर्घटमिति । त्वदुक्तं दुरुपपादमित्यर्थः । कुतस्तत्राह। न खल्विति। कुतो न प्रमाणमिति चेन्न । येन पदानामेव संसृष्टार्थबोधकत्वमनुभवसिद्धं तेन त्वदुक्तं विमानमित्याह। येनेति। संसृष्टमेवेति। परस्परमिति शेषः । गवादिपदानि ह्यभियुक्तैर्विशिष्टार्थप्रत्ययोद्देशेनैव प्रयुज्यन्ते तस्यैव श्रोतुः पुरुषार्थजनकत्वात्, तदुद्देशेनैव प्रेक्षावतां शब्दप्रयोगाच्छ्रोतारोऽपि ततस्तमेव बुभुत्सन्ते न पदार्थमात्रमिति न पदानां तावतैव पर्यवसानं युक्तमतः किंचिद्गौरवेऽपि प्रामाणिकतया तस्यान्विते पदानां शक्तिरुक्तयुक्त्यनुभवकार्यबलेन च कल्पनीयेति त्वदुक्ता कल्पना न प्रामाणिकीति भावः ॥ ३७१ ॥

नासंसृष्टपदार्थबुद्धिपदयोः पूर्वापरत्वप्रमां
मुक्त्वा कारणकार्यतावगतये कश्चित्समर्थस्तयोः ॥
पौर्वापर्यमुदीक्ष्य हेतुफलतां सर्वत्र संगृह्णते
नो चेत्सर्वमसंगतं भवति वः सर्वव्यवस्थाहतेः ॥३७२॥

ननु शब्दात्परंपरया विशिष्टबोधसंभवे नान्विते शक्तिः कल्पनीया तावतैवाभियुक्तप्रयोगाद्युपपत्तेरित्याशङ्क्य शुद्धपदार्थबोधस्य पदस्य चान्वयव्यतिरेकानवगमान्न हेतुहेतुमत्ता सिद्ध्यति, न हि गामानयेतिवाक्य-

प्रयोगे पदार्थस्मृतिः पृथगनुभूयते येन पदस्य तद्धेतुता सिद्धेरद्वाक्यार्थानुभवस्तु ततोनुऽभूयत इत्यन्वित एव शक्तिर्युक्तेत्याह। नासंसृष्टेति। तयोरसंसृष्टपदार्थबुद्धिपदयोः। नियतपूर्वभावित्वं कारणत्वं तादृशापरकालवृत्तित्वं कार्यत्वं तदेतदुभयं तयोः पूर्वापरत्वज्ञानं विना न संभवतीत्यर्थः। उक्तमेवार्थं सामान्यतोऽन्वयमुखेनाप्याह। पौर्वापर्यमिति। हेतुफलयोरिति शेषः। सर्वत्र दण्डघटादौ। विपक्षे बाधकमाह। नो चेदिति। पूर्वापरत्वज्ञानं विनापि हेतुफलभावग्रहश्चेदित्यर्थः। असाङ्गत्ये हेतुमाह। सर्वव्यवस्थाहतेरिति। दण्डादिः कारणं घटादिः कार्यमित्येवं हेतुहेतुमद्भावस्य व्यवस्थाविलोपप्रसङ्गादित्यर्थः॥ ३७२॥

पूर्वापरान्वयबलेन हि कारणत्व-
कार्यत्वसंगतिमिह प्रतियन्ति लोके॥
नो चेद्भवेदनियमो न च तत्र कर्तुं
कार्याणि कारणविशेषमुपाददीरन्॥ ३७३॥

उत्तरार्द्धं विवृण्वन् कार्यकारणव्यवस्थाऽभावेऽनिष्टं प्रसञ्जयति। पूर्वापरान्वयेति। पूर्वापरकालान्वयावगतिबलेनेत्यर्थः। अनियमः कार्यकारणभावानियमः। तत्रानियमे कार्याणि घटादिरूपाणि कर्तुं कारणविशेषं दण्डादि कारणं नैव कुलालादय उपाददीरन्नित्यर्थः। अतो वाक्यार्थज्ञानाय प्रयुक्तपदतदर्थस्मृत्योः पौर्वाप-

र्यज्ञानासंभवेन कार्यकारणत्वग्रहासंभवात् पदानां पदार्थमात्रज्ञाने पर्यवसानं कल्पयितुं न युक्तमिति भावः ॥ ३७३ ॥

पदजातबुद्धिजनिता भवति
व्यतिषक्तबुद्धिरिति तावदिह ॥
न विगानमस्ति भवतामपि चेद्
व्यवधानकल्पनमकारणकम् ॥ ३७४ ॥

ननु भवतु पदानां वाक्यार्थज्ञानादृते न पर्यवसानं न चैतावता संसर्गे शक्तिः सिद्ध्यति गौरवात्,लाघवेन पदार्थमात्रे क्लृप्तशक्तिकैः पदैः स्वार्थस्मृतिद्वाराकाङ्क्षादिसहकारिबलेन संसर्गज्ञानसंभवात्,एवं च शक्तिबलात्पदार्थस्मृतिर्विशिष्टज्ञानं विना पदानामपर्यवसानं संसर्गे च न पदशक्तिरिति त्रितयं सिद्धमिति चेत्तत्राह । पदजातबुद्धीति । पदसमूहबुद्धिजनितेत्यर्थः । व्यतिषक्तबुद्धिरिति । विशिष्टार्थबुद्धिरित्यर्थः । इह वृद्धव्यवहारस्थले । विशिष्टार्थबुद्धिस्तावत् पदजातबुद्धिजनिता भवतीति भवतामपि चेन्न विगानमस्ति तदा पदार्थस्मृतिव्यवधानकल्पनमकारणकमप्रमाणमिति संबन्धः । अयमाशयः । यदि संसर्गज्ञानं पदजन्यं तर्हि कार्यानुरोधेन पदानां तत्र शक्तिरावश्यकी शक्तेः कार्योन्नेयतया यथाकार्यं कल्प्यत्वात् , अन्यथा पटजननाशक्ताद्दण्डादिव पटःपदात्संसर्गज्ञानं न जायेत । न च कार-

णतारूपा तन्निर्वाहिका शक्तिरन्या दण्डादौ, शब्दे चान्याऽभिधारूपा शक्तिः सा च न संसर्ग इति वाच्यम् । दण्डादिशक्त्या सदृश्या एव तस्याः स्ववाच्यसंबन्धानपेक्षशब्दवृत्तित्वेनाभिधात्वे संभवति तद्भेदे प्रमाणाभावात्। लाक्षणिकशब्दवृत्तिकारणता तु नैवम्। अन्वयव्यतिरेकनियमाद्यनुपपत्तिकल्प्यत्वाविशेषेण च तदभेद एवोचितः। न चैवमपि पदार्थशक्त्यैव परम्परया संसर्गज्ञानमन्यथासिद्धमिति वाच्यम्। यतस्तथा सति वाक्यार्थे तवापि मते लक्षणैव स्यात्, शक्त्या परम्परासंबन्धस्यैव लक्षणात्वात्, अन्यथा तीरादेरपि तथैव गङ्गादिपदाज् ज्ञानमस्त्विति लक्षणैव लुप्येत । तस्मात्संसर्गे लक्षणामनभ्युपगच्छतस्तत्र शक्तिरवश्यं वाच्येति ॥ ३७४ ॥

व्यतिषक्तबुद्धिजनकं सकलं
पदजातमित्यनुमतं यदि वः ।
व्यवधानकल्पनविडम्बनया
किमिहाञ्जसैव जनकं भवतु ॥ ३७५ ॥

नन्वेवमपि व्यवधानकल्पनमकारणमित्यनुचितं वाक्यार्थबुद्धेः पदार्थविशिष्टबुद्धितया पदार्थज्ञानजन्यत्वात्तस्य च पदाभिहितस्मृत्यन्यस्यासंभवात्, किं च वाक्यार्थज्ञाने पदमेव करणमिति तद्व्यापारतयापि सावश्यं वाच्येति चेत्तत्राह। व्यतिषक्तबुद्धीति । व्यव-

धानकल्पनैव विडम्बना नटना तयेत्यर्थः। अञ्जसा साक्षाच्छक्त्यैवेति यावत्। न तावन्मध्ये स्मृतिः कल्पनीया गौरवात्। अन्यत्रापि विशिष्टज्ञानस्य विशेषणज्ञानाजन्यतया प्रकृते तदनपेक्षणात्। न चैवमगृहीतशक्तेरपि वाक्यार्थधीप्रसङ्गः। संबन्धज्ञानजन्यसंस्कारस्य पदज्ञानोद्बुद्धस्यान्वयव्यतिरेकाभ्यां हेतुत्वावधारणेनातिप्रसङ्गाभावात्। करणव्यापारोऽप्यावश्यकश्चेत्संस्कारोद्बोध एवास्तु। न चैवं संस्कारजन्यत्वेन वाक्यार्थज्ञानस्य स्मृतित्वं स्यादिति वाच्यम्। समानविषयसंस्कारजन्यस्यैव स्मृतित्वाद्वाक्यार्थज्ञाने च तदभावात्। संस्कारकरणकं च ज्ञानं स्मृतिः, करणता च कारणतेव शक्तिविशेषः, वाक्यार्थज्ञाने च वाक्यमेव करणं न संस्कार इति व्यवधानकल्पनमकारणकमेवेति भावः ॥ ३७५ ॥

पारम्पर्यं ह्यगतिकगतिं कारणादाश्रयन्ते
नोत्सर्गेण स्फुरति विदुषां यत्र तत्र प्रनाड़ी॥
श्रुत्या सोमक्रयमनुगतः साधनत्वेन हित्वा
साक्षाद्भावं ह्यरुणिमगुणः प्रापदेनामशक्तेः॥३७६॥

नन्वेवमपि न तदकारणकं विशकलितपदप्रयोगे हि ततः पदार्थस्मृतिरनुभूयत इति पदस्य स्मारकत्वं क्लृप्तम्, अतः संश्लिष्टपदप्रयोगेऽपि पदात्सावश्यकी, एवं च तत्रैव पदव्यापारः, वाक्यार्थबोधे तु पदार्थानामेवा-

काङ्क्षादिमतां हेतुत्वम्, न चैवं वाक्यार्थबोधस्याशाब्दत्वापत्तिः पदार्थाख्यमानान्तरमपि प्रसज्येतेति वाच्यम्, परम्परया शब्दजन्येऽपि शब्दस्य तात्पर्येण तच्छाब्दत्वोपपत्तेः, अत एव वृद्धानां तदुद्देशेन शब्दप्रयोगोऽपि न विरुध्यते, पदार्थमानत्वमपि वक्ष्यमाणदृष्टान्ते प्रसिद्धमिति नालौकिकमत्र किं चिदति चेन्नेत्याह । पारम्पर्यमिति। यत्र विद्वांसोऽगतिकगतिं मुख्यगतिशून्यानां गतिसदृशं पारम्पर्यमाश्रयन्ते तत्र तेषां विदुषां कारणाद्बलवदनुपपत्तितः सा प्रनाडी स्फुरति न तूत्सर्गेण स्वभावतः स्फुरतीत्यर्थः। यत्र हि यस्य कारणत्वं प्रमितमथ च साक्षान्नोपपद्यते यथा यागस्य स्वर्गं प्रति कारणता तत्रानुपपत्तिबलाद्विधान्तराभावनिमित्तं परम्पराकारणत्वं पण्डिता आश्रयन्ते यथा मध्येऽपूर्वकल्पनया यागस्य, नैवमिह संसृष्टज्ञाने स्मृत्या विना साक्षात्कारणत्वे शब्दस्य काप्यनुपपत्तिरस्ति विशिष्टज्ञानत्वादिप्रयुक्तानुपपत्तेः परिहृतत्वात्। न चान्ते समूहालम्बनैकस्मृतिविषयतावत्पदेभ्यो मध्ये स्मृतिरनुभूयत इत्युक्तम्। एवं पदानामेव स्वतात्पर्यगोचरविशिष्टज्ञानजनकत्वे संभवति पदार्थाख्यप्रमाणान्तरमपि न कल्पनीयम्। वक्ष्यमाणदृष्टान्तेऽपि न प्रमाणान्तरं संप्रतिपन्नमिति वक्ष्यत इति भावः। साक्षात्प्रमितिकरणत्वासंभवेऽन्यद्वारा तदुपपादनीयमित्यत्र स्वयं

दृष्टान्तमाह । श्रुत्येति । साधनत्वेन सोमक्रयमनुगतः सोमक्रयेण संबद्धः । साक्षाद्भावं साक्षात्साधनत्वम् । एनां प्रनाडीं प्रापयत् । अशक्तेः शक्त्यभावात् । अरुणिमगुणो हि अरुणयेत्यादिवाक्येऽरुणयेति तृतीयाश्रुत्या सोमक्रयं प्रति साधनत्वेन बोधितः स्वस्यामूर्तत्वेन साक्षात्क्रयसाधनत्वाशक्तेः साक्षाद्भावं विहाय द्रव्यावच्छेदद्वारा परम्परया साधनत्वं प्रापदित्यर्थः ॥ ३७६ ॥

श्वेतिमानमभिपश्यतः पुरः
शृण्वतस्तदनु हेषितध्वनिम् ॥
तद्वदत्र खुरमुद्गरस्वनं
श्वेतरूपतुरगोऽटतीति धीः ॥ ३७७ ॥

यत्तु पदार्थाख्यं मानं लोकसिद्धमिति पूर्वपक्षिणोऽनुशयमवोचाम तदिदानीं शङ्कते । श्वेतिमानमिति । श्वेतं रूपमित्यर्थः । पुरः अग्रे । हेषितध्वनिम् अश्वध्वनिम् । अनेनाश्वत्वोपस्थितिरुक्ता । अत्र लोके । खुरमुद्गरस्वनं खुरस्य तीक्ष्णशब्दम् । अनेन च तस्य धावनं सूचितम् । लोके हि अग्रे दूरतः श्वेतरूपं पश्यतोऽश्वध्वनिं खुरशब्दं च श्रुत्वा प्रत्येकमश्वत्वाद्यवगच्छतः श्वेतोऽश्वो गच्छतीति बुद्धिर्जायते, सा न तावत् प्रत्यक्षेण दूरादिदोषेण तस्य तदसमर्थत्वात्, नापि लिङ्गेन विशिष्टार्थव्याप्तलिङ्गाभावात्, न तादृशः शब्दस्तत्रास्ति, ततः क्लृप्तमानान्तरासंभवाच्चक्षुरादिनावगतश्वेतादिरूपपदार्थैरेव

श्वेतोऽश्वो धावतीति धीर्यदुद्भवतीत्यर्थः ॥ ३७७ ॥

तद्वदत्र पदजातबुद्धिभि-
र्बोधिताखिलपदार्थहेतुकः ॥
सर्वशब्दविषयार्थसंगतेः
प्रत्ययो भवति योग्यतादिभिः ॥ ३७८ ॥

दार्ष्टान्तिकमाह । तद्वदिति । अत्र वाक्ये पदजातबुद्धिभिः प्रतिपदं क्रमेणोत्पन्नमतिभिर्बोधिता येऽखिलपदार्थास्तद्धेतुकः सर्वेषां गवादिशब्दानां ये प्रतिपाद्यार्थास्तेषां परस्परसंगतेः संसर्गस्य योग्यतादिभिराकाङ्क्षायोग्यतासन्निधानैः सहकारिभिः प्रत्ययस्तद्विषयः प्रत्ययो भवतीत्यर्थः । अतः पदार्थमानत्वं लोकप्रसिद्धमेवात्रास्थितमिति नालौकिकमिति भावः ॥ ३७८ ॥

नैतत् क्रमनिमित्ततोऽपि घटते संसर्गधीरीदृशी
श्वेतोऽश्वस्त्वरितोऽभिधावतितरामित्यादिकार्योत्थिता॥
कार्यं क्रमनिबन्धनं यदि भवेन्नास्यापरं कारणं
कल्प्यं तेन पदार्थजातजनिता नैषा मतिर्लिङ्गजा ॥३७९॥

सिद्धान्ती प्रत्यक्षादिनैवास्य प्रत्ययस्योपपत्तेर्न तदर्थं मानान्तरं कल्प्यमिति दूषयति । नैतदिति । कुत इत्यत आह । क्रमनिमित्ततोऽपीति । वक्ष्यमाणक्रमप्रमाणात् । ईदृशीत्युक्तमेवाह । श्वेतोऽश्व इति । ननु यथानुमानाद्यवगतं प्रत्यक्षेणाप्यवगच्छन्ति तद्वत्क्रमप्रमाणावगतमपि पदार्थप्रमाणेनावगच्छन्त्विति तत्रा-

ह। कार्यमित्यादिना। क्लृप्तं निबन्धनं कारणं यस्य तत्। यत्र ह्युभयमपि क्लृप्तं भवति तत्रैकेनावगतमन्येनाप्यवगम्यतां यत्र तु नैवमथ च क्लृप्तेनैव कार्यं निर्वहति तस्यापरं कारणं न कल्प्यं कार्यस्य तेनैव निराकाङ्क्षत्वात्। ततः किं तत्राह। तेनेति। एषा मतिः श्वेतोऽश्व इत्यादिमतिः। किंप्रमाणजा तर्ह्येषा मतिस्तत्राह। लिङ्गजेति। लिङ्गेति प्रत्यक्षस्याप्युपलक्षणम् ॥३७९॥

पादार्थं न पृथक् प्रमाणमपरं नानाप्रमाणोद्भवं
नाप्येतत्फलमत्र पक्षयुगले कल्प्यं निमित्तान्तरम्॥
क्लृप्तं लिङ्गमतोऽपि निर्वहति चेत्संसर्गधीरीदृशी
पादार्थी न पृथक् प्रमा न च फलं नानाप्रमाणोद्भवम्३८०॥

न पदार्थजातजनितेत्यादि विवृण्वंस्तर्हि प्रत्यक्षादिसमुदायादेषा मतिरस्त्वित्याशङ्कामपि निराकरोति। पादार्थमिति। पदार्थसबन्धि पादार्थं पदार्थसमुदायरूपमिति यावत्। पृथक् प्रत्यक्षादिव्यतिरिक्तम्। अपरं प्रत्येकप्रत्यक्षादिफलादतिरिक्तम्। नानाप्रमाणोद्भवं प्रत्यक्षलिङ्गसमुदायजन्यम्। एतत्फलं संसर्गज्ञानं श्वेतोऽश्वो धावतीत्येवंरूपा प्रमा। उभयत्र दूषणमाह। अत्रेति। तस्मिन्पक्षद्वय इत्यर्थः। पदार्थसमुदायस्य प्रमाणसमुदायस्य च प्राक् प्रमाणत्वेनाक्लृप्तत्वात्तदुभयप्रमाणत्वमत्रैव कल्पनीयमित्यर्थः। अथ वा पृथक् प्रमाणत्वपक्षे नानाप्रमाणफलत्वे च पक्षद्वये निमित्तान्तरं कल्प्यं यत-

इत्यर्थः । तर्ह्यनन्यथासिद्धकार्यबलात्तदन्यतरप्रामाण्यं कल्प्यतामित्याशङ्क्यासिद्धो हेतुरित्याह । क्लृप्तमिति । लिङ्गमिति प्रमाणान्तरस्याप्युपलक्षणम् । इदमिहाभिप्रेतम् । श्वेतद्रव्येण सममिन्द्रियसंनिकर्षस्तावदस्त्येवान्यथा श्वेत इति ज्ञानासंभवात्, अश्वत्वादंशज्ञाने चक्षुषो यद्यपि दोषः प्रतिबन्धकस्तथापि हेषादिना तदनुमाने तद्विशिष्टेन्द्रियेण प्रत्यभिज्ञेव परोक्षापरोक्षरूपा श्वेतोऽश्वो धावतीति धीर्भवितुमर्हति । एवं विमतः श्वेतः अश्वः हेषाकर्तृत्वात्संमतवदिति श्वेतोऽश्व इति विशिष्टज्ञाने, श्वेतोऽश्वो धावति, अव्यवधानेन नाना देशेषु दृश्यमानत्वात्तादृशदेवदत्तवत्, एवं श्वेतरूपे हेषाखुरमुद्गरस्वनादिकर्तृत्वसामानाधिकरण्यानुपपत्त्याप्येतादृशी धीर्भवितुमर्हतीति । न तदर्था त्वदुक्तकल्पनेत्याशयेनोपसंहरति । पादार्थीति । पदार्थसमुदायकराणिकेत्यर्थः ॥ ३८० ॥

नासंसृष्टमतो वदन्ति न च तान्याहुः क्रियासङ्गतं
योग्येनान्वितमेव केवलममून्याहुः स्वमर्थं यतः ॥
एवं सत्यपवर्जितक्रियमलं निष्पन्नरूपं सदा
संसर्गादिविवर्जितं च वदितुं वस्तुस्वरूपं श्रुतिः ॥३८१॥

एवं योग्येतरकार्यान्विते योग्येतरान्विते वा न पदानां शक्तिरतिगौरवात्, नापि केवलपदार्थे वाक्यार्थप्रतीतेराकस्मिकतापत्तेः, केवलार्थशक्तेभ्य आकाङ्क्षादि-

सहकृतेभ्यः पदेभ्यो न संसर्गधीजन्माऽशक्तात्कार्यासम्भवेन तदा कार्यानुरोधेन शब्दशक्तेरपि तत्रावश्यकत्वात्, कारणताशक्तेरेत्र स्ववाच्यसम्बन्धानपेक्षशब्दवृत्तित्वेनाभिधाशक्तित्वात्, नापि पदस्मारितपदार्थानामेवाकाङ्क्षादिवशात्परस्परं स्वसंसृष्टविषयज्ञानकारणता, शब्देभ्यः साक्षादेव वाक्यार्थप्रमासंभवे मध्ये स्मृतिकल्पनायोगाद्वाक्यार्थबोधस्य शब्दाजन्यत्वेऽशाब्दत्वं च स्यात्, न च परम्परया शब्दमूलत्वेन शाब्दत्वम्, चाक्षुषरूपादिलिङ्गजानुमितेरपि चाक्षुषत्वापत्तेः, पदार्थाख्यप्रमाणान्तरकल्पनाप्रसङ्गादपि नैते पक्षाः साधव इत्युक्तमिदानीं लाघवेनाकृतिमात्रवाचकशब्देन व्यक्तिरिव पदार्थशक्तपदेभ्यो वाक्यार्थो लक्ष्यतामेवं च न प्रागुक्तो दोषः कोऽप्यत्र प्रसज्यत इत्याशङ्कयात्रापि प्रतिपिपादयिषाद्यनुराधेन केवलपदार्थशक्तेरयुक्तत्वे स्थितेऽन्वयबोधस्य शब्दलभ्यत्वान्नातीवास्माकमनिष्टमित्याशयमेतदनिराकरणे द्योतयन्नुपसंहरति। नासंसृष्टमिति। वदन्ति पदानीति शेषः। कार्यान्विते शब्दसङ्गतिं निराकृत्य सिद्धान्विते तत्समर्थनफलमाह। एवं सतीति। सिद्धान्वितस्यापि शब्दार्थत्वसंभवे सतीत्यर्थः। अपवर्जिता परिहृता क्रिया कार्यं यस्मिन् ब्रह्मणि तत्। अलं समर्था ॥३८३॥

अभिहितघटनाऽथ वाऽन्विताना-

मभिहितिरस्त्वथ वा न पक्षपातः ॥
क्व चिदपि समयेऽस्ति नः कदा चिद्
बहुघटनात्मकवस्तुनिष्ठवाक्ये ॥ ३८२ ॥

एवमभिहितान्वयादि निराकृत्यान्वितमात्रं शब्दार्थ इत्युक्तम्, ननु कोऽयमभिनिवेशस्तवाभिहितान्वयपक्षेऽपि लक्षणयाऽखण्डब्रह्मसिद्धिसंभवात्, तावन्मात्रस्यैव तव मते प्रतिपाद्यत्वादित्याशङ्क्यास्तु वा तथेत्याशयेनाह । अभिहितघटनेति । अभिहितानां घटनाऽन्वय इत्यर्थः । पूर्वोक्तनियमकल्पादस्य कल्पान्तरत्वं द्योतयितुमाद्योऽथ वेति शब्दः, स चादौ योजनीयः । क्वचिदपि समये पक्षपातो नो नास्तीति संबन्धः । नन्वखण्डे ब्रह्मणि नोभयमपि संभवतीति कथं तदङ्गीकार इत्याशङ्क्यान्यत्रैव तदङ्गीकार इत्याह । बहुघटनेति । बहूनामर्थानां घटनात्मकं यद्वस्तु प्रतिपाद्यं तन्निष्ठे वाक्ये गामानयेत्यादिलौकिके ज्योतिष्टोमेन यजेतेत्यादिवैदिके चाभिहितघटनेत्यादिसंबन्धः ॥ ३८२ ॥

अभिहितघटना न चोपपन्ना
परदृशि नाभिहितिस्तथान्वितानाम् ॥
अनधिकविकलार्थगोचरत्वा-
न्न तदुभयं श्रुतिमस्तके पदानाम् ॥ ३८३ ॥

बहुघटनात्मकेतिविशेषणव्यावर्त्यमाह । अभिहित-

घटना न चेति । परदृशीत्यसङ्गस्वप्रकाशचिदात्मनो निर्देशात्तस्यान्वितत्वेनानन्वितत्वेन वाभिधानायोग्यता ध्वनिता । कुतो नेत्यत आह । अनधिकेति । अधिको विकलश्च न भवतीत्यनधिकविकलः, तादृशः शुद्धचिद्रूपोऽर्थो गोचरो येषां तेषां भावस्तत्त्वं तस्मादित्यर्थः । अथ वाधिकेत्यन्वितत्वं विकलेति केवलत्वम् । यद्यप्यात्मवस्तु केवलं तथाप्यन्वयप्रतियोगितया स्वरूपेण वा नाभिधानयोग्यं स्वप्रकाशत्वादिति विकलोक्त्यभिप्रायो द्रष्टव्यः । उपसंहरति । न तदिति । तत्तस्मात् । उभयम् अभिहितान्वयोऽन्विताभिधानं च ॥ ३८३ ॥

अभिहितघटना यदा तदानीं
स्मृतिसमबुद्धियुगं पदे विधत्तः ॥
परदृशि पुनरन्विताभिधाने
पदयुगलात्स्मृतियुग्ममेव पूर्वम् ॥ ३८४ ॥

ननु पक्षद्वयेऽपि वाक्यस्याखण्डार्थप्रतिपादने किं कश्चिद्विशेषोऽस्तीत्याकाङ्क्षायामस्ति कश्चिदित्याह । अभिहितघटना यदेति । स्मृतिसमबुद्धियुगमिति । भट्टपक्षे हि पदानां पदार्थमात्रबोधे पर्यवसानात्सा पदशक्त्यैव लभ्यत इति न स्मृतिः शब्दमात्रकरणकस्य स्मृतित्वायोगात् । किं तु संबन्धावगमकाले प्रसिद्धार्थविषयतयानुवादत्वेन स्मृतिसमेति । पदे तत्त्वंपदे । त-

स्मिन्पक्षे स्मृतिसममेव बुद्धियुगं परमात्मनि विधत्तः जनयतः । अन्विताभिधाने तु पदानां शक्त्यान्वयप्रतिपादन एव व्यापारात्पदार्थज्ञानं संबन्धिविषयैव पदजमिति न तत्पदकरणकं किं तु प्रसिद्धस्मृतिवत्संस्कारकरणकमेवेति स्मृतिरेवातस्तत्त्वंपदयुगलाद्वाक्यार्थप्रतीतेः पूर्वं स्मृतिद्वयमेव भवतीति विशेष इत्यर्थः । एतच्च परमताङ्गीकारेणोक्तमिति द्रष्टव्यम् । अत उभयमतानुरोधेन तत्त्वंपदार्थविषया धीः स्मृतिसमा स्मृतिरेव वेति यथा तथास्तु, एतावताप्यखण्डार्थनिष्ठता वाक्यस्य न विहतेति भावः ॥ ३८४ ॥

स्मृतिसमपदजन्यबुद्धियुग्मात्
परदृशि मोहनिवर्त्तनं परेषाम् ॥
परदृशि पदजस्मृतिद्वये स्यात्
पदयुगलात्प्रमितेः समुद्भवो नः ॥ ३८५ ॥

एवं तत्त्वंपदजन्यपदार्थबोधे पक्षद्वये विशेषमुक्त्वाऽखण्डवाक्यार्थबोधोत्पत्तौ विशेषमाह । स्मृतिसमपदेति । स्मृतिसमे च ते पदजन्ये च ते च बुद्धी तयोर्युग्मं तस्मादित्यर्थः । मोहनिवर्तनं साक्षात्कारः । तत्त्वंपदजन्यस्मृतिसमलक्ष्यपदार्थद्वयज्ञानादेवाभिहितान्वयवादिनामात्मसाक्षात्कारो भवेन्न तु शब्दादितरत्र तु पदजन्यस्मृतिद्वये सति तत्त्वंपदाभ्यामेव वाक्यार्थप्रमितेः समुद्भव इति महान्विशेषः । एवं च न इति वद-

ता साक्षात्कारस्योपनिषज्जन्यत्वेन ब्रह्मणः स्वमते औपनिषदत्वसिद्धेरिदमेव ज्याय इति दर्शितम् ॥ ३८५ ॥

औदासीन्यप्रच्युतिप्रापकेऽर्थे
लिङ्लोड़ादेर्लोकतो ज्ञातशक्तेः ॥
पुंसो वेदे प्रेरकत्वेन कल्प्या
लिङ्लोड़ादेर्भावनैवानृतन्त्रे ॥ ३८६ ॥

एवं लोके शब्दानां कार्यान्विते व्युत्पत्तिबलेन वेदान्तानां सिद्धब्रह्मण्यप्रामाण्यमिति मतं निराकृत्य तत्र तेषां प्रामाण्यं स्थापितम्, इदानीं भावनावाक्यार्थवादी त्र्यंशभावनारूपपुंप्रवृत्तिपर एव सकलोऽपि वेद इत्याशयेन प्रथमं शब्दभावनाया लिङर्थत्वमाशङ्कते। औदासीन्येति। औदासीन्यस्य प्रवृत्तिप्रागभावस्य प्रच्युतिरभावः प्रवृत्तिरिति यावत्। तस्याः प्रापके निमित्तेऽर्थे प्रेरणायामित्यर्थः। लोकतो लोके पुंस औदासीन्यप्रच्युतिप्रापकेऽर्थे ज्ञातशक्तेर्लिङ्लोड़ादेर्वेदेऽर्थवत्त्वेन लिङ्लोड़ादेर्भावना लिङ्लोड़ादिव्यापाररूपा भावना कल्प्या। कुत इत्यत आह। पुंसः प्रेरकत्वेनेति। लिङ्लोड़ादेरित्यनुषञ्जनीयम्, प्रेरकव्यापारः प्रेरणा वेदे च लिङ्लोड़ादेरेव पुमांसं प्रति प्रेरकत्वात्तद्व्यापार एव भावना तत्र लिङर्थ इत्यर्थः। ननु लोके चेतनानामेव प्रेरकत्वं दृष्टं तत्कथमचेतनलिङादेस्तदिति तत्राह। अनृतन्त्र इति। अपौरुषेय इत्यर्थः। मा-

मयं प्रेरयतीति यद्व्यापारं ज्ञात्वा चेतनः प्रवर्त्तते स व्यापारवान् प्रेरकस्तद्व्यापारश्च प्रेरणा स चापौरुषेये वेदे लिङादिरेव यजेत जुहुयादित्यादितद्व्यापारश्रवणानन्तरमेव पुरुषस्य प्रवृत्तेः स एव प्रवर्त्तक इत्यर्थः । एतदुक्तं भवति । माणवक गामानयेत्याचार्यवचःश्रवणानन्तरं प्रवर्त्तमानं माणवकं दृष्ट्वा व्युत्पित्सुरित्थमनुमिनोति विमता प्रवृत्तिः प्रेरणाज्ञानपूर्विका नरान्तरायत्तप्रवृत्तित्वान् मम स्तनार्थिनो रोदनेन प्रेरिताया मातुस्तनदानप्रवृत्तिवदिति । स्वभोजनादिप्रवृत्तिवारणाय नरान्तरेति । तत्र चान्वयव्यतिरेकाभ्यां लिङादेः शक्तिं कल्पयतीति तत्र व्युत्पन्नलिङादेर्वेदे तद्व्यापार एव भावना तदर्थः सिद्ध्यतीति ॥ ३८६ ॥

आज्ञाद्यर्थः प्रेरकः पौरुषेये
लिङ्लोडादेर्भावना वेदवाक्ये ॥
पुंसोऽभावात्तद्गताज्ञाद्यभावात्
पुंसंबन्धात्प्रेरकास्ते हि वाक्ये ॥ ३८७ ॥

ननु किं लोकेऽपि लिङादिव्यापार एव प्रेरणा नेत्याह । आज्ञाद्यर्थ इति । आदिपदेनाभ्यर्थनादिग्रहः, आज्ञादिरूपोऽर्थ इत्यर्थः, प्रेर्यते प्रवर्त्त्यतेऽनेनेति प्रेरकः प्रेरणा, लौकिकवाक्यस्य पौरुषेयतयाचार्यादिपुरुषसंबन्धात्तत्र स एव प्रेरकस्तद्व्यापाररूपाज्ञादिरेव प्रेरणा, पुंप्रवृत्तेस्तत एव संभवेन लिङादेस्तत्र प्रेरकत्वायोगादित्यर्थः ।

एवं च तद्द्वैविध्यं सिद्ध्यतीत्याशयेनाह । लिङ्लोडादेरिति । ननूक्तव्यवस्थायां किं नियामकमित्याशङ्क्य तयोः संभवासंभवावेव व्यवस्थापकावित्याशयेनाह । पुंसोऽभावादिति । अभावादिति च्छेदः । तद्गतेति । वेदगतेत्यर्थः । ते पुमांसः आज्ञादयो वा । तथा च न लिङादेः प्रेरणा तत्रास्तीति भावः । एवं च प्रेरणात्मनि लिङादिशक्तेर्लोकवेदयोः समत्वान्न कार्यवादिन इव भावनावादिनो वैयधिकरण्यादिवैषम्यमिति भावः ॥ ३८७ ॥

लिङ्लोडादिर्भावकस्तत्र भाव्या-
नुष्ठेयेऽर्थे पुंप्रवृत्तिः प्रसिद्धा ॥
लिङ्लोडादेः पुंप्रवृत्त्यंशनिष्ठो
व्यापारो यस्तं विदुर्भावनेति ॥ ३८८ ॥

ननु भावनायाश्चेतनव्यापारत्वेन प्रसिद्धत्वात्कथं लिङ्लोडादेर्व्यापारो भावनेत्याशङ्क्य सत्यमर्थभावना तथैव शब्दभावना तु ततो विलक्षणा ततस्तत्र भावकादिवैलक्षण्यं युज्यत इत्याशयेन तस्या भावकं भाव्यं चाह । लिङ्लोडादिरिति । भावको भावनाश्रयस्तत्कर्तेति यावत् । तत्र शब्दभावनायां भाव्या साध्या अनुष्ठेये कृतिसाध्ये अर्थे धात्वर्थे पुंप्रवृत्तिः अर्थभावनारूपा पुरुषप्रवृत्तिः सप्तम्यौ च समानाधिकरणे विषयत्वार्थे । यद्यपि धात्वर्थोऽर्थभावनाया न भाव्यः किं

तु करणं तथापि तत्साध्य एव स भाव्यावच्छिन्नायां व्यापाररूपायां तस्यां करणतयान्वेतीति तस्य तत्साध्यत्वानपायादर्थे पुंप्रवृत्तिरित्युक्तम्। प्रसिद्धा धात्वर्थनिष्पत्तिबलात्सिद्धा। तथा च धात्वर्थातिरिक्तार्थभावना नेति शङ्का न कार्येत्यर्थः। ननु क्लेशात्मिकायाः प्रवृत्तेर्भाव्यत्वायोगात्स्वर्गादिरेव भाव्यो वाच्यः स चार्थभावनाया एव भाव्यो न शब्दभावनाया अपीत्याशङ्क्याह। लिङ्लोडादेरिति। पुंप्रवृत्तिरूपो यो भाव्योंऽशस्तन्निष्ठस्तत्पर्यवसायी, प्रेरणारूपस्य लिङादेर्व्यापारस्य प्रेर्यप्रवृत्तिरूपा सैव भाव्यत्वयोग्येति तन्निष्ठैव शब्दभावनेति भावनावादिनो मन्यन्त इत्यर्थः॥ ३८८॥

करणमिह लिङादेर्ज्ञानमेवाङ्गभागः
पुनरभिरुचिहेतुर्दृश्यते च प्रशंसा॥
विधिरयमिह तन्त्रे जैमिनीये न कार्यं
न च भवति विधिर्नः श्रेयसो हेतुरर्थः॥ ३८९॥

ननु शब्दभावनाया अपि भावनात्वात्त्र्यंशत्वं वाच्यं तत्र प्रवृत्तिर्यद्यपि प्रथमांशः सिद्धस्तथापि तत्करणमितिकर्तव्यता च न सिद्धे, तत्र न तावच्छब्दः करणं तस्य तत्कर्तृत्वात्, न च तदरिक्तं किं चित्करणमस्ति, नापि प्रयाजादिरिव तददितिकर्तव्यता काचिदनुभूयते इत्याशङ्क्य तदुभयमाह। करणमिति।

इह शब्दभावनायाम् । लिङादेस्तस्यां गृहीतसंगतिकलिङादेः । अङ्गभाग इतिकर्तव्यता । अभिरुचिहेतुः धात्वर्थानुष्ठानेच्छाहेतुः । प्रशंसा स्तुतिस्तज्ज्ञानमिति यावत् । शब्दभावनाया वाचकत्वेन लिङादिज्ञानानन्तरमेव तच्छ्राविणां प्रवृत्तिदर्शनेन तद्धेतुतया कल्प्यशब्दभावनाया अपि तदानीमेव भावात्तज्ज्ञानं तत्करणम्, एवमर्थवादार्पितधात्वर्थप्राशस्त्यज्ञानं तत्र रुच्युत्पादनद्वारा शब्दभावनासाध्यप्रवृत्तौ साहाय्यमाचरतीति तत्रेतिकर्तव्यतेति सा त्र्यंशा सिद्धेत्यर्थः । ननु भवतु शब्दभावनाया एवं त्र्यंशता भावनाज्ञानं कुतो भवेत् लिङादिनैवेत्याह । विधिरिति । प्रवर्त्तकलिङाद्यर्थ इत्यर्थः । अयं भावनारूपः शब्दव्यापारः । तन्त्रे शास्त्रे । नन्वलौकिकजातीयेन किं तेन लोकप्रसिद्धजातीयस्य कार्यस्य श्रेयःसाधनत्वस्य वा लिङाद्यर्थत्वमस्त्वित्याशङ्क्य तस्यापि प्रवर्त्तकव्यापारतया लोकप्रसिद्धजातीयत्वात् परमते चातिप्रसङ्गान्नेत्याह । न कार्यमित्यादिना । नोऽस्माकं जैमिनीयानां न कार्यं विधिर्लिङाद्यर्थः, यागाद्यर्थोऽपि श्रेयःसाधनत्वेन न विधिरित्यर्थः ॥ ३८१ ॥

विधिरिह गुणभूतः प्रत्ययार्थोऽपि नित्यं
भवति च पुरुषोत्या भावनाऽस्य प्रधानम् ॥
भवति दशलकारप्रत्ययैः साभिधेया

विधिर्विहितलकारैर्भावना शब्दहेतुः ॥ ३९०॥

नन्वस्या भावनायाः प्रत्ययार्थत्वेन प्राधान्यं वाच्यम्, एवमर्थभावनाया अपि तद्भाव्यतया प्राधान्यमिति कथं प्रधानद्वयमेकवाक्यार्थः स्यादिति तत्राह । विधिरिति। इहास्मिंस्तन्त्रे प्रत्ययार्थोऽपि लिङाद्यर्थोऽपि विधिः शब्दभावनारूपो गुणभूत एव न प्रधानमित्यर्थः । नित्यं शब्दात्प्रतीतिकालेऽर्थभावनानिष्पादनकाले च, चोऽवधारणे, पुरुषोत्था पुरुषजन्या तद्व्यापाररूपा भावना अर्थभावनैव अस्य विधेरभिधारूपस्य प्रधानम्, यद्यपि शब्दभावना प्रत्ययाभिधेया यद्यपि चान्यः प्रत्ययार्थः प्रधानं तथापि प्रत्ययार्थतया पुरुषार्थभाव्यतया च प्रधानीभूतार्थभावनां प्रति भावनालिङर्थवादे विधिप्रत्ययार्थो निर्वर्त्तकतयाऽपुरुषार्थभाव्यतया च गुणभूत एव, ततश्च न प्रधानद्वयप्रयुक्तो दोष इत्यर्थः।ननु प्रत्ययस्य शब्दभावनार्थत्वात्कथमर्थभावनार्थत्वमपि, अनिमित्तानेकार्थताया अन्याय्यत्वादित्याशङ्क्याह।भवतीति। लड़ादिदशलकारप्रत्ययैस्तत्स्थानविहिततिबादिभिः साऽर्थभावनाऽभिधेया भवति, विधिविहितलिङ्लोड्लेड्भिः शब्दहेतुः शब्दकर्तृका भावना अभिधेया भवतीत्यनुषङ्गः।ओदनं पचतीत्यादिलड़ादिप्रयोगेऽप्योदनपाकं करोतीत्येवं कृतिप्रतीतेः केवलधातुप्रयोगे च तदभावादित्यन्वयव्यतिरेकाभ्यां लड़ादिदशलकारा-

णामाख्यातत्वसामान्येन तत्र शक्तिर्निश्चीयते लः कर्मणि चेति सूत्रसामर्थ्यादपि तन्निश्चीयते लिङादीनां तु लिङ्त्वसामान्येन प्रयत्नवाचिनामपि विधिनिमन्त्रणादिसूत्रेण विध्यर्थे पुनर्विधानाल्लिङ्त्वाद्याकारेण तदर्थत्वमविरुद्धम्, दृश्यते ह्येकस्यापि दीपस्य तेजस्त्वदहनत्वरूपभेदेन तमोऽपहतिपाकनिर्वर्त्तकत्वं तद्वल्लिङादेरप्युभयार्थत्वमिति भावः ॥ ३९० ॥

भवति च पुरुषार्थकर्मकेयं
पुरुषनिमित्तकभावना न तद्वत् ॥
भवति तु विधिशब्दकर्तृकान्या
न हि निरवद्यपुमर्थताप्रवृत्तेः ॥ ३९१ ॥

इदानीमर्थभावनायाः पुरुषार्थभाव्यकत्वमाह । भवति च पुरुषार्थेति । पुरुषेण अभिलषितोऽर्थः स्वर्गादिः कर्म भाव्यं यस्याः सा तथा। पुरुषो निमित्तं कर्ता यस्या भावनायाः सा पुरुषनिमित्तकभावना। भवति चेति चकारेण प्रसङ्गात्तत्र यागादिधात्वर्थः करणं प्रयाजादि चेतिकर्त्तव्यतेति दर्शितम्। अर्थभावनाया हि समानपदोपात्तमपि यागादिधात्वर्थं स्वतोऽपुरुषार्थं विहाय भिन्नपदोपात्तमपि स्वतः पुरुषेणाभिलषितं स्वर्गाद्येव भाव्यं कल्प्यते अन्यथा विधेः प्रेरकत्वानुपपत्तेरिति सा पुरुषार्थभाव्यनिष्ठैव। एवं समानपदोपात्तो यागादिर्व्यापाररूपायां तस्यां योग्यतया करणत्वेनान्वेति। प्रक-

रणपाठात् प्रयाजादिरितिकर्त्तव्यतयेति त्र्यंशा सेति भावः । शब्दभावना तु न पुरुषार्थभाव्येत्युपसंहरन्नाह । न तद्वदित्यादिना । अन्या शब्दभावना । विधिशब्दकर्तृका लिङादिशब्दव्यापारात्मिका । ननु शब्दभावनाया अपि परम्परया पुरुषार्थनिष्ठत्वमस्तीत्याशङ्क्य प्रवृत्तेः प्रेरणारूपायास्तस्याः प्रेर्यव्यारमात्रे पर्यवसानादिति प्रागुक्तमर्थं स्मारयति । न हि निरवद्येति ॥ ३९१ ॥

अभिमतपशुपुत्त्रवृष्टिनाक-
प्रभृतिकभाव्यगता हि भावनेयम् ॥
अनभिमतसुदुष्करातिदुःखां
नयति तु भाव्यपदं प्रवृत्तिमन्या ॥ ३९२ ॥

भावनयोरुक्तमेव भाव्यवैलक्षण्यं विशदयति । अभिमतेति । नाकः स्वर्गः । प्रभृतिशब्देन ग्रामादि गृह्यते । अभिमतपश्वादिभाव्यनिष्ठेयमर्थभावनेत्यर्थः । अनभिमता स्वतोऽनभिलषिता सुदुष्करा बहून्तराया एवंभूता चासावतिदुःखा अत्यन्तं दुःखमिश्रिता तां प्रवृत्तिमिति संबन्धः । भाव्यपदं भाव्यस्थानम् । अन्या शब्दभावना अनभिमतत्वादिविशिष्टां प्रवृत्तिं स्वभाव्यत्वेन कल्पयतीत्यर्थः ॥ ३९२ ॥

प्रत्ययप्रकृतिशब्दतो बहि-
र्विद्यतेऽभिहितसङ्गतिश्च नः ॥

प्रत्ययप्रकृतिशब्दयोः पुन-
र्नित्यमन्वितधियो निमित्तता ॥ ३९३ ॥

नन्वभिहितान्वयवादे यागभावनयोर्भावनयोर्वा कथमुक्तान्वयबोधः स्यान्न हि यागो भावने च पृथक्पृथगभिहिताः येनाकाङ्क्षाद्यनुरोधेन पश्चादन्वयबोधो भवेदित्याशङ्क्याह । प्रत्ययप्रकृतिशब्दत इति । प्रत्ययो लिङ्लोडादिः, प्रकृतिर्धातुः, प्रकृतिप्रत्ययशब्दाभ्यां बहिरन्यत्रैव, चोऽवधारणे, अभिहितसंगतिः अभिहितयोः संबन्धः, नोऽस्माकं भट्टानां मते प्रकृतिप्रत्ययातिरिक्तयोर्यजेतस्वर्गकामपदयोर्गवादिनयनादिपदयोश्चपरस्परनैरपेक्ष्येणोपस्थितयोस्तथैव स्वस्वार्थाभिधानसंभवादभिहितयोस्तदर्थयोरन्वयबोध आकाङ्क्षाद्यनुरोधेन भवेत् प्रकृतिप्रत्ययोस्तु प्रत्येकमप्रयोगान्नियमेन मिलितप्रयोगे मिलितयोरेव तदर्थयोरभिधानमिति तत्रान्विताभिधानमेव, अन्यथा तत्राप्याकाङ्क्षादिसाचिव्यमपेक्ष्येत, न च तदस्तीति नोक्तदोष इति तदेतदाह। प्रत्ययप्रकृतीत्यादिना । पुनःशब्दो यस्मादर्थे, प्रकृतिप्रत्ययशब्दयोर्यस्मादन्वितधियोऽपृथग्बुद्धेर्निमित्तता विशिष्टैकबुद्ध्युत्पादकता नित्यं सदैव, अनुभवसिद्धेति शेषः ॥ ३९३ ॥

भावनाद्वयमतोऽवबोध्यते
धातुवाच्यघटितं लिङादिभिः ॥

प्रत्ययार्थगुणवस्तुवाचिनो
धातवः प्रकृतयो हि धातवः ॥ ३९४ ॥

भावनाद्वयं व्युत्पादितं निगमयति । भावनाद्वयमिति । अत उक्तन्यायात् । धातुवाच्यघटितं धात्वर्थकरणकम् । यद्यप्येकैव भावना धातुवाच्यघटिता तथापि प्राणभृत उपदधातीतिवत् भावनाद्वयं तद्घटितमित्युक्तम् । धातुवाच्यघटितत्वमुपपादयति । प्रत्ययार्थेति । प्रकृतिप्रत्ययौ प्राधान्येन प्रत्ययार्थं सह ब्रूत इत्यभियुक्तवचनात् प्रत्ययार्थं प्रति गुणभूतार्थवाचिनो धातव इति धात्वर्थघटितैव भावनेत्यर्थः । ननु प्रकृत्यर्थस्य प्रत्ययार्थं प्रति गुणत्वे धात्वर्थे किमागतमित्याशङ्क्य धातुरपि प्रकृतिरेवेत्याशयेनाह । प्रकृतय इति । यस्मादुपरि प्रत्ययो विधीयते सा प्रकृतिः धातोश्च प्रत्ययविधिरिति धातवः प्रकृतय इत्यर्थः । अथ वा । ननु यागेन स्वर्गं भावयेदिति धात्वर्थकरणिकैकैव भावना प्रतीयते न भावनान्तरमतो भावनाद्वयोक्तिर्वाक्यप्रमाणविरुद्धेति तत्राह । भावनाद्वयमिति । धातुवाच्यघटिततत्प्रतीतिबलादेव तद्गोचरभावनान्तरप्रतीतिरवश्यं वक्तव्या, तस्या भाव्यत्वप्रतीतिमन्तरेण धात्वर्थस्य तत्करणत्वेनान्वयायोगात् । समभिव्याहृतार्थवादार्पितप्राशस्त्यादेर्वाक्यार्थेऽन्वयाय च भावनान्तरप्रतीतिरवश्यं वाच्येति

भावः । शेषं पूर्ववत् ॥ ३९४ ॥

भव्याय भूतमुपदिश्यत इत्यवोचन्
पूज्यास्ततः सकलमेव तु वेदशास्त्रम् ॥
कार्यप्रधानमिति निश्चिनुमोऽस्मदीये
तन्त्रे च कार्यमुदितः पुरुषप्रयत्नः ॥ ३९५ ॥

एवं भावनाद्वयं विधिवाक्यप्रतिपाद्यमुपपाद्य तत्रैव सर्वस्य वेदस्य शबरस्वामिवचनेन पर्यवसानमिति दर्शयन्नुपसंहरति । भव्याय भूतमिति । यद्यपि प्रागिदं वचनमुदाहृत्य ब्रह्मणि वेदान्तप्रामाण्याविरोधेन नीतं तथापि भावनावादिनेदानीं तदुपन्यस्तमिति न दोषः । पूज्याः शबरस्वामिनः । वेद एव शास्त्रं वेदशास्त्रम् । कार्यमनुष्ठेयभावना प्रधानं यस्य वेदशास्त्रस्य तत् । ननु कार्यं कृतिसाध्यं गुर्वभिमतं किं न स्यात्तत्राह । अस्मदीय इति । पुरुषप्रयत्न इति । अर्थभावनेत्यर्थः । प्राभाकराभिमतकार्यस्याप्रमाणिकत्वाज्जैमिनीयेऽस्मिन् शास्त्रे पुरुषप्रयत्न एव कार्यमुक्तमित्यर्थः ॥ ३९५ ॥

अभिदधाति करोति च लिङ्पदं
श्रुतिवचःसु निजामपि भावनाम् ॥
न च करोति न वक्ति च तां पुन-
र्नरवचःस्विति दुःशकमुच्यते ॥ ३९६ ॥

इदानीं लोकवेदयोर्लिङादीनां विलक्षणार्थत्वकल्पनमयुक्तं सुतरां वैदिकलिङादीनां स्वकर्तृकव्यापाराभि-

धायित्वं तस्य दुर्निरूपत्वादपि नैतन्मतं युक्तमिति दूषयति । अभिदधातीति । निजां स्वव्यापाररूपां शब्दभावनामभिदधाति वदति करोति निष्पादयति चार्थभावनामपि शब्देन स्वविशिष्टव्यापारे स्वस्य वृत्तौ स्वात्मन्यपि वृत्तिप्रसङ्गेन विरोधं द्योतयति । तां स्वव्यापाररूपाम् भावनाम् । नरवचःस्विति । लिङ्पदमित्यनुषञ्जनीयम् । लोके आज्ञादेरेव लिङर्थत्वेन तत्र शब्दभावनाया अभावाल्लौकिकलिङादिर्न तां करोति न च तामभिधत्त इति विभागकथनं दुःशकं दुरुपपादनमयुक्तमुच्यते इत्यर्थः ॥ ३१६ ॥

वक्तृत्वमेव घटते यदि लिङ्पदस्य
सर्वत्र नार्द्धजरतीयमिदं प्रशस्तम् ॥
सामर्थ्यमेकरसमेव यदोपपन्नं
नानारसं न खलु तत्परिकल्पनीयम् ॥ ३१७ ॥

ननु किमिति दुःशकं तदुपपादनादित्याशङ्क्याह । वक्तृत्वमिति । अभिधातृत्वं बोधकत्वमिति यावत् । सर्वत्र प्रत्यक्षादिप्रमाणे लिङादौ च लोके क्लृप्तेन स्वार्थबोधनेनैव वैदिकलिङादीनामपि प्रामाण्यं यदि घटेत तदा यथा कस्याश्चित्स्त्रिया युवत्या एव भर्त्ता प्रयोजनानुसारेणार्द्धशरीरेण जरतीत्वमपीच्छति चेदप्रामाणिकं तन्न सिद्ध्यति तथा तत्तुल्यमिदं प्रवर्तनं न प्रशस्तम् अन्यत्र प्रमाणेषु तस्यादर्शनेन वैदिकलिङादि-

ष्वपि तदयोगादित्यर्थः । ननु वेदे लिङादेरप्रेरकत्वे कथं पुंसः प्रवृत्तिः स्यात्तत्र प्रेरकान्तराभावादित्याशङ्क्यानुमानादेर्लौकिकलिङादेरिव च स्वप्रवर्तकज्ञाने सति पुरुषः स्वेच्छयैव तां करोति । तदाह श्रुतिः । काममय एवायं पुरुषः स यथाकामो भवति तत्क्रतुर्भवति तत्कर्म कुरुत इत्याद्या, स्मृतिरपि यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति । तथा च प्रमाणं किमपि न प्रवर्त्तकमित्याशयेनाह । सामर्थ्यमिति । एकरसं प्रत्यक्षादिप्रमाणेन सममेकरूपं स्वप्रमेयज्ञानानुकूलमेव एकरसमिति प्रेरणानुकूलत्वं वा व्यावर्त्तयति । नानारसं प्रत्यक्षादिविलक्षणं बोधप्रवृत्त्युभयानुकूलत्वम् ॥ ३९७ ॥

श्रेयोहेतुत्ववाची यदि भवति तदा संभवत्येकरूपा
शक्तिस्तस्याभिधाने न तु भवति तदा कारकोऽयं प्रवृत्तेः ॥
श्रेयोहेतुश्च वाच्यः श्रुतिवचसि तदा पौरुषेये च तुल्यः
क्लृप्तश्चासौ न कल्प्यः श्रुतिवचसि यथा भावना लिङ्निबद्धा ३९८

वक्तृत्वमेव घटते, सामर्थ्यमेकरसमिति चोक्तं स्वमतेन वैदिकलिङादेरुपपादयति । श्रेयोहेतुत्ववाचीति । वैदिकलिङादिरिति शेषः । तदा तस्य लिङादेरभिधाने स्वार्थबोधने एकरूपा शक्तिर्भवति । एवं सति प्रमाणरूपस्य वेदस्य कारकत्वदोषोऽपि परिहृतः स्यादित्याह । न तु भवतीति । अयं लिङादिः तदा श्रेयोहेतु-

त्ववाचित्वे प्रवृत्तेः कारको न भवति प्रवर्त्तको न भवति,तस्याः श्रेयोहेतुत्वज्ञानेनान्यत एव सिद्धत्वादित्यर्थः। ननु श्रेयोहेतुत्वज्ञानं वा लिङ्व्यापारः कल्प्यतां प्रवर्त्तना वा को विशेष इत्याशङ्क्याह । श्रेयोहेतुश्चेति । यदा लिङादेः श्रेयोहेतुः श्रेयोहेतुत्वं वाच्यं भवति तदा स श्रुतिवचसि पौरुषेये च तुल्यस्तथा च लिङादेः श्रेयोहेतुत्वबोधनं नापूर्वमिति न प्रेरणातौल्यं तस्येत्यर्थः । किञ्च मन्मते गामानयेत्यादिवाक्ये लिङादेः श्रेयोहेतुत्वबोधकत्वं क्लृप्तं न तु शब्दभावनाबोधकत्वं न चान्यत्र धात्वर्थे वा त्वन्मते श्रेयोहेतुत्ववत् शब्दभावना क्वचिदपि क्लृप्तास्तीति प्रमेयस्वरूपं प्रमाणस्य तद्बोधकत्वं च अलौकिकमेव कल्प्यं तच्चायुक्तं क्लृप्तेनैवोपपत्तावित्याह । क्लृप्तश्चेति । असौ श्रेयोहेतुः प्रमाणस्य तद्बोधनव्यापारश्च । लिङ्निबद्धा लिङ्व्यापाररूपेत्यर्थः । इदमत्राभिप्रेतम् । अस्ति तावत्प्रेक्षावतामपि भोजनादौ प्रवृत्तिः सा तावच्छब्देन वा पुंसा वा केन चित्प्रेर्यमाणस्य न भवति अपि तु हितसाधनत्वज्ञानादिति भवतोऽपि संप्रतिपन्नम्, बालस्य स्तन्यदाने मातृप्रवृत्तिरपि तदिष्टमावश्यकं च बालजीवनाद्युद्दिश्यैव न तु तत्प्रेरणयैव, भोजनादौ क्लृप्तहेतोरेव तस्यां कल्पयितुमुचितत्वाच्च, अतः प्रवर्त्तनायाः क्वापि प्रवृत्तिहेतुत्वस्याक्लृप्तत्वान्न माणवकप्रवृत्त्या त-

दनुमानमिति न लिङादेः प्रवर्त्तनासामान्येऽपि लोकतः शक्तिः सिद्ध्यत्यपि तु श्रेयोहेतुत्व एवेति कथं वैदिकलिङादिः प्रवर्त्तनां प्रतिपादयेत्, तदभावे वा कथं तस्य प्रवर्त्तनाव्यापारः कल्प्यः, व्यापारोऽपि निरवयवे विभौ शब्दे परिणामः परिस्पन्दो वा न संभवति, न चान्यः कश्चित्तद्व्यापारो निरूपयितुं शक्यः, एवं शब्दभावनात्वविशेषोऽपि लिङादितो न सिद्ध्येत् तस्य प्रवर्त्तनासामान्यनिष्ठत्वात्, वाच्यार्थसंबन्धितयान्यतोऽनवगते तस्मिन् लक्षणानुपपत्तेश्च, तस्मादप्रामाणिकमिदं कल्पनमिति श्रेयोहेतुत्वमेव सर्वत्र लिङाद्यर्थ इत्यर्थ इति ॥ ३९८ ॥

धात्वर्थतोऽन्या न च भावनास्ति
याम् भावनां वक्तुमलं लकारः ॥
धात्वर्थमुद्दिश्य न पुंप्रयत्नो
लोके यतो भाति निरूपणायाम् ॥ ३९९ ॥

एवं लिङ्त्वाद्याकारेण शब्दभावना लिङाद्यर्थ इति भाट्टमतं निराकृत्य लत्वाकारेणाख्यातार्थोऽर्थभावनेति तन्मतमर्थभावनाया अप्रामाणिकत्वेन दूषयति । धात्वर्थत इति । भावना अर्थभावना । लकारः लडादिप्रत्ययः । न तावत्प्रयत्नरूपार्थभावनायां प्रत्यक्षं प्रमाणं भवति सुखदुःखादिवत् प्रयत्नरूपस्य कस्यचिदननुभवात् । अत एव करोमीति प्रत्यक्षसिद्धः स

इति निरस्तम् । हस्तादिव्यापारदशायामेव नियमेन भवतोऽस्यानुभवस्य तन्मात्रविषयत्वात् । अत एव रथो गच्छतीत्याद्यनुभवोऽपि । बाह्यव्यापाराभावेऽप्यान्तर उद्योगरूपोऽर्थः कश्चिदनुभूयत इति चेन्न । तस्यापि शरीरान्तरप्रदेशचेष्टाविषयत्वादतो न प्रत्यक्षं तत्र प्रमाणमित्यर्थः । ननु प्रयत्नवदात्मसंयोगासमवायिकारणकत्वाच्चेष्टायास्तया सोऽनुमीयत इति चेत्तत्राह । धात्वर्थमुद्दिश्येति । चिकीर्षानन्तरमेव चेष्टादर्शनेन तदाश्रयसंयोगो मनःसंयोगविशेषो वा तदसमवायिकारणं भविष्यतीति धात्वर्थहेतुतयापि लोके वर्णितप्रकारेण विचारे क्रियमाणे प्रयत्नो नाम कश्चिदतो न भाति ततो भावना नास्तीति संबन्धः। यत्त्वन्नगोत्पादानुकूलः कर्तृव्यापारो भावना स च धात्वर्थादन्यः । अन्यथाख्यातस्यानर्थक्यापत्तेः, पाकयागादेर्धात्वर्थस्य पचियज्यादिधातुभिरेवाभिहितत्वात्, स च रथो गच्छतीत्यादावप्यस्त्येव, एवं परस्परव्यावृत्तधात्वर्थेभ्यः सकलधात्वर्थानुगतत्वादपि तस्य ततोऽन्यत्वम्, प्रतीयते हि पचति यजेतेत्यादिप्रयोगे सर्वत्र करोत्यर्थः, सैव कृतिर्न प्रयत्न इति । तन्न । न तावत्प्रत्ययार्थवत्त्वाय धात्वर्थादन्यो व्यापार एषितव्यः लडादिरूपस्याख्यातस्यावश्यकश्रेयःसाधनताभिधायित्वेनातदर्थत्वात्,लिङादेरपि धात्वर्थगतसाध्यताभिधायित्वात्, अत एव यजेते-

त्यादिना यागादेः साध्यत्वविशिष्टश्रेयःसाधनत्वं प्रतीयते अन्यथा ततः प्रवृत्त्यनुपपत्तेः । काष्ठैः पचतीति काष्ठादेः पाककरणत्ववत् । नाप्यनुगततया तस्य धात्वर्थात्पृथग्व्यापारत्वम्, आख्याताभिधेयस्य धर्ममात्रत्वेनाप्यनुगतत्वोपपत्तेः, ततो नास्ति भावनेति भावः ॥३९९॥

न कर्मकाण्डेऽपि ततो नियोगो
न भावनाप्युक्तनयेन तस्मिन् ॥
न तद् द्वयं वेदशिरःसु तस्मा-
त्ततो न कार्यार्थपराणि तानि ॥ ४०० ॥

एवं वेदान्तानां सिद्धब्रह्मपरत्वव्युदासाय नियोगरूपे कार्ये भावनारूपे वा पर्यवसन्नो वेद इति प्रत्यवस्थानं कर्मकाण्डस्यापि न तदर्थत्वं तद्गतलिङादीनां श्रेयःसाधनतार्थत्वेन तदन्वितार्थपरत्वात्तस्येत्युपपादनेन प्रत्युक्तम्, भव्याय भूतमिति भाष्याशयश्च प्रागेवोक्त इति न तद्बलादपि कार्यपरत्वमित्यभिप्रेत्योपसंहरति । न कर्मकाण्डेऽपीति । ततः प्राग्वर्णितन्यायान्न नियोगोऽस्तीति शेषः । तस्मिन् कर्मकाण्डे । यदा कर्मकाण्डेऽपि तयोरियं गतिस्तदाऽखण्डब्रह्मपरे वेदान्ते तदुभयं नेति किमु वक्तव्यमित्याशयेनाह । न तद् द्वयमिति । नियोगो भावना चेत्यर्थः । तर्हि द्रष्टव्यः पश्येदित्यादिज्ञानविधीनां का गतिरित्याशङ्क्याह । तत इति । ज्ञानविधेरप्युपरिष्टान्निरसिष्यमाणत्वा-

न्न तद्विधिपरं वेदशिरः किं त्वखण्डब्रह्मपरमिति भावः ॥ ४०० ॥

अपि च प्रतिषेधचोदना-
विषयः स्यात्प्रतिषिद्धकर्मणः ॥
फलगर्द्धिनिवृत्तिरेव सा
न नियोगो न च तस्य गोचरः ॥ ४०१ ॥

एवं वेदान्तानां कार्यपरत्वं निराकृत्य ब्रह्मपरत्वं स्थापितम्, इदानीं वेदान्तवाक्यं कार्यपरं वेदवाक्यत्वादग्निहोत्रादिवाक्यवदित्यनुमानं ब्राह्मणं न हन्यात्सुरां न पिबेदित्यादिप्रतिषेधवाक्ये व्यभिचारेण दूषयति। अपि चेति। प्रतिषेधचोदना प्रतिषेधवाक्यं प्रतिषिद्धकर्मणः प्रतिषिद्धस्य हननादेः या फलगर्द्धिनिवृत्तिः फलाकाङ्क्षौदासीन्यरूपोपरतिः सैव प्रतिषेधचोदनाया विषयः स्यात्। ततः किं तत्राह। सेति। सा निवृत्तिः नियोगः कार्यं न भवति प्रागभावरूपत्वेन तस्याः सिद्धस्वभावत्वात्। तर्हि किं तद्विषयो विधेयः तथा च निषेधानां विधिनिष्ठता नेत्याह। न चेति। तस्य नियोगस्य गोचरो विषयः तस्याननुष्ठेयत्वात्, नियोगग्रहणं भावनाया अप्युपलक्षणम्, नापि भावना भाव्यो वा तथेत्यर्थः। निषेधवाक्यस्य हि निषिध्यमानहननादिगतश्रेयःसाधनत्वाभाव एवार्थः, न च स नियोगो भवति, न वा तस्य गोचरः, विधेर्भावार्थगोचरत्वानियमादिति न

तद्वाक्यं कार्यपरमतस्तत्र वेदवाक्यत्वं व्यभिचरतीत्यर्थः ॥ ४०१ ॥

नञः स्वसम्बन्धिपदार्थवस्तुनो
निवृत्तिरर्थः सहजप्रसिद्धितः ॥
अनीक्षणादौ व्रतशब्दसंगतेः
परप्रयुक्ता खलु मानसी क्रिया ॥ ४०२ ॥

ननु निवृत्तिरेव नञर्थ इति कथम्, यावता नेक्षेतोद्यन्तमित्यत्रेक्षणविरुद्धमानसक्रियाविधिर्यथाश्रीयते तद्वद्धननादिविरुद्धक्रिया प्रकृतेऽपि विधीयतामित्याशङ्क्य दृष्टान्तवैषम्येण परिहरति । नञ इति । स्वसम्बन्धि यत्पदं तदर्थः स एव वस्तु तस्येत्यर्थः । नञ्पदं येन पदेन सम्बध्यते तस्य तदर्थाभाव एव सहजार्थो मुख्योऽर्थः, कुतः वृद्धव्यवहारे तथा प्रसिद्धितः, न तद्विरुद्धत्वादिः, नानार्थत्वप्रसङ्गात्, तच्चैकस्य शब्दस्य सति गत्यन्तरेऽनुपपन्नम् । एतदुक्तं भवति । न हन्तव्य इत्युक्ते स्वरसतः स्वसम्बन्धिधनिवृत्तेरेव पुरःस्फूर्तिदर्शनात्सैवार्थो न पर्युदासस्तथेति मुख्यार्थसम्भवे नार्थान्तरं कल्प्यमित्यर्थः। कथं तर्हि नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदा चन नोपरक्तं न वारिस्थं न मध्यं नभसो गतमित्यादौ पर्युदासाश्रयणमिति चेद्बलवद्बाधवशादित्याह । अनीक्षणादाविति । नेक्षेतेत्यादौ मानसी क्रिया ईक्षणविरुद्धा मानसी क्रिया परप्रयुक्ता खलु मुख्यार्थपरिग्रहबलवद्बा-

धनिमित्तैव । किं तद्बलवद्बाधकं व्रतशब्दसंगतेः, तस्य वाक्यस्योपक्रमे अथातः प्रजापतिव्रतमिति व्रतशब्दश्रवणाद् व्रतस्य चानुष्ठेयत्वादनुष्ठेयपरं तत्प्रकरणं नञो मुख्यार्थस्याभावस्याननुष्ठेयत्वान्नञानुष्ठानयोग्या मानसी क्रिया तत्र लक्ष्यत इति तद्वाक्यं विधिपरम्, न च तथात्र मुख्यार्थान्वये किं चिद्बाधकमस्तीति नैतद्विधिपरमित्यर्थः ॥ ४०२ ॥

अपि च प्रतिषेधचोदना
न तु भिद्येत भवन्मते विधेः ॥
विधिरेव तु चोदनाखिला
न हि वेदे वचनं निवर्त्तकम् ॥ ४०३ ॥

किं च प्रतिषेधवाक्यस्यापि निवृत्तिक्रियाविधिपरत्वे सर्वमेव वाक्यं विधिपरमिति विधिप्रतिषेधविभागो न स्यादस्ति च स फलबुद्धिप्रमेयाधिकारिबोधकभेदतः पञ्चधात्यन्तभिन्नत्वाद्भेदो विधिनिषेधयोरिति सकलमहाजनादृत इत्याशयेनाह । अपि च प्रतिषेधचोदनेति । विधेरिति पञ्चमी । कुत इत्यत आह । विधिरेव त्विति । भवन्मत इत्यनुषङ्गः । ननु प्रवर्त्तको विधिः निषेधवाक्यं च निवर्त्तकमिति कथं तस्य विधित्वं तत्राह । न हि वेद इति । अत्रापि भवन्मत इत्यनुषञ्जनीयम् । निषेधेऽपि विधीयमानायाः क्रियायाः प्रवृत्तिविशेषत्वान्न भवन्मते तद्वाक्यं प्रतिषेधनिष्ठमिति

भावः ॥ ४०३ ॥

प्रतिषेधवाक्यवदतः सकलं
विधिशून्यमेव फलवद्भवतु ॥
वचनं त्रयीशिरसि तत्त्वमसि-
प्रभृति प्रतीचि तमसोऽपहतेः ॥ ४०४ ॥

एवं संक्षेपेण प्रतिषेधवाक्यस्य सिद्धनिष्ठत्वमुपपाद्य तद्वदेव समस्तं वेदान्तवाक्यं विधिशून्यमेव फलपर्यवसायि प्रमाणमस्तु इत्युपसंहरति । प्रतिषेधवाक्यवदिति । अत उक्तन्यायात् । तत्त्वमसिप्रभृति तत्त्वमस्यादि वचनमिति संबन्धः । फलवत्त्वमेवाह । प्रतीचीति । तमसोऽनाद्यज्ञानस्य अपहतेर्बाधनादित्यर्थः ॥ ४०४ ॥

नामधातुसहितो नञिष्यते
पर्युदासविषयो मनीषिभिः ॥
न प्रसक्तविनिवृत्तिवाचको-
ऽब्राह्मणादिषु तथोपलम्भनात् ॥ ४०५ ॥

एवं नञो मुख्यया वृत्त्या प्रसज्यप्रतिषेधार्थत्वात् तस्य च कार्यविषयत्वासंभवादनीक्षणादावनुष्ठेयार्थव्रतशब्दसमभिव्याहारबलेन नञः पर्युदासलक्षणया ईक्षणविरुद्धमानसक्रियार्थत्वान्निषेधवाक्ये च तादृशस्य मुख्यार्थत्यागनिमित्तस्य कदाचिदप्यभावान्निषेधवाक्यं निषेधनिष्ठं न कार्यनिष्ठं तद्वदेव वेदान्तवाक्यं सर्वमेव ब्रह्मनिष्ठमित्युक्तमिदानीं नञर्थे महाभ्युपगमविशेषं

दूषयितुमनुवदति । नामधातुसहित इति । सुबन्तेन धातुना वा सहित इत्यर्थः । न केवलं प्रसक्तस्याभाव एव नञो मुख्यार्थोऽपि तु तदन्यतद्विरोधिनावपि, तत्र नामधातुसहितो नञ् पर्युदासविषय इष्यते, पर्युदासो नाम नञ्संबन्धिपदार्थपरिवर्ज्जनम्, नामधातुभ्यां योगे प्रसक्तस्य विनिवृत्तिरभावस्तन्मात्रवाचको न कुतः अब्राह्मणादिषु अग्रे अब्राह्मणस्तिष्ठति म्लेच्छोऽयमधर्मीत्यादौ ब्राह्मणातिरिक्ते धर्मविरुद्धे पापे च ततः प्रतीतिदर्शनादित्यर्थः । तदुक्तम् । नामधात्वर्थ योगी तु नैव नञ् प्रतिषेधकः । वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति ॥ ४०५ ॥

अब्राह्मणाधर्मगिरोर्नञेष
नामान्वयादाश्रितपर्युदासः ॥
अन्यं विरुद्धं च सदाभिधत्ते
नोद्यन्तमित्यादिषु धातुयोगात् ॥ ४०६ ॥

उक्तमेव दृष्टान्तं प्रकटयन्नामधातुयोगिनोऽपि नञस्तदन्यविरुद्धार्थत्वे क्रमेणोदाहरणमाह । अब्राह्मणेति। आश्रितोऽर्थत्वेन स्वीकृतः पर्युदासो येन नञा सः । नोद्यन्तमिति । नेक्षेतोद्यन्तमादित्यमित्यादिष्वित्यर्थः । एष नञ् धातुयोगाद्धातुरीक्षणं तत्संबन्धात् पर्युदासवृत्त्या विरुद्धमीक्षणविघातकमन्यसंकल्पं सदाभिधत्त इति योजना ॥ ४०६ ॥

नोद्यन्तमित्यत्र नञेक्षणार्थ-
समीपकार्यान्तरमुच्यते हि ॥
ततश्च नेक्षिष्य इतीदृशी स्यात्
संकल्पना संनिहितत्वहेतोः ॥ ४०७ ॥

नन्वत्र वाक्ये कीदृशः पर्युदासो नञा लभ्यते तमाह । नोद्यन्तमिति । अत्रास्मिन्वाक्ये ईक्षणार्थस्य ईक्षणधात्वर्थस्य समीपं संबन्धि यत्कार्यान्तरम् ईक्षणविरुद्धम् ईक्षणकार्यात्कार्यान्तरं धातुयोगिनापि नञा तदर्थविरुद्धमेव वस्त्वन्तरमभिधीयते नान्यदिति समीपेत्युक्तम् । तदेव विविच्य दर्शयति । ततश्चेति । नेक्षिष्य इतीदृशी संकल्पनास्मिन्वाक्ये नञभिधेया स्यादीक्षणविरोधिसंकल्पस्येक्षणविरोधितया तत्संबन्धित्वेन सन्निहितत्वाद्धेतोरित्यर्थः ॥ ४०७ ॥

द्विजं न हन्यान्न कलञ्जमद्या-
दित्यादिवाक्ये विधिनास्य योगात् ॥
प्रसज्यमानार्थनिवृत्तिमात्रं
नञोऽर्थ इत्याश्रितमादरेण ॥ ४०८ ॥

क्व तर्हि प्रसज्यप्रतिषेधावकाशस्तमाह । द्विजं न हन्यादिति । अद्याद्भक्षयेत् । आदिपदेन न सुरां पिबेदित्यादि संगृह्यते विधिना लिङादिपदेनास्य नञः प्रसज्यमानस्य भ्रान्त्या प्रसक्तस्य हननादिगतस्यार्थस्य श्रेयःसाधनत्वस्य निवृत्तिरभावस्तन्मात्रमित्यर्थः । द्विजं

न हन्यादित्यादिवाक्ये नञो लिङादिसंबन्धवशात्तदर्थस्य श्रेयःसाधनत्वस्याभावमात्रमर्थ इत्यङ्गीकृतं परैरित्यर्थः ॥ ४०८ ॥

नाद्यां न हन्यां न पिबेयमित्यपि
वाक्येषु नञ्वत्सु वदन्ति मानसीम् ॥
संकल्परूपां विधिबन्धिनीं क्रियां
नोद्यन्तमित्यादिवचःस्विवापरे ॥ ४०९ ॥

अत्रापि प्राभाकराणामभ्युपगममाह । नाद्यां न हन्यामिति । अपरे प्राभाकराः नञ्वत्सु न हन्यादित्यादिषु वाक्येषु नाद्यां न हन्यामित्यादिसंकल्परूपां विधिबन्धिनीं विध्यनुबन्धरूपां क्रियां वदन्तीति संबन्धः । तत्र दृष्टान्तो नोद्यन्तमित्यादीति, न हन्यादित्यादावपि हननपानादि न कुर्यामिति हननादिक्रियाविरोधिसंकल्पक्रियाविधिरेवार्थ इति प्राभाकरा वदन्तीत्यर्थः॥४०९॥

वाक्येषु नञ्वत्सु निवृत्तिमात्रं
प्रमेयमित्यभ्युपगम्यमाने ॥
प्रत्यक्षमानेन विरुद्ध्यते हि
निवृत्तिशास्त्रं न च युज्यते तत् ॥ ४१० ॥

ननु न हन्यादित्यादौ प्रसज्यप्रतिषेधार्थत्वसंभवे किमिति पर्युदासाश्रयणमित्याशङ्क्य तत्संभवोऽसिद्ध इत्याह । वाक्येष्विति । प्रत्यक्षमानेनेति । वक्ष्यमाणविधया श्रेयःसाधनत्वस्य हननादेर्ब्राह्मणादेर्वा निवृत्तिरभा-

वः प्रत्यक्षमानेन हि विरुद्ध्यत इति नञस्तत्प्रमेयत्वमभ्युपगन्तुं न शक्यतेऽतस्तच्छास्त्रं निवृत्तिशास्त्रमिति न युज्यत इति सर्वमेव शास्त्रं प्रवर्त्तकमित्यर्थः ॥४१०॥

प्रवर्त्तकं वाक्यमुवाच चोदनां
निवर्त्तकं नैवमुवाच भाष्यकृत ॥
ततश्च विद्धो न हि चोदनाऽस्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः ॥ ४११ ॥

किं च चोदनेति क्रियायाः प्रवर्त्तकं वचनमिति शाबरभाष्यकारोऽपि निषेधचोदनाया अपि प्रवर्त्तकत्वं दर्शयति, विधिनिषेधविभागस्तु धात्वर्थतद्विरोधिक्रियाविधित्वरूपतदवान्तरविशेषनिमित्त इति सापि प्रवृत्तिनिष्ठेत्याशयेनाह। प्रवर्त्तकमिति। अन्यथा निषेधवचनं निषेधचोदनेत्यपि स ब्रूयान्नैवमवोचदित्याह। निवर्त्तकमिति। ततः किं तत्राह। ततश्चेति। या प्रवर्त्तिका न भवेत्सा चोदना न ह्यस्तीति स्थितिरिति विद्ध इति सम्बन्धः। तथा च न हन्यादित्यादिनिषेधचोदनापि संकल्पक्रियायां प्रवर्त्तिकेति भावः ॥ ४११॥

न नामयोगो न च धातुयोगो
लिङादियोगोऽपि न कारणं नः ॥
नञः स्वसम्बन्धिनिवृत्तिमात्रं
स्वतोऽभिधेयं परतोऽन्यदस्य ॥ ४१२ ॥

इदानीमाद्यमते यद्यप्युक्तविधयापि न हन्या-

दित्यादिनिषेधवाक्यस्य सिद्धमात्रपर्यवसानं सिध्यति, तथापि यदि नेक्षेतेतिवाक्यस्थनञेक्षणविरुद्धार्थप्रतीत्यनुरोधेन तस्य मुख्यार्थत्वं वदेत्तर्हि ततस्तत्प्रतीतौ शक्तिं विना गत्यन्तरमुक्तमेव, यद्युपपत्तितः तर्हि सा तत्र नास्त्येव, प्रत्युत विपक्ष एव सेत्याशयेन नामादियोगव्यवस्थया तुल्यवन्नञर्थत्रैविध्यमुक्तं दूषयति। न नामयोग इति। कारणं व्यवस्थयान्यत्वादिप्रतिपादन इति शेषः। नः अस्मन्मते। कुतस्तत्राह। नञ इति। स्वसंबन्धिनो निवृत्तिरभावस्तन्मात्रम्। स्वतः मुख्यवृत्त्या। तर्हि ब्राह्मणादिप्रयोगेषु अन्याद्यर्थप्रतीतिः कथं तत्राह। परत इति। अस्य नञोऽन्यत्प्रसज्यप्रतिषेधातिरिक्तं तदन्यत्वादि परतो लक्षणया प्रतीयत इति शेषः। तथा चान्यलभ्यत्वादनेकशक्तिकल्पने गौरवाच्च तदन्यतद्विरोधिनौ नञो न मुख्यार्थाविति भावः॥ ४१२॥

तथाहि नाग्रे करिणीति नाम्ना
गजोऽत्र नास्तीति च धातुयोगे॥
लिङादियोगेऽपि निवृत्तिरर्थो
विषं न खादेदिति नञ्पदस्य॥ ४१३॥

ननु नामादियुक्तेन नञा नियमेन प्रतीयमानयोस्तदन्यविरोधिनोः कथं लाक्षणिकत्वमित्याशङ्क्य नियमेन ततस्तत्प्रतीतिरसिद्धेत्याशयेन तदकारणत्वमेव वि-

वृणोति । तथाहीति । नाग्रे करिणीति वाक्य इति शेषः, अग्रे करिणी नेति वाक्ये नञ्पदस्य नाम्ना योगेऽपीत्यनुषङ्गः । एवं गजोऽत्र नास्तीत्यादावपि योजना। निवृत्तिः प्रसज्यप्रतिषेधः । न खादेन्न भक्षयेत्, लोके हि नाग्रे करिणीत्यादिवाक्ये प्रयुक्तान्नञो नामादिसंबन्धविशेषे सत्यपि लिङादियुक्तात्ततस्तदर्थाभाव इव करिण्यादेरभाव एव प्रतीयते न ततोऽर्थान्तरमिति कुतस्त्वदुक्तो नियमः, कुतस्तरां नामादेर्नञ्सम्बन्धस्य त्वदुक्तव्यवस्थितनञर्थप्रतीतिहेतुत्वमिति भावः ॥ ४१३ ॥

तथा श्रुतौ नेति वचःसु नाम्नि
नानेह नास्तीति च धातुयोगे ॥
तथा विधाने न कलञ्जमद्या-
न्नञोऽविशेषेण निवृत्तिरर्थः ॥ ४१४ ॥

ननु लोके यथा तथास्तु, श्रुतौ तूक्तव्यवस्था भविष्यतीत्याशङ्क्य तत्रापि लोकसाम्यमेवाह । तथा श्रुताविति । नेतिनेतीति वाक्यद्वयं स एष नेतिनेतीति वाक्यं चापेक्ष्य नेतिवचःस्विति बहुवचनम् । नाम्नि नामयोगे इतिशब्दस्य नामत्वाच्छ्रुतौ नेति वचःसु नञो नामयोगे सत्यपि, तथा नेह नानास्तीति वाक्ये अस्तीति धातुना योगेऽपि, नानेह नास्तीति छन्दोऽनुरोधेन व्यत्ययः, तथा न कलञ्जमद्यादिति वाक्ये विधाने विधायकपदयोगेऽप्यविशेषेण त्वदुक्तविशेषं विनैवेतिश-

ब्दपरामृश्यप्रपञ्चादिनिवृत्तिरेवार्थो भवति, तथैव तदर्थस्य बादरायणादिभिः प्रकृतैतावत्त्वं हि प्रतिषेधतीत्यादिन्यायेन निरूपितत्वात्, अतो वेदेऽपि नामयोगादिना नञो न व्यवस्थितार्थत्वमित्यभाव एव स्वतोऽव्यभिचारान्नञर्थः पर्युदासस्तु लाक्षणिक एवेति भावः॥४१४॥

औदासीन्यं पुरुषगतमेवाविशेषान्नञोऽर्थो
भ्रान्तिप्राप्तेऽसति तु विषये यत्रयत्रैष दृष्टः ।
नौदासीन्यं पृथगिह भवेदात्मचिन्मात्ररूपात्
सिद्धे वस्तुन्यवसितमतो वेदवाक्यं निषेधे ॥४१५॥

एवं नामादियोगेन नञः स्वतोऽर्थविशेषनिष्ठत्वं निराकृत्य मुख्यया वृत्त्या प्रसज्यप्रतिषेधार्थत्वमुक्तं तदुपसंहरति । औदासीन्यमिति । प्रसज्यप्रतिषेध इत्यर्थः । भावप्रपञ्च इवाभावोऽप्यात्मन्येव बाध्य इति दर्शयितुं पुरुषगतमेवेत्युक्तम् । नञर्थो भवेदिति शेषः । तुरवधारणे । विषये नामाद्यर्थे । भ्रान्तिप्राप्ते वस्तुतोऽविद्यमाने भ्रान्त्या प्रसक्ते सति । यत्रयत्र वाक्ये एष नञ् दृष्टः तत्र सर्वत्राविशेषान्नामादियोगकृतविशेषाभावात् पुरुषगतमौदासीन्यमेव नञर्थो भवेदिति संबन्धः । ननु नेतिनेतीतिवाक्यस्यात्मपरत्वात्कथं निषेधपरत्वम्, अन्यथा तस्यानात्मनिष्ठत्वापत्तेरात्मनोऽद्वयत्वव्याघाताच्च इत्याशङ्क्य सोऽपि प्रपञ्चाधिष्ठानात्मैवेति नोक्तद्दोष इत्याशयेनाह । नौदासीन्यमिति ।

इह ब्रह्मणि ॥ ४१५ ॥

प्रवर्त्तकं वाक्यमुवाच चोदनां
निधाय बुद्धौ वचनं निवर्त्तकम् ॥
द्वितीयसूत्रे भगवान् बहुश्रुतो
न चोदनाद्वित्वनिवारणाय तत् ॥ ४१६ ॥

इदानीं नाद्यां न हन्यामित्यादिना प्राभाकरोक्तं निषेधवाक्यस्य प्रवृत्तिनिष्ठत्वं सोपस्करमाशङ्क्य निराकरिष्यन्प्रथमं शाबरभाष्याद् द्विविधोऽपि विधिः प्रवृत्तिनिष्ठ एवेति तदुक्तं दूषयति । प्रवर्त्तकमिति । द्वितीयसूत्रे चोदनालक्षणोऽर्थो धर्म इति सूत्रे । भगवान् बहुज्ञः तत्र हेतुर्बहुश्रुतः अत एव सहस्रशाखा अर्थतोऽपि वेत्ति शबरस्वामीत्यैतिह्यम् । चोदनानां प्रवर्त्तकत्वनिषेधकत्वरूपेण द्वित्वस्य द्वैविध्यस्य निवारणाय न तद्भाष्यमित्यर्थः । भाष्यकारो हि निवृत्तिनिष्ठामपि चोदनां बुद्धौ निधायैव वेदे निषेधकपरमपि वाक्यमस्तीति जानन्नेव प्रक्रान्तधर्मनिरूपणाय प्रवृत्तस्तत्प्रमाणं प्रवर्त्तकं वाक्यं चोदनामुवाच न तु निवृत्तिमात्रनिष्ठां चोदनां निवारयितुम् । अन्यथोक्तविधया निषेधवाक्यस्य प्रवृत्तिनिष्ठत्वासिद्धेस्तस्य तदज्ञानप्रसङ्गान्न बहुश्रुतत्वं संभवेदिति भावः ॥ ४१६ ॥

ननु निवृत्तिपरत्वमुदीरितं
विघटयामि निषेधगिरामहम् ॥

न हि कलञ्जमिति प्रतिपाद्यते
यदि तदा नयनेन विरुध्यते ॥ ४१७ ॥

एवं भाष्यवाक्यबलान्निषेधवाक्यस्य निवृत्तिकार्यार्थत्वमाशङ्कितं निरस्तमिदानीं प्राभाकरः प्रतिज्ञापूर्वकं निषेधनिष्ठत्वं दूषयति । ननु निवृत्तीति । किं कलञ्जाद्यभावो निषेधवाक्ये नञर्थः, किं वा भक्षणाद्यभावः, उत प्रत्ययार्थाभाव इति विकल्प्याद्यं प्रत्यक्षविरोधेन दूषयति । न हीति । यदीह कलञ्जं न हीति निषेधवाक्ये नञर्थः प्रतिपाद्यते तदा नयनेन प्रत्यक्षेण विरुद्ध्यते, तस्य तत्र प्रत्यक्षेणानुभवादित्यर्थः॥४१७॥

अथ कलञ्जपदार्थगभक्षणं
न हि तदप्यमुनैव विरुद्ध्यते ॥
अथ तदीय फलस्पृहयान्वयो
न हि तदप्यनुभूतिपराहतम् ॥ ४१८ ॥

द्वितीयं दूषयति। अथेति।अनेनार्थान्तरतोक्ता। कलञ्जपदार्थगभक्षणं तस्य भक्षणं न हीति यदि प्रतिपाद्यत इत्यनुषङ्गः, तदपि पूर्ववत्प्रत्यक्षेणैव बाध्यते तदौन्मुख्येन चैतस्य स्वसामग्रीद्वारा प्राप्तत्वादित्याशयेनाह । तदपीति।तृतीयेऽपि किं प्रत्ययार्थः फलरागः,उत भक्षणादिनियोगः।आद्यमनूद्य प्रत्याह।अथ तदीयेति। कलञ्जभक्षणादिसंबन्धि यत्फलं तस्य स्पृहा रागः तयाऽन्वयो नञ इति शेषः। तदपि एतदपि न हीति संबन्धः। यत-

स्तद्रागिणोऽनुभूतिपराहतमिति ॥ ४१८ ॥

अथ तदीयनियोगनिवर्त्तनं
भवतु भक्षणमस्तु तदिच्छया ॥
न हि नियोगनिवृत्तिनिवेदने
सति कलञ्जमभक्ष्यमितीङ्ग्यते ॥ ४१९ ॥

प्रत्ययार्थो नियोगो निषेद्धव्य इति पक्षमनुवदति । अथ तदीयनियोगेति । कलञ्जभक्षणे नियोगो विधिर्नेति निषेधवाक्यार्थ इति शङ्कितुराशयः । एतावता न तवेष्टसिद्धिरिति दूषयति । भवत्विति । अयं निषेधवाक्यार्थ इति शेषः । मा भूत्तस्य विधिः नैतावता तद्भक्षणनिवृत्तिः सिद्ध्येत् भोजनादेरिवान्यतोऽपि तत्संभवेन निषेधवैयर्थ्यादित्याशयेनाह । भक्षणमस्त्विति । उक्तमेव व्यतिरेकमुखेनाप्याह । न हि नियोगेति । इङ्ग्यते ज्ञायते ॥ ४१९ ॥

इह कलञ्जपदेन नञन्वयो
भवति वास्य नञोऽदिसमागमः ॥
अदिगतेन लिङादिपदेन वा
सह समेति नञत्र गतिस्त्रयी ॥ ४२० ॥

अस्तु तर्हि यदभावस्तत्र केनापि मानेन न बाध्यते तदभाव एव नञर्थ इत्याशङ्क्य शब्दोपस्थितस्यैव शाब्देन नञर्थेनान्वयो वक्तव्यः नामधातुप्रत्ययव्यतिरिक्तशब्दस्येहाभावेन कलञ्जाद्यतिरिक्तस्य नञर्थान्व-

यिनः कस्य चिच्छाब्दस्यासंभवादित्याशयेनाह । इह कलञ्जपदेनेति । इह प्रकृतवाक्ये अदिना भक्षणवाचिधातुना वा समागमः सम्बन्धः अदिगतेनाद्धातुगतेन लिङादिपदेन प्रत्ययार्थेन वा सह समेति संबध्नाति अन्वितो भवतीत्यर्थः । अत्र न कलञ्जमित्यादिवाक्ये । गतिः ज्ञानोपायोऽन्वयः । त्रयी त्रिविधा ४२०

उदितपक्षपरिग्रहकारिणां
न च निषेधगिरामुपपादने ॥
भवति शक्तिरतश्च निषेधगी-
रपि नियोगपराभ्युपगम्यताम् ॥ ४२१ ॥

एवं च उक्तान्यतमपक्षे निषेधवाक्यस्य निषेधनिष्ठत्वोपपादनाशक्तेर्निषेधवाक्यमपि निवृत्तिनियोगपरमेवाभ्युपगन्तव्यमिति प्राभाकरः स्वमतमुपस्थापयति । उदितेति । उक्तपक्षत्रयान्यतमपरिग्रहकारिणां वादिनामित्यर्थः । निषेधगिरां प्रामाण्यस्येति शेषः । यत उक्तरीत्या निषेधवाक्यस्य प्रामाण्यं न संभवति अत इत्यर्थः । चकारेण शब्दार्थस्य कार्यान्वयनियमं सूचयति ॥ ४२१ ॥

यथा च यागाद्यनुबन्धभेदाद्
द्भिन्नेषु शास्त्रेषु नियोगभेदः ॥
निवृत्तिभेदादपि तद्वदस्य
निवृत्तयोऽपि ह्यनुबन्धभूताः ॥ ४२२ ॥

ननु वेदे निवृत्तिनियोगस्यैकत्वे भक्षणादिनिवृत्तिनियोगसिद्धावपि पानादिनिवृत्तिनियोगसिद्धिर्न स्यादिति पानादौ यथेष्टं प्रवर्त्तेत, तन्निवृत्तिनियोगभेदस्तु तन्मतेऽनुपपन्न एव, अनुबन्धभेदाधीनशास्त्रभेदे सत्येव नियोगभेदस्य तदभ्युपगमात्, न हीह यागदानादिरिवानुबन्धो भिद्यत इत्याशङ्क्येहापि पानभक्षणादिभेदेन तत्प्रतियोगिकनिवृत्तिक्रियारूपानुबन्धभेदसंभवान्निवृत्तिनियोगोऽपि यागदानादिनियोगवद्भिद्यत इत्याशयेनाह । यथा च यागादीति । आदिपदेन दानहोमसंग्रहः । अनु पश्चाद्बध्यते व्यवच्छेदकतयेति यागादिधात्वर्थोऽनुबन्धः तद्रूपोऽनुबन्धो नियोगविषयस्तद्भेदाच्छास्त्रेष्वसन्निकृष्टार्थप्रतिपादकवाक्येषु भिन्नेषु सत्सु यथा यागादिनियोगभेदस्तद्वदत्र भक्षणादिनिवृत्तिक्रियाभेदादपि निवृत्तिशास्त्रभेदादस्य नियोगस्य भेद इत्यनुषङ्गः । ननु यागादीनामनुष्ठेयत्वात् कृतिसाध्यनियोगानुबन्धत्वं युज्यते न निवृत्तीनामित्याशङ्क्य तासामपि प्रवृत्तिविरोधिमनोव्यापाररूपतयानुष्ठेयत्वात्तदनुबन्धत्वं युज्यत इत्याशयेनाह । निवृत्तयोऽपीति । अपिशब्देन तासां यागादिसाम्यं द्योतयति । हि यस्मान्निवृत्तयो यागादिसमास्तस्मादनुबन्धभूता नियोगसाधनकृत्यवच्छेदकतया तद्द्वारा निरूपिकाः स्युरित्यर्थः ४२२

निवृत्तिसिद्ध्यापि नियोगसिद्धिः

प्रवर्त्तमानस्य न गर्त्तपातः ॥
निषिद्धचेष्टा निरयस्य हेतु-
र्नियोगतो नाध्यवसीयते हि ॥ ४२३ ॥

नन्वेवमपि कस्तत्र नियोज्यः न हि तेन विना नरव्यापाररूपायाः कृतेर्लिङादिनाभिधानं पर्यवस्येदित्याशङ्क्य निवृत्तिनियोगस्य निवर्त्तनव्यापारसामर्थ्यप्राप्तनिवर्त्यप्रवृत्त्युन्मुखस्यैव नियोज्यत्वात् तन्निवृत्तिमात्रादेव नियोगसिद्धेरत एव विश्वजिन्न्यायात्स्वर्गकामोऽत्र नियोज्योऽस्त्विति निरस्तं सामर्थ्यप्राप्तनियोज्ये संभवति तन्न्यायस्यानवतारादित्याशयेनाह । निवृत्तिसिद्धयापीति । ननु कलञ्जभक्षणादिनिवृत्त्या निरयादिपातो न भवतीति तत्परिहारकाम एव नियोज्योऽस्त्विति चेन्न । नियोगस्य तदाकाङ्क्षाया अन्यत एव शान्तत्वेन तत्कल्पनायोगात् । किं च यदि तद्भक्षणादिना निरयपातो भवेत्तर्हि तद्वर्जनेन सोऽपि वर्जितः स्यात्, न चैवमस्ति प्रमाणाभावादित्याशयेनाह । प्रवर्त्तमानस्येति । ननु यो ब्राह्मणायावगुरेत्तं शतेन यातयादित्यादिवाक्यान्निषिद्धप्रवृत्तेर्निरयहेतुत्वं प्रतीयत इति चेत्तत्राह । निषिद्धचेष्टेति । हेतुपदानन्तरमितिपदमध्याहर्त्तव्यम्, नियोगतो विधित इत्यर्थः । अर्थवादो हि नियोगाकाङ्क्षितमेवार्थं प्रतिपादयति । नियोगश्च स्वनियोज्यसिद्धयेऽर्थवादसामर्थ्यलभ्यमपि फलमा-

काङ्क्षतीत्यन्यतो लब्धे नियोज्ये नियोगस्य तदपेक्षोपरमान्न नियोगसामर्थ्येन ततस्तदध्यवसातुं शक्यत इत्युक्त एव नियोज्य इति भावः । हिशब्देन जरत्प्राभाकरमत एतत्सुप्रसिद्धमिति द्योतयति ॥ ४२३ ॥

नियोग एवैष पुमान्नियुज्यते
नियोगसिद्धै तु पुनर्नियुज्यते ॥
परत्र कर्मस्वथ वा निवृत्तिषु
स्थितिः प्रसिद्धेति नियोगवादिनाम् ॥ ४२४ ॥

ननु निरयपातपरिहारेच्छां विना चेतनः कथं नियोगेन नियुज्येत प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तत इति न्यायादित्याशङ्क्य प्राभाकरसिद्धान्तरहस्यमाह । नियोग एवेति । एष नियोज्यः । नियोगे इति सप्तमी। नियुज्यते नियोगेनेति शेषः । नियोज्यो हि लोके कार्यं लिङादिव्युत्पत्तिबलान्नियोगमेव लिङादितः स्वकृतिसाध्यत्वेनावगच्छंस्तदुन्मुखो भवति । अयमेव नियोज्यस्य नियोगे तन्नियोगो नाम स्वर्गादिकमपि हि नियोगः स्वसिद्ध्यनुकूलनियोज्यसिद्धये प्रयच्छतीति स एव मुख्यः साध्यः । तदुक्तम् । स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये । कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव न इति । नियोगमुद्दिश्यैव पुमान्प्रथमं प्रवर्त्तत इत्यर्थः । नन्वव्यापाररूपे तस्मिन्कथं पुंसो नियोगो भवेदित्याशङ्क्य तदनन्तरं तेनैव नियोगेन तद्विषये या-

गादिधात्वर्थं तत्सिद्धये स नियुज्यत इति तद्द्वारा स नियोगं साधयिष्यतीत्याशयेनाह । नियोगसिद्ध्यः इति । तुरवधारणे । तत्सिद्ध्यर्थमेवेत्यर्थः । पुनः पश्चात् । परत्र नियोगविषयेषु । तानेवाह । कर्मस्वित्यादिना । कर्मसु नियुज्यत इत्यनुषङ्गः । स्थितिः सिद्धान्तः ॥ ४२४ ॥

प्रवृद्धरागस्य निवृत्तयोऽस्थिरा-
स्ततः स्थिरत्वाय नियुज्यते पुमान् ॥
निवृत्तिदेशेषु नियोगबुद्धितो
निवृत्तिमूर्ध्वं परिपालयिष्यति ॥ ४२५ ॥

ननु यदि निवृत्तिसिद्ध्या तन्नियोगः सिध्येत्तर्हि निषिद्धेऽन्यतोऽपि प्रवर्त्तकरागाद्यभावे निवृत्तिसिद्धेः किं नियोगस्य पृथङ् नियोगेनेत्याशङ्क्याह । प्रवृद्धरागस्येति । यद्यप्युक्तरीत्या सकृन्निवृत्तिर्भवेत्तथापि नियोगेन तन्नियोगाभावे प्रथममिव पुंसः पुनरपि तत्र राग उत्पद्येतेति निषेध्यान्निवृत्तयोऽस्थिराः स्युरिति यतस्ततो हेतोः निवृत्तिस्थेम्ने निवृत्तिरूपदेशेषु पुमान्नियुज्यते । एवं हि सति प्रवृत्त्युन्मुखः पुमान्निवृत्तिनियोगमेव कार्यमवगच्छेदिति निवृत्तयः स्थिराः स्युरित्याशयेनाह । नियोगबुद्धित इति । ऊर्ध्वं ऊर्ध्वमपीत्यर्थः । परिपालयिष्यति । अविच्छिन्नप्रवाहां तां करोतीत्यर्थः ॥ ४२५ ॥

अनाद्यजग्धेष्व निवृत्तिरिष्टा

विशिष्टदन्तोष्ठनिविष्टसंवित् ॥
अनन्यसंसर्गिपदार्थसंवि-
न्निवृत्तिरित्येष हि राजमार्गः ॥ ४२६ ॥

ननु केयं निवृत्तिर्नाम ननूक्तं प्रवृत्तिविरोधिमानसी क्रियेति ननु तत्राप्युक्तमेवं सति नञः स्वार्थत्यागप्रसङ्ग इति सत्यं निवृत्तिस्थैर्याय सोऽप्युचित एव ननु प्राभाकरनयेऽभावाभावात्कथं तेन लक्षणा मुख्यार्थसंबन्धासंभवादित्याशङ्क्य प्राभाकरमते भावरूपभक्षणाद्यभावं नञो मुख्यार्थं निवृत्तिलक्षणार्थमाह । अनाद्येति । न आद्यमनाद्यं तस्य भक्षणानर्हस्य कलञ्जादेर्जग्धेर्भक्षणादित्यर्थः । चोऽवधारणे । निवृत्तिरभावः । विशिष्टदन्तोष्ठनिविष्टसंविदेव । अविशिष्टेति वा छेदः केवलदन्तोष्ठविषयज्ञानमित्यर्थः । जग्धेरिति षष्ठी वा । अन्यत्समानम् । भक्षणाद्यकालीनदन्तोष्ठादिव्यावृत्तये विशिष्टेत्युक्तम् । तत्र हेतुत्वेन तत्सिद्धान्तं दर्शयति । अनन्यसंसर्गीति । अन्यो निषेध्यः तत्संसर्गी न भवतीत्यनन्यसंसर्गी तादृशो यः पदार्थः निषेध्यानधिकरणं तत्संवित्केवलाधिकरणज्ञानमिति यावत् । राजमार्गः निर्दोषः । प्राभाकरपक्षे हि यत्राभावव्यवहारस्तस्य प्रतियोग्यसंसर्गिणो ज्ञानमभाव इति प्रसिद्धम् । एवं च भक्षणादिनिवृत्तिरपि केवलदन्तोष्ठादि तदेव तत्र नञोच्यते । अतो न निवृत्तिर्लक्ष्यत इत्यर्थः । एवं-

रूप एवाभावो निवृत्तिः प्रकृते विधेयास्तु तथा च न लक्षणेति चाशयः ॥ ४२६ ॥

ननु समीहितसाधनता लिङो
लशुनगृञ्जनभक्षणसंश्रया ॥
भवति वाच्यतयाभिमतास्य नो
नञपि तद्विनिवृत्तिनिवेदकः ॥ ४२७ ॥

एवं स्वमतं प्रसाध्येदानीं सिद्धान्त्यभिमतं निषेधवाक्ये नञर्थं दूषयितुमनुवदति । ननु समीहितेति । लशुनादिकं लोकप्रसिद्धम् । अस्य लशुनादिभक्षणस्य नोऽस्मन्मते तस्याः समीहितसाधनतायाः विनिवृत्तिरभावः तस्या निवेदको बोधक इत्यर्थः । प्रत्ययेन संबद्धो हि नञ् लशुनादिभक्षणगतेष्टसाधनत्वस्य लिङाद्यर्थस्याभावं बोधयतीत्यर्थः ॥ ४२७ ॥

तदसदिष्टफलोद्भवदर्शना-
ल्लशुनगृञ्जनपर्युषिताशनात् ॥
न हि निषिद्धपदार्थनिमित्तकः
सुखलवः पुरुषस्य न विद्यते ॥ ४२८ ॥

तद्दूषयति । तदसदिति । तदप्यसदित्यर्थः । कुतः लशुनादिभक्षणादिष्टफलस्य सुखादेरुद्गम उदयः तद्दर्शनादित्यर्थः । उक्तमेव व्यतिरेकेनिषेधेन द्रढयति । न हीति । स्पष्टमन्यत् । तस्मात्सर्वो वेदः कार्यपर इति भावः ॥ ४२८ ॥

अदृष्टदोषं परिहृत्य शंसतः
कलञ्जमास्वाद्य सुखित्वमात्मनः ॥
पुमानबोधोपहतः समीहते
तदीहिताभावपरा निषेधगीः ॥ ४२९ ॥

उच्यते । यदि निषेधवाक्यस्थलिङादिना कार्यमुपस्थाप्येत तदा तस्य कथं चिदुक्तरीत्या नञर्थो विषयः कल्प्येत । न त्वेतदस्ति । लोके धात्वर्थातिरिक्तकार्याभावेन तस्य च धातुसिद्धत्वेन लिङादेस्तदर्थत्वाभावात् । न च धात्वर्थ एव कार्यतया लिङाद्यर्थ इति वाच्यम् । कृतिसाध्यताया एव कार्यतात्वेऽतिप्रसक्तायास्तस्या लिङाद्यर्थत्वायोगात् । न च कृतीप्सितता तस्य कार्यतेति वाच्यम् । बहुक्लेशसाध्यतया तस्य स्वतस्तदयोगात् इष्टसाधनत्वेन तस्य कृतीप्सितत्वेऽवश्यं प्रथमोपस्थितस्य तस्यैव प्रवर्त्तकत्वं लिङर्थत्वं चेति न कार्यं लोके लिङर्थ इति कथं निषेधवाक्यस्थलिङादिना तत्राविदितसंगतिकेन तदुपस्थाप्येत । तस्माच्छ्रेयःसाधनत्वमेव लोकव्युत्पत्तिबलेनात्रापि लिङर्थः कल्प्यत इति तदभाव एव नञर्थः । न चैवं कलञ्जभक्षणादेः सुखसाधनत्वानुभवविरोधः । यद्यपि प्रवृत्तौ कृतिसाध्यश्रेयःसाधनत्वज्ञानं कारणम् तथापि तस्य श्रेयसः प्रबलानर्थसम्बन्धित्वज्ञाने प्रवृत्तिर्न भवतीति तदज्ञानं प्रतिबन्धकाभावतयाऽवश्यं

वक्तव्यमिति निषिद्धे प्रवर्त्तमानस्यापि तत्साध्यसुखे बलवदनर्थसाधनत्वाज्ञानं वाच्यम् एवं च सामग्रीसमाजादिदं बलवदनिष्टाननुबन्धीष्टसाधनमिति भ्रमो भवतीति भ्रान्तिप्राप्तं तदेव विशिष्टेष्टसाधनत्वं निषेधवाक्येन नञर्थान्वयाय लक्षणयानूद्य निषिद्ध्यते भोजनादिव्यापारे तस्य लिङ्वाच्यसंबन्धित्वावगमादिति नानुभवविरोध इत्याशयेनाह । अदृष्टदोषं परिहृत्येति । यतः पुमान्कलञ्जभक्षणादेर्बलवदनिष्टानुबन्धित्वाज्ञानेनोपहतः सन् समीहते प्रवर्त्तते ततश्चात्मनः स्वस्य कलञ्जं विषलिप्तशरहतमृगमांसमास्वाद्य भक्षयित्वा अदृष्टदोषं परिहृत्य अनादृत्य सुखित्वं शंसतः प्रार्थयतस्तस्येहितमभिलषितं यद्बलवदनिष्टाननुबन्धीष्टसाधनत्वं तदभावपरा निषेधगीरिति संबन्धः । समानेन कलञ्जभक्षणेन बलवदनिष्टाननुबन्धीष्टं भवत्विति प्रार्थयतस्तस्याभिलषितसुखसाधनत्वं लिङादिनाऽनूद्य निषेधवाक्यं निषेधति । यतः पुमानज्ञानादेव तच्चिकीर्षापूर्वं करोतीत्यर्थः । अबोधोपहत इत्यनेन भ्रान्तिप्राप्त इति प्रागुक्तः प्रसज्य प्रतिषेधविषयो दर्शितः॥४२९॥

नरकपातविवर्जनवर्त्मना
भवतु विप्रबधात्परमार्थतः ॥
मम सुखित्वमितीच्छति यत्पुमा-
न्न तदितीह निषेधगिरोच्यते ॥ ४३० ॥

अदृष्टदोषमित्याद्युक्तमेव विवृणोति । नरकपात इति । नरकपातस्य विशेषेण वर्जनं यस्मात्तेनोपायेन, इत्थंभावे तृतीया,नरकपातवर्जनाभिमानमात्रव्यावृत्तये परमार्थत इत्युक्तम् । भवति ह्यत्यन्ताविवेकिनस्तीव्ररोषवशात्तादृशाभिमानः । तत्तादृशसुखहेतुत्वम् । इह विप्रवधादौ ॥ ४३० ॥

प्रमाणतो नास्ति निषिद्धकर्मणः
फलस्पृहाऽदृष्टभयं विना तव ॥
भ्रमादबोधप्रभवात्प्रवर्त्तते
न तात मानेन फलस्पृहाऽत्र ते ॥ ४३१ ॥

नन्वनुभवसिद्धं सर्वेषां कलञ्जभक्षणादेस्तादृशसुखसाधनत्वं कथं नञा निषेद्धुं शक्यमित्याशङ्क्य भ्रान्तिसिद्धमेव तन्न प्रमाणसिद्धं तत्प्रमाणस्य श्रुतेस्तत्राभावात्, प्रत्यक्षादेश्च पारलौकिकानर्थाभावावेदनेऽसमर्थत्वादित्याशयेनाह । प्रमाणत इति । फलस्पृहा फलसाधनत्वम् । अदृष्टभयं विना पारलौकिकबलवद्दुःखभयपरिहारेण । कथं तर्हि तत्र प्रवृत्तिरिति तत्राह । भ्रमादिति । बलवदनिष्टानुबन्धित्वाज्ञानप्रभवादिदं बलवदनिष्टाननुबन्धीति भ्रमादित्यर्थः । उपसंहरति । न तातेति । यथा बालं मातानिष्टान्निवर्त्तयति एवं श्रुतिरपि त्वदभिमतफलसाधनत्वमत्र नेति निवारयतीति तातेत्यनेन सूचितम् ॥ ४३१ ॥

इति श्रुतिः शास्ति निषिद्धकर्मणि
प्रवृत्तिमन्तं पुरुषं नञन्विता ॥
न चायमर्थोपहृतः प्रमान्तरै-
र्न हि प्रमाणैरपरैर्विरुद्ध्यते ॥ ४३२ ॥

निषिद्धेषु वर्णितफलसाधनत्वस्य भ्रमसिद्धत्वोपपादनफलमाह। इतीति। उक्तप्रकारेणेत्यर्थः। श्रुतिः निषेधवाक्यं शास्ति प्रतिपादयति। निषेधाधिकारिणमाह। निषिद्धेति। प्रवृत्तिमन्तं प्रवृत्त्युन्मुखम्। न चैवं सति मानान्तरविरोध इत्याह। न चेति। अयं बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावः। अपहृतः बाधितः। तत्राविरोधे हेतुमाह। न हीति। विशेष्यांशस्य तत्र सत्त्वेऽपि विशेषणांशस्याभावेन तद्विशिष्टस्याप्रामाणिकत्वाद्विशेष्यमात्रग्राहिभिर्न विरोधः। यद्यपीष्टसाधनत्वमेव लिङर्थ इति वक्ष्यति। तथापि नञर्थान्वयायात्र वर्णितभ्रान्तिप्राप्तं विशिष्टेष्टसाधनत्वमेव लिङादिलक्षितं नञा निषिद्ध्यते। न चैवं नञ एव निवृत्तौ लक्षणास्त्विति वाच्यम्। प्रतिपिपादयिषितार्थतया प्रधाननञनुरोधेन तदर्थप्रतियोगितया गुणभूतश्रेयःसाधनत्ववाचिलिङादावेवानुवादेन लक्षणाया न्याय्यत्वाल्लक्षितं च तत्त्राप्रामाणिकमेवेति न प्रमाणान्तरविरोध इति भावः। अथवा प्रकृतश्रुतिर्न स्वार्थपरेत्यपि नाशङ्कनीयमित्याह। न चेति। अव्ययानामनेकार्थत्वादपशब्द उपशब्दार्थे, मानान्तरेण

प्रापित इत्यर्थः। अनेनानुवादकत्वन्निरस्तम्। गुणवादाशङ्कापि नास्तीत्याह। न हीति। विरोधिप्रमाणान्तरानिरूपणादित्यर्थः ॥ ४३२ ॥

भुजङ्गभोगं सुकुमारशीतलं
निदाघसंतापनिवृत्तये शिशुम् ॥
भ्रमादुपादित्सुमुदीक्ष्य कातरा
निवर्त्तयेत्तज्जननी यथा तथा ॥ ४३३ ॥

न तात मानेनेत्यनेन सूचितदृष्टान्तानुवादपूर्वकं दार्ष्टान्तिकं विशदयति। भुजङ्गभोगमिति द्वयेन। सर्पशरीरमित्यर्थः। सुकुमारशीतलं मृदु शीतलं चेत्यर्थः। निदाघस्तीव्रातपस्तत्कृतो यः शरीरस्य संतापस्तन्निवृत्तये भ्रमाद्बलवदनिष्टाननुबन्धितया निवृत्तिसाधनमिति भ्रमादुपादित्सुं ग्रहणेच्छुं कातरा दुःखपरवशा निवर्त्तयेत् मा गृहाणेति हस्तेन निवारयेत् यथा तथेत्युपरि श्लोके योजनीयम् ॥ ४३३ ॥

भ्रमादनर्थस्य निदानमादरा-
त्कृतार्थतायै लशुनादिभक्षणम् ॥
नञन्विता वैदिकचोदनाप्यसौ
विधित्सुमालक्ष्य निवर्त्तयिष्यति ॥ ४३४ ॥

लशुनादिभक्षणादिविधित्सुमालक्ष्यासौ वैदिकचोदनापि निवर्त्तयिष्यतीति संबन्धः ॥ ४३४ ॥

क्रियानुप्रवेशं विना प्रागभावः

ल्पनायाश्च प्रसङ्गं विवृणोति । उदासीनेति । चकारान्नियोगस्याश्रुतत्वं सूचयति । लिङादेरतदर्थत्वान्नियोगे सतीत्यनेनाश्रुतकल्पनां सूचयति । त्याज्यतामिति । श्रुतहानिरुक्ता । अस्तु तर्हि श्रुतस्यैवौदासीन्यस्य विधिरिति न तद्वद्द्वयप्रसङ्ग इत्याशङ्क्य तस्याभावार्थत्वादिति प्रागुक्तं मनसि निधायाह । अतद्योग्यभावादिति । औदासीन्यस्य धात्वर्थत्वाभावेन नियोगविषयतायोग्यताशून्यत्वादित्यर्थः । ततः किं तत्राह । अयोग्य इति । वाक्यार्थभाक् वाक्यार्थान्वयी जैमिनीयैरपि ॥ ४३७ ॥

निषिद्धक्रिया प्रत्यवायाय नेति
स्वकर्णौ जनः प्रोर्णुते पापभीरुः ॥
समाकर्ण्य दुर्भाषितं पार्श्ववर्ती
न पापाक्षरं किं चिदेतादृगन्यत् ॥ ४३८ ॥

एवं निषेधवाक्यस्य गुरुमतानुवर्त्तिकल्पितनियोगार्थत्वं संदूष्य निषिद्धानुष्ठानस्य प्रत्यवायजनकत्वं नेति तदुक्तमपि प्रथमं महाजनसंवदनविरोधेन दूषयति । निषिद्धक्रियेति । प्रोर्णुते गाढं पिधत्ते । पार्श्ववर्ती जनः। निषिद्धक्रिया प्रत्यवायाय नेति प्राभाकरस्य दुर्भाषितं समाकर्ण्य पापभीरुः सन् स्वकर्णौ प्रोर्णुते तस्य जनस्याशयमाह । न पापाक्षरमिति । एतादृशमन्यत्किं चिदपि दुष्टवचनं नेत्याशयेनेत्यर्थः । अतः सकलमध्य-

स्यमहाजनव्यवहारविरोधादतितुच्छमिदं मतमिति भावः ॥ ४३८ ॥

निषिद्धक्रिया प्रत्यवायाय नो चे-
त्तदा दुःखमाकस्मिकं सर्वपुंसाम् ॥
सुखं पुण्यमूलं यथा सर्वपुंसां
तथा दुःखमप्यस्तु वः पापमूलम् ॥ ५३९ ॥

किं च निषिद्धक्रियायाः पापजनकत्वेऽनुभूयमानं दुःखमाकस्मिकं स्यात् तस्य तदेकनिदानत्वादिति सदृष्टान्तमाह । निषिद्धक्रियाप्रत्यवायाय नो चेदिति । आकस्मिकमकारणकमित्यर्थः । वो युष्माकमपि संमतमिति शेषः । भवद्भिरपीदमवश्यमङ्गीकार्यमित्यर्थः ॥४३९॥

निषिद्धक्रियां चोदितस्याक्रियां वा
विना नास्ति पापस्य निष्पत्तिहेतुः ॥
ततस्तद्द्वयं पापनिष्पादकत्वा-
द्भवेत्प्रत्यवायस्य नित्यं निदानम् ॥ ४४० ॥

ननु निषिद्धक्रियायाः पापामूलत्वेऽपि विहिताकरणनिमित्तपापेन दुःखं भविष्यतीत्याह । निषिद्धक्रियामिति । चोदितस्य नित्यस्याक्रियाम् अननुष्ठानं यत इत्यादौ योजनीयम् । तद्द्वयं निषिद्धक्रिया विहिताननुष्ठानं च । प्रत्यवायस्य दुःखस्य । यदि विहिताकरणं पापजनकं तव मते स्यात्तदा निषिद्धानुष्ठानमपि पापजनकं कथन्न स्यान्नरकवर्जनफलाकाङ्क्षायाः निषिद्धान्निव-

र्त्तमानेपि तुल्यत्वात् नियोगपुरुषार्थतायाश्च नित्यनियोगेपि संभवादित्युभयं तुल्यमेवेति भावः ॥ ४४० ।

निषिद्धक्रिया दुःखनिष्पत्तिहेतु-
र्भवेल्लक्षणं चोदितस्याक्रियास्य ॥
अभावान्न भावस्य निष्पत्तिरिष्टा
भवेल्लक्षणं ज्ञायमानस्त्वभावः ॥ ४४१ ॥

विहिताकरणस्य पापनिदानत्वमापातदृष्ट्याङ्गीकृतं वस्तुतस्तु निषिद्धक्रियैव पापहेतुः तस्या अनर्थहेतुतायां प्रमाणस्य वक्ष्यमाणत्वात् विहिताकरणं तु पापहेतोर्लक्षणमात्रं न तु स्वयं पापजनकम् । तदुक्तं भट्टपादैः । अकुर्वन्विहितं यस्तु करोत्यन्यदचेतनः । प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यत इति । विहितमकुर्वन् लक्षणार्थे शतृप्रत्ययः । लक्ष्यमेवाह । तत्काले यदन्यदविवेकी करोति निषिद्धमनिषिद्धं वा तत एवास्य प्रत्यवायः स्वतोऽनिषिद्धस्यापि तत्कालीनतया निषिद्धत्वात् न त्वभावात्पापोत्पत्तिरिति श्लोकार्थः । अत इदं प्रामाणिकमित्याशयेनाह । निषिद्धक्रिया दुःखेति । लक्षणं ज्ञापकमस्य दुःखहेतोः पापस्य । कुत एवमित्यत आह । अभावादिति । न चैवं प्रागभावस्य कारणता न स्यादिति वाच्यम् । तस्यैवाभावात् । प्रतिबन्धकाभावतया तत्सत्त्वेऽपि तस्य निःस्वभावत्वान्निर्व्यापारत्वाच्च तदतिरिक्तदण्डादिभ्य एव कार्यनिष्पत्तेः, अभाव-

ज्ञानमपि प्रतियोग्यनुपलम्भेन साक्षिण एवास्मिन्मते भवतीति नाभावस्य क्वचिदपि भावकारणत्वमिति भावः । तर्हि लक्षणं वा कथं विहिताकरणं स्यादित्यत आह । भवेल्लक्षणमिति । अविद्यमानस्यापि धूमादेरिव वह्न्यादिकं प्रत्यस्यापि ज्ञायमानतया लक्षकत्वमविरुद्धमिति भावः ॥ ४४१ ॥

निवृत्तिनिष्ठे तु निषेधवाक्ये
निषिद्धकर्माचरणादनर्थः ॥
प्रतीयतेऽर्थादिति तत्र युक्तं
दुःखं नृणां दुश्चरितैकमूलम् ॥ ४४२ ॥

ननु भवन्मतेऽपीष्टसाधनत्वाभावस्यैव नञर्थत्वान्निषिद्धक्रियाया निरयपातहेतुत्वं कुतोऽवसीयत इत्याशङ्क्य बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावस्य नञर्थस्यानुपपत्त्या तत्सिद्ध्यति, निषिद्धक्रियाया दृष्टसुखजनकत्वेन विशेषणाभावादेव विशिष्टाभावस्य तत्र वक्तव्यत्वाद्विशेषणं च बलवदनिष्टाननुबन्धित्वमिति तदभावो बलवदनिष्टसाधनत्वं सिद्ध्यतीत्याशयेनाह । निवृत्तिनिष्ठ इति । तुशब्देन परमताद्विशेषं दर्शयति । तमेव विशेषं निषिद्धेत्यादिना दर्शयति । अर्थादुक्तानुपपत्त्या । निषिद्धक्रियायाः पापजनकत्वे स्वमते प्रमाणोपन्यासफलमाह । तत्र युक्तमिति । एकशब्देन विहिताकरणस्य तन्मूलत्वं निषेधति ॥ ४४२ ॥

समीहितोपायतया लिङन्वयात्
प्रतीयमानस्य तु भक्षणादिनः ॥
न पर्युदासाश्रयणेन नञ्पदा-
दनिष्टहेतुत्वमतिर्भविष्यति ॥ ४४३ ॥

एवं स्वमते निषेधवाक्यस्याभावमात्रनिष्ठत्वमर्थान्निषेध्यप्रवृत्तेर्बलवदनिष्टहेतुत्वसिद्धिश्चेत्युपपादितम्, संप्रति निषेधवाक्यस्य बलवदनिष्टसाधनत्वमर्थं पर्युदासलक्षणया ये आश्रयन्ते तन्मतमनूद्य निषेधति । समीहितोपायेति । लिङन्वयान्निषेधवाक्य इति शेषः । निषेधवाक्यस्थभक्षयेदित्यादेर्लिङन्वयाल्लिङान्वयो यस्य नञ्पदस्य तल्लिङन्वयं तस्मादिति विग्रहः समीहितोपायतया प्रतीयमानस्य भक्षणादिनः भक्षणमादिर्यस्य पानस्य तस्य नञ्पदात्पर्युदासाश्रयणेनानिष्टहेतुत्वमतिर्भविष्यतीति यत्तन्नेति सम्बन्धः। इदमत्र तदाकूतम् । यत्र निषेद्धव्यं भ्रान्त्या प्रसज्यते तत्र नञः प्रसज्यप्रतिषेधोऽर्थः, यत्र तु तदस्त्येव तत्र तस्य निषेधायोगात्पर्युदासलक्षणा आश्रयणीया, प्रकृतेऽपीष्टसाधनत्वस्य सत्त्वात्तदनिष्टसाधनत्वमेव नञर्थो वक्तव्यः, एवं च प्रवृत्त्युन्मुखस्य ततो निवृत्तिरप्युपपन्नेति । एतन्नेत्यर्थः ॥ ४४३ ॥

तथाहि सम्बन्ध्युपमर्दबुद्धये
समर्थमुत्सर्गमपेक्ष्य नञ्पदम् ॥

न पर्युदासाय विनापवादकं
ततो निवृत्त्यर्थपरं तदिष्यते ॥ ४४४ ॥

कुत इत्यत आह । तथाहीति । नञ्सम्बन्धिपदार्थस्य य उपमर्दोऽभावस्तद्बुद्धये उत्सर्गं मुख्यवृत्तिमपेक्ष्य औत्सर्गिकस्वभावेन । तर्हि किं नञः पर्युदासो नार्थ इत्याशङ्क्य यत्रोत्सर्गप्राप्तमुख्यार्थस्याभावस्यापवादकं बाधकं किं चिदस्ति तत्र पर्युदास आश्रीयते न च प्रकृते तदस्तीत्याशयेनाह । न पर्युदासायेति । फलित माह । तत इति । ततः कारणात्पूर्वोक्तमार्गेण प्रार्थनानिवृत्तिपरं निषेधवाक्यमित्यर्थः ॥ ४४४ ॥

अतः प्रसज्यप्रतिषेधसम्भवा-
न्न पर्युदासाश्रयणं प्रशस्यते ॥
न पर्युदासाश्रयणं विना भवे-
दनिष्टहेतुत्वनञर्थकल्पना ॥ ४४५ ॥

ननु कथमिष्टसाधनस्य भक्षणादेस्तत्र निषेधः कथं वा तदनिष्टसाधनतावगमं विना प्रवृत्त्युन्मुखस्य ततो निवृत्तिर्भवेदिति तदाशयं दूषयन्नुपसंहरन्नाह । अत इति । यतो मुख्यार्थबाधे सत्येव पर्युदासलक्षणा अत इत्यर्थः। प्रसज्यप्रतिषेधसंभवादिति। निवृत्तेरप्येतदुपलक्षणम्, बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य निषेध्यस्य तत्र भ्रान्त्या प्रसक्तत्वेन निषेधसंभवाद्विशिष्टनिषेधसामर्थ्याद्बलवदनिष्टसाधनत्वस्यापि सिद्धेर्निवृत्तेरप्यु-

पपत्तेर्न पर्युदास आश्रयणीय इत्यर्थः । मा भूत्तर्हि पर्युदास इत्याशङ्क्य तदा भवदिष्टं न सिद्ध्यतीत्याह । न पर्युदासाश्रयणमिति ॥ ४४५ ॥

अभीष्टहेतुत्वलिङर्थपृष्ठतो
ह्यनर्थहेतुत्वनञर्थकल्पना ॥
न पर्युदासं परिहृत्य कल्प्यते
न पर्युदासः प्रतिषेधसंभवात् ॥ ४४६ ॥

द्वितीयार्द्धार्थमेव विवृणोति । अभीष्टहेतुत्वेति । अभीष्टहेतुत्वस्य लिङर्थत्वात्तद्वति तन्निषेधायोगेन पश्चात्प्रस्तुते नञोऽनर्थहेतुत्वकल्पना वाच्या, सा च न पर्युदासलक्षणां विना संभवति सापि मुख्यार्थसंभवे न युक्तेत्यर्थः । नन्विष्टहेतुत्वस्य प्रत्यक्षविरोधादेव निषेधासंभवात्पर्युदास आश्रीयतामिति चेन्न । इष्टं प्रति साधनत्वांशनिषेधासंभवेऽपि इच्छांशस्य प्रमाणमूलत्वनिषेधसंभवस्योक्तत्वात् । तस्मान्निषेधवाक्यं निवृत्तिपरमेवेति सिद्धम् ॥ ४४६ ॥

प्रमाणमिच्छन्प्रतिषेधचोदनां
समस्तवेदस्य न कार्यगोचरम् ॥
प्रमाणभावं प्रतिपत्तुमीश्वरो
निषेधवाक्ये तदसंभवाद्यतः ॥ ४४७ ॥

एवं निषेधवाक्यस्य प्रतिषेधमात्रनिष्ठत्वे सिद्धे सति वेदवाक्यस्य कार्यगोचरत्वनियमाभावात्तद्वदेव वेदान्त-

वाक्यमप्युक्तन्यायेन सिद्धब्रह्मपरं स्वीकर्त्तव्यमित्युपसंहरति। प्रमाणमिति सार्द्धेन। कुतो नेश्वरस्तत्राह। निषेधवाक्य इति। तदसंभवात् कार्यगोचरत्वासम्भवात्, एवं वेदस्य कार्यार्थत्वानियमो यतः अत इत्युत्तरेण संबन्धः ॥४४७॥

अतो न वेदान्तवचस्सु विद्यते
विधिर्नियोगो न च शब्दभावना ॥
न कर्मकाण्डेऽपि नियोगतोऽस्त्यसौ
यतो निषेधेषु न विद्यते विधिः ॥ ४४८ ॥

विधिः कर्तुरिष्टाभ्युपायः । एतदेव कैमुतिकन्यायेनाप्याह । न कर्मकाण्डेऽपीति । नियोगतो नियमतः । असौ विधिः ॥ ४४८ ॥

उपेत्यवादं परिगृह्य चोच्यते
नियोगनिष्ठास्तु निषेधगीरपि ॥
तथापि वेदान्तवचःसु विद्यते
विधेर्न गन्धोऽपि विरोधकारणात् ॥ ४४९ ॥

इदानीं निषेधवाक्यस्य निवृत्तिविधिनिष्ठत्वमुपेत्यापि वेदान्ते विध्यसंभवमाह । उपेत्यवादमिति । अभ्युपगमवादमित्यर्थः । तमेव प्रकटयति । नियोगनिष्ठेति । गन्धो लेशः, उत्पत्त्यादिरूप एकोऽपि विधिर्न संभवतीत्यर्थः । विरोधकारणादिति । वेदान्तानामद्वैते तात्पर्यग्राहकप्रमाणविरोधादित्यर्थः ॥ ४४९ ॥

ज्ञानं विधातुं हि न शक्यमेत-

न्न शक्यते कर्तुमकर्त्तुमेतत् ॥
अतोऽन्यथा कर्त्तुमशक्यमेतत्
प्रमाणमेयैकनिबन्धनत्वात् ॥ ४५० ॥

प्रकारान्तरेणापि तदसंभवमाह । ज्ञानं विधातुमिति । न तावद्वेदान्तानां कर्मविधिपरत्वं संभवति, तत्प्रतिपाद्यस्यात्मनः कर्मशेषत्वासंभवेन विनियोजकप्रकरणाद्यभावेन तेषां तदयोगात् । नापि वेदान्तावगतोपासनाविधिशेषत्वम्, मुमुक्षोरुपासनया प्रयोजनाभावेन तमधिकृत्य प्रवृत्तानां तेषां तदनुपपत्तेः । अस्तु तर्ह्यात्मन्येवात्मानं पश्येदितिश्रुतज्ञानविधिपरत्वं ज्ञाने मुमुक्षोरेवाधिकारादिति चेन्न । एतदलौकिकाद्वयात्मविषयकं ज्ञानं हि यतो विधातुं न शक्यम् । कुतो विधातुं न शक्यं तत्राह । न शक्यत इति । यद्धि कर्त्तुमकर्त्तुं शक्यते पुरुषप्रयत्नेन निष्पाद्यते तदभावे च न यथातिरात्रे षोडशिग्रहणम्, यच्चान्यथापि कर्त्तुं शक्यं यथानुदितहोम उदितहोमाद्विलक्षणस्तदेव विधेयम्, ज्ञानं तु नैवं तस्य प्रमाणप्रमेयैकतन्त्रतया पुरुषेच्छायत्तत्वाभावादित्यक्षरार्थः । विधिजन्येष्टसाधनताज्ञानाधीना यत्र चिकीर्षोदेति तज्जन्यया कृत्या यत्साध्यते तद्विधिविधेयम् यथाग्निहोत्रादि, ज्ञानं च नैवं न हि ज्ञानं चिकीर्षया निष्पाद्यते अनिच्छतोऽपि तद्दर्शनान्नापि कृत्या अयतमानस्यापि तद्दृष्टेरिति ज्ञानस्या-

विधेयतया न वेदान्तास्तद्विधिपरा इति भावः ॥४५०॥

ब्रह्मज्ञानं जानता ब्रह्मबुद्धेः
कर्तव्यत्वं शक्यते ज्ञातुमेतत् ॥
न ह्यज्ञात्वा ब्रह्मबुद्धिं तदीयं
कर्त्तव्यत्वं कश्चिदीष्टे ग्रहीतुम् ॥ ४५१ ॥

किं चात्मानं पश्येदितिवाक्यार्थावगमात्प्राग्विधेयात्मज्ञानं न ज्ञातं किं वा ज्ञातम्, आद्योऽनुपपन्न इत्याह । ब्रह्मज्ञानमिति। ज्ञानस्य विधिसंसर्गरूपवाक्यार्थनिश्चयहेतुत्वेन तदभावे स न स्यादित्यर्थः ॥ ४५१ ॥

ब्रह्मज्ञानं ब्रह्मणि ज्ञायमाने
ज्ञातुं शक्यं नान्यथा तच्च तद्वत् ॥
विज्ञातं चेद् ब्रह्मणस्तत्त्वमस्य
प्राप्ता मुक्तिर्नास्ति कृत्यं विधीनाम् ॥ ४५२ ॥

द्वितीयेऽपि तद्विषयो ब्रह्म ज्ञातमिति वाच्यम्, अन्यथा विषयनिरूप्यज्ञानस्य ज्ञातुमशक्यत्वात्, एवं च ब्रह्मणो यत्तत्त्वज्ञानं मोक्षाय विधीयते तदपि ज्ञानवद्विज्ञातमित्यस्याधिकारिणो ज्ञानान्मुक्तिः प्राप्तेति नास्ति विधीनां प्रयोजनमित्याह। ब्रह्मज्ञानमिति ॥४५२॥

दृशो विराट्सूत्रशरीरगोचरं
परस्पराध्यासमबोधसंभवम् ॥
अनर्थमाहुः श्रुतिमस्तके स्थिता-
स्ततोऽस्य विद्यासमयैव मुक्तता ॥ ४५३ ॥

ब्रह्मणि ज्ञाते ज्ञानं विधीयते इति पक्षे न केवलं प्रयोजनाभावाज्ज्ञानविध्यसंभवः किं तु तन्निमित्तप्रमाकर्त्तृकरणादिभेदासंभवादपि विधिर्न संभवति इत्याह । दृशो विराड़िति । परस्य दृशः प्रत्यक्चैतन्यस्य विराट् स्थूलभूततत्कार्यात्मस्थूलप्रपञ्चः, सूत्रं सूक्ष्मभूततत्कार्यलिङ्गशरीरमस्मदादीनाम्,शरीरं व्यष्टिरूपं तद्गोचरं परस्पराध्यासमहं ममेत्यवभास्यावभासात्मकमनर्थमबोधादज्ञानात्संभवं श्रुतिमस्तके वेदान्ते स्थिताः परिनिष्ठिता आहुः । उक्ताध्यासस्याज्ञानसमुत्थत्वे फलितमाह । तत इति । अस्याधिकारिणो ज्ञातुः । विद्यायाः समय एवोत्पत्तिसमयो यस्याः सा तथा मुक्तता अविद्यातत्कार्यसंसारराहित्यम् । ततो भेदाभावात्कथं विध्यर्थावगमोऽनुष्ठानं वाधिकारिणो भवेदिति भावः ॥४५३॥

अनाद्यविद्यापटनेत्रबन्धनं
प्रसह्य वेदान्तनिबन्धना मतिः ॥
स्वजन्ममात्रेण दृढात्मगोचरा
समूलदाहं दहतीति हि श्रुतिः ॥ ४५४ ॥

ननु विद्यासमयैव मुक्ततेति कथं ज्ञानसहकारिणां तदानीं नियमेनासंभवान्न ह्यसहकृतमेव किं चित्कार्यं जनयद्दृष्टमित्याशङ्क्यान्यत्तथैव, ज्ञानं त्वविद्यानिवृत्तौ स्वोत्पत्तिमात्रेण समर्थमित्याशयेनाह । अनाद्यविद्येति । अविद्यायाः स्वरूपप्रकाशकार्यप्रतिबन्धकत्वा-

त्पटवत्सा नेत्रबन्धनमित्युक्तम्,ज्ञानोत्पत्त्यनन्तरं तद्विरोधेनानादिरप्यविद्या तत्कार्यं वा स्थातुं न शक्नोतीति सह्येति सूचितम्। आपातज्ञानव्यावृत्तये दृढेति, समूलदाहं मूलं संसारमूलं विविधवासनास्तद्दाहसहितं यथा स्यात्तथा दहति नाशयतीति श्रुतिः भिद्यते हृदयग्रन्थिः, तरति शोकमात्मविदित्याद्या दर्शयतीत्यर्थः ॥ ४५४ ॥

विज्ञाते ब्रह्मणि स्याद्विधिरयमफलः प्रत्यये तस्य तद्वन्नाज्ञातब्रह्मकर्मा विधिविषय इति प्रत्ययो बुद्धियोग्यः ॥
ब्रह्मात्मप्रत्ययेऽतो विधिरनवसरः सर्वथा चिन्त्यमानस्तस्माद् ब्रह्मात्मवस्तुन्यवसितमखिलं विद्धि वेदान्तवाक्यम् ॥ ४५५ ॥

नन्वस्तु ब्रह्मणि वाक्यात्परोक्षनिश्चये सति तज्ज्ञाने विधिरिति चेन्न तावत्तदेव ज्ञानं विधेयं सिद्धस्य साध्यत्वायोगात्, नापि तज्जातीयान्तरं तस्य पूर्वज्ञानवद्विधिं विनैव शब्दात्संभवात्, फलं च तस्य न दृश्यते मोक्षस्य विधिफलत्वेऽनित्यत्वापत्तेः, नापि साक्षात्कारस्तत्फलं तस्य प्रमाणैकफलत्वेनानैयोगिकफलत्वात्, अत एव साक्षात्कारोऽपि न विधेय इत्याशयेनाह। विज्ञात इति। शब्दतो विज्ञातेऽपीत्यर्थः। तस्य प्रत्ययेऽयं विधिरफलः स्यादिति संबन्धः। यदा परोक्षमपरोक्षं वा ब्रह्मणि ज्ञाते तज्ज्ञानं वाक्यावगतमपि न विधेयं त-

दात्यन्ताज्ञातब्रह्मकर्मकं ज्ञानमशक्यनिरूपणत्वात्सुतरां न विधेयमित्युक्तमेव स्मारयति । तद्वन्नाज्ञातेति । अज्ञातं ब्रह्म कर्म विषयो यस्य प्रत्ययस्य स विधिविषय इति बुद्धियोग्यो न स्यादित्यर्थः । उक्तरीत्या ज्ञानविधिविषयानिरूपणफलमाह । अतो ब्रह्मात्मप्रत्यय इति । अनवसरः अयुक्तः सर्वथा स्वरूपतो विषयतश्च ज्ञातत्वाज्ञातत्वाभ्यां परोक्षत्वापरोक्षत्वाभ्यां च विचारार्हविषयासंभवादयुक्त इत्यर्थः । विध्यसंभवफलमाह । तस्मादिति । कृत्स्नस्य कर्मकाण्डस्य नियोगार्थत्वेऽपि उक्तन्यायेन वेदान्तेषु तदसंभवात्तेषां सिद्धे ब्रह्मण्येव पर्य्यवसानमिति भावः ॥ ४५५ ॥

विरुद्धत्रिकस्य द्वयापत्तिदोषा-
न्न शक्यं विधानं धियः संग्रहीतुम् ॥
यथा वाजपेये गुणस्येह तद्व-
त्ततो नास्ति वेदान्तवाक्ये विधानम् ॥ ४५६ ॥

प्रकारान्तरेणापि सदृष्टान्तं ज्ञानविध्यसंभवमाह । विरुद्धत्रिकस्येति । विरुद्धानां त्रयाणां समूहो विरुद्धत्रिकं तस्येत्यर्थः । वक्ष्यमाणप्रकारेण विरुद्धत्रिकस्य यद् द्वयं तदापत्तिस्तत्प्रसङ्गः स एव दोषस्तस्माद्धियो विधानं संग्रहीतुम् अवगन्तुम्,वाजपेये वाजपेयनाम्नि कर्मणि, गुणस्य वाजपेयाख्यगुणस्य । दार्ष्टान्तिकमाह । इहेति। तद्वद्वाजपेयगुणवत् । ततो विरुद्धत्रिकद्वयापत्तेः । विधानं

ज्ञानस्येति शेषः । यथा वाजपेये वक्ष्यमाणविधया विरुद्धत्रिकद्वयप्रसङ्गेन गुणस्य विधानमङ्गीकर्तुं न शक्यते तद्वत्तत एव दोषादिह वेदान्तवाक्ये धियो विधानं नास्तीत्यर्थः ॥ ४५६ ॥

उद्दिश्यमानत्वमनूद्यमान-
भावः प्रधानत्वमितीदमेकम् ॥
तथाप्युपादेयविधेयशेष-
भावप्रभेदं त्रिकमन्यदत्र ॥ ४५७ ॥

किं तद्विरुद्धत्रिकद्वयमिति जिज्ञासायामाह । उद्दिश्यमानत्वमिति । किं चिद्विधातुं सिद्धवन्निर्दिश्यमानत्वमित्यर्थः। प्रागवगतस्य पश्चाद्वादोऽनुवादस्तद्विषयोऽनूद्यमानस्तस्य भावः । प्रधानत्वं शेषित्वमनूद्यमानभावश्च प्रधानत्वं चेति समाहारैकवचनम्, अनूद्यमानभाव इति सविसर्गः पाठः सुगमः । इति अनेन प्रकारेण एकं त्रिकमिति शेषः । उपादेयम् अनुष्ठेयतया निर्देश्यम् । विधेयम् अज्ञातं सज् ज्ञाप्यम् । शेषं गुणभूतं तेषां भावस्तत्प्रभेदो यस्मिंस्त्रिके तत्तथा, भावशब्दस्योपादेयादिभिः प्रत्येकं संबन्धः । अपिशब्दस्यान्यदपीति संबन्धः । अत्र त्रिकद्वयसमुदाये ज्ञानविधौ वाजपेयगुणविधौ चोद्दिश्यमानत्वमनूद्यमानत्वं प्रधानत्वं चेतीत्यमिदमेकं त्रिकं तथोपादेयत्वविधेयत्वशेषत्वप्रभेदमन्यदपि तद्विरुद्धं त्रिकं स्यादित्यर्थः ॥ ४५७ ॥

एकेन वाक्येन धियो विधानं
प्रत्यक्प्रमित्सा च यदि प्रतीचि ॥
त्रिकद्वयं तत्र विरुद्धमेतत्
प्रसज्यते कष्टमतः किमन्यत् ॥ ४५८ ॥

ननु वाजपेयपूर्वपक्ष इवात्मा वारे द्रष्टव्य इत्यत्र गुणविध्यश्रवणात् कथं विरुद्धत्रिकद्वयप्रसङ्गः, स च वाजपेय इव धात्वर्थेऽन्यत्र वेत्यपि न ज्ञायत इत्याशङ्क्य सत्यं गुणविधिप्रयुक्तं प्रकृते न वैरूप्यं किं त्वन्यथा, तथा हि ज्ञानविधिमभ्युपगच्छतः किं तेनैव वाक्यजन्यविधेयज्ञानेन ब्रह्मणः सिद्धिरभिमतोतान्येन,न तावदन्येन संभवति ब्रह्मणः प्रत्यक्षाद्ययोग्यत्वात् , नापि वाक्यान्तरजन्यज्ञानेन तस्यापि लिङादियुक्तत्वे प्रस्तुततुल्यत्वात् , तत्र लिङादिराहित्ये वा सिद्धमेव तर्हि वेदान्तानां ब्रह्मनिष्ठत्वं ततश्च प्रयोजनलाभ इति किं ज्ञानविधिना, तस्माद्यद्वाक्यजं ज्ञानं विधेयं तत एव ब्रह्मणः सिद्धिर्वक्तव्या , तत्र चोक्तवैरूप्यप्रसङ्ग इत्याशयेनाह । एकेन वाक्येनेति । धिय आत्मज्ञानस्य । प्रतीचः प्रमातुमिच्छा प्रत्यक्प्रमित्सा प्रमित्सितप्रत्यक्सिद्धिरित्यर्थः । यदि भवेदिति शेषः । तत्र तदा प्रतीचि एतद्विरुद्धत्रिकद्वयं प्रसज्यते, अतोऽस्मादन्यत्किं कष्टमनिष्टमित्यर्थः ॥ ४५८ ॥

उद्दिश्यमानं तदनूद्यमान-

भूतं प्रधानं च धियो विधाने ॥
प्रमीयमाणं पुनरात्मवस्तु
तदास्पदं स्यादितरत्रिकस्य ॥ ४५९ ॥

ननु विधेयज्ञानस्य ब्रह्मसाधकत्वे प्रतीचि किं त्रिकं कथं प्रसज्यत इति वीक्षायां विभज्य तदुभयत्रिकप्रसङ्गं दर्शयति । उद्दिश्यमानमिति । आत्मवस्तु धियो विधानेऽभ्युपगम्यमाने उद्दिश्यमानं भवति, एवं तदात्मवस्त्वनूद्यमानभूतं तथा प्रधानं चेत्येकस्य त्रिकस्य प्रतीचि प्रसङ्ग इत्यर्थः । इतरत्रिकप्रसङ्गमाह । प्रमीयमाणमिति । विधेयज्ञानेन प्रसाध्यमानं पुनस्तदात्मवस्त्वितरत्रिकस्योपादेयत्वविधेयत्वशेषत्वरूपत्रिकस्यास्पदं स्यादिति संबन्धः । एतदुक्तं भवति । मुमुक्ष्वभिलषितं प्रत्यग्ब्रह्मात्मकं मोक्षमुद्दिश्य मुमुक्षुरात्मानं जानीयादिति ज्ञानविध्यभ्युपगमे मोक्षात्मकब्रह्मणः सिद्धवन्निर्देश्यत्वरूपमुद्देश्यत्वं तावत्सिद्धं तच्च तस्य प्रागनवगतस्य न संभवतीति तदनुवादपूर्वमेव वक्तव्यम् इति तस्यानूद्यमानत्वं च स्यादेवमुद्दिश्यमानस्य फलतया प्राधान्यं चेत्येकं त्रिकम् । तथा विधेयज्ञानप्रमेयत्वे उद्देश्यत्वविरुद्धमुपादेयत्वं प्रमितिजन्यफलवत्तयानुष्ठेयत्वं तथा प्रागज्ञातस्यैव प्रमेयतया तस्यानूद्यमानत्वविरुद्धमज्ञाततत्वमेवं तस्य प्रधानत्वविरुद्धं विधेयज्ञानक्रियाविशेषणतयाऽप्रधानत्वं चेति मुमुक्ष्वभिलषितमोक्षोद्देशेन

ज्ञानविधौ ब्रह्मणि वैरूप्यं प्रसज्यत इति ॥ ४५९ ॥

प्रथमत्रिकं यजिनिगद्यगतं
गुणसंगतेरवगमे भवति ॥
चरमत्रिकं यजिनिगद्यगतं
फलसंगतेरवगमे तु पुनः ॥ ४६० ॥

इदानीं दृष्टान्तेऽपि विरुद्धं त्रिकद्वयं विविच्य दर्शयति । प्रथमत्रिकमिति । उद्दिश्यमानत्वादिकत्रिकमित्यर्थः । यजिनिगद्यो यागः तद्गतमित्यर्थः । गुणसङ्गतेरवगमे गुणविधिपरत्वाभ्युपगम इत्यर्थः । वाजपेयेन स्वाराज्यकामो यजेतेत्यत्र पूर्वपक्षे यज्यर्थं यागमुद्दिश्य वाजपेयाख्यगुणसंबन्धविधानेऽभ्युपगम्यमाने यागगतमुद्देश्यत्वादित्रिकं भवेत् । एवं फलसङ्गतेरवगमे स्वाराज्यफलोद्देशेन तद्यागविधाने चरमत्रिकमुपादेयत्वादित्रिकं भवेदेवेत्यर्थः ॥ ४६० ॥

सकृदुच्चरन्यजतिरेष गुणं
न फलं च सङ्गमयितुं क्षमते ॥
कथितत्रिकद्वयविरोधवशाद्
यजिवस्तुनीति ननु नीतिविदः ॥ ४६१ ॥

ननु फलं प्रति यागस्य साधनत्वं गुणं प्रति साध्यत्वमित्यन्यान्यनिरूपितयोस्तयोरेकत्र न विरोधः न हि दण्डसाध्येन घटेनोदकमानयेति न व्यवह्रियते, अत एव फलं प्रत्युपादेयत्वं फलसाधनतयाऽज्ञाततारूपं वि-

धेयत्वं च गुणं प्रत्युद्देश्यत्वानूद्यमानत्वाभ्यां न विरुद्धयत इत्याशङ्क्याह । सकृदुच्चरन्निति। सकृदुद्गच्छन्सकृच्छ्रूयमाण इति यावत्। सकृच्छ्रुतो हि यजतिः सकृदेव यागं प्रकाशयेत्, स यदि यागेन स्वाराज्यं भावयेदिति करणत्वविशिष्टतया यागमुपस्थापयति तदा करणेन तेन गुणस्य करणतयान्वयासंभवात्तदर्थं तदानीमेव तं साध्यतयाप्युपस्थापयतीति वाच्यम्, अन्यथाकाङ्क्षायोग्यतयोरसंभवात्, करणत्वं च तदा सिद्धसत्ताकस्यैव धर्मः साध्यत्वं च तदाऽसिद्धसत्ताकस्येति तयोरन्यानिरूपितयोरपि युगपदसंभवात्स्वरूपतः प्रतीतितश्च विरोध एव, अग्रे पूर्वमिति च शब्दाभावाद् गुणफलसमभिव्याहृतयजिना तत्साध्यत्वसाधनत्वविशिष्टयोरभेदप्रतीतेस्तयोरपि यौगपद्यस्य वक्तव्यत्वात्, दण्डसाध्येत्युक्तदृष्टान्तेपि विशिष्टयोर्विरोधः, एवमुपादेयत्वोद्देश्यत्वयोरपि सिद्धासिद्धधर्मयोर्युगपद्विरोध एव, तथा विधेयत्वानूद्यमानत्वयोरिति यजिना सकृत्प्रकाशिते वर्णितं त्रिकद्वयं नान्वेतुमर्हति । अथ करणत्वादित्रितयविशिष्टविषया प्रतीतिरन्यान्या च साध्यत्वादित्रिकविषयेति चेन्न । सकृच्छ्रुतयजेस्तदयोगात्, वैरूप्ये च तन्त्रानवतारादतः स्वाराज्यकामो यजेत यजेत वाजपेयेनेति यज्यावृत्त्या प्रतीतिद्वये वाक्यभेदः स्यात्, स चैकवाक्यत्वसंभवे न युक्तः, तस्माद्वाजपेयेने-

ति न गुणविधिः किं तु कर्मनामेति प्राचि तन्त्रे स्थितम्, तदिदं नीतिविद आहुरिति दर्शितम्। अक्षरार्थः स्फुट एव, सङ्गमयितुं यजिवस्तुनीति संबन्धः ॥४६१॥

इति वाजपेयगतनीतिवशा-
दपि नात्मवस्तुविषयावगतौ ॥
विधिरस्ति तेन विधिशून्यतया
परमात्मवस्तुविषयोपनिषत् ॥ ४६२ ॥

यथा वाजपेये वैरूप्यप्रसङ्गाद् गुणविधिर्न संभवति एवमात्मावगतावपि तत एव विधिर्न संभवतीत्युक्तमुपसंहरति। इति वाजपेयेति। विध्यसंभवफलमाह। तेनेति ॥ ४६२ ॥

सगुणवाक्यमपीह समन्वितं
भवति निर्गुणवस्तुनि सर्वशः ॥
न खलु निर्गुणवस्तुसमन्वयं
न सहते सगुणस्य समन्वयः ॥ ४६३ ॥

एवं निर्गुणवाक्यानां विधिशून्ये स्वप्रधाने ब्रह्मणि समन्वयो निरूपितः, इदानीं सर्वं खल्विदं ब्रह्मेत्यादिसगुणवाक्यानामपि निर्गुणे ब्रह्मणि समन्वये तात्पर्य्यमस्त्येव, वस्तुतो निर्गुणब्रह्मण एव मायया गुणवत्तया प्रतीतेरित्याशयेनाह। सगुणवाक्यमिति। इह वेदान्ते सर्वशः सर्वसगुणब्रह्मवाक्यमिति संबन्धः। ननु सगुणविषयवाक्यस्य निर्गुणतात्पर्यं विरुद्धमित्याशङ्क्य व-

क्ष्यमाणविधया नास्ति विरोध इत्याशयेनाह । न खल्विति । सगुणस्य तद्विषयवाक्यस्य ॥ ४६३ ॥

सत्यासत्यवपुस्तथाहि सगुणं ब्रह्मास्य विद्या तथा
तद्वत्तद्विषयस्य वेदवचसस्तात्पर्य्यमेवंविधम् ॥
तेनावान्तरमस्य वेदवचसस्तात्पर्य्यमन्यादृशं
चान्यन्निर्गुणवस्तुतत्त्वविषयं संकीर्त्त्यते भागशः॥४६४॥

ननु सगुणं कथं वस्तुतो निर्गुणं येन वाक्यस्य तत्र तात्पर्य्यं तत्रापि तद्वदित्याशङ्क्य निर्गुणे गुणसंसर्गस्याध्यस्तत्वेन तदधिष्ठानस्य तदापि निर्गुणत्वानपायादित्याशयेनाह । सत्यासत्येति । न खलु निर्गुणवस्त्वित्यादिनोक्तमर्थं तथाहीति परामृशति । तथाहि सगुणं ब्रह्म सत्यासत्यवपुस्तस्य विद्या तद्गोचरं ज्ञानं तथा सत्यासत्यवपुः सत्यासत्यविषयेति यावत् । तद्वज्ज्ञानवत्तद्विषयस्य सगुणब्रह्मविषयस्य वेदवचसस्तात्पर्य्यमप्येवंविधं सगुणनिर्गुणविषयं सगुणज्ञानस्योभयविषयत्वात्तज्जननसामर्थ्यरूपं तद्वाक्यतात्पर्य्यमपि तथेत्यर्थः । नन्वेकस्य वाक्यस्यैवं तात्पर्य्यभेदो न युक्तः तद्भेदप्रसङ्गादित्याशङ्क्यैकमेव सगुणविषयं तात्पर्य्यं विषयोपाधिना भिन्नम्, तत्रापि गुणांशस्य कल्पितत्वात्परमपुरुषार्थत्वाभावाच्चावान्तरम्, ब्रह्मांशे तु तत् परमपुरुषार्थसाधनतया सत्यविषयतया च परममिति न तात्पर्य्यस्य स्वतो भेदो न वा तदुभयत्र तुल्यमतो न

वाक्यभेद इत्याशयेनाह । तेनेति । अस्य सगुणविषयस्योन्यादृशं निर्गुणवाक्यतात्पर्य्याद्विलक्षणम् गुणांश इति शेषः। भागशो भिन्नविषयप्रयुक्तभेदेनेत्यर्थः॥४६४॥

रूप्यज्ञानं रजतमिदमित्येवमुत्पद्यमानं
सत्यासत्यं विषयमपृथग्दर्शयत्येकमेव ॥
तद्वन्मानं सगुणविषयं सत्यमिथ्यावभासं
संसृष्टार्थद्वयमिति दृढं दर्शयत्येकमेतत् ॥४६५॥

सगुणवाक्यजन्यं ज्ञानं ब्रह्मणि गुणवैशिष्ट्यं निर्गुणं ब्रह्म च विषयीकरोतीत्येतल्लौकिकभ्रमदृष्टान्तेनाह । रूप्यज्ञानमिति । एकमेव रूप्यज्ञानमिति संबन्धः । सत्यं चासत्यं चेति द्वन्द्वैकवद्भावः । अपृथक्कल्पिताभेदम् । दार्ष्टान्तिकमाह । तद्वन्मानमिति । सत्यमिथ्यावस्तुनोरवभासो यस्मान्मानात्तत्सत्यमिथ्यावभासम् । ननु किं पृथक्पृथक्तयोरवभासः नेत्याह । संसृष्टार्थद्वयमिति। परस्परं संसृष्टमर्थद्वयमित्यर्थः । इतिशब्दो दार्ष्टान्तिकोपसंहारार्थः। दृढं निःसंदिग्धम्। तद्वत् रूप्यज्ञानवत् एतदेकं सगुणविषयं सत्यमिथ्यावभासं मानं संसृष्टार्थद्वयं दृढं दर्शयतीति संबन्धः ॥ ४६५ ॥

तद्बुद्धिमात्रफलतैव च तत्परत्वं
वेदान्तवादिसमये न तु शेषभावः ॥
शेषत्वमक्षरकलापगताप्तिमात्रं
प्रत्येव नाध्ययनमर्थधियोऽपि शेषः ॥ ४६६ ॥

एवं वेदान्तानां सगुणनिर्गुणब्रह्मविषयाणां निर्गुणे ब्रह्मणि तात्पर्य्यमित्युपपादितम्,ननु भवन्मते वेदस्य तात्पर्य्यमेव न सिद्ध्यति तत्प्रतीतीच्छयोच्चरितत्वं हि शब्दे तात्पर्य्यम्, न चापौरुषेये तत्संभवतीत्याशङ्क्य तत्र तात्पर्य्यस्वरूपमाह । तद्बुद्धिमात्रेति । शब्दस्य यत्रार्थे तात्पर्य्यं संमतं तद्बुद्धिमात्रानुकूलशक्तिरेव तत्र तात्पर्य्यमित्यर्थः । इयमेव शब्दस्य तात्पर्य्यं न तु वक्तुरिच्छा,वेदे तदभावात् । लौकिकवाक्येऽपि तद्वृत्तिशक्तिविशेषस्यैव तत्तात्पर्य्यत्वे संभवति व्यधिकरणेच्छायास्तत्कल्पनायोगात्,इच्छयोच्चरितत्वस्यापि सापेक्षत्वान्निरपेक्षशक्तिविशेषस्यैव तस्योचितत्वात्, लौकिकवाक्ये वक्तुरिच्छा तात्पर्यग्राहकतयाऽपेक्षितेति नोन्मत्तादिवाक्ये तत्प्रसक्तिरिति लोके वेदे च तद्बुद्धिमात्रफलतैव तात्पर्य्यमित्यर्थः। अर्थवादादीनां तदर्थप्रतीतिफलत्वेऽपि विधावेव तात्पर्य्याभ्युपगमात्तत्रातिव्याप्तिपरिहाराय मात्रेत्युक्तम् । एवं च तेषां तद्बुद्धिमात्रं न फलमपि तु विधिवाक्यार्थबुद्धिरिति न स्वार्थे तात्पर्य्यप्रसङ्ग इति भावः । महातात्पर्य्याभिप्रायं वा मात्रपदम्, बुद्ध्यन्तराशेषफलतद्बुद्धिफलकत्वं महातात्पर्य्यम्,प्रत्येकमङ्गप्रधानवाक्यगतावान्तरतात्पर्य्ये प्रसक्तिवारणाय बुद्ध्यन्तराशेषेति । अङ्गप्रधानवाक्यैकवाक्यरूपमहावाक्यस्यैव महातात्पर्य्यं तच्चोक्तरूपमेवेति नासंभवः । नन्वध्य-

यनविधेरर्थावबोधफलत्वाद्वेदस्यार्थावबोधशेषतैवार्थे तात्पर्य्यमिति जैमिनीयैराश्रितम्, एवं भवद्भिरपि तदेव किमिति नाङ्गीक्रियते इत्याशङ्क्याह । वेदान्तवादीति । वेदान्तप्रामाण्यवदनशीलानां सिद्धान्त इत्यर्थः । कुत इत्यत आह । शेषत्वमिति । अध्ययनस्येति शेषः । अक्षरकलापः अक्षरसमूहस्तद्गताप्तिमात्रं प्रत्येवेत्यर्थः । अध्ययनविधेः स्वाध्यायावाप्तिमात्रफलतया तां प्रत्येव तस्य शेषत्वमिति न तद्बलाद्वेदस्यार्थावबोधशेषत्वमित्यर्थः । एवकारव्यवच्छेद्यमाह । नाध्ययनमिति ॥ ४६६ ॥

तच्छेषभावमनपेक्ष्य च तत्फलं स्या-
दाधानवन्न हि तदङ्गमिह क्रतूनाम् ॥
अग्न्यङ्गमेव हि तदिष्टमथापि तस्य
सर्वक्रतुष्वधिकृतिः फलमभ्युपेतम् ॥ ४६७ ॥

नन्वक्षराप्तेरपुरुषार्थत्वात्कथमध्ययनविधेस्तच्छेषत्वम्, न चावाप्तेभ्योऽक्षरेभ्योऽर्थावबोधो भवतीति वाच्यम्, तर्ह्यर्थावबोधशेषत्वमेवोचितमिति चेन्न । पश्वन्नादिवत्परम्परया पुरुषार्थस्यापि भाव्यत्वसंभवेनाध्ययनस्य तच्छेषत्वात्, वस्तुतोऽध्ययनस्यार्थावबोधः फलं तथापि न तस्य तच्छेषत्वं मानाभावात्, अर्थावबोधफलवादिनाप्यध्ययनस्य तथावगतं स्वाध्यायशेषत्वमपरित्यज्यैव तत्फलशेषत्वस्यैव वक्तव्यत्वात्, तत्फलता-

यास्तच्छेषत्वे नाव्याप्तत्वाच्चेत्याशयेनाह । तच्छेषभावमिति । तदर्थज्ञानं फलमस्याध्ययनस्य तत्तत्फलम् । तत्फलस्यापि तच्छेषत्वे उदाहरणमाह । आधानवदिति । अग्न्याधानवदित्यर्थः । दृष्टान्तं निषेधमुखेन विशदयति । न हीति । हिर्हेतौ । तदाधानम् । क्रतूनां दर्शपूर्णमासादियागानाम् । यस्मादाधानं न दर्शादिक्रतुप्रकरणे विहितमनारभ्याधीतत्वात्, नापि पर्णतान्यायः स्वतो व्यापाररूपत्वात् अग्निशेषत्वाच्च, तस्मात्तद्दर्शादेर्नाङ्गं किन्त्वग्नीनिति श्रुत्याऽग्नीनां शेषित्वावगमात्तदङ्गमेव तदिष्टम् , एवमपि तदधीनाग्न्यायत्ता उत्तरक्रतूनां सिद्धिः साग्नीनुद्दिश्यैव दर्शादिविधानात् , त्रैवर्णिकानां तेष्वधिकृतिश्च तत्फलं मीमांसकैरभ्युपेतमिति न तत्फलता तच्छेषत्वनियता येनाध्ययनस्यापि तच्छेषत्वं भवेदिति भावः ॥४६७॥

मन्त्रार्थवादगतमध्ययनं तदर्थ-
मात्रप्रतीतिफलमित्यपि नाभ्युपेतम् ॥
विद्धरर्थबुद्धिमनुसृत्य फलावसानां
सा तद्गतीति तदतत्परतोपपत्तिः ॥ ४६८ ॥

तद्बुद्धिमात्रफलतैवेति तात्पर्य्यलक्षणे मात्रचो व्यावर्त्यमर्थवादादीति यदवादिष्म तदर्थमर्थवादादेः स्वार्थे तात्पर्य्याभावं दर्शयति । मन्त्रार्थवादेति । इषेत्वेत्यादिर्मन्त्रः, वायुर्वै क्षेपिष्ठेत्यादिरर्थवादः, तद्विषयक-

मध्ययनं तस्य मन्त्रादेः शब्दशक्त्या प्रतीयमानो योऽर्थस्तन्मात्रे मन्त्रादिजन्या या प्रतीतिस्तदेव फलं यस्य तत्तथा नाभ्युपेतम् , मीमांसकादिभिरिति शेषः । कुत इत्यत आह । विद्ध्यर्थबुद्धिमिति । शाखाच्छेदवायव्यश्वेतालम्भनादिविद्ध्यर्थबुद्धिं स्वतः फलावसानामनुसृत्य तद्द्वारेण सा मन्त्राद्यर्थप्रतीतिस्तद्वती फलवतीति यतोऽतस्तस्यार्थवादादेरतत्परता स्वार्थपरताभावस्तस्योपपत्तिरित्यर्थः । मन्त्रार्थवादाभ्यां यत्स्वार्थे ज्ञानं जन्यते तदेव तत्फलमिति केनापि नाभ्युपेयते येन तयोः स्वार्थपरता भवेत्किं तु मन्त्रस्यानुष्ठेयार्थस्मृतिद्वारार्थवादस्य विधेयप्राशस्त्यधीद्वारा फलावसानत्वमिति तत्रैव तयोस्तात्पर्य्यमित्यस्वार्थपरतोपपन्नेति भावः ॥ ४६८ ॥

सप्रयोजनकबुद्धिकारणं
वाक्यमाहुरिह तत्परं बुधाः ॥
सप्रयोजनकबुद्धिशेवधी-
हेतुमन्यपरमाश्रयन्ति च ॥ ४६९ ॥

नन्वर्थवादादेः स्वार्थप्रतीतिजनने किमिति सा प्रतीतिर्न तत्फलं तज्जन्यस्यैव तत्फलत्वादतस्तयोः स्वार्थेपि तात्पर्य्यं भवेदित्याशङ्क्याह । सप्रयोजनकेति । इह लोके वेदे च शब्दजन्या प्रतीतिर्यद्विषया सती समीहितपर्य्यवसायिनी भवति स शब्दस्तत्पर इति बुधा

आहुरित्यर्थः । एवमतत्पराणामपि स्वरूपं बुधसंमतमाह । सप्रयोजनकबुद्धिशेषेति । अर्थवादार्थबुद्धिः प्रशस्तविधेयबुद्धिद्वारा फलवती भवति ; एवं मन्त्रार्थधीरनुष्ठेयार्थस्मृतिद्वारा तथा, एवं च सप्रयोजनकबुद्धिं प्रति शेषभूता याऽर्थवादादिजन्या धीस्तद्धेतुं वाक्यमन्यपरं विधेयपरमेव चोऽवधारणे न स्वार्थपरमाश्रयन्तीत्यर्थः । यस्मिन्नर्थे वाक्यजन्यमपि ज्ञानं पुरुषार्थहेतुर्न भवति तद्वाक्यं तत्परं न भवति परं तु यमन्यमाश्रित्य फलपर्य्यवसायि स्यात्तत्परमेवेत्यर्थः ॥ ४६९ ८

मन्त्रार्थवादवचसामपि गोचरेषु
सौवेष्ववान्तरमुशन्ति च तत्परत्वम् ॥
के चित्त्रयीशिरसि खिन्नधियो मुनीन्द्रा-
स्तद्बुद्धियो विधिषु शेषतया निवेशात् ॥४७०॥

एवं मीमांसकानां मते अर्थवादादिमात्रस्य स्वार्थे तात्पर्य्याभावमुक्त्वा स्वमते मानान्तराविरुद्धतदसिद्धार्थार्थवादादेः स्वार्थेऽप्यवान्तरतात्पर्य्यमस्तीत्याह । मन्त्रार्थवादवचसामिति । देवताविग्रहादेः स्वर्गादेश्च प्रतिपादकमन्त्रार्थवादवचसामित्यर्थः।सौवेषु स्वीयेषु।अवान्तरम् फलवद्बुद्धिशेषबुद्धिफलकत्वमवान्तरत्वम्।तत्परत्वं तात्पर्य्यं तच्च फलवद्बुद्धिफलकत्वमिति विभागः । उशन्ति अङ्गीकुर्वन्ति । के चिद्वैयासिकमतानुसारिणः । त्रयीशिरसि वेदान्ते । खिन्नधियः परिश्रमशा-

लिनः । ननु किमिति तर्हि मन्त्रादेर्विध्यर्थे तात्पर्य्यं कल्प्यते तदभावे च विधिना त्वेकवाक्यत्वादिति न्यायविरोधस्तत्राह । तद्वदिति । स्वार्थवद्विधिष्वपि मन्त्रार्थवादवचसां तत्परत्वमित्यनुषङ्गः । तत्र हेतुः, धियः शेषतया निवेशादिति । मन्त्रादिजन्यतदर्थज्ञानस्य ध्यानाग्निहोत्रादिविधेयानुष्ठानशेषतया निवेशादित्यर्थः । अत एव मन्त्राद्यर्थज्ञानं फलवद्भवेत् । अथ वा मन्त्रादेः स्वार्थेऽवान्तरतात्पर्य्ये हेतुमाह । तद्वद्धिय इति । मन्त्राद्यर्थविशिष्टधिय इत्यर्थः । तथा च मन्त्रार्थज्ञानस्यापि विधिद्वारा फलवत्त्वादुक्तं तत्र तात्पर्य्यलक्षणमस्त्येव,अन्यद्वारा च तदिति विधितात्पर्य्यापेक्षया तदवान्तरं चेत्यर्थः । तत्तदिति पाठे तत्तद्धियो देवताविग्रहस्वर्गादिधिय इत्यर्थः । देवताधिकरणे देवतानामपि ब्रह्मविद्याधिकारश्रवणात्तेषामपि मन्त्रार्थवादप्रतीतविग्रहादिमत्त्वं बादरायणादिभिराश्रितमिति मन्त्रादेः स्वार्थेऽवान्तरतात्पर्य्यं तत्संमतम्, परमतात्पर्य्यं तु मन्त्रादिजन्यतदर्थज्ञानस्य विध्यर्थे शेषतया प्रवेशात्तत्रैवेति भावः ॥ ४७० ॥

श्रेयःसाधनता लिङर्थ इति च प्रागुक्तमत्यादरा-
च्छ्रेयःसाधनयागदानहवनाद्यर्थैकनिष्ठं ततः ॥
सर्वं कर्मवचो नियोगपरता तस्यापि नालोचने
वक्तव्या किमुतास्य वेदशिरसः सा नेति भूयोऽपि नः ॥ ४७१ ॥

एवं वेदान्तानां सिद्धे ब्रह्मणि तात्पर्य्यमुक्तं तात्पर्य्यं च शब्दस्य स्वाभिमतं निरूपितमिदानीं वेदस्य सिद्धार्थनिष्ठत्वे जैमिनीयवचनविरोधं परिहर्तुं प्रागुक्तमर्थमनुवदति । श्रेयःसाधनतेति । न इत्यादौ द्रष्टव्यम् । अत्यादरान्न्यायपूर्वम् । ततः किं तत्राह । श्रेयःसाधनयागेति । ततः श्रेयःसाधनतायाः लिङर्थत्वव्युत्पादनात्सर्वं हि कर्मवाक्यं लिङाद्यर्थनिष्ठं लिङादेश्च श्रेयःसाधनमर्थ इत्युक्तमेवं च सर्वं कर्मवचः श्रेयःसाधनयागाद्यर्थनिष्ठमेवावश्यमभ्युपेयमित्यर्थः । एकेति नियोगनिष्ठतानिराकरणं कृतं सूचयति । ततश्च नः अस्मान्प्रति भूयः पुनरपि तस्य कर्मवचसोऽप्यर्थालोचने नियोगपरता न वक्तव्या न शङ्कितुं युक्ता अस्य वेदशिरसः सा नियोगपरता न वक्तव्येति किमुतेति सम्बन्धः ॥ ४७१ ॥

श्रेयःसाधनयागदानहवनाद्यर्थेषु कार्य्यात्मसु
सर्वं कर्मवचः प्रमाणमिति तु ग्राह्यं वचो जैमिनेः ॥
भाष्यं पश्यत शाबरं स्फुटतरं यो यागमित्यादिकं
श्रेयःसाधनयागमात्रवचनं धर्माभिधानं वदत् ॥४७२॥

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यादिसूत्रैः सिद्धार्थस्यापि वेदस्य जैमिनिर्नियोगनिष्ठत्वमवोचत्तत्कथं वेदस्य तदर्थताशङ्का न कर्त्तव्या, कथं वा वेदान्तानां सिद्धार्थत्वमित्याशङ्क्य, जैमिनेराम्नायशब्दः कर्मभागमात्रपरस्तदर्थस्यैवाथातो धर्मजिज्ञासेति

विचार्य्यतया तदुपक्रमात्तत्रापि तदभिमता क्रिया श्रेयःसाधनं यागादिरेव तदन्यस्यासंभवादित्याशयेनाह । श्रेयःसाधनेति । कार्य्यात्मसु कृतिसाध्यस्वभावेषु । सर्वं कर्मवच इति सूत्रस्थाम्नायशब्दार्थ उक्तः । तु शब्दोऽवधारणे । सर्वं कर्मवाक्यं श्रेयःसाधनयागादिकार्येषु प्रमाणमित्येतावत्येवार्थे जैमिनेर्वचो ग्राह्यं न तु सर्वः स्वाध्यायो नियोगे प्रमाणमिति तत्सूत्रार्थो ग्राह्य इत्यर्थः । ननु किंबलादेवं तत्सूत्रं व्याख्यायत इत्याशङ्क्य जैमिनिनोक्तचोदनाप्रमेयधर्मस्य तद्भाष्यकारेण यागादिरूपत्वाभिधानबलादित्याशयेनाह । भाष्यं पश्यतेति । स्फुटतरं स्पष्टार्थम् । भाष्यमेवाह । यो यागमिति । योयागमनुतिष्ठति तं धार्मिकमित्याचक्षत इत्येवंरूपम् । नन्वत्र धार्मिकमिति यागकर्तुर्नियोगनिष्ठत्वमेवोच्यते धर्मशब्दस्य नियोगात्मापूर्ववचनत्वादित्याशङ्क्याह । श्रेयःसाधनयागमात्रेति । धर्म इति शब्दः श्रेयःसाधनयागमात्रस्य वचनमिति वदच्छाबरं भाष्यमिति संबन्धः । यागानुष्ठातुर्धार्मिकत्वकथनाद्यागमेव भाष्यकारो धर्म इति वदतीति भावः ॥ ४७२ ॥

पुल्लिङ्गतापि घटते क्रतुवाचिनोऽस्य
सूक्ष्मात्मना भवति हि क्रतुरप्यपूर्वम् ॥
तेन क्रतोरुपचरन्नभिदां पुमान्स्यात्
क्लीबस्तु धर्ममिति हि क्रतुवाचकत्वे ॥ ४७३ ॥

ननु चोदनालक्षणोऽर्थो धर्म इति पुल्लिङ्गो धर्मशब्दो जैमिनिना प्रयुक्तः स चापूर्ववचन एव पुल्लिङ्गधर्मशब्दस्य तदेतत्क्षत्रस्य क्षत्रं यद्धर्म इत्यादिवेदे तत्रैव प्रयोगात् अतो भाष्यं तदनुसारेणैव नेतव्यम्, यद्यपि क्रतावपि धर्मशब्दोऽस्ति तथापि स नपुंसक एव तानि धर्माणीति तस्यैव तत्र श्रुतौ दर्शनादित्याशङ्क्याह। पुल्लिङ्गतापीति। भाष्यकारोक्त्यैव सूत्रार्थस्य प्रत्येतव्यत्वादेतद्भाष्यबलात्पुल्लिङ्ग एव धर्मशब्दोऽपूर्ववाची तत्तादात्म्यात्क्रतावुपचरितो जैमिनिनेति अपूर्वस्य क्रतुसूक्ष्मरूपत्वेन हेतुना क्रतोरपूर्वेणाभिदामभेदमुपचरन्पुमान्पुल्लिङ्गः स्याद्धर्मशब्द इति शेषः। क्रतुवाचकत्वे तु विवक्षिते धर्ममिति क्लीबः स्यान्न त्वौपचारिकप्रयोगेऽपि, अतः सूत्रकारस्य पुल्लिङ्गधर्मशब्दप्रयोगोऽपि तस्य नियोगाशयं न सूचयतीति भावः॥ ४७३ ॥

इष्टाभ्युपायवचनो लिङिति स्थितौ च
स्याद्भावनावचनतास्य यदा तदा च॥
कर्तुर्भवेदधिकृतिस्तु नियोगवादे
स्वाम्ये स्थिते सति भवेदथ कर्तृभावः॥४७४॥

ननु सूत्रकारेणैव षष्ठाद्ये स्वर्गकामपदस्य नियोज्यपरत्वं वदता प्रत्ययार्थो नियोगोऽभ्युपेतो नियोगकार्यताबोद्धुरेव नियोज्यत्वेन तेन विना व्युत्पादनायोगादित्याशङ्क्य सत्यं प्राभाकरैरेवं तदधिकरणार्थ उक्तः

स न तथाधिकारित्वव्युत्पादनस्यैव स्वर्गकामपदस्य फलपरत्वव्युत्पादनेन तत्र विवक्षितत्वात्। नन्वधिकारित्वमेव स्वर्गकामस्य नियोज्यत्वपूर्वकमिति चेत्सत्यं नियोगवादे तथैव, श्रेयःसाधनस्य वाक्यार्थत्ववादे तस्य कर्त्रन्वयपूर्वक एव तदन्वय इत्याशयेनाह । दृष्टाभ्युपायेति । स्थितौ मते। प्रधानपदार्थाकाङ्क्षानुसारेण पदान्तराणामर्थबोधकत्वं वाच्यम्। लिङाद्यर्थः श्रेयःसाधनं च प्रधानं स च धात्वर्थः कर्त्तृव्यापारात्मक्रियारूपः क्रिया च कर्तारं प्रथममपेक्षत इति क्रियाक्षिप्तं कर्त्तारं स्वर्गकामपदं विशिनष्टीति प्रथमं स्वर्गकामः कर्तृत्वेनान्वयं प्राप्य पश्चाच्छ्रेयसो भोक्त्रपेक्षायां स एव स्वर्गकामः स्वाभिलषितस्वर्गसाधने धात्वर्थे मदर्थमिदं कर्मेत्यवगच्छन्नधिकारित्वमपि प्रतिपद्यते तदिदमाह। कर्त्तुर्भवेदधिकृतिरिति। किं च जैमिनीयमताभियुक्तैर्भट्टैरप्येवमाश्रितत्वात्तस्यापि तदेव संमतमित्याशयेनाह । स्याद्भावनेति । अस्य लिङादेर्भावनायामपि क्रियारूपत्वेनोक्तरूपेणैव स्वर्गकामोऽन्वेतीति भावः । तर्हि नियोगवादे कथं तदन्वयवैलक्षण्यमित्याशङ्क्याह । नियोगेति । तत्र हि नियोगाकाङ्क्षयैव स्वर्गकामस्यान्वय इति ममायं नियोग इति स्वामित्वं प्रतिपद्यैव तद्विषये यागेऽपि नियोगबलादधिकारान्वयं तत्पूर्वकं कर्त्तृत्वं च प्राप्नोतीति तत्र वैपरीत्यमिति भावः। स्वा-

म्ये स्वर्गकामस्येति शेषः । अथानन्तरम् ॥ ४७४ ॥

इष्टाभ्युपायो विधिरात्मनीच्छा-
मुत्पादयन्प्रेरकतामुपैति ॥
इष्टाभ्युपायेऽवगते लिङादे-
रिच्छा फलादेनमुपैति सद्यः ॥ ४७५ ॥

ननु नियोगानङ्गीकारे कथं स्वर्गकामस्य यागे प्रवृत्तिः स हि तत्प्रेरित एव प्रवर्त्तत इत्याशङ्क्य पुरुषार्थकामनाप्रयुक्ता हि तत्प्रवृत्तिः पुरुषार्थश्च श्रेयःसाधनं यागादिरतस्तदधीनचिकीर्षयैव स प्रवर्त्तते न तु नियोगेनापुरुषार्थेनेत्याशयेनाह । इष्टाभ्युपाय इति । विधीयत इति विधिः । आत्मनि स्वस्मिन्यागादेः श्रेयःसाधनत्वेन लिङादिनावगमात्तच्चिकीर्षा भवति ततः प्रवर्त्तत इत्यर्थः । ननु यागादेः क्लेशात्मकत्वात्कथं नियोगं विना स्वतन्त्रस्य तस्येच्छा भवेदित्याशङ्क्य स्वर्गादेःस्वत इष्यमाणत्वात्तस्य साधनानुष्ठानमन्तरेण। सिद्धेस्तत्साधनतया लिङाद्यवगते यागादौ तत्फलेच्छया तच्चिकीर्षा भवतीति नोक्तदोष इत्याशयेनाह । इष्टाभ्युपायेऽवगत इति । लिङादेः सकाशादिष्टाभ्युपायेऽवगत इति संबन्धः । फलात्फलेच्छानन्तरमेव तत्साधनतयावगते चिकीर्षा भवतीति फलादित्युक्तम् । एनं धात्वर्थमिच्छा सद्यस्तत्क्षणमेव नियोगनिमित्तमनपेक्ष्य उपैति तत्रेच्छा भवेदित्यर्थः । फलेच्छा साधनेच्छाहेतुः साधनेच्छा च प्रवृ-

त्तिहेतुः सा च साधनज्ञानाधीनेति न नियोगः प्रवृत्तावुपयुज्यत इति भावः ॥ ४४५ ॥

नियोगकोट्यापि नरो न कश्चि-
दिच्छां विना दुःखनिदानभूतम् ॥
करोति कर्मेह पुमर्थरागात्
प्रवृत्तिरेवेति हि राजमार्गः ॥ ४७६ ॥

एवं स्वपक्षे यागादौ स्वतन्त्रचेतनप्रवृत्तिमुपपाद्य नियोगवादे तदसंभवमाह। नियोगकोट्यापीति। अनेकनियोगैरित्यर्थः । नरः स्वतन्त्रः स्वर्गकामादिः स्वतः क्लेशात्मके यागादौ स्वाभिलषितस्वर्गासाधने इच्छाऽसंभवात्स्वतन्त्रस्तन्न करोतीत्यर्थः । इह जगति । स्वमते प्रागुक्तरीत्या यागादौ प्रवृत्तौ लोकानुसारमाह। पुमर्थ इति। भोजनादिव्यापारे दुःखसाधनेऽपि पुमर्थसाधनतयावगते इच्छया लोकप्रवृत्तिरस्त्येवेति राजमार्गः सर्वदोषरहितः प्रसिद्धः पन्थाः निर्दुष्टोयमुपाय इत्यर्थः ॥४७६॥

इष्टाभ्युपायस्य च कार्यभावः
प्रयत्ननिष्पाद्यतयोपपन्नः ॥
स चावसेयो वचनाल्लिङादेः
प्रत्यक्षतो रागनिबन्धनस्तु ॥ ४७७ ॥

नन्विष्टसाधनताज्ञानस्य चन्द्रादौ सत्त्वेऽपि न कश्चित्तत्र प्रवर्त्तत इति कथं तत्प्रवर्त्तकमित्याशङ्क्य, कृतिसाध्येष्टसाधनताज्ञानं प्रवर्त्तकं तच्च न चन्द्रादावस्ती-

ति न तत्र तस्य व्यभिचार इत्याशयेनाह । इष्टाभ्युपायस्येति । च उक्तशङ्कानिवर्त्तकः । कार्यभावः कार्यत्वम् । ननु कृत्युद्देश्यस्यैव कार्यत्वं तच्च स्वतः पुरुषार्थस्यैवेति न धात्वर्थस्य तदस्तीत्याशङ्क्याह । प्रयत्ननिष्पाद्यतयेति । तृतीयेत्थंभावे प्रयत्ननिष्पाद्यतारूपः स तस्योपपन्न इत्यर्थः । ननु कार्यभावो लिङादिना ज्ञायते चेत्स एव लिङर्थोस्तु किमिष्टाभ्युपायत्वस्यापि तदर्थत्वकल्पनयेत्याशङ्क्य प्रयत्ननिष्पाद्यतारूपकार्यभावज्ञानस्यातिप्रसङ्गेनाप्रवर्त्तकत्वात्प्रवर्त्तकस्यैव लिङर्थत्वात्तद्विशेषितेष्टसाधनत्वं लिङर्थ इत्याशयेनाह । स चेति । कृतिसाध्येष्टाभ्युपाय एवेत्यर्थः । ननु यागादेरिष्टसाधनतया कृतिजनकेच्छाविषयतारूपकृत्युद्देश्यताप्यस्तीति तदात्मकमेव कार्यत्वं लिङर्थः किं न स्यादित्याशङ्क्य तस्य प्रत्यक्षसिद्धत्वान्न शब्दार्थत्वमित्याह । प्रत्यक्षत इति । रागनिबन्धनः फलेच्छानिबन्धनः, फलेच्छयैव हि साधनेच्छा भवतीति तथोक्तम् ॥ ४७७ ॥

कार्यत्वमिच्छावशवर्त्ति किं चि-
दिष्टाभ्युपाये निजमस्य किं चित् ॥
निजं लिङादेरवसेयमस्य
साक्षिप्रसादादितरप्रतीतिः ॥ ४७८ ॥

उक्तं कार्यताद्वैविध्यं विशदयति । कार्यत्वमिति । इष्टाभ्युपाये यागादौ, किं चित्कृत्युद्देश्यतारूपं कार्यत्व-

म्। इच्छावशवर्त्ति फलरागनिमित्तम्। निजं स्वाभाविकं कृतिसाध्यत्वरूपम्, तस्य धात्वर्थस्वरूपक्रियात्वप्रयुक्तत्वान्निजत्वम्। अस्येष्टाभ्युपायस्य। कार्यत्वं विभज्य तत्र लिङर्थमाह। निजमिति। अस्येतीष्टाभ्युपायत्वं सूचितम्. कृतिसाध्येष्टाभ्युपायत्वं लिङाद्यवसेयमित्यर्थः। प्रत्यक्षतो रागनिबन्धन इत्युक्तं स्पष्टयति। साक्षिप्रसादादिति। प्रत्यक्षत इत्यर्थः। इतरप्रतीतिः। कृत्युद्देश्यतारूपकार्यत्वप्रतीतिः। चिकीर्षितत्वं हि कृत्युद्देश्यत्वं चिकीर्षा तु रागः स च जायमान एव नियतविषयः सन् साक्षिणावभास्यमान एव जायते मनसावसेयतया वेति प्रत्यक्षत इतरप्रतीतिरित्यर्थः॥ ४७८॥

जानात्यर्थे लिङ्पदं गौणमाहु-
र्जानात्यर्थः कर्तृतन्त्रो न हीष्टः॥
यागाद्यर्थे कर्तृतन्त्रे हि मुख्यो
लिङ्लोड़ादिः श्रेयसो हेतुभूते॥ ४७९॥

ननु कृतिसाध्येष्टसाधनत्वं कथं लिङाद्यर्थः आत्मानं पश्येदित्यादौ लिङस्तदर्थत्वायोगान्न हि ज्ञानं कृतिसाध्यमित्याशङ्क्य, सत्यमत एव ज्ञाने न विधिः किं तु तत्र लिङ्पदं गौणमेवेत्याह। जानात्यर्थ इति। ज्ञान इत्यर्थः। तत्र हेतुः। जानात्यर्थः कर्तृतन्त्र इति। हिर्हेतौ। यस्माज्जानात्यर्थः कर्तृतन्त्रः कर्तुरिच्छाधीनो न तस्मात्तत्र लिङ्पदं गौणमित्यर्थः। तर्हि यागादाव-

जानात्यर्थे लिङ्पदं गौणमाहु-
र्जानात्यर्थः कर्तृतन्त्रो न हीष्टः ॥
यागाद्यर्थे कर्तृतन्त्रे हि मुख्यो
लिङ्लोडादिः श्रेयसो हेतुभूते ॥ ४७९ ॥

ननु कृतिसाध्येष्टसाधनत्वं कथं लिङाद्यर्थः, आत्मानं पश्येदित्यादौ लिङस्तदर्थत्वायोगान्न हि ज्ञानं कृतिसाध्यमित्याशङ्क्य, सत्यमत एव ज्ञाने न विधिः किं तु तत्र लिङ्पदं गौणमेवेत्याह । जानात्यर्थ इति । ज्ञान इत्यर्थः । तत्र हेतुः । जानात्यर्थः कर्तृतन्त्र इति । हिर्हेतौ । यस्माज्ज्ञानात्यर्थः कर्तृतन्त्रः कर्तुरिच्छाधीनो न तस्मात्तत्र लिङ्पदं गौणमित्यर्थः । तर्हि यागादावपि तत्तथैवास्त्वित्याशङ्क्य मुख्यत्वे संभवति तस्य न गौणत्वं न्याय्यमित्याह । यागाद्यर्थ इति ॥ ४७९ ॥

जानात्यर्थे श्रेयसो हेतुभाव-
भागोऽबुद्धो बोध्यते लिङ्पदेन ॥
यागाद्यर्थे श्रेयसो हेतुभावो
मुख्यो बोध्यः कर्तृतन्त्रो न गौणः ॥ ४८० ॥

केन तर्हि मुख्यार्थगुणेन ज्ञाने लिङ्पदप्रवृत्तिरिति जिज्ञासायामाह । जानात्यर्थे श्रेयस इति । लिङर्थे हि कृतिसाध्यत्वं श्रेयःसाधनत्वं चेति भागद्वयमस्ति तत्रात्मज्ञाने सर्वानर्थमूलाविद्यानिवृत्तिरूपश्रेयःसाधनत्वभागो लिङ्पदेनान्यतोऽनवगतो बोध्यत इति कृ-

तिसाध्यताभागाभावादेव तत्तत्र गौणमित्यर्थः। यागादौ तु तद्द्वयमस्तीति तत्र तन्मुख्यमेवेति प्रागुक्तं विशदयति। यागाद्यर्थ इति। कर्तृतन्त्र इत्यनेन यागादौ कृतिसाध्यत्वमपि सूचितमतस्तत्र मुख्य एव लिङर्थ इत्यर्थः॥ ४८०॥

यागाद्यर्थे मुख्यता यद्वदस्य
ब्रह्मज्ञानस्यान्तरङ्गेषु तद्वत्॥
तर्कादीनां कर्तृतन्त्रत्वहेतो-
र्ज्ञानादर्वाग्गौणता हेत्वभावात्॥ ४८१॥

तर्हि किं वेदान्ते ज्ञान इव न क्वापि विधिरित्याशङ्क्य ज्ञानोपाये श्रवणादौ पुरुषेच्छावशवर्तिनि सोऽस्तीति सदृष्टान्तमाह। यागाद्यर्थे मुख्यतेति। मुख्यता मुख्यार्थता। अस्य लिङादिपदस्य। अन्तरङ्गेषु प्रवृत्तिपर्य्यन्तमुमुक्षानन्तरमवश्यानुष्ठेयेषु श्रवणादिषु। तत्र हेतुमाह। तर्कादीनामिति। श्रवणं ह्यद्वितीये ब्रह्मणि वेदान्तानां तात्पर्य्यावधारणहेतूपक्रमोपसंहारैक्याद्युपपत्तिप्रतिसंधानम्। एवं वियदादेश्चेतनं कर्तारं विना कार्यत्वाद्यनुपपत्तिज्ञानं मननम्, तच्च ब्रह्मणि तर्क एवेति तथोक्तम्। एवमद्वैतब्रह्मणो निरन्तरानुसन्धानरूपं निदिध्यासनमपि कर्तृतन्त्रमेव। तथा च ब्रह्मज्ञानसाधने श्रवणादौ तर्करूपेण कृतिसाध्यताभागस्यापि भावाद्यागादाविव लिङादेर्मुख्यार्थतेति भावः। नन्वद्वैत-

ब्रह्मावगतिसमये क्रियाकारकाद्यभावात्कथं लिङादिमुख्यार्थसंभवस्तत्राह। ज्ञानादर्वागिति। अविद्यादशायां विधिनिमित्तं सर्वमस्त्येव। न चैवमात्मनः श्रवणादिविधिशेषत्वापत्तिः, तेषामेव तच्छेषत्वेनात्मनोऽनन्यशेषत्वादिति भावः॥ ४८१॥

भूतस्य भव्याय यथोपदेशः
क्रियापरे वस्तुपरे तु काण्डे॥
न हीष्टमेवं विपरीतमस्मिन्
भव्यस्य भूताय सदोपदेशः॥ ४८२॥

ननु भूतं भव्यायोपदिश्यत इति शबरस्वामिवचनात्सिद्धस्य सर्वस्य भव्यार्थत्वप्रतीतेः कथमात्मनोऽनन्यशेषत्वमित्याशङ्क्य प्रागुक्तमर्थं व्यवधानेन तद्विस्मरणसंभवात् स्मारयति। भूतस्येति। व्रीहिकपालादेरित्यर्थः। वस्तुपरे ब्रह्मपरे। विपरीतं भूतभव्यपरत्वविपरीतम्, भव्यस्य यज्ञादेः श्रवणादेश्च, भूताय सिद्धस्वरूपमोक्षाय॥ ४८२॥

भव्यप्रतीतावुपयोगभाजो
भवन्ति कार्त्स्न्येन च सिद्धवादाः॥
क्रियाप्रधाने न तथात्र किं तु
भूतप्रतीतौ खलु भव्यवादाः॥ ४८३॥

उक्तविभागमेवोपपत्तित उपपादयंस्तद्वाक्ययोरपि तथैव शेषशेषितेत्याशयेनाह। भव्यप्रतीताविति। व्री-

हिकपालादेर्हि साक्षात्परंपरया वा यागादिक्रियानिर्वृत्तिद्वारा कार्यार्थत्वमस्तीति क्रियाप्रधाने कर्मकाण्डे भूतं भव्यार्थमुक्तमिति न्यायमूलं तद्भाष्यं तद्विषयतयोपपन्नमत्र तु तन्न्यायाभावान्न तद्भाष्यं प्रवर्त्तत इत्याशयेनाह । न तथेति । अत्र ब्रह्मकाण्डे अद्वैतब्रह्मणः कुत्रापि कथमपि कार्ये उपयोगाभावात्प्रत्युत ब्रह्मसाक्षात्कार एव श्रवणादेर्भव्यस्य पर्य्यवसानमिति तन्न्यायवैपरीत्यमेव युक्तमिति भावः ॥ ४८३ ॥

भव्यप्रतीतौ न हि कश्चिदर्थो
भूतप्रतीतौ पुनरस्ति मुक्तिः ॥
श्रोतव्य इत्यादि ततो विधानं
भूतोपदेशानुगुणं समस्तम् ॥ ४८४ ॥

नन्वात्मप्रतीतेर्भव्यतया तदर्थश्रवणादेः कथं भूतशेषत्वमित्याशङ्क्य तत्प्रतीतेरपि तदभिव्यञ्जकतया तदर्थत्वात्तद्धेतोरपि तदर्थत्वमेवेत्याशयेन भूतप्रतीतौ खलु भव्यवादा इत्युक्तमेव विवृणोति । भव्यप्रतीतौ न हीति । अर्थो मुख्यप्रयोजनम् । फलितमाह । श्रोतव्य इति । ततः श्रवणादेः स्वतो मुख्यप्रयोजनत्वात् । श्रोतव्य इत्यादिरूपं समस्तं विधानं सिद्धाद्वैतब्रह्मोपदेशानुगुणमिति तत्तच्छेषमित्यर्थः ॥ ४८४ ॥

आदाय मुख्यगुणलाक्षणिकप्रवृत्ती-
र्भव्यप्रतीतिजनकैः सह भूतवादाः ॥

संबन्धिनो विधिवचःसु तथात्र सर्वे
भव्यार्पणाः परिबृढप्रतिपादकेन ॥ ४८५ ॥

एवं भव्यानां भूतानां च काण्डद्वयेऽपि परस्परं विपरीतं शेषशेषित्वमुपपाद्य तद्वाक्ययोस्तु वायुर्क्षेपिष्ठत्वादेर्भव्यार्थत्वाभावेन तदभावमाशङ्क्य तदुपपादयति । आदायेति । विधिवचस्सु विधिप्रकरणेषु ये भूतवादा भूतार्था अर्थवादादयस्ते मुख्यगुणलाक्षणिकवृत्तीरादाय मुख्याद्यन्यतमया वृत्त्या स्वर्गाद्यादित्यादिसादृश्यप्राशस्त्यादि बोधयन्तो भव्यप्रतीतिजनकैरनुष्ठेयार्थविधायकैः सह सम्बन्धिनो भवन्ति सम्बध्यन्ते यथा तथात्र काण्डे भव्यार्पणा भव्यबोधकाः श्रोतव्यादिशब्दाः परिबृढस्य प्रभोर्ब्रह्मणः प्रतिपादकेन वाक्येन सम्बन्धिन इत्यनुषङ्गः ॥ ४८५ ॥

सिद्धार्थवादिवचनेषु न गौणतादि-
दोषाय कर्मपरवाक्यगतेषु यद्वत् ॥
कार्यार्थवादिवचनेषु न गौणतादि-
दोषस्तथोपनिषदीति समानमेतत् ॥ ४८६ ॥

एवं ब्रह्मादिशब्दानां वेदान्तगतभव्यार्थशब्देभ्यः प्राधान्यमुपपाद्य तत्फलं गुणे त्वन्याय्यकल्पनेतिन्यायेन ब्रह्मादिपदानुगुण्येनैव भव्यं नेयमिति सदृष्टान्तमाह । सिद्धार्थवादीति । कर्मपरवाक्यानि विद्ध्युद्देशास्तद्गतानि तदेकवाक्यतामापन्नानि यानि सि-

द्वार्थबोधकपदानि तेष्वित्यर्थः । न गौणतादिर्दोषायेति । तेषां गुणभूतार्थत्वाद् गुणवचने च प्रधानानुरोधेन गौणतादिर्न दोषायेत्यर्थः । दार्ष्टान्तिकमाह । कार्यार्थवादीति । ब्रह्माप्येति ब्रह्मैव भवतीत्यादिवचनेष्वित्यर्थः । एतद् गुणेऽन्याय्यवृत्तिकल्पनम् ॥ ४८६ ॥

मानेन मेयावगतिश्च युक्ता
धर्मस्य जाड्याद्विधिनिष्ठकाण्डे ॥
मेयेन मानावगतिस्तु युक्ता
वेदान्तवाक्येष्वजडं हि मेयम् ॥ ४८७ ॥

किं च यथा मानमेयभावः काण्डद्वये विपरीत एवं भूतभव्ययोर्गुणप्रधानभाववैपरीत्यमपि न्याय्यमेवेत्याशयेनाह । मानेनेति । श्रुत्यादिप्रमाणेनेत्यर्थः । मेयस्य धर्मस्यावगतिः । चोऽवधारणे । मानेन सम्बध्यते । तत्र हेतुः । धर्मस्य जाड्यादिति । मेयेन स्वप्रकाशचैतन्येनैव वेदान्तप्रतिपाद्येन मानस्य वेदान्ततज्जन्यवृत्त्यादेरवगतिर्युक्ता चैतन्येनैव हि जडस्यावगतिर्घटादौ दृष्टेत्यर्थः । मेयान्मानावगतौ हेतुं मनसि निधायाह । वेदान्तेति । यद्यपि स्वाविद्यानिवृत्तौ वेदान्तं तज्जन्यवृत्तिं चापेक्षते ब्रह्म, तथापि स्वसिद्धौ नापेक्षते अप्रतिबद्धस्वप्रकाशसाक्षिणस्तदनपेक्षत्वाज्जडं च सर्वं तद्भास्यमिति वेदान्ताद्यपि तेनैवावगन्तव्यमित्यर्थः ॥ ४८७॥

कर्मप्रधानेऽतिगते च काण्डे

वाक्यत्वमाख्यातपदप्रयुक्तम् ॥
ब्रह्मप्रधाने श्रुतिमस्तकेऽस्मि-
न्नामप्रधानं वचनं समस्तम् ॥ ४८८ ॥

नन्वस्तिर्भवन्तीपरः प्रयोक्तव्य इतिकात्यायनवचनात् क्रियापदनिमित्तैव पदानामेकवाक्यता, वेदान्ते च न क्रियापदं भवद्भिरिष्यते, अतो वेदान्तवाक्येष्वजडं हि मेयमित्यनुपपन्नमित्याद्याशङ्कां निराकृतामपि विस्मरणशीलं प्रति पुनर्निराकरोति । कर्मप्रधान इति । अतिगते अतिक्रान्ते । नामप्रधानं ब्रह्मात्मादि सुबन्तपदप्रधानम् । कात्यायनवाक्यं हि वृद्धव्यवहारमूलम्, वृद्धाश्च यत्र क्रियां तत्संसृष्टं वा प्रतिपिपादयिषन्ति तत्रैव चाख्यातपदं प्रयुञ्जते यत्र तु नैवं किं तु संबन्धिविशेषं प्रकारविशेषं वा विजिज्ञापयिषन्ति तत्र देवदत्तस्येदं गृहं कुसुमितं वनमिति च तेन विनैव प्रयुञ्जतेऽतः कर्मकाण्डस्य क्रियाप्राधान्यात्तत्रैव वाक्यत्वं क्रियापदनिमित्तमिति कात्यायनस्याप्याशयः । ब्राह्मे काण्डे तु नामार्थप्राधान्यान्नामपदमेवैकवाक्यतायां निमित्तमित्याशयः ॥ ४८८ ॥

कार्यप्रधानमखिलं च पदं सुबन्त-
माख्यातमेव फलतः खलु कर्मकाण्डे ॥
तद्वत्तिङन्तमपि वेदशिरःसु सर्वं
नामैव तद्धि परिनिष्ठितवस्तुनिष्ठम् ॥ ४८९ ॥

ननु वेदान्तेऽप्यस्त्यादिक्रियाश्रवणात्सर्वत्र क्रियापदनिमित्तमेव वाक्यत्वमस्त्वित्याशङ्क्य यथा कर्मकाण्डे सुबन्तमपि पदं भव्यार्थं फलत आख्यातव्यावहारार्हमेव भवति एवमत्र तिङन्तमपि फलतो नामैवातः साध्यार्थक्रियापदाभावान्नामप्रधानमेव वेदान्तवाक्यमित्याशयेनाह । कार्यप्रधानमिति । अनुष्ठेयार्थप्रधानं सुबन्तं सुबन्तमप्याख्यातम् आख्यातव्यवहारार्हम् फलतोऽनुष्ठेयार्थप्रतीतेः । तिङन्तं तिङन्ततया प्रतीयमानम् । नाम नामव्यवहारार्हम् । अत्र हेतुस्तद्धीति ॥४८९॥

आग्नेयमाश्विनमथैन्द्रमितीदृशं हि
सर्वं सुबन्तमपि भव्यपरं प्रसिद्धम् ॥
साऽस्येति तद्धितसमन्वितसन्निधाने
नामैव तद्भवति यद्भवतीति तद्वत् ॥ ४९० ॥

किं नाम पदं भव्यार्थं सदाख्यातं दृष्टान्ते विवक्षितमितिजिज्ञासायामाह । आग्नेयमिति । अग्निर्देवताऽस्येत्याग्नेयः पुरोडाशः । एवमाश्विनादावपि । तथा च सुबन्तेनापि तेन द्रव्यदेवतासंबन्धद्वाराऽनुष्ठेययागप्रतीतेस्तदाख्यातवद्भव्यपरमित्यर्थः । इदानीमाख्यातपदस्यापि नामत्वे दृष्टान्तमाह । सास्येतीति । सास्य देवतेति सूत्रेण विहितो यस्तद्धितस्तत्समन्वितं यदाग्नेयादिपदं तत्सन्निधाने भवतीति यत्पदं तन्नामैव भवति। तदर्थस्यान्यव्यापारत्वे नाननुष्ठेयत्वादिति यद्वत्तद्वदित्यर्थः ॥४९०॥

अस्त्यस्म्यसीति च तिङन्तपदानि सन्ति
वेदान्तवाक्यनिलयानि तथापि तानि ॥
नाख्यातशब्दनिजशक्तिधुरं वहेयु-
रस्तित्वमात्रविषया हि निषक्तिरेषाम् ॥ ४९१ ॥

तद्वदिति सूचितं दार्ष्टान्तिकमाह । अस्त्यस्म्यसीति । आख्यातशब्दस्य या निजा शक्तिस्तस्या धुरं भवयार्थप्रकाशं न वहेयुरित्यर्थः । कुतो न वहेयुस्तत्राह । अस्तित्वमात्रेति । अस्तिप्रकृत्यर्थमात्रनिष्ठा ह्येषां पदानां निषक्तिः संबन्ध इत्यर्थः ॥ ४९१ ॥

पूर्वापरीभूतपदार्थनिष्ट-
माख्यातमाख्यातविदो वदन्ति ॥
कूटस्थसत्तावगतिप्रधान-
माख्यातवत्साधु तिङन्तमाहुः ॥ ४९२ ॥

कस्तर्हि आख्यातपदस्य मुख्योऽर्थो यस्य नाख्यातशब्दनिजशक्तिधुरं वहेयुरित्यनेनास्त्यादिशब्दात्प्रतीतिर्निषिध्यत इत्याकाङ्क्षायामाह । पूर्वापरीभूतेति । गच्छति पचतीत्यादिना हि गम्यादिधात्वर्थः पूर्वापरीभूतानेकक्षणनिचयरूपः प्रतीयत इति स एवाख्यातान्तपदस्य मुख्योऽर्थं इत्याख्यातविदो वैयाकरणा वदन्तीत्यर्थः । एवं चात्मस्वरूपसत्तापर्यवसाय्यस्त्याद्यपि आख्यातवत्साधु शब्ददोषरहितं तिङन्तमात्रं भवति न तु पचत्यादिरिव मुख्यार्थमित्याह । कूटस्थसत्तेति ॥ ४९२ ॥

अस्तित्ववस्तुविषयोपनिषन्निषक्ति-
राश्रीयते यदि तदा प्रमितं प्रमेयम् ॥
तस्यास्तवापतति मानमितत्वमेव
ह्यस्तित्वमात्मगतमभ्युपयन्ति धीराः ॥४१३॥

कूटस्थसत्तावगतिमात्रनिष्ठमस्त्यादिसमभिव्याहृतमपि वेदान्तवाक्यमित्युक्तमाक्षिपति । अस्तित्वेति । अस्तित्ववस्तु सत्ता, वेदान्तानां तन्निष्ठत्वे मानान्तरप्रमितप्रमेयता तत्सिद्धानुवादता तव प्रसज्येत । कुतस्तत्राह । मानमितत्वेति । मानविषयत्वमेव हि सर्वत्रास्तित्वमिति धीरा धृष्टाः प्राभाकरा अङ्गीकुर्वन्तीत्यर्थः । आत्मगतमिति तु प्रस्तुताभिप्रायम् ॥ ४१३ ॥

अथ वा मितियोग्यतास्तिता
निरवद्यास्तु समस्तवस्तुषु ॥
परमात्मनि तत्प्रतीतये
सकलं वेदशिरः प्रवर्त्तताम् ॥ ४१४ ॥

ननु मानविषयत्वस्यास्तित्वे सुषुप्त्यादावात्मादेरसत्त्वापत्तिरित्यरुचेराह । अथ वेति । निरवद्या निर्दुष्टा, सुषुप्त्यादावात्मादेः सत्त्वोपपत्तेरित्यर्थः । एवं चास्त्यर्थनिष्ठत्वे वेदान्तानां परमात्मनि तदनुवादायैव सकलं वेदशिरः प्रवर्त्ततां प्रवर्त्तेत तच्चानुपपन्नम् । अप्रामाण्यप्रसङ्गादस्त्यर्थनिष्ठा वा तेषां मा भवत्विति क्रियानिष्ठैवास्त्वित्याशयः ॥ ४१४ ॥

तदसुन्दरमात्मसंविदो-
रपि सत्ता भवताभ्युपेयते ॥
न तयोर्विषयत्वहीनयो-
र्मितियोग्यत्वमितित्वसंभवः ॥ ४९५ ॥

सिद्धान्ती तद् दूषयति । तदसुन्दरमिति । एवं वदता प्राभाकरेणाप्यात्मनस्तत्समवायिज्ञानस्य च सत्ताभ्युपेयेतैव । सैवं सति न सिद्ध्येत्तयोरविषयत्वात् । अत एव तद्योग्यताभावाज्ज्ञानस्य स्वप्रकाशत्वादात्मनस्तदाश्रयतया त्वया भानस्याभ्युपेयत्वादित्यर्थः ॥ ४९५ ॥

क्षितिजलदहनानिलाम्बराणां
जनिमनुमाय विभक्तताबलेन ॥
जगति हि जनिमद्विभज्यमानं
घटघटिकादि समीक्ष्यते समस्तम् ॥ ४९६ ॥

नन्विदं समन्वयनिरूपणं निरालम्बनं कर्तुं कथं शक्यम्, न च ब्रह्मैवालम्बनमिति वाच्यम्, तस्याप्रसिद्धत्वात्, न हि गवादिवत्तत्प्रसिद्धमस्ति, न च समन्वयनिरूपणात्प्राक् शब्दतोऽपि तत्सिद्धम्, न चासंभावितं प्रमाणेन निश्चेतुं शक्यम्, तदुक्तम्, संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुना न तस्य हेतुभिस्त्राणमुत्पतन्नेव यो हत इति, न च जगत्कार्यतल्लिङ्गानुमानात्तत्सिद्धिः, समन्वयनिरूपणवैयर्थ्यात्, महापृथिव्यादेः कार्यत्वासिद्धेश्चेति । मैवम् । प्रपञ्चाख्यकार्यलिङ्गत-

र्कसंभावितचेतनकारणस्यैवाद्वयनित्यशुद्धज्ञानानन्दादिस्वरूपेण वेदान्तैः प्रतिपाद्यमानत्वान्नोक्तदोष इत्याशयेन जन्माद्यस्य यत इति सूत्रन्यायं व्युत्पादयितुमुपक्रमते,तत्र श्रोतृजिज्ञासानुरोधेन साक्षात्पुरुषार्थतया च प्रत्यगभिन्ने ब्रह्मणि तत्त्वमादिवाक्यार्थे न्यायतो निरूपिते तस्यैव तदर्थं तत्पदवाच्यतल्लक्ष्यस्वरूपन्यायजिज्ञासानुसारेण व्युत्क्रममाश्रित्य द्वितीयसूत्रन्यायमवतारयन् प्रथमं चेतनं जगत्कारणमनुमातुं कार्यत्वलिङ्गस्य वियदादिपक्षधर्मत्वसिद्ध्यर्थं वियदादेः कार्यत्वं साधयति । क्षितिजलदहनेति। जनिमुत्पत्तिम् । विभक्तताया भिन्नत्वस्य बलं जनिव्याप्तिपक्षधर्मत्वयोर्ज्ञानं तेन । तत्र तस्य पक्षधर्मत्वं सिद्धमिति व्याप्तिं दर्शयति । जगतीति।हिर्हेतौ । यस्माज्जगति विभज्यमानं घटघटिकादि समस्तं जनिमत्समीक्ष्यते ततो विभक्तताबलेन क्षितिजलादीनां जनिमनुमाय , तर्कयन्त्यधिकारिणश्चेतनकारणमित्यग्रिमेण संबन्धः । क्षित्यादिमहाभूतानि जायन्ते विभक्तत्वाद् घटादिवत् । ननु ब्रह्मणि व्यभिचारस्तस्यापि प्रपञ्चाद्विभक्तत्वात् । न च परमार्थतो विभक्तत्वं हेतुस्तत्र नास्तीति वाच्यम् । पक्षदृष्टान्तयोरपि सिद्धान्ते तदभावादिति चेन्न । स्वसमानसत्ताकविभक्तत्वस्य हेतुत्वात् । प्रपञ्चे तस्य सत्त्वाद् ब्रह्मणि च तन्नास्तीति नोक्तदोषः । न चैवमप्यविद्यादौ व्यभि-

चार इति वाच्यम्। साध्यस्यापि तत्र सत्त्वादध्यस्तता हि जन्म वियदादेः साध्यम्, न तु प्रागसतः सत्तायोगित्वम्, तस्य क्वाप्यभावात्। न चाध्यस्तत्वमपि घटादौ परस्यासंप्रतिपन्नमिति वाच्यम्, स्वार्थानुमानस्यैवमप्यविरोधात्प्रसिद्धभ्रमस्य परं प्रति दृष्टान्तत्वसंभवाच्च। न चैवं वियदादेरप्यज्ञानवदध्यस्तत्वसंभवेन ततश्चेतनकारणानुमानं वक्ष्यमाणं न स्यादिति वाच्यम्। चेतनाधिष्ठानत्वस्यैव वक्ष्यमाणप्रतिज्ञयाभिप्रेतत्वात्। न चाप्रयोजकतास्य हेतोरिति वाच्यम्। श्रुत्यवधृताद्वितीयत्वस्य विपक्षे बाधप्रसङ्गात्। अथ वा वियदादिमहाभूतानि भूतत्वे सत्यनादीनि न भवन्ति विभक्तत्वाद् घटादिवत्। इदं च साध्यं ब्रह्मण्यज्ञाने च विशेषणाभावकृतमस्त्येव, परप्रसिद्धं च निषेध्यमिति न कोऽपि दोषः। विपक्षे बाधकं चोक्तमेवात्राप्यनुसन्धेयमिति भावः ॥ ४९६ ॥

क्षितिजलदहनेषु तत्प्रदेशाज्
जनिसहितानुपलभ्य तद्बलेन ॥
क्षितिजलदहनत्वलिङ्गमार्गा-
दपि जनिमेष्वनुमाय तर्कयन्ति ॥ ४९७ ॥

किं च महापृथिवी जन्मवती क्षितित्वात् खातपूरितक्षित्येकदेशवत्। एवं महज्जलं जन्मवज्जलत्वाच्चन्द्रकान्तान्निःसृतजलवत्। एवं मथनादुद्भूतदहनादि-

दृष्टान्तेन महतस्तेजःप्रभृतेरपि तदनुमेयमित्याह । क्षितिजलदहनेष्विति । स्पष्टम् ॥ ४९७ ॥

जनिमदभवदेतच्चेतनादेव हेतो-
र्घटवदिति पुनस्तत्कारणे चेतनत्वम् ॥
अनुमिमत उदर्के कार्यतालिङ्गतोऽमी
जगति हि परिदृष्टं चेतनादेव कार्यम् ॥४९८॥

एवं कार्यत्वहेतोः पक्षधर्मत्वे सिद्धे तद्धेतुकं तर्कयन्तीति सूचितं चेतनकारणानुमानं दर्शयति । जनिमदिति । एतन्महापृथिव्यादीति पक्षनिर्देशः । जनिमदिति तत्र सिद्धे हेतुनिर्देशः । पुनःशब्दः सिद्धान्ते विशेषद्योती । तमेव विशेषमाह । चेतनादेवेति । विमतमुपादानाभिन्नचेतनप्रभवं कार्यत्वात्सम्मतवत् । घटादेरपि सिद्धान्ते तथात्वान्न साध्यवैकल्यम् । सुखादिकं वा परं प्रति दृष्टान्तोऽस्त्विति तत्कारणे चेतनत्वं तस्य पृथिव्यादेश्चेतनकारणकत्वम् । उदर्के पक्षे । हेतुसिद्ध्यनन्तरं मुमुक्षवोऽनुमिमत इत्यर्थः । तत्रापि घटादौ कुलालादिजन्ये उक्तसाध्यव्याप्तिरस्तीत्याशयेनाह । जगतीति । हिः प्रसिद्धौ कार्यलिङ्गमनुमानमपि चेतनकारणस्वरूपनिर्धारणे न निरपेक्षं समर्थमपि तु तत्स्वरूपं प्रसाधयन्त्याः श्रुतेरुक्तविधया चेतनकारणमुपस्थापयदर्थं सम्भावयतीति तत्र तर्क एवेति तर्कयन्तीति सूचितम् ॥ ४९८ ॥

जगदुदयनिमित्तं चेतनं किं नु नाना
किमु भवतु तदेकं सर्ववित् सर्वशक्ति ॥
इति भवति तु पश्चात् कारणे चेतनेऽस्मि-
न्ननवगतिनिमित्तः संशयो दुर्निवारः ॥ ४११ ॥

नन्वनुमानाच्चेतनकारणसिद्धौ वैशेषिकादिमत इव तदेव सर्वज्ञसाधकं तत्र प्रमाणमस्तु किं तस्य तर्कताभ्युपगमेन ततश्च वेदान्तवैयर्थ्यमित्याशङ्क्य यद्यप्युक्तविधया तेन सामान्यतश्चेतनरूपं किं चिज्जगतो निदानं सिद्ध्यति तथापि तस्मिन्नेकत्वनानात्वसंशयानिवृत्तेस्तत्सर्ववित्सर्वशक्ति किं वा विपरीतमित्यादिसंशयो न निवर्त्तेत तन्निदानस्य तदेकत्वाज्ञानस्यानिवर्त्तितत्वात्, एवं जगदुपादानस्य निर्विशेषत्वादिसिद्धिरपि ततो न स्यादिति तर्क एव तदित्याशयेनाह । जगदुदयेति । जगत्कारणे चेतने अनुमानात्सिद्धेऽपि तस्मिन्पश्चात्तत्स्वरूपानवगतिनिमित्त इतीत्थं संशयो दुर्निवारो भवत्येवेत्युक्तं संशयप्रकारमभिनयेनाह । जगदुदयनिमित्तमिति । यदि तदेकं भवेत्तदा फलितं सिद्धान्तलाभमाह । सर्ववित्सर्वशक्तीति । ननूक्तानुमानादेव लाघवसहकृतात्कारणैकत्वसिद्धिस्तत्सर्वज्ञं सर्वशक्ति चेति सिद्ध्यतीति कथमनुमानानन्तरं तदेकत्वादिसंशय इति चेत् । सत्यम् । यद्यनुमानात्तदेकत्वं निश्चीयेत स न सम्भवति लोके च विचित्रप्रासादादेर्बहु-

कर्त्रेकत्वदर्शनेन तदनुसारिलिङ्गेन तद्विपरीतनिश्चयसम्भवात् । सम्भवल्लघुविषये हि लाघवतर्कोऽपि प्रवर्त्तेत । न च लोके कर्त्तॄणामसर्वज्ञासर्वशक्तितया विचित्रकार्य एकस्य कर्तुरसम्भवेऽपि सर्वज्ञेश्वरस्य तत्सम्भवाल्लाघवावकाशोऽस्तीति वाच्यम् । एवं सत्यन्योन्याश्रयात्कथमपि लाघवप्रवृत्तेः प्राक् तस्मिन्सर्वज्ञत्वादिसम्भावनातुषस्याप्यभावात् । किं च कर्त्रैकत्वं यद्येकत्वसंख्या तर्हि तन्नानात्वेऽपि सा सिद्ध्यतीति कुतस्ततः सर्वज्ञत्वादिसिद्धिः । यदि च कर्त्रभेदस्तदेकता तर्ह्यस्मादनुमानात्प्राक् क्षितिजलादीनां कर्त्रसिद्धेस्तत्प्रतियोगिकभेदस्यानुपस्थितस्याभावो नानुमितिविषयः स्यात् । न हि प्रतियोगिज्ञानं विना भेदस्तदभावो वा सिद्ध्येत् । तस्मादनुमानात्कर्त्रैकत्वानिश्चयात्संशय एवेति सर्वज्ञत्वादिसिद्धिः कथमपि ततो न भवेदिति भावः ॥ ४९९ ॥

श्रुतिवचनविशेषाच्चेतने कारणेऽस्मिन्
यत इति निरवद्यादेकताधीरथागात् ॥
प्रकृतिरिति च तस्मिन् कारणे पञ्चमीयं
जनयति दृढबुद्धिं तद्विधानादिहैव ॥ ५०० ॥

कथं तर्हि भवन्मतेऽपि कारणैकत्वं सिद्ध्येदित्याशङ्क्य यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति जगत्कारणवाक्यगताद्य-

त इति यच्छब्दैकवचनादनुमानसिद्धकारणानुवादगतात्तत्सिद्धिरित्यभिप्रेत्याह । श्रुतिवचनेति । अथोक्तानुमानानन्तरं यत इति श्रुतिवचनविशेषादेकवचनरूपान्निरवद्यादनुमानोक्तशङ्काकलङ्कशून्यादस्मिन् चेतने जगत्कारण एकताधीरगादागच्छेत् । यद्यपि यत इति बहुत्वसाधारणम् तथापि येन जातानीत्युपरितनैकवचनेन तस्याप्येकवचनत्वं निर्णीतमिति भावः । नन्वनुमानसिद्धचेतनकारणानुवादियच्छब्दैकवचनाज्जगत्कर्त्तुरेकत्वं सिद्ध्येन्न तु भवदभिमतं तस्य तदुपादानैक्यमपीत्याशङ्क्याह । प्रकृतिरिति । चकारेणैकताधियं समुच्चिनोति । तस्मिन्कारणे इयं पञ्चमी प्रकृतिरिति च दृढबुद्धिं जनयतीति संबन्धः । तत्र हेतुमाह । तद्विधानादिति । जनिकर्त्तुः प्रकृतिरितिसूत्रेणेह प्रकृतित्वे पञ्चमीविधानादेवेत्यर्थः । यद्यपि पुत्रात्प्रमोदो जायत इत्यादिप्रयोगानुरोधेन निमित्तोपादानसाधारणीह प्रकृतिः तथापि प्रकृतेऽपेक्षितस्य जगदुपादानत्वस्य ततः प्रतीतिसंभवान्न कश्चिद्दोषः । प्रत्युतापेक्षितनिमित्तत्वमपि ततः सिद्ध्यतीति गुण एव । श्रुत्यन्तरे च तदैक्षत बहु स्यां प्रजायेयेत्येकस्यैव चेतनस्योभयविधं कारणत्वं स्पष्टं श्रूयते । ननूपादानस्य नानात्वनियमादुपादानकर्त्रोश्च तथात्वादेतद्बाधितमिति चेत् । न तावदुपादानत्वं नानात्वनियतं रूपोपादाने घटा-

दौ व्यभिचारात् । न च द्रव्योपादानेऽयं नियमः, एकस्या एव रज्ज्वाः सर्पाद्यधिष्ठानत्वात् । रज्जुसर्पादेरिव वियदादेरप्यज्ञातब्रह्मविवर्त्तत्वेनाविशेषात् । एवमेकस्मादात्मन उपादानाद्द्विविधस्वप्नप्रपञ्चोदयादपि नास्ति सिद्धान्तेऽयं नियमः । अत एवोपादानकर्त्तृभेदोऽपि न नियतः । किं च सर्वत्र कार्ये चैतन्यस्यैकस्यैव कुलालादिशरीरावच्छेदेन निमित्तत्वं मृदाद्यवच्छेदेनोपादानत्वमिति तद्भेदे नास्त्येवोदाहरणं परमतेऽपि । देवदत्तो जानातीच्छतीत्यादिप्रतीत्यनुरोधेन ज्ञानाद्युपादानस्यैव कर्त्तृत्वमेवमीश्वरात्मघटसंयोग एकस्यैव तदुभयमिति नैव पराप्रसिद्धमस्माभिरुच्यत इति जगत्प्रकृतिरेका तदधिष्ठात्री चेति सिद्धम् ॥ ५०० ॥

एकत्वमेकवचनादवगम्यमानं
यच्छब्दवाच्यनिलयं यत इत्यमुष्मिन् ॥
वाक्ये जगत्प्रकृतिगामितया न विद्मः
संख्यां विभक्त्यभिहिते वचनं हि नाह ॥५०१॥

एका प्रकृतिरित्येतदाक्षिपति । एकत्वमिति । यत इत्यमुष्मिन्वाक्ये एकवचनादवगम्यमानमेकत्वं यच्छब्दवाच्यनिलयं यच्छब्दप्रकृत्यर्थमात्राश्रयं जगत्प्रकृतिगामितया विभक्त्यर्थजगत्प्रकृतित्वविशिष्टाश्रयतया न विद्मः । कुतः वचनं विभक्त्यभिहिते स्वाभिधेयां संख्यां नाह न वदेद्यत इत्येकवचनस्य पञ्चमीविभक्तिप्रतिपा-

द्यप्रकृतित्वविशिष्टे स्वाभिधेयसंख्यां वक्तुमसामर्थ्यादेका प्रकृतिरिति धीः कुतो भवेदिति भावः ॥ ५०१ ॥

न हि विभक्त्यभिधेयपदार्थगं
वचनमाह निजं विषयं क्वचित् ॥
वचनवाच्यगतं न वदन्ति च
स्वमभिधेयमशेषविभक्तयः ॥ ५०२ ॥

वचनस्य विभक्त्यर्थविशिष्टस्वार्थाभिधायित्वं न क्वापि दृष्टमिति न प्रकृतिरेकेति धीः संभवतीत्याह । न हि विभक्तीति । अस्तु तर्हि विभक्तेर्वचनार्थविशिष्टान्वितस्वार्थजगत्कारणत्वाभिधायित्वं तथा चैका प्रकृतिरिति धीर्युक्तैवेत्याशङ्क्याह । वचनवाच्येति । एवं चैकवचनस्य यद्वाच्यमेकत्वं तद्विशिष्टगतं विभक्त्यर्थप्रकृतित्वं प्रस्तुते न सिद्ध्येदित्यर्थः ॥ ५०२ ॥

प्रातिपदिकार्थगतमेव वचनानि
स्वंस्वमभिधेयमभिधातुमलमर्थम् ॥
प्रातिपदिकार्थगतमेव निजमर्थं
वक्ति च विभक्तिरपि नेह वचनार्थे ॥ ५०३ ॥

ननु किमिति विभक्तिवचनाभ्यां परस्परार्थान्वितस्वार्थाभिधानं न कर्त्तव्यमित्याकाङ्क्षायामाह । प्रातिपदिकार्थेति । प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमस्य व्युत्पत्तिसिद्धत्वाद्वचनविभक्त्योः प्रकृत्यर्थान्वितस्वार्थाभिधान एव सामर्थ्यं न तु वचनस्य विभ-

क्त्यर्थान्वितार्थाभिधानेऽपि । एवं विभक्तेरपि न वचनार्थान्विताभिधानेऽपि । तयोः प्रत्ययत्वाविशेषादिति भावः ॥ ५०३ ॥

पशुनेति पदे तृतीयया
करणत्वं हि पशोर्निवेद्यते ॥
वचनेन पशोरिहैकता
न पुनः सा करणस्य कथ्यते ॥ ५०४ ॥

ननु पशुना यजेतेति वाक्यात्पशुरेकः करणमिति प्रतीयते तद्वदेका जगत्प्रकृतिरिति शाब्दी प्रतीतिः किमिति न भवेदित्याशङ्क्य दृष्टान्तासंमत्योत्तरमाह । पशुनेतीति । पशुनेति पदे या तृतीया तयेत्यर्थः । इह पशुनेतिपदे । सा एकता । करणस्य तृतीयार्थकरणत्वविशिष्टस्य । इदमपि प्रागुक्तप्रत्ययाश्रितन्यायबलादेवेति द्रष्टव्यम् ॥ ५०४ ॥

अनुपपत्तिबलेन विधेस्तयोः
करणतैकतयोरवगम्यते ॥
करणतैकपशोरिति संगति-
र्न घटते हि विधिर्विरहय्य ताम् ॥ ५०५ ॥

कथं तर्हि पशुरेकः करणमिति धीरित्याशङ्क्याह । अनुपपत्तीति । पशुविशिष्टयागविध्यनुपपत्तिबलेनेत्यर्थः । विधेरनुपपत्तिबलेन तयोः करणतैकतयोः करणतैकपशोरित्येवंरूपेण संगतिरवगम्यते हि यस्मात्तां सं-

गतिं विरहय्य विधिर्न घटते तस्माद्विधेरनुपपत्तिबलेनेत्यधस्तनेन संबन्धः ॥ ५०५ ॥

उपादानतः संख्यया संगतिः स्या-
दवच्छेदकत्वेन संख्यानिवेशात् ॥
पशोरेतयोस्तेन मार्गेण कार्ये
निवेशोपपत्तेरुपादानमानात् ॥ ५०६ ॥

ननु नियोगस्य तां विना कानुपपत्तिरित्याकाङ्क्षायां विध्यनुपपत्तिनिमित्तां तदुभयसंगतिमुपपादयति । उपादानत इति । विध्यनुपपत्तिबलात्पशोः संख्यया संगतिः स्यात्तत्संगतिविशेषमेव दर्शयन्सामर्थ्यरूपलिङ्गसिद्धं संख्यास्वभावं तत्र हेतुत्वेनाह । अवच्छेदकत्वेन संख्यानिवेशादिति । स्वाश्रयद्रव्यावच्छेदकत्वेन हि सर्वत्र संख्या द्रव्ये निविशते नात्र सा पशोरवच्छेदकत्वेनान्वेतीत्यर्थः । ततः किं तत्राह । एतयोरिति । करणत्वैकत्वयोरित्यर्थः । तेन पश्वन्वयेन । मार्गेण द्वारेण । कार्ये पशुयागकार्ये । निवेशोपपत्तेरित्यनन्तरं पशुरेकः करणमिति धीरुपपन्नेति शेषः । एतदुक्तं भवति । पशुना यजेतेत्यत्र पशुप्रातिपदिकेन पशुविभक्तिवचनाभ्यां करणत्वमेकत्वं चावगम्यते तेषां च विधिनैव संबन्धः सर्वस्यापि तत्प्रकरणेऽवगतस्य तेनैवान्वयात्, संख्या चोपादेयविशेषणतया विवक्षिता तत्र साक्षात्तेषां नियोगान्वयानुपपत्तेर्नियोगस्य च स्वविषय-

धात्वर्थकरणमन्तरेण कार्यत्वावगमापर्यवसानात्पशुं धात्वर्थकरणतया योजयति । करणीभूतपशोश्चावच्छेदकसंख्याविशेषमन्तरेण विधेः पुनरपि सानुपपत्तिस्तदवस्थेति तत्सामर्थ्यानुसारेण करणपशोरवच्छेदकत्वेन संख्यां गृह्णातीति सिद्धं वचनविभक्त्यर्थयोरुपादानमानात्पशुना परस्परं च संसर्गः पशुत्वकरणत्वयोश्च कार्येण संबन्ध इति ॥ ५०६ ॥

न चैवं विधिः कश्चिदत्रेति न स्या-
दुपादानतः संगतिर्यत्पदार्थे ॥
विभक्त्यर्थसंख्यार्थयोर्नेह कश्चि-
द्यतो वा इमानीति वाक्ये विधिर्नः ॥ ५०७ ॥

नन्वेवं यतो वा इमानीति वाक्येऽपि वचनविभक्त्यर्थयोरेवमेवान्वयोऽस्त्वित्याशङ्क्य नैवं युक्तम् अत्र विधेरभावादित्याह । न चैवमिति । यथा पशुनेति वाक्ये विधिरेवमत्र यत इत्यादिवाक्ये कश्चिदुत्पत्तिविनियोगादिविषयः कोऽपि विधिर्न, भावार्थविषयस्य तस्य शुद्धसिद्धार्थेऽसंभवादित्यर्थः । विध्यसंभवे फलितमाह । न स्यादित्यादिना । संख्यात्र तद्वाचकं वचनम् । नन्वत्रापि तद्विजिज्ञासस्वेति विधिः श्रूयत इत्याशङ्क्य ब्रह्मस्वरूपवाक्यात्तस्यावान्तरवाक्यभेदान्न तदाकाङ्क्षया स्वरूपवाक्यस्थपदार्थान्वयो युक्त इत्याशयेनाह । नेह कश्चिदिति । स्वस्याव्युत्थितत्वद्योतनाय

न इति शिष्यस्योक्तिः । तस्मादेतस्माद्वाक्यादेक प्रकृतिरिति धीर्न संभवतीति भावः ॥ ५०७ ॥

अवितथमिदमेवमेतदस्मि-
न्न खलु विधेर्वचनं पठन्ति वाक्ये ॥
यत इति घटते तथापि योगो
वचनविभक्तिनिगद्ययोरिहापि ॥ ५०८ ॥

इदानीं सिद्धान्ती पश्वेकत्वकरणत्वयोरिव प्रकृतेऽपि यत्पदार्थे वचनविभक्त्यर्थान्वयो युज्यते इति तदुक्तं विद्धुरभावमङ्गीकुर्वन्नाह । अवितथमिति । सत्यमित्यर्थः । पश्वेकत्वकरणत्वयोर्विधिसामर्थ्यादेव परस्परं संसर्ग इत्येतदिदमा परामृशति । यत इति । वाक्ये विद्धुरभाव इत्येतदप्यङ्गीकरोति । एवमेतदिति । एतदप्यवितथमित्यर्थः । अङ्गीकृतमेतदेवाह । अस्मिन्निति । यत इत्यस्मिन्वाक्य इति संबन्धः । कथं तर्हि तयोरन्वयः स्यादित्याशङ्क्याह । घटत इति । यद्यपीह विधेर्वचनं न पठन्ति तथापि वचनविभक्तिनिगद्ययोर्वाच्ययोरेकत्वप्रकृतित्वयोरिहापि योगो घटत इति संबन्धः॥५०८॥

एकत्वमेकवचनेन समर्पितं य-
द्यच्छब्दवाच्यनिलयं यत इत्यमुष्मिन् ॥
पञ्चम्युपात्तमपि यत्प्रकृतित्वमस्मिन्
संगच्छते तदुभयं पशुवस्तुनीव ॥ ५०९ ॥

ननु प्रतिज्ञामात्रेण न वस्तुसिद्धिः, न चात्र तयोर-

न्वयप्रापकं हेतुं कं चित्पश्याम इत्याशङ्क्याह । एकत्वमिति । यत इत्यमुष्मिन्वाक्य एकवचनेन यच्छब्दवाच्यनिलयं यच्छब्दार्थजगत्कारणाश्रयं यदेकत्वं समर्पितम् एवं यत इति पञ्चम्योपात्तं तद्गतं यत्प्रकृतित्वं तदुभयमप्यस्मिन् जगत्कारणे परस्परं संगच्छते । तत्र दृष्टान्तः । पशुवस्तुनीति । संख्याकरणत्वयोरिति शेषः । इदं हि वाक्यं वाक्यशेषावगतब्रह्मणो लक्षणं बोधयति तच्च जगत्प्रकृतित्वमात्रेण न सिद्ध्यति। जगत्प्रकृतीनामनेकत्वे एकस्य ब्रह्मणस्तदात्मत्वायोगादिति जगत्प्रकृतित्वविशिष्टस्य वचनार्थैकत्वेन संबन्धो लक्ष्यब्रह्मणापेक्षित इत्येका प्रकृतिरिति सिद्ध्यतीति भावः ॥५०९ ॥

एका या प्रकृतिः समस्तजननी तद्ब्रह्म जिज्ञास्यता-
मित्यत्रापि हि वस्तुनिष्ठवचने शक्यैव तत्संगतिः॥
विज्ञातुं विधिमन्तरेण च तथानर्थक्यभीतया न हि
स्वाध्यायाध्ययनैकगोचरविधेरायातमर्थं विना॥५१०॥

ननु ब्रह्मणो लक्ष्यताबलाद्विभक्तिवचनार्थयोः संगतिरित्युक्तमयुक्तं सिद्धान्ते हि जगत्कारणत्वं वक्ष्यमाणरीत्या तटस्थलक्षणं गृहस्येव काकः । तत्त्वं च तद्वज्ज्ञातस्यैवेति वाच्यम् । न च जगत एकप्रकृतित्वमन्यतोऽवगतम्, न चास्मादेव वाक्यात्तदवगमः, एकस्य वाक्यस्य कारणैकत्वतदभिन्नब्रह्मस्वरूपप्रतिपादनायो-

गादत एव तस्य लक्षणत्वायोगात्कथं तदनुपपत्त्या तत्सिद्धिरित्याशङ्क्यावान्तरतात्पर्य्यभेदेन यत इत्यादिवाक्यं जगत्प्रकृतावेकत्वं प्रसाध्य तदनुवादेन तद्ब्रह्मेति वाक्येनैकत्वं गच्छद्ब्रह्मस्वरूपपरमिति नोक्तदोष इत्याशयेनाह । एका या प्रकृतिरिति । जिज्ञास्यतामिति विजिज्ञासस्वेति पदार्थो दर्शितः विचार्यतामित्यर्थः । विचारविधेरपि ब्रह्मण्येव महातात्पर्यमिति वस्तुनिष्ठवचन इत्युक्तं तयोर्वचनविभक्त्यर्थयोः संगतिर्यथा विधिना ज्ञायते तथा तं विनाप्यानर्थक्यभीत्या प्रयोजनाभावप्रसङ्गभीतया विज्ञातुं शक्यैवेति संबन्धः । ननु न प्रमाणं प्रयोजनानुसारेण स्वार्थं साधयति येन तदभावप्रसङ्गभयेनालौकिकोऽर्थस्तस्य कल्प्येतेत्याशङ्क्याह। न हि स्वाध्यायेति । न हि यतो वा इत्यादिवचनमर्थं विना स्वस्य श्रोतृसमीहितार्थपर्य्यवसानं विना स्वाध्यायाध्ययनविधेः प्रापकादायातं प्राप्तं स्यादध्ययनविधिर्ह्यध्येतुः फलवदर्थप्रतीतिप्रयोजनमेव वाक्यमध्यापयतीति तद्रहितं वाक्यं नाध्ययनविधिना प्राप्येत । यतो वाइत्यादिवाक्यं चाद्वैतब्रह्मलक्षणज्ञानायैवाध्ययनविधिनाधीतमिति तदभावे तदध्ययनं न फलवद्भवेदतस्तत्परिहाराय तस्य विवक्षितलक्षणतात्पर्य्यसिद्ध्यर्थं तदुभयसंगतिर्द्रष्टव्येति भावः । अथ वा स्वाध्यायाध्ययनविधेरायातोयोऽर्थस्तं विना तदभावे आ-

नर्थक्यभीत्या तत्संगतिर्विज्ञातुं न हि शक्या शक्यैवेति काक्वा दर्शयतीति योजनीयम् ॥ ५१० ॥

वचनार्थविभक्तिवाच्ययो-
रुपपन्नान्वयबुद्धिरर्थतः ॥
पशुनेति पदे यथा तथा
यत इत्यादिपदेऽपि लक्षणे ॥ ५११ ॥

तथेति सूचितं दृष्टान्तं दार्ष्टान्तिकं च विशदयन्नुक्तमार्गेण तदुभयसंबन्धसिद्धिमाह । वचनार्थेति । वचनार्थश्च विभक्तिवाच्यं च तयोरित्यर्थः । अर्थतः अनुपपत्तितः । पशुनेतिपदे यथा वचनार्थेत्यादिसंबन्धः । लक्षणे अद्वैतब्रह्मलक्षणवाक्ये ॥ ५११ ॥

विधिनिष्ठवाक्यमपि बोधयति
स्वमपेक्षितं विषयमर्थवशात् ॥
परमात्मनिष्ठमपि तुल्यमिदं
वचसोर्द्वयोरपि तु रूपमतः ॥ ५१२ ॥

ननु सिद्धार्थवाक्यस्य कथं विधिवाक्येन तुल्यता विधिर्हिस्वसामर्थ्यादलौकिकमर्थराशिं प्रतिपादयेत्, तदुक्तं शबरस्वामिभिः चोदना हि भूतं भवन्तं भविष्यन्तमित्यादीत्याशङ्क्य सिद्धवाक्यमपि तात्पर्य्येण यमर्थं प्रतिपादयेत्तदपेक्षितमर्थान्तरमपि कथं न प्रतिपादयेदन्यथा तत्तात्पर्य्यानिर्वाहात् । विधिवाक्यस्यापि तद्बलादेव तथा सामर्थ्यमन्यथा वसन्ते ज्योतिषा यजे-

तेत्यत्रापि कर्मान्तरं ग्रहं संमार्ष्टीत्यत्राप्येकत्वं विशेषणं किमिति न कल्प्येतेत्याशयेनाह । विधिनिष्ठवाक्यमिति । स्वं स्वीयं परमात्मनिष्ठमपि स्वमपेक्षितं विषयमर्थवशाद्बोधयतीत्यनुषङ्गः । फलितमाह । तुल्यमिति । यत एवमतः सिद्धार्थविधिनिष्ठवचसोर्द्वयोरपीदमर्थान्तरप्रतिपादकत्वं रूपं तुल्यमेवेत्यर्थः ॥ ५१२ ॥

एकं चेतनमस्य यत्प्रकृतितामापन्नमुत्प्रेक्षते
तद्ब्रह्मेति निशामयेति निपुणं ब्रूते परब्रह्मणः ॥
सिद्धं लक्षणमादरेण महता व्यावर्त्तयद्ब्रह्मण-
स्तत्त्वं तत्त्वमसीति वाक्यनिलयं तच्छब्दलक्ष्यं वचः५१३

वस्तुतस्तु जगत्कारणे प्रकृतित्वं विभक्तिर्न प्रतिपादयति तस्यानुमानादेव सिद्धत्वात्प्राप्तानुवादेनानेकार्थविधानासंभवाच्च किं तु वचनार्थमेकत्वमेव तद्वाक्यं प्रतिपादयति । तत्र चेतनमात्रोद्देशेनैकत्वविधानासंभवाज्जगत्कारणत्वेन तदधिष्ठानमेवोद्दिश्य वचनार्थः प्रतिपाद्यत इति नात्र कश्चिद् दोषतुषोपीत्याशयेनाह । एकं चेतनमिति । अस्य वियदादिप्रपञ्चस्य यच्चेतनं प्रकृतितामापन्नमुत्प्रेक्षतेऽनुमिनोति तदेकमिति प्रथममन्वयः । पश्चात्तदप्यनुवाद्यकोटौ निक्षिप्याह । तद्ब्रह्मेति । निशामय शृणु विचारयेत्यर्थतस्तद्विजिज्ञासस्वेत्यस्य ग्रहणम् । एवमादिवचोऽत्र प्रागुक्तशङ्काभावान्निपुणं यथा स्यात्तथा परब्रह्मणोऽनुमानसिद्धं जगत्का-

रणत्वरूपं लक्षणं महतादरेण ब्रूत इति संबन्धः । लक्षणमिति तद् ब्रह्मेत्यादेरुपलक्षणम् । अत एव महतादरेणेत्युक्तम् । यदेकं जगत्कारणं तद् ब्रह्मेति तद्विजिज्ञासस्वेति डित्थमेनं विजानीहीतिवत् तस्य ब्रह्मसंज्ञापरमिदं न लक्षणपरमित्याशङ्क्य तस्योपरिष्टान्निरसिष्यमाणत्वाज्जगत्कारणतया सांख्यादिकल्पितप्रधानादिव्यावृत्तये ब्रह्मलक्षणमेवेह श्रुत्यभिप्रेतमित्याशयेनाह । व्यावर्त्तयदिति । तच्छब्दलक्ष्यं ब्रह्मणस्तत्त्वमद्वयानन्दं प्रधानादिभ्यो व्यावर्त्तयदिति संबन्धः । तटस्थेश्वरस्यैवेदं लक्षणमिति भ्रमापनोदनाय तत्त्वमसीति वाक्यनिलयं तदेकवाक्यमिति वचसो विशेषणमुक्तम् ॥ ५१३ ॥

लक्ष्यस्य लक्षणमिह त्रिविधं प्रसिद्धं
लोके स्वलक्षणममुष्य विशेषणं वा ॥
यद्वोपलक्षणमिमानि च लक्षणेन
व्यावर्णयामि पृथगेव तु तत्प्रतीहि ॥ ५१४ ॥

नन्वेकस्य वस्तुन एकेनैव लक्षणेनेदं प्रयोजनं सिद्ध्यत्यस्ति चात्र श्रुतिप्रसिद्धं तत्सत्यज्ञानादीति किमनेनापि लक्षणेनेत्याशङ्क्यैकस्यैव लोके लक्षणत्रैविध्यप्रसिद्धेरिहाप्यनेकलक्षणं न दोषाय प्रत्युतानेन विना सत्यादिलक्षणमेव दुर्ज्ञानमित्याशयेनाह । लक्ष्यस्येति । त्रैविध्यमेवाह । स्वलक्षणमिति । स्वरूपभूतं लक्षणमित्य-

र्थः । अमुष्य लक्ष्यस्य । वेति चार्थे । यद्वेति यच्चेत्यर्थः । लक्ष्यस्य किं चित्स्वरूपभूतं लक्षणं किं चिच्च तस्य विशेषणमन्यच्चोपलक्षणमितीह लोके लक्ष्यस्य त्रिविधं लक्षणं प्रसिद्धमिति संबन्धः । नन्वेषां किमन्योऽन्यं भेदकमित्याकाङ्क्षायामाह । इमानीति । स्वरूपलक्षणादीनीत्यर्थः । व्याकर्णयामि विशेषतो वर्णयामि तत्त्वं प्रतीहि जानीहीत्यर्थः ॥ ५१४ ॥

लक्ष्यार्थनिष्ठमुपलब्धमतोऽन्यतोऽर्था-
न्निःशेषतो यदतिरिच्य तदर्थवस्तु ॥
लक्ष्यं निवेदयति लक्षणमेतदाहुः
सामान्यलक्षणमिदं त्रिषु लक्षणेषु ॥ ५१५ ॥

प्रथममेतेषां साधारणं लक्षणमाह । लक्ष्यार्थनिष्ठमिति । लक्ष्यार्थनिष्ठमुपलब्धं सदन्यतः सजातीयादेर्निःशेषार्थादतिरिच्य व्यावर्त्य लक्ष्यं स्वाश्रयमर्थवस्तुनि वेदयति । तदेतल्लक्षणमित्याहुः । इदं च त्रिष्वपि लक्षणेषु लक्षणत्वसामान्यलक्षणमिति संबन्धः । असंभवाव्याप्तिदोषदुष्टेऽतिव्याप्तिपरिहाराय लक्ष्यार्थनिष्ठमुपलब्धमिति । यावल्लक्ष्ये प्रतीतमित्यर्थः । निःशेषतो व्यतिरिच्येति विशेषणान्नातिव्याप्तिदुष्टेऽप्यतिप्रसङ्गः । नन्विदं स्वरूपलक्षणे नास्ति तस्य स्ववृत्तित्वासंभवादिति चेत्सत्यम् । यत्प्रमितं सद्द यस्य तत्सजातीयादिभ्यः सर्वेभ्यो व्यावर्त्तकं तत्तल्लक्षणमिति विवक्षितत्वान्न कोऽपि दो-

ष इत्याशयः ॥ ५१५ ॥

लक्ष्यस्वरूपमपि सद्यदमुष्य साक्षा-
दर्थान्तराद्भवति भेदकमेतदाहुः ॥
अस्य स्वलक्षणतयैव तु लक्षणं खं
छिद्रं द्रवं जलमितीदृशमत्र लोके ॥ ५१६ ॥

इदानीं स्वरूपलणस्य स्वरूपमाह । लक्ष्यस्वरूपमिति । साक्षात्स्वभावतो लक्ष्यस्वरूपमपि सद्यदमुष्य लक्ष्यस्यार्थान्तराद्भवति भेदकमेतत्तु लक्षणमस्य लक्ष्यस्य स्वलक्षणतयैवाहुस्तत्रोदाहरणमाह । खं छिद्रमिति । लोकप्रतीतिमनुसृत्येदमुदाहृतमिति द्रष्टव्यम् ॥ ५१६ ॥

स्वानुरक्तमतिजन्मकारणं
यत्पुनर्भवति लक्ष्यवस्तुनि ॥
तद्विशेषणतयास्य लक्षणं
केसरादिकमिवाश्ववस्तुनः ॥ ५१७ ॥

इदानीं विशेषणलक्षणस्य स्वरूपं कीर्त्तयति । स्वानुरक्तेति । यत्पुनर्लक्षणं सल्लक्ष्यवस्तुनि स्वविशिष्टबुद्धिजन्मकारणं भवति तदस्य विशेषणतया लक्षणमाहुरित्यनुषङ्गः । स्वरूपं तटस्थं च लक्षणं व्यावर्त्तयितुं स्वानुरक्तेति, लक्ष्यविशेषणतया प्रतीयमानमित्यर्थः । अलक्षणं दण्डादि व्यावर्त्तयितुं लक्षणमिति । उदाहरति । केसरादीति ॥ ५१७ ॥

स्वानुरक्तमतिजन्महेतुतां

लक्ष्यवस्तुनि निरस्य लक्षणम् ॥
अस्वरूपमपि तस्य यद्भवे-
त्काकवत्तदुपलक्षणं विदुः ॥ ५१८ ॥

तटस्थलक्षणस्वरूपमाह । स्वानुरक्तेति । विशेषणलक्षणेऽतिव्याप्तिवारणाय निरस्येत्यन्तम् । स्वरूपेतिव्याप्तिपरिहाराय अस्वरूपमिति । लक्ष्याविशेषणं सद्यदस्वरूपं लक्षणं तदुपलक्षणं विदुः । तद्देशीयतत्कालीनगृहवृत्तिकाकसंबन्धस्यानतिप्रसक्तस्य लक्षणतया काकवदित्युदाहरणम् ॥ ५१८ ॥

विश्वोद्भवस्थितिलयप्रकृतित्वमस्य
चिद्वस्तुनो यदसहायपरिग्रहस्य ॥
तद्वर्णनीयमुपलक्षणमेव कस्माद्
ब्रह्मेति लक्ष्यपदशक्त्यविरोधहेतोः ॥ ५१९ ॥

एवं त्रिविधं लक्षणमुक्त्वा तर्हि जन्मादिकारणत्वं ब्रह्मणः किं लक्षणमित्याकाङ्क्षायामाह । विश्वोद्भवेति । प्रकृतित्वमिति कर्तृत्वस्याप्युपलक्षणम् । अत एवासहायपरिग्रहस्यातिरिक्तसहायापेक्षाशून्यस्यैकस्येति यावत् । अस्य चिद्वस्तुनो विश्वोद्भवादिप्रकृतित्वं यत्तदुपलक्षणमेव वर्णनीयम् । नन्वस्वरूपस्य तस्य विशेषणत्वसंभवात्कस्मादुपलक्षणत्वमुच्यत इत्याशङ्कते । कस्मादिति । यावल्लक्ष्यस्वरूपं तद्धर्मो भूत्वा यल्लक्षयति तदेव विशेषणलक्षणम् । जगत्कारणत्वमपि यावल्लक्ष्यभा-

वि चेद्ब्रह्म परिच्छिन्नं स्यादिति तत्पदशक्तिर्वक्ष्यमाणा बाध्येत तत्परिहारोयोपलक्षणत्वमेवास्य युक्तम्। एवं च तल्लक्ष्यमखण्डं सिद्ध्यतीत्याशयेनाह। ब्रह्मेति ॥५१९॥

विश्वोद्भवस्थितिलयप्रकृतित्वरूप-
मेकाकिनो यदिह लक्षणमुच्यमानम् ॥
तद् ब्रह्मणो यदि विशेषणरूपमिष्टं
ब्रह्मेति लक्ष्यविषयस्य पदस्य भङ्गः ॥ ५२० ॥

ननु यत इत्याद्यनेकपदमुख्यार्थानुरोधेन ब्रह्मपदमात्रशक्तिविरोधोऽपि न दोषः स्यादिति तद्विशेषणत्वमेव न्याय्यम्। अन्यथा काकतत्पदयोरिव बहुषु पदेषु लक्षणैव स्यादित्याशङ्क्य लक्ष्यपदानुरोधेनोपलक्षणत्वमेव न्याय्यमित्याह। विश्वोद्भवस्थितिलयप्रकृतित्वरूपमिति। स्पष्टम् ॥ ५२० ॥

लक्ष्यार्थवाचि पदमत्र हि लक्षणार्थे
वाक्ये प्रधानमितरद् गुणभूतमाहुः ॥
ब्रह्मेति लक्ष्यविषयं च पदं समर्थं
भूमानमेव वदितुं न तु मर्त्यमल्पम् ॥ ५२१ ॥

यदर्थप्रमित्यर्थं लक्षणं मृग्यते तद्धि प्रधानम्, प्रधानानुरोधेन चाप्रधानेषु लक्षणा न्याय्या गुणे त्वन्याय्यकल्पनेति न्यायात्, न त्वप्रधानानेकानुरोधेनापि प्रधानभङ्ग इत्याशयेन सामान्यन्यायपूर्वकमुक्तमेवोपपादयति। लक्ष्यार्थेति। लक्षणमर्थोऽभिधेयं यस्य तस्मि-

न् । इतरल्लक्षणपदम् । सामान्यन्यायं प्रस्तुते योजयति । ब्रह्मेति । ततः किमित्याशङ्क्य ब्रह्मपदं मुख्यार्थमाहेत्याह । भूमानमिति । त्रिविधपरिच्छेदशून्यम्, तद्धात्वर्थस्य बृहत्त्वस्य तत्रैव पर्य्यवसानात् । मर्त्यं कालतः परिच्छिन्नम् । मर्त्यं वदितुं न समर्थमित्यत्र हेतुतया मर्त्यस्वरूपमाह । अल्पमिति । श्रुतिर्हि यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेति भूमानं निरुच्य तद्दार्ढ्याय तदन्यदल्पमनित्यं चेति निन्दति । अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्यमिति । एवं च ब्रह्मणि तदतिरिक्तसंसर्गाभ्युपगमे भूमवाचिब्रह्मपदशक्तिर्बाध्येत, कथं वा ब्रह्मपदमल्पं वदितुं समर्थं स्यादत इदं विशेषणलक्षणं न भवतीत्युपलक्षणमेवेत्यर्थः ॥ ५२१ ॥

तस्मात्प्रधानपदभङ्गभयाद्गुणानां
युक्तं ग्रहीतुमुपलक्षणगोचरत्वम् ॥
ब्रह्मेति चैतदुपलक्ष्यसमर्पणार्थ-
मेवं समञ्जसमिदं पदजातमस्मिन् ॥ ५२२ ॥

उक्तमर्थं न्यायपूर्वकमुपसंहरति । तस्मादिति । उक्तन्यायात्प्रधानपदं ब्रह्मपदं तस्य भङ्गभयात्तच्छक्तिभङ्गप्रसङ्गेन गुणभूतानां लक्षणपदानामुपलक्षणगोचरत्वमेव ग्रहीतुं युक्तमेवं ब्रह्मेत्येतत्पदं चोपलक्ष्यसमर्पणप्रयोजनकं ग्रहीतुं युक्तमिति संबन्धः । एवं च सति न

शेषिपदभङ्गप्रसङ्ग इत्याह । एवं समञ्जसमिति । अस्मिन् यत इत्यादिलक्षणवाक्ये ॥ ५२२ ॥

लक्ष्यस्वरूपकथनाय न लक्षणानि
नाप्यस्य वाचकमिदं पदमित्यमुष्मै ॥
व्यावृत्तमेतदखिलादितरार्थजाता-
दित्येतदेव वदितुं ननु लक्षणानि ॥ ५२३ ॥

एवं जन्मादिकारणत्वस्य तटस्थलक्षणत्वमुपपाद्य तस्य व्यावृत्तिप्रयोजनकत्वं पराभिमतं व्यावर्त्तयद् ब्रह्मणस्तत्त्वमित्यत्राभ्युपेतमुपपादयितुमुपक्रमे । ननु व्यावर्त्तयद्ब्रह्मणस्तत्त्वमित्युक्तमयुक्तं लोके लक्षणवाक्यानां लक्ष्यस्वरूपज्ञानाय गवादिपदेन व्यवहारसिद्धये वा प्रयोगदर्शनादित्याशङ्क्यासिद्धो हेतुरित्याह । लक्ष्यस्वरूपेति । लक्षणानि तद्वाक्यानि । अस्य लक्ष्यस्येदं गवादिपदं वाचकपदमित्यमुष्मै ज्ञापनायेत्यर्थः । सास्नादिमती गौर्गन्धवती पृथ्वीत्यादिलक्षणेन न गवादिस्वरूपं प्रतिपाद्यते, गवादेः प्रत्यक्षसिद्धत्वेन तद्वाक्यवैयर्थ्यात्। नापि सास्नादिमती व्यक्तिर्गवादिशब्दवाच्येत्यपि प्रतिपाद्यम् , सास्नादेस्तदर्थत्वाभावात् । न वा तदा सास्नादिमती गौरिति प्रतीतिः स्यादतो नेदमुभयं लक्षणवाक्यप्रयोजनमिति व्यावृत्तिबोध एव तत्प्रयोजनं वक्तव्यमित्याशयेनाह । व्यावृत्तमिति । नन्विति निश्चये ॥ ५२३ ॥

लक्ष्यस्वरूपमुपलभ्य तदेकनिष्ठं
दृष्ट्वा च लक्षणमनेन तदेव लक्ष्यम् ॥
व्यावर्त्य बोधयितुमुत्सहते जनोऽयं
तत्त्वान्तरादिति यतः प्रतिपन्नमेतत् ॥ ५२४ ॥

किं च चक्षुषः सास्नादिवैशिष्ट्यं बोधयतस्तद्द्वारा व्यावृत्तिबोधः प्रयोजनं दृष्टम्, एवं लक्षणवाक्यस्यापि तदेव युक्तमित्याशयेन प्रथमं दृष्टान्तमाह । लक्ष्यस्वरूपमिति । उपलभ्य चक्षुषेति शेषः । अयं व्यवहर्ता ॥ ५२४ ॥

संज्ञासंज्ञिसमन्वयावगतये नेष्टं क्वचिल्लक्षणं
व्यावृत्तिप्रतिपत्तिमात्रजनकं लक्ष्ये भवेदन्यतः ॥
लक्ष्यं लक्षणवर्त्मना हि जगति व्यावर्त्तयन्तोऽन्यत-
स्तत्तल्लक्षणमादरेण महता संगृह्णते वादिनः ॥५२५॥

उक्तनिषेधानुवादपूर्वकं दार्ष्टान्तिकमाह । संज्ञासंज्ञीति । गवादिपदस्य लक्ष्यस्य च वाच्यवाचकरूपो यः समन्वयस्तदवगतय इत्यर्थः । एतच्च प्रागुक्तस्वरूपकथनाय नेत्यस्योपलक्षणम् । किं च संज्ञासंज्ञिसमन्वयाय लक्षणवाक्यं वदन्नपि व्यावृत्तिप्रतिपत्तिप्रयोजनं तस्याङ्गीकुर्यादेवान्यथानतिप्रसक्तस्वरूपेण संज्ञिनोऽनवगमे तत्रैव संज्ञासंबन्धस्य दुरवगमत्वात्, अतस्तदेव प्रयोजनमित्याशयेनाह । व्यावृत्तिप्रतिपत्तीति । तस्माल्लोके गवादिलक्षणानामेतदेव प्रयोजनं वृद्धसंमतमित्युप-

संहरति। लक्ष्यं लक्षणवर्त्मनेति। लक्षणवर्त्मनेत्यनेन लक्षणवाक्यस्य लक्षणया व्यावृत्तिबोधप्रयोजनकत्वं सूचितम्। तत्तल्लक्षणं तस्य तस्य गोघटादेर्लक्षणम् ॥५२५॥

तस्माद् ब्रह्मणि वाच्यवाचकयुजासिद्ध्यै श्रुतिर्नाभ्यधा-
ज्जन्माद्यस्य समीक्षितस्य जगतो यद् ब्रह्मणो लक्षणम्॥
नापीदं स्वकरूपबोधनपरं संकीर्तितं ब्रह्मणः
किं त्वब्रह्मपदार्थतोऽस्य सकलाद् व्यावृत्ततासिद्धये ५२६

एवं लोकेऽस्वरूपलक्षणानां व्यावृत्तिमात्रप्रयोजनकत्वमुक्तम्, एवं सृष्टिवाक्यार्थजगत्कारणत्वमपि ब्रह्मणस्तदितरव्यावृत्तय एव श्रुत्यानूद्यते, किं चाश्रुतव्यवहारादिकल्पनाप्रसङ्गान्न वाच्यवाचकसंबन्धसिद्धिस्तत्प्रयोजनं नापि ब्रह्मस्वरूपसिद्धिस्तस्याखण्डैकरसस्य जगत्कारणत्ववैशिष्ट्यविषयवाक्यप्रतिपाद्यत्वायोगादित्याशयेनोपसंहरति। तस्मादिति। अस्य समीक्षितस्य जगतो जन्मादि जन्मस्थितिभङ्गन्तत्कारणत्वं यद्ब्रह्मणो लक्षणं तच्छ्रुतिर्ब्रह्मणि वाच्यवाचकयुजासिद्ध्यै नाभ्यधात्, नापीदं लक्षणवाक्यं ब्रह्मणः स्वरूपबोधनपरं तदर्थं सत्संकीर्तितं किं त्वस्य ब्रह्मणः सर्वस्मादब्रह्मपदार्थतो व्यावृत्ततासिद्धय इति संबन्धः। एतच्च ग्रन्थकारेण "व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजन„मिति परोक्तमेकं पक्षमाश्रित्योक्तं न तु स्वमतम्, प्रकृष्टप्रकाशादिलक्षणवाक्यस्य चन्द्रस्वरूपार्थतायाः प्रागु-

क्तत्वाल्लक्षणवाक्यमात्रस्य सिद्धान्तिभिरखण्डार्थताभ्युपगमाच्च । किं च लक्षणवाक्यं मुख्यवृत्त्या न व्यावृत्तिं प्रतिपादयितुं शक्नोति । नापि लक्षणया तद्बीजानुपपत्तेरभावात् । लक्षणयापि लक्ष्यस्वरूपमप्रतिपाद्य कस्येतरव्यावृत्तिं प्रतिपादयेद्धर्मिविशेषविशिष्टतयैव तस्या ज्ञातुं शक्यत्वात्।न च लक्षणवाक्यं गवादिकं बोधयदेव तस्येतरव्यावृत्तिं बोधयतीति वाच्यम्।आवश्यकत्वाच्छब्दस्य विरम्य व्यापाराभावाच्च तस्य तत्रैव व्यापारो न तु व्यावृत्तावपि। न च लक्षणवाक्येन लक्षणसंसर्गे प्रतिपादिते लिङ्गादितरव्यावृत्तिसिद्धिरिति वाच्यम्।विशिष्टस्वरूपाभिधानमात्रस्यैव शब्दव्यापारतया व्यावृत्तेः प्रमाणान्तरव्यापारसाध्यत्वप्रसङ्गेन व्यावृत्तमेतदखिलादित्यादिना प्रक्रान्तविरोधात्।अर्थादपि सिद्ध्यन्त्यास्तस्याः शब्दव्यापारगोचरत्वायोगाच्च । संज्ञासंज्ञिसंबन्धार्थत्वनिराकरणं तु युक्तमेव । एतच्च सर्वं प्रागुपपादितमप्याचार्याणामेतत्संमतमितिभ्रमापनोदनायास्माभिरुक्तम् ॥ ५२६ ॥

परिच्छिन्नवस्तुव्यवच्छेदसिद्धै
जगाद श्रुतिर्लक्षणं ब्रह्मणस्तत् ॥
परिच्छिन्नता प्रापिता पूर्वपक्षे
परब्रह्मणस्तन्निषेधार्थमेतत् ॥ ५२७ ॥

एवं च ब्रह्मतटस्थलक्षणवाक्यं सांख्यादिकल्पितपरि-

च्छिन्नप्रधानाद्यसंभवलक्षणकथनमुखेन तल्लक्षितस्य सत्यादिवाक्यसिद्धाखण्डस्वरूपे पर्यवस्यति , न हि प्रपञ्चस्योपादानाभिन्नचेतनकारणे बुद्ध्यसन्निहिते सति सत्यादिविधिनिषेधवाक्यानां तत्त्वमस्यादिवाक्यानां च समन्वयनिरूपणं संभवति निरालम्बनतन्निरूपणायोगात्तत्र चार्थात्परभ्रमविषयपरिच्छिन्नप्रधानादिव्यावृत्तिरपि सिद्ध्यति न तु सा लक्षणवाक्यस्य साक्षात्प्रयोजनमित्याशयेनाह । परिच्छिन्नेति । वस्तुतः परिच्छिन्नं यज्जगत्कारणं सांख्याद्यभिमतं तद्व्यवच्छेदसिद्ध्या इत्यर्थः । लक्षणमभिन्ननिमित्तोपादानत्वरूपम् । न हीदं लक्षणं सांख्याद्यभिमते जगदुपादाने पातञ्जलाद्यभिमतेश्वरे वा संभवति । ब्रह्मणि तु तदबाधितमिति तल्लक्ष्यस्य ब्रह्मणः प्रधानादिव्यावृत्तिरर्थात्सिद्ध्यतीति भावः । नन्वर्थादपि परिच्छिन्नताव्यावृत्तिः कथं लक्षणवाक्यप्रयोजनं न ह्यनादिसिद्धा श्रुतिरादिमत्पुरुषभ्रमसिद्धव्यावृत्तये स्वार्थं प्रतिपादयतीति युक्तमिति चेन्न । तेषामपि पक्षाणामसत्त्ववादपक्षस्यैवानादिपूर्वपूर्वभ्रमसिद्धतयानादित्वेन श्रुत्यैव निराकार्यत्वादित्याशयेनाह । परिच्छिन्नतेति । परब्रह्मणो जगत्कारणस्य। एतदभिन्ननिमित्तोपादानत्वं लक्षणम् ५२७

कालस्वभावपरमाण्वसुभृत्प्रधान-
स्कन्धप्रतीत्यखिलशून्यकथाप्रसङ्गे ॥

जन्मादिसूत्रमवतीर्णमियं श्रुतिश्च
तस्मादिदंपरमिदं द्वितयं प्रवृत्तम् ॥ ५२८ ॥

जगत्कारणे परिच्छिन्नत्वप्रसञ्जकं पूर्वपक्षं विवृण्वंस्तन्निवृत्त्यर्थत्वं श्रुत्यादेराह। कालस्वभावेति । वसन्तादिकाल एव नियमेन कार्यविशेषदर्शनात्काल एव कारणमिति केचित् । कारणं विनैव कार्यं भवतीति स्वभाववादिनः । सूक्ष्मेभ्यस्तन्त्वादिभ्यः स्थूलस्य पटादेरुत्पत्तिदर्शनात्सूक्ष्मं स्थूलस्य कारणमेवं तन्त्वादेरपि तदवयवाः सूक्ष्माः कारणमिति यतोऽन्यन्न सूक्ष्मं संभवति ते निरवयवाः परमाणवो जगन्मूलकारणमिति वैशेषिकादय आहुः । असुभृज्जीवः स्वकर्मद्वारा कारणमिति मीमांसकाः । त्रिगुणात्मकस्य जगतः कार्यस्य सदृशं त्रिगुणात्मकं प्रधानमेव कारणमिति सांख्याः । स्कन्धवादी बाह्यार्थास्तित्ववादी सौत्रान्तिकादिर्बौद्धः । स हि परमाणुसङ्घातरूपं पृथिव्यादि रूपविज्ञानवेदनासंज्ञासंस्कारात्मकपञ्चस्कन्धात्मकमाध्यात्मिकं जगदित्याह । प्रतीतिः क्षणिकविज्ञानम् , तत्र कल्पितमेव जगदिति विज्ञानमात्रतत्त्ववादीबौद्धः। अखिलशून्यवादी सर्वं शून्यमिति वदति माध्यमिकः । स हि शून्यमेव पूर्वपूर्वालीकवासनावशाद्विचित्रप्रपञ्चाकारेण प्रथत इत्याह । एतेषां कालादीनां या कथा चर्चा तत्प्रसङ्गे जगत्कारणस्य परिच्छिन्नत्वप्रसक्तौ तन्निवृत्तये ज-

न्मादिसूत्रमियं श्रुतिश्च । तस्मादिदं श्रुतिसूत्रात्मकं द्वितयमिदं परमर्थादेतत्प्रयोजनकं प्रवृत्तमिति संबन्धः । एतदुक्तं भवति । न हि कालादिः सर्वोऽपि प्रपञ्चस्य निरपेक्ष उपादानकारणं भवति , चेतनानधिष्ठितस्याचेतनस्य कारणत्वादर्शनात् । अस्तु तर्हीश्वरोऽधिष्ठाता तदधिष्ठिताः परमाणव उपादानमिति चेन्न । कार्यस्य स्वापेक्षयाल्पपरिमाणजन्यत्वनियमाभावेन परमाण्वसिद्धेः । न हि दीर्घेभ्यस्तन्तुभ्यो द्व्यङ्गुलः पटो न भवति, न चातिविस्तृतदीर्घदुकूलद्वयेनैका रज्जुर्न क्रियते, निरवयसंयोगासंभवेन द्व्यणुकादिकार्यासंभवाच्च । न हि स्वाभावसमानदेशः संयोगो निष्प्रदेशे परमाणौ संभवति। तस्येश्वरसंबन्धासंभवेन तदधिष्ठानं चानुपपन्नम् , लाघवेनोपादानाधिष्ठात्रोरेकत्वे संभवति तद्भेदायोगाच्च । लोकेऽपि तयोर्भेदो न संप्रतिपन्न इत्युक्तम् । लोके प्रेक्षावतां नियमेन कार्यविशेषमुद्दिश्य विशिष्टकारणोपादानदर्शनान्न स्वभाववादः प्रामाणिकः। सर्गाद्यकालेऽशरीरिणो जीवस्य ज्ञानासंभवेन विश्वनिर्माणायोगात् । किं बहुना यद्यत्परिच्छिन्नं तत्तत्कार्यमेवेति न कस्यापि कारणमतः सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्वजगदुपादानं कर्तृ चेति जन्मादिसूत्रन्यायतो यत इत्यादिश्रुतिप्रतिपाद्यं सिद्धमिति ॥ ५२८ ॥

अधिष्ठात्रधिष्ठेयभावेन योनि-

निमित्तं च यत्कारणं जन्मभाजाम् ॥
परिच्छिन्नतास्यापि संभावितैव
प्रतीचोऽस्य भेदे परैरुच्यमाने ॥ ५२९ ॥

ननु श्रुतिसूत्राभ्यामेवंविधकारणे सिद्धेऽपि तस्य जडप्रपञ्चपरिच्छेद एव वारितः स्यान्न त्वात्मनानात्वमपि, संभवति हि तादृशस्यापि कारणस्य परैरुच्यमानो जीवाद्भेद इत्याशङ्कते । अधिष्ठात्रधिष्ठेयेति । अधिष्ठात्रधिष्ठानम् अधिष्ठेयमध्यस्तं तद्भावेन विवर्ताधिष्ठानत्वेनेत्यर्थः । योनिरुपादानं निमित्तं कर्तृ च । अथ वा तदात्मानं स्वयमकुरुतेति स्वस्यैव स्वगोचरकृतिशालित्वं स्वाश्रितकृतिविषयत्वं च यच्छ्रुतं तदधिष्टात्रधिष्टेयभावः, तेन इत्थंभावे तृतीया अधिष्ठातृभावेन निमित्तमधिष्ठेयभावेन योनिश्चेत्यर्थः । शेषं स्पष्टम् ॥ ५२९ ॥

ततस्तन्निषेधार्थमेतद्बभाषे
श्रुतिर्ब्रह्म तद्भिन्नता तस्य कस्मात् ॥
प्रतीचोऽपि हि ब्रह्मता नित्यसिद्धा
दृशो भेदसिद्धिर्निरालम्बनैव ॥ ५३० ॥

तद् दूषयति । तत इति । यत एवं कारणस्य जीवात्परिच्छेदः परोक्तः सम्भावितस्तत इत्यर्थः । एतत्प्रपञ्चस्याभिन्ननिमित्तोपादानं ब्रह्म । फलितमाह । तदिति । तस्मादित्यर्थः । तस्य ब्रह्मणः । कस्माद्भिन्नता न

कस्मादपीत्यर्थः । एतदेवोपपादयति । प्रतीचोऽपीति । प्रपञ्चोपादानस्यैकवचनेक्षणश्रुतिभ्यां तत्कर्तृचेतनाभेदे सिद्धे तदुपादानब्रह्मणश्चेतनस्य जीवादपि चेतनाद्भेदो निरस्त एव । दृशोदृगन्तरप्रतियोगिकभेदासिद्धेर्मिथ्याभेदविषयत्वात् । न हि ज्ञानं ज्ञानान्तरमविषयीकृत्य ततः स्वस्य भेदं विषयीकर्तुं शक्नोति न वा ज्ञानं ज्ञानान्तरं विषयीकर्तुं विषयस्य जडत्वापत्तेर्विषयविषयिणोर्वस्तुतः सम्बन्धासम्भवाच्च विषयिणि तस्य कल्पितत्वे च विषयस्यैव ज्ञानमिति न ज्ञानभेदसिद्धिरतश्चिद्रूपस्य प्रतीचश्चिद्रूपब्रह्मता नित्यसिद्धेत्याशयः॥५३०॥

जगत्कारणत्वं पुनर्यत्र दृष्टं
न तल्लक्षणं तत्स्वरूपप्रसिद्धै ॥
स्वरूपे यतो लक्षणे दृश्यमाने
प्रसिद्धं ततो लक्ष्यवस्तुस्वरूपम् ॥ ५३१ ॥

एवं लक्षणवाक्यं विशिष्टलक्षणाभिधानद्वारा समन्वयनिरूपणालम्बनार्पणेन सत्यादिवाक्यार्थे पर्यवस्यति अर्थाच्च जगत्कारणस्य परिच्छेदव्यावृत्तिरित्युक्तम् । नन्वस्त्वेवमितरव्यावृत्तेरार्थिकत्वं तथापि जगत्कारणत्वं यस्य धर्मस्तत्सिद्ध्यर्थमेवेदं लक्षणमस्तु न तु सत्यादिवाक्यैक्येन तदर्थाखण्डवस्तुसिद्धय इत्याशङ्क्याह । जगत्कारणत्वमिति । यत्र चेतनसामान्ये । दृष्टमुक्तानुमानेनैतच्छ्रुतेश्चावगतम् । तत्स्वरूपप्रसिद्धै तस्य

चेतनसामान्यस्य कारणत्वविशिष्टस्वरूपनिश्चयाय । कुतोनेत्यत आह । स्वरूप इति । धर्मिण्यवगत एव हि तस्यैवं लक्षणमित्यवगन्तुं शक्यमेवं च यतः स्वरूपे दृश्यमाने लक्षणं तदीयतया प्रसिद्धं भवति , लक्षणाच्च लक्ष्यवस्तुरूपप्रसिद्धावन्योन्याश्रयः । न चानुमानादेव तत्सिद्धमिति वाच्यम् । तत्सिद्धये लक्षणानुपयोगप्रसङ्गात् , श्रुतिश्चात्र केवलानुवादिनी स्यादिति ॥ ५३१ ॥

निमित्तं च योनिश्च यत्कारणं त-
त्परं ब्रह्म सर्वस्य जन्मादिभाजः ॥
इति स्पष्टमाचष्ट एषा श्रुतिर्नः
कथं सिद्धवल्लक्षणं सिद्धिबाह्यम् ॥ ५३२ ॥

एवं प्रपञ्चस्याभिन्ननिमित्तोपादानत्वं ब्रह्मलक्षणमित्युक्तम् , ननु लक्षणमन्यतः प्रसिद्धमेव श्रुत्यानूद्यत इति वाच्यम् , अन्यथा तस्यापि श्रुतिप्रतिपाद्यत्वप्रसङ्गेनाखण्डार्थत्वक्षतेः , न चैकस्योभयरूपं कारणत्वं लोके प्रसिद्धमस्तीति शङ्कते । निमित्तं चेति । नोऽस्मान्प्रत्येषा यतो वेत्यादिरूपा श्रुतिः सर्वस्य जन्मादिभाजो यत्कारणं निमित्तं योनिश्च भवति तत्परं ब्रह्मेति सिद्धिबाह्यं लोकाप्रसिद्धं लक्षणं सिद्धवत् प्रमाणसिद्धमिव कथं स्पष्टमाचष्टेति सम्बन्धः ॥५३२॥

न खल्वीदृशं कारणं लोकसिद्धं
यतोऽनूद्य तल्लक्षणं तेन लक्ष्यम् ॥

व्यवस्थापयन्ती प्रवृत्तैवमेषा
विधत्ते नु वक्तीति चैतद्विरुद्धम् ॥ ५३३ ॥

सिद्धिबाह्यमित्येतदेव प्रपञ्चयन्नाह । न खल्विति । नन्वियमेव श्रुतिरवान्तरतात्पर्येणोभयविधं कारणत्वं ब्रह्मणो वदत्विति चेत्तत्राह । यतोऽनूद्येति । यत इति यच्छब्दयुक्तेयं श्रुतिस्तादृशं कारणत्वमनूद्याद्वैतं ब्रह्म व्यवस्थापयन्ती प्रवृत्तेति तत्प्रागेव तत्सिद्धिर्वाच्येत्यर्थः । तर्हीयं स्वसामर्थ्यसिद्धमेवार्थमनुवदत्वित्याशङ्क्याह । विधत्त इति । अज्ञातमर्थं प्रतिपादयति । अनुवक्ति ज्ञातमर्थं बोधयतीति चैतदुभयमेकस्य विरुद्धमन्योन्याश्रयप्रसङ्गादित्यर्थः ॥ ५३३ ॥

अनुवददिदमेव वाक्यमर्था-
दुपनयतीदृशकारणं प्रसिद्धम् ॥
अनुवदनमशक्यमन्यथा स्या-
दवगतगोचरमेव हीदमिष्टम् ॥ ५३४ ॥

सिद्धान्ती यत इति वाक्यस्य यच्छब्दप्रयोगादनुवादत्वे स्थिते तत्सामर्थ्यादेव तादृशं कारणत्वमपि तद्विधास्यति, अन्यथाऽनुवादत्वायोगात् , न चैवमन्योन्याश्रयः , अनाद्यनुवादसामर्थ्यलब्धविधानस्याप्यनादित्वादित्याशयेनाह । अनुवददिति । प्रसिद्धमिति । स्वसामर्थ्यप्रसिद्धमित्यर्थः । इदमेव वाक्यं प्रसिद्धमीदृशं कारणमनुवददर्थादुपनयति विधत्ते । तत्साम-

र्थमेव व्यनक्ति । अनुवदनमिति । अन्यथा तद्विध्यभावे अनुवदनमशक्यमेव स्यात्, कुतः यत इदमनुवदनमवगतगोचरमेवेष्टमन्यथा सर्वस्यानुवादत्वापत्तेः । न चैवमुक्तरीत्याप्ययं दोषः समान इति वाच्यम् । निर्णीतानुवादत्व एव वाक्यस्यैवंविधत्वादिति भावः॥५३४॥

यथा विशिष्टस्य विधानतोऽर्था-
द्विशेषणानां घटते विधानम् ॥
स्थितेऽनुवादेऽपि तथेह योज्य-
मनूद्यमानेऽपि जगन्निदाने ॥ ५३५ ॥

श्रुतिः स्वाभिधानसामर्थ्यसिद्धमेवार्थमाश्रित्य प्रवृत्तेत्येतन्मीमांसकानामपि सम्मतमिति दृष्टान्तेनाह । यथा विशिष्टस्येति । यथा सोमेन यजेतेत्यादिसोमादिविशिष्टयागविधानस्य सामर्थ्याद्विशेषणानां सोमादीनामपि विधानं घटते, श्रूयमाणशब्दस्यैव तत्रापि तात्पर्ये वाक्यभेदप्रसङ्गात्, विशेषणाधीनसिद्धेर्विशिष्टस्य, तद्विधानं विना विध्यसम्भवात्, एवमिह यतोवेत्यादिवाक्येऽनुवादत्वे स्थितेऽनूद्यमाने जगन्निदाने जगतोऽभिन्ननिमित्तोपादानेऽर्थाद्विधानं योज्यमिति सम्बन्धः ॥ ५३५ ॥

अथ वानुवादमुपलभ्य ततो-
ऽनुपपद्यमानवपुषः प्रमितेः ॥
अपरं निमित्तमिह कल्प्यमिति

प्रवदन्ति केचिदभियुक्ततराः ॥ ५३६ ॥

इदानीं दार्ष्टान्तिके प्रागुक्तानुमानसिद्धमेवार्थं श्रुतिरनुवदतीत्याशयेनाह। अथ वेति। ततोऽनुवादात्। अनुपपद्यमानवपुषः पूर्वसिद्धिं विनानुपपद्यमानस्वरूपात्। पूर्वप्रमितेरपरमनुमानम्। अभियुक्ततरा उक्तानुमानेऽतिप्रवीणाः ॥ ५३६ ॥

अपि विशिष्टविधौ वचनान्तरा-
दनुपपत्तिबलानुमितादिह ॥
विधिरशेषविशेषणगोचरो
न तु पुनस्तत एव विधानतः ॥ ५३७ ॥

दृष्टान्तेऽपि विशेषणं लैङ्गिकविनियोगवन्नित्यानुमेयश्रुतित एव सिद्ध्यति न तु विशिष्टविधिसामर्थ्यात्, अन्यतः सिद्धेऽर्थे विधिव्यापारान्तरकल्पनागौरवायोगादित्याह। अपि विशिष्टेति। सर्वत्र विशिष्टविधावप्यनुपपत्तिबलानुमिताद्विशेषणसिद्धिं विना विशिष्टविधानानुपपत्तिकल्पिताद्वचनान्तरादशेषविशेषणगोचरो विधिः सिध्यतीत्यर्थः ॥ ५३७ ॥

जन्मादिलक्षणमिदं जगतो यदुक्तं
सद्ब्रह्मणस्तदिह चिन्हतयोपदिष्टम् ॥
नास्मिन् प्रमाणमपरे पुनरेतदेव
ब्रह्मप्रमाणमनुमानमुदीरयन्ति ॥ ५३८ ॥

एवं कार्यलिङ्गसम्भाविताभिन्ननिमित्तचेतनकारणानु-

वादेन वादिप्रसिद्धकारणविलक्षणे ब्रह्मणि यतो वेत्यादिश्रुतिः पर्यवस्यतीत्युक्तम् । सम्प्रति उक्तमर्थमनुवदन् कार्यलिङ्गकमनुमानमेवेश्वरे प्रमाणमिति मतमनूद्य दूषयति । जन्मादिलक्षणमिति । जगतो यदिदं जन्मादि तत्कारणत्वरूपं सन्निर्दुष्टं ब्रह्मणो लक्षणमुक्तं तदिह ब्रह्मणि चिन्हतया परसिद्धकारणविलक्षणब्रह्मोपस्थितये उपलक्षणतयोपदिष्टं तदस्मिन् ब्रह्मणि न प्रमाणं ततः सर्वज्ञाद्यसिद्धेरित्युक्तम् । अपरे वैशेषिकादयः पुनरेतदेव वर्णितसम्भावनामात्रहेतुं कार्याख्यं लिङ्गमेव ब्रह्मप्रमाणमनुमानमुदीरयन्ति । क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदिति कार्यलिङ्गकमनुमानं मानमीश्वरे वदन्तीत्यर्थः ॥ ५३८ ॥

कार्यानुमानपरतन्त्रमिदं हि शास्त्रं
शास्त्रस्य नोपकरणं तदितीक्षमाणाः ॥
तद् दुर्घटं न खलु कारणमद्वितीयं
चैतन्ययुक्तमिति कार्यवशात् प्रतीमः ॥५३९॥

ननूदाहृतश्रुतिप्रमुखवाक्येषु सत्सु तदर्थसम्भावकतया तदुपकरणमनुमानमेव तत्र प्रमाणमिति कथं वदन्तीत्याशङ्क्याह । कार्यानुमानेति । श्रुतिर्हि कार्यलिङ्गानुमाननिर्णयतात्पर्यकतया तत्परतन्त्रेति तेषामभिमानः । शास्त्रस्य नोपकरणमिति । व्याप्तिपक्षधर्मतायुक्तत्वेन धूमादिलिङ्गवद्वन्ह्यादौ कार्यत्वमपीश्वरे

स्वतन्त्रमेव प्रमाणं न तु तत् प्रमाणश्रुतेरुपकरणमित्यर्थः । दूषयति । तद् दुर्घटमिति । कुतस्तत्राह । न खल्विति । श्रुतिः खल्वद्वितीयं सर्वज्ञं जगत्कारणं प्रतिपादयति, न हि तत् कथमपि कार्यलिङ्गवशाद् वयमवगच्छामः, तस्य तत्रासमर्थत्वादिति भावः॥५३९॥

वेदान्तवाक्यमिह येन पथा प्रवृत्तं
लोकप्रसिद्धपदशक्तिमुपाददानम् ॥
विश्वोद्भवस्थितिलयप्रकृतौ निमित्ते
सच्चित्सुखात्मनि परात्मनि नैवमन्यत् ॥५४०॥

ननु कार्यलिङ्गतोऽपि लाघवाद् विश्वकर्तर्येकस्मिन् सिद्धे तत्सार्वज्ञ्यमप्यधिकरणसिद्धान्ततया सिद्ध्यति, अद्वितीयत्वं तु स्वोपजीव्यानुमानविरोधाच्छ्रुत्याऽपि न स्पृश्यत इति कथं कार्यवशान्नेश्वरं प्रतीम इत्युक्तं तत्राह । वेदान्तवाक्यमिति । न हि कार्यलिङ्गमनुमानं वेदान्तैः शक्तिनिर्णयायापेक्ष्यते, प्रागुक्तन्यायेन लोकत एव तत्सिद्धेः । नापि तात्पर्यनिश्चयाय तस्याप्युपक्रमोपसंहारादिपरामर्शादेव सिद्धेः । अतः कथमपि तन्न वेदान्तोपजीव्यम् । कार्यलिङ्गतोऽपि जगत्कर्त्रैकत्वासिद्धेरुक्तत्वान्न तत्सार्वज्ञ्यं सिद्ध्यति ततस्तदेकत्वसिद्धावपीश्वरस्य नित्यकृतिपक्षे तदनुपयोगाज् ज्ञानमेव न सिध्येत कुतः सार्वज्ञ्यं कृतेर्ज्ञानसमानाश्रयत्वानियमेन तत्सिद्धौ च तद्वन्नित्यदुःखादिकमपि प्रसज्येत ततो

नानुमानादीश्वरसिद्ध्याशा कर्तव्या । किं च वेदान्तवाक्यं सृष्ट्यादिकारणानुवादेन लोकप्रसिद्धपदशक्त्यनुसारिलक्षणमार्गेण तत्सच्चित्सुखात्मकमद्वयं प्रत्यगभिन्नमिति प्रतिपादयति, न चैवमनुमानं किमपि साधयितुं शक्नोतीति श्रुतिरेव तत्र प्रमाणं नान्यदनुमानम् । तथा च श्रुतिः, नैषा तर्केण मतिरापनेयेत्याशयेनोक्तम् । येन पथेत्यादिना ॥ ५४० ॥

भङ्क्त्वा कथं चिदनुमानवशेन सिद्धे
सर्वेश्वरे कणभुगादिभिरुच्यमाने ॥
वेदान्तवाक्यमपि योज्यमतोऽनुमाने
सापेक्षतोपनिषदां यदि साहसं तत् ॥ ५४१ ॥

यत्पुनरुक्तं कार्यानुमानपरतन्त्रमिदं हि शास्त्रमित्यनेन श्रुतेरनुमानसापेक्ष्यं स्वार्थप्रतिपादनमिति न तद्विरुद्धोपक्रमादिशब्दन्यायावगताद्वयादिस्पृक् शास्त्रमिति तदप्येवं सति निरस्तम्, विपक्षे वेदाप्रामाण्यप्रसङ्गश्चेत्याशयेनाह । भङ्क्त्वेति । उपक्रमादिनाऽद्वये निर्णीततात्पर्यमपि वेदान्तवाक्यं कथं चिद्भङ्क्त्वा लोकवत्साधान्यमात्रपरत्वकल्पनेन स्वार्थात्प्रच्याव्यानुमानसिद्धे कणभुगादिभिरुच्यमाने सद्वितीये सर्वेश्वरे विषये योज्यमतोऽनुमानसापेक्षतैवोपनिषदामिति यदि तत्साहसम्, तथात्वे वेदान्तानामप्रामाण्यप्रसङ्गादित्यर्थः ॥ ५४१ ॥

निष्कारणं श्रुतिशिरोवचनस्य भङ्गं
ये वर्णयन्ति सहसा स्वमनोरथेन ॥
दीप्तस्य दावदहनस्य न ते किमर्थं
ज्वालां पिबन्ति कथनीयमिदं बहुज्ञैः ॥५४२॥

साहसमित्येतदेव प्रकटयति । निष्कारणमिति । श्रुतिसिद्धाद्वये बाधकाभावेऽपि तत्त्यागो निष्कारण एवेत्यर्थः । यदि श्रुतिसिद्धमर्थमबाधितमपि स्वाभ्युपगतसिद्धान्तानुरोधेन त्यक्त्वा तस्यार्थान्तरं वर्णयन्ति । तेषां तर्ह्यशक्यसाहसं किमपि नेति वह्निज्वालामपि दीप्तां कथं न ते पिबेयुरत्र बहुज्ञैर्वैशेषिकैः कारणं किंचिद्वक्तव्यमिति ॥ ५४२ ॥

ननु सच्चिदादिवपुषो जगतः
प्रकृतित्वबोधनमकारणकम् ॥
परमात्मनो न हि पदार्थयुजा
रहितेह संभवति योग्यतया ॥ ५४३ ॥

ननु श्रुतिरपि जगत्प्रकृतित्वेन सच्चित्सुखात्मकं ब्रह्म कथं प्रतिपादयेत्तस्य तदसंभवादिति शङ्कते । नन्विति । अकारणकं प्रमाणरूपकारणशून्यम् । न च शब्दप्रमाणमेव तज्जनकमित्याह । न हीति । उक्तरूपे परमात्मनि योग्यतया रहिता पदार्थयुजा सृष्टिवाक्यस्थपदार्थानां संबन्धो न हि संभवतीति भावः ॥ ५४३ ॥

उपादानता सच्चिदानन्दमूर्ते-

विरुद्धा जडेष्वेव सा दृश्यते हि ॥
विरुद्धैः पदार्थैर्न वाक्यार्थसिद्धि-
र्न खल्वग्निनोक्षेदितीहान्वयोऽस्ति ॥ ५४४ ॥

तस्य तदयोग्यत्वमेव विवृणोति । उपादानतेति । विरोधमेवाह । जडेष्वेवेति । यज्जडं मृदादि तदेवोपादानं दृश्यत इति चेतनस्योपादनत्वं विरुद्धमित्यर्थः । तद्विरोधप्रतिपादनफलमाह । विरुद्धैरिति । तत्र दृष्टान्तो न खल्विति । उक्षेत् सिञ्चेत् ॥ ५४४ ॥

उपादानता चेतनस्यापि दृष्टा
यथा स्वप्नसर्गे विचित्रे प्रतीचः ॥
यथा चोर्णनाभस्य सूत्रेषु पुंसां
यथा केशलोमादिसृष्टौ च दृष्टा ॥ ५४५ ॥

किं चेतनस्य द्रव्योपादानत्वं विरुद्धमुतोपादनत्वमात्रम् । नोभयमपि । सिद्धान्ते हि विवर्त्ताधिष्ठानत्वमेवोपादानत्वम् । तच्च मृदाद्यवच्छिन्नचैतन्यस्य घटादिकं प्रत्यस्त्येव । एवं पुरुषादौ स्थाण्वाद्यारोपेऽपि चेतनस्य द्रव्योपादानत्वम् । तथा स्वप्न आत्मनो विचित्रप्रपञ्चोपादानत्वं प्रतीत्यनुरोधेन वक्तव्यमित्याशयेनोपसंहरति । उपादानता चेतनस्येति । सिद्धान्ते समुच्चयासंभवादपिरवधारणे । मृदादेरपि घटादिपरिणाममाश्रित्य तत्समुच्चयार्थो वा । एवं परिणामवादेऽपि नायं नियम इत्यभिप्रेत्य दृष्टान्तान्तरमाह । यथा चेति ।

ऊर्णनाभो लूताकीटस्तस्योपादानता दृष्टेत्यनुषङ्गः । ननु तत्सूत्रं तल्लालापरिणाम एव सा च न चेतनेत्याशङ्क्य तत्रान्यं दृष्टान्तमाह । पुंसामिति । जीवानामित्यर्थः । ननु जीवच्छरीरस्यैव केशलोमाद्युपादानत्वं न तु जीवस्येति चेन्न । मृतशरीरे केशादिवृद्ध्यदर्शनेन परस्परं तादात्म्येनाध्यस्तयोरप्यविनिगमेन तत्रोपादानत्वात् । अत एव श्रुतिः । यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति यथा सतः पुरुषात् केशलोमानि तथाक्षरात् संभवतीह विश्वमिति दृष्टान्तेन ब्रह्मणः प्रपञ्चोपादानत्वमाहेति ॥ ५४५ ॥

बुद्ध्यादिकार्येष्वपि चेतनोऽयं
भवेदुपादानमितीष्यते च ॥
आत्मा गुणी ते च गुणाः प्रसिद्धा
गुणी गुणानां प्रकृतिश्च सिद्धा ॥ ५४६ ॥

वैशेषिकादीनामपि यदुपादानं तज्जडमेवेति न नियमो बुद्ध्याद्युपादाने चेतने व्यभिचारात् । न च द्रव्योपादानस्यैव तथात्वनियम इति वाच्यम् । गुणोपादानेष्वपि पृथिव्याद्यष्टसु चेतनत्वादर्शनादात्मनो गुणोपादानत्वमपि न स्यात् । न चानुभवाच्चेतनस्यापि गुणोपादानत्वमिति वाच्यम् । घटादावपि सत्तास्फूर्त्यनुभवात्सतश्चेतनस्य तदभ्युपगम्यताम् । न च तत्र सत्तास्फूर्त्योस्तदुपादानादन्यता संभवति । न च घटः

सन्निति सत्तादात्म्यानुभवो वैशेषिककल्पितसत्ताजातिविषयः । तज्जातौ मानाभावात् । न च सदनुगतधीरेव तन्मानम् । तस्याः सत्संबन्धमात्रविषयतया मृद्घट इतिवद्धर्मिविषयत्वेनाप्युपपन्नत्वेन धर्मासाधकत्वात् । न च घटनिष्ठत्वेन प्रतीतेः सा धर्मः । तस्या बाधायोग्यत्वरूपाया घटेऽवृत्तेः । न हि घटस्याबाध्यत्वे मानमस्ति । तस्मात् कालत्रयाबाध्यश्चिदात्मैव सर्वत्रोपादनतयाऽनुस्यूतः सद्बुद्धिविषयः । जाड्यबुद्धिस्त्वविद्याकृतेति द्रष्टव्यम् । एवं श्रुतिबलादपि चेतनस्य तव मते बुद्ध्याद्युपादानतावद्वियदाद्युपादानत्वमविरुद्धमित्याशयेनाह । बुद्ध्यादिकार्येष्वपीति । आदिशब्देनेच्छादिर्गृह्यते । इष्यते परैरिति शेषः । तेषामङ्गीकारमेवोपपत्तिपूर्वकमाह । आत्मेति । ते बुद्ध्यादयः । ततः किं तत्राह । गुणीति । अनित्यगुणाश्रय इत्यर्थः । अन्यथा गुणगुणिभावो बुद्ध्यादेरात्मनश्च न स्यादिति भावः ॥ ५४६ ॥

आकाङ्क्षादिर्विद्यते योग्यतान्ता
यस्मादस्मिन्नागमाज्जायमाने ॥
सामग्री या वैदिकैरस्य दृष्टा
तस्माद्युक्ता योनिता चेतनस्य ॥ ५४७ ॥

एवमात्मनोऽपि द्रव्योपादानत्वं दृष्टान्तत उपपाद्य तत्र यदुक्तं पूर्ववादिना चेतनो द्रव्योपादानमिति वाक्यं

योग्यताविरहान्न बोधकमिति तदेवं सति न युक्तमित्याह। आकाङ्क्षादिरिति। योग्यता अन्ते यस्या आकाङ्क्षादित्रय्याः । आकाङ्क्षा आदिर्यस्या योग्यतान्तायाः सा तथा। अस्मिन्निति बुद्धिस्थं ब्रह्म प्रपञ्चोपादानमिति ज्ञानं परामृशति । अन्यत्रागमाद्वाक्याज्जायमाने ज्ञाने वैदिकैर्मीमांसकैर्लौकिकैश्च या सामग्री दृष्टा आकाङ्क्षादियोग्यतान्ता सा अस्मिन् जनयितव्ये यतो वा इत्यादिपदानामपि यस्माद्विद्यते तस्माद्युक्ताऽस्य चेतनस्य योनितेति संबन्धः। उक्तरीत्या चेतनस्य द्रव्योपादानत्वे बाधकाभावात्तत्प्रतिपादकवाक्यस्य सहकारिभूता आकाङ्क्षासन्निधानयोग्यताः सन्तीति ब्रह्मणस्तत् सिद्ध्यतीति भावः ॥ ५४७ ॥

तस्मादेतल्लक्षणं चिन्हमाहु-
र्नैतत्तस्मिन् ब्रह्मणि स्यात् प्रमाणम् ॥
आम्नायस्य स्वप्रधानत्वहेतो-
र्लिङ्गस्यास्मिन् शेषभावाच्च नित्यम् ॥ ५४८ ॥

एवं सृष्टिवाक्यैर्ब्रह्मणोऽभिन्ननिमित्तोपादानत्वं यदुक्तं तत्तस्य चिह्नमेव न तु तस्मिन् प्रमाणं प्रमाणं तु तत्र स्वतःप्रमाणवेदान्तवाक्यमेव , कार्यलिङ्गमपि तदर्थोपपादकतया तत्साहाय्यमाचरंस्तत्र तर्कभावं प्राप्नोतीति स्वाभिमतमुपसंहरति। तस्मादेतदिति। स्पष्टम् ५४८

इत्थं जगत्कारणवादिवाक्यं

समन्वितं ब्रह्मणि तत्पदार्थे ॥
तल्लक्षणं तस्य तटस्थभूत-
मानन्त्यसिद्ध्यै कथयद् यथोक्तम् ॥ ५४९ ॥

एवं सृष्टिवाक्यस्य ब्रह्मणि तत्त्वमसिवाक्यस्थतत्पदार्थे निरूपिते परमप्रकृतं समन्वयमुपसंहरति । इत्थमिति । जगत्कारणवादिवाक्यं तस्य ब्रह्मणः सजातीयादिपरिच्छेदराहित्यरूपानन्त्यसिद्ध्यै तटस्थभूतं कल्पिततया तत्स्वरूपात् पृथग्भूतं यथोक्तमभिन्ननिमित्तोपादानत्वरूपं तल्लक्षणं कथयत् तत्पदार्थे ब्रह्मणीत्थं समन्वितमिति संबन्धः ॥ ५४९ ॥

स्वात्मानमेव जगतः प्रकृतिं यदेकं
सर्गे विवर्तयति तत्र निमित्तभूतम् ॥
कर्माकलय्य रमणीयकपूयमिश्रं
पश्यन् नृणां परिवृढं तदितीर्यमाणम् ॥५५०॥

ननु ब्रह्मैकमेवोपादनं निमित्तं च चेत् कथमस्य प्रपञ्चस्य क्रमेण सृष्टिर्वैचित्र्यं वा वैषम्यं नैर्घृण्यं वा भगवतः कथं न प्रसज्येतेत्याशङ्क्योपादानकर्त्रोरेव श्रुतिबलादेकत्वमवगच्छामो न तु सृज्यमानप्राणिनां विचित्रं कर्म तद्वासनास्तेषां भोगवासना वा नेति वदाम इति तदभिव्यक्तिक्रमवैचित्र्याभ्यामेव क्रमवद्विचित्रसृष्टिरुपपन्ना । अत एवेश्वरस्य न वैषम्यादिकमपि । तथा च श्रुतिः तद्य इह रमणीयचरणा रमणीयां यो-

निमापद्येरन् कपूयचरणाः कपूयां योनिमित्याद्या विचित्रां संसारगतिमनुवदतीत्याशयेनाह । स्वात्मानमिति । यत्तदितीर्यमाणं तत्त्वमसि वाक्ये तत्पदोपात्तं परिवृढं ब्रह्म तत् नृणां रमणीयं पुण्यं कपूयं पापं मिश्रं मिलितं तदुभयं कर्म पश्यज्जानत् सर्गे कर्त्तव्ये तत्र निमित्तभूतमाकलय्येदं विचित्रं सर्गनिमित्तमिति निश्चित्य एकमपि जगतः प्रकृतिं स्वात्मानमेव विवर्त्तयति अवस्तुतोऽन्यथाभावमापादयतीति संबन्धः । एवं सृज्यमानप्राणिकर्मवशान्नोक्तदोषतुषोऽपीति भावः । एवं सृष्टिवाक्यानां तटस्थब्रह्मलक्षणानुवादद्वारा तत्पदलक्ष्येब्रह्मणि समन्वयो निरूपितः । ततः स्वरूपलक्षणमपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यसिद्धं यत इति यच्छब्दप्रकृत्यंशेन चेतनानुवादेनाखण्डज्ञप्तिमात्रमित्यर्थाद् दर्शितमिति द्वितीयसूत्रेण लक्षणद्वयमपि सिद्धम् ॥ ५५० ॥

पदवृत्तिसमन्वयावुभौ
प्रतिपाद्यौ प्रथमे हि लक्षणे ॥
तदवान्तरवाक्यवर्त्मना
पदवृत्तिः प्रथमं प्रकीर्तिता ॥ ५५१ ॥

ननु समन्वयसूत्रेणैव वेदान्तवाक्यानां ब्रह्मणि समन्वयोविचारित इति किमनेन सूत्रेणापि तन्निरूपणेनेत्याशङ्क्य तेन तत्त्वमस्यादिसमस्तवाक्यानां महातात्प-

यं निरूप्यम्, द्वितीयसूत्रे तु तत्पदवृत्तिर्निरूपितेति नैतद्व्यर्थं न हि तत्पदतात्पर्यनिश्चयं विना वाक्यार्थपरिच्छेदः संभवतीत्याशयेनाह । पदवृत्तीति । लक्षणे अध्याये । यस्मादेवं तस्मादवान्तरवाक्यवर्त्मना तत्त्वमसिवाक्यं तत्पदार्थनिष्ठं वाक्यं तदर्थकथनमार्गेण प्रथमं समन्वयविचारात्पूर्वम् ॥ ५५१ ॥

आद्ये सूत्रे त्वंपदस्योदितत्वाद्
वृत्तेरस्मिंस्तत्पदस्योच्यमाना ॥
वृत्तिर्ज्ञेया तत्पदार्थेऽद्वितीये
प्रत्यङ्मात्रे त्वंपदस्योदितैव ॥ ५५२ ॥

नन्वेवं त्वंपदस्यापि वृत्तिर्निरूपणीया स्यादन्यथा वाक्यार्थापरिच्छेदादित्याशङ्क्य प्रथमसूत्रे सा निरूपितैवेति द्वितीयसूत्रे तत्पदवृत्तिरेव निरूप्यत इत्याशयेनाह । आद्ये सूत्र इति । अथातो ब्रह्मजिज्ञासेतिसूत्र इत्यर्थः । अस्मिन् द्वितीयसूत्र इत्यर्थः । ननु द्वितीयसूत्रे तत्पदस्य कस्मिन्नर्थे तात्पर्यं निरूप्यते प्रथमसूत्रे वा कीदृशि त्वंपदस्येत्यपेक्षायामाह । तत्पदार्थ इति । अद्वितीय इति छेदः । अद्वितीये नित्यशुद्धादिस्वरूपे ब्रह्मणि तत्पदार्थे । द्वितीयेन तत्पदस्य वृत्तिर्निरूप्यते प्रथमेन तु प्रमात्रादिविलक्षणापरोक्षसाक्षिचैतन्यमात्रे त्वंपदस्य सा निरूपितेत्यर्थः ॥ ५५२ ॥

अनधिकारिणि शुद्धचिदात्मके

दृगदृशोरितरेतरविभ्रमात् ॥
शमदमादिसन्विततेष्यते
भवति तेन चितोऽप्यधिकारिता ॥ ५५३ ॥

ननु प्रथमसूत्रमधिकारिणो ब्रह्मज्ञानाय श्रवणकर्तव्यतां प्रतिपादयति, न तु कस्मिंश्चिदर्थे त्वंपदवृत्तिमिति चेन्न। तत्त्वमसिवाक्ये ह्यधिकारिणि प्रयुज्यमानं त्वंपदं तस्य ब्रह्माभेदयोग्यं रूपं दर्शयति, प्रथमसूत्रं च मुक्त्यधिकारिविषयमिति तेन तन्निरूपितमेव। ननु वैराग्यशमदमादिविशिष्टस्य मुमुक्षोर्ब्रह्मविचाराधिकारः तस्य कथं ब्रह्माभेदयोग्यतेति चेत्, सत्यम्, शान्त्यादिमत एवाधिकारः स च तत्त्वमसिवाक्यसामर्थ्यान्नित्यमुक्तं ब्रह्मैवेति स्वतो नाधिकारी किन्त्वीदृशोऽपि तस्मिन् दृग्रूपस्यात्मनोऽदृग्रूपस्याविद्यकाहङ्कारादेश्चेतरेतरात्मताध्यासात्संसारवत्तद्धर्मविवेकवैराग्यशमदमादिमत्तेष्यते तेन चिदेकरसस्याप्यधिकारिता भवतीति महावाक्ये त्वंपदसामर्थ्यात्सिद्ध्यति। ततश्चाधिकारिनिरूपके प्रथमसूत्रे त्वंपदस्य चिन्मात्रे वृत्तिर्निरूपितेत्याशयेनाह। अनधिकारिणीति ॥ ५५३ ॥

अनधिकारितया दृगवस्थिता
स्वरसतः परमेश्वरविग्रहः ॥
घनतमः पटलावरणान्वया-
दुपगता श्रवणाद्यधिकारिताम् ॥ ५५४ ॥

नन्वधिकारिण एव मुक्त्यन्वयित्वात्तस्य केवलस्यैवात्मनः शमादिः श्रवणाद्यधिकारश्चेति दृग्दृशोरित्याद्यनुपपन्नमिति चेत्तत्राह । अनधिकारितयेति । पूर्वोक्तन्यायेन परमेश्वरस्वरूपत्वादधिकारिस्वरूपभूता दृक् स्वतोऽनधिकारितया स्थितेति प्रागुक्ताध्यासादेव तदधिकार इति भावः । ननु स्वप्रकाशदृश्यध्यास एव कथमित्याशङ्क्य तस्या अप्यज्ञानावरणस्योपपादितत्वात् स उपपन्न इत्याशयेनाह । घनतम इति ॥ ५५४ ॥

अज्ञानतज्जघटना चिदधिक्रियायां
द्वारं परं भवति नाधिकृतत्वमस्याः ॥
नाचेतनस्य घटतेऽधिकृतिः कदा चित्
कर्तृत्वशक्तिविरहादिति वक्ष्यते हि ॥ ५५५ ॥

नन्वेवमहङ्कारादिविशिष्टस्य श्रवणाद्यधिकारे तस्यैव मोक्षोऽपि वाच्य इति न केवलात्मनि त्वंपदवृत्तिरित्याशङ्क्य यथा देहादिद्वारा स्वर्गसाधने कर्मण्यात्मनोऽधिकारो न तु तेन विनैवमहङ्कारादिद्वारा मुक्तस्यैवात्मनोऽमुक्तताभ्रान्तस्य मुक्तिसाधनेऽधिकारो न तु तेन विना न वा तस्य मुक्त्यन्वय इत्याशयेनाह । अज्ञानतज्जेति । अज्ञानतज्जाभ्यां घटना संबन्धः, चितोऽधिक्रिया तस्यां द्वारं घटकमुपाधिरिति यावत् । अस्या घटनाया अधिकाराभावे हेतुमाह । नाचेतस्येति । अचेतनत्वात्तस्या अधिकृतिर्न युज्यत इत्यर्थः

अचेतनस्यापि सा किं न स्यादित्यत आह। कर्तृत्वेति। अचेतनस्य चेतनधर्मश्रवणादिकर्तृत्वायोगाच्चेतनानधिष्ठितस्य तस्य स्वातन्त्र्येण व्यापारासंभवेन च कर्तृत्वशक्तिर्नेति साङ्ख्यनिराकरणावसरे सूत्रकृता वक्ष्यत इत्यर्थः। एवं नित्यमुक्तात्मैव स्वाध्यस्तदेहद्वयतद्धर्मवैराग्यादिसंपन्नस्तद्द्वारा ब्रह्मविचारेऽधिकारीति तन्निष्ठत्वं पदस्याद्यसूत्रे तत्र वृत्तिर्निरूपितेति भावः ॥५५५॥

उपसत्तिवाक्यमधिकारिणि यत्
कथितं समन्विततया प्रथमम् ॥
इदमेव चेतसि निधाय तु तत्
मुनिना प्रकीर्तितमुदारधिया ॥ ५५६ ॥

ननु शुद्धचिदात्मन एवोक्तरीत्याधिकार इति त्वंपदस्य तत्रैव वृत्तिश्चेत्तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्यादिश्रुत्यर्थतयोपससाद चतुष्टयसाधन इत्यादिनाधिकारिनिरूपणप्रस्तावे भवतायमर्थः कथं नोक्त इत्याशङ्क्य सूत्रार्थत्वादस्य तत्र ममायमभिप्रेत एवेत्याशयेनाह। उपसत्तिवाक्यमिति। तुरवधारणे। यतो मुनिना तत् कीर्तितमेवेत्यर्थः ॥ ५५६ ॥

शिष्योपसत्तिवचनानि समन्वितानि
शिष्ये चिदात्मनि परात्मनि नित्यमुक्ते ॥
इत्येतदत्र कथितं मुनिना त्वमर्थे
त्वंशब्दवृत्तिकथनाय परे प्रतीचि ॥ ५५७॥

ननूदाहृतवाक्येऽयमर्थो न प्रतीयत इति कथं मुनिनापि संकीर्तित इत्याशङ्क्योक्तन्यायसिद्धमर्थं स्मारयति । शिष्योपसत्तीति । स्पष्टम् ॥ ५५७ ॥

उपसदनवचो विचारमार्गात्
त्वमितिपदस्य परात्मनीह वृत्तिम् ॥
कथयति भगवान् द्वितीयसूत्रे
तदितिपदस्य परात्मनीति भेदः ॥ ५५८ ॥

एवं प्रथमद्वितीयसूत्राभ्यामद्वये प्रतीचि तत्त्वं पदवृत्तिनिरूपणसमर्थनमुपसंहरति । उपसदनेति । परात्मनि देहेन्द्रियाहंकारादिविलक्षणे साक्षिणि । इह प्रथमे सूत्रे । परात्मनि जगत्कारणेऽधिष्ठानेऽद्वितीये ॥ ५५८॥

आवृत्त्या वा तन्त्रवृत्त्याथ वेदं
सूत्रं युक्तिं वेदवाक्योपयुक्ताम् ॥
अप्याचष्टे वृंहणीमन्तरेण
स्वार्थं युक्तिं वेदवाक्यं न पुष्टम् ॥ ५५९ ॥

ननु यदि द्वितीयसूत्रं यतो वेत्यादिसृष्टिवाक्यं सूचयत्तदर्थेऽद्वये तत्पदवृत्तिनिरूपणपरं तर्हि तदर्थाद्वयसंभावकयुक्तेरसूत्रितत्वात् कथं तत्सिद्धेयदित्याशङ्क्य तदसूत्रणमसिद्धमित्याशयेनाह । आवृत्त्येति । इदं द्वितीयं सूत्रं ह्येकया वृत्त्योक्तां श्रुतिं सूचयत्यन्यया वृत्त्या जन्माद्यस्य यतः संभवतीत्यध्याहारेण च वेदवाक्यार्थनिर्णयोपयुक्तां युक्तिमपि सूचयति । अथ वा त-

न्तवृत्त्या तामाचष्टे, युगपदनेकार्थविवक्षयोच्चारणं तन्त्रम् । सूत्रत्वादेवानेकार्थत्वमपि नान्याय्यमिति भावः । ननु वेदवाक्यस्यानपेक्षस्य किं युक्त्या सहायेनेत्याशङ्क्याचेतनप्रपञ्चस्य चेतनोपादानत्ववत्तत्कर्त्रभेदतत्सर्वज्ञत्वसर्वशक्तित्वादीनां लोकाप्रसिद्धानां श्रुतीनामप्युपपादकयुक्तिमन्तरेण विपरीतन्यायबाध्यत्वशङ्कया श्रुतिमात्रादसिद्धेः साप्यपेक्षितेत्याशयेनाह । बृंहणीमिति । स्वार्थे सम्भावनाहेतुं युक्तिं विना वेदवाक्यं न पुष्टं न स्वार्थनिश्चायकमित्यर्थः ॥ ५५९ ॥

त्वम्पदार्थविषयं समन्वयं
तत्पदार्थविषयं ततः क्रमात् ॥
तस्य शेषमपरं च वर्णय-
न्नुक्तवानथ महावचोगतम् ॥ ५६० ॥

ननु यदि प्रथमद्वितीयसूत्राभ्यां तत्त्वम्पदवृत्ती निरूपिते समन्वयसूत्रेण च समस्तवेदान्तवाक्यतात्पर्यं तर्हि वाक्यार्थविषयत्वेन प्रधानत्वात् सूत्रकारेणापि भवतेव तदेवादौ निरूपणीयमित्याशङ्क्य शास्त्रारम्भाय साधिकारिविचारविधौ प्रथमसूत्रेण निरूपिते विचार्यमाणब्रह्मलक्षणासम्भवेन तदाक्षेपे तत्समाधानार्थं द्वितीयं प्रवृत्तमिति ताभ्यां पदार्थद्वये सिद्धे तदुभयाभेदे वाक्यार्थे तृतीयसूत्रेण श्रुतेरपौरुषेयतया स्वतःप्रामाण्ये सिद्धे तदाक्षेपसमाधानपरसमन्वयसूत्रावकाश इति क्र-

मेण मुनेः सूत्रप्रणयनं युक्तमित्यभिप्रेत्याह । त्वम्पदार्थेति । समन्वयं जीवस्वरूपपरवाक्यानामिति शेषः । तत्पदार्थविषये सत्यादिवाक्यानामिति शेषः, समन्वयमिति चानुषञ्जनीयम् । तस्य समन्वयस्य शेषमनुकूलमपौरुषेयत्वम्, महावचोगतं महावाक्यगतं समन्वयमित्यनुषङ्गः । पदार्थनिश्चयं विना वाक्यार्थावगमायोगादधिकार्यादिनिरूपणव्याजेन पदार्थद्वयनिरूपणपूर्वकं सूत्रकारो वाक्यार्थं न्यरूपयदिति सिद्ध एव क्रमः साधुरिति भावः ॥ ५६० ॥

त्वम्पदस्य दृशि वृत्तिमद्वये
तत्पदस्य च निवेदयन् मुनिः ॥
प्रत्यगद्वयपरं समन्वयं
शेषिणं पुनरथाब्रवीत्तयोः ॥ ५६१ ॥

एवं सूत्रचतुष्टयेन तत्तद्वर्णितार्थे पदद्वयवाक्यवृत्तिनिरूपणसमर्थनमुपसंहरति । त्वम्पदस्येति । दृशि प्रत्यगात्मनि त्वंपदस्य वृत्तिम् । अद्वये ब्रह्मणि तत्पदस्य वृत्तिम् । मुनिर्व्यासः । अथानन्तरं तयोस्तत्त्वंपदवृत्त्योः शेषिणं समन्वयं प्रत्ययद्वयपरं प्रत्यगद्वये ब्रह्मणि ऐक्यरूपेणाब्रवीत्, वाक्यस्येति शेषः ॥ ५६१ ॥

शक्नोति सिद्धमवबोधयितुं च वाक्यं
शक्नोति कार्यरहितं वदितुं च वाक्यम् ॥
शक्नोत्यखण्डमवबोधयितुं च वाक्यं

शक्नोति मुक्तिफलमर्पयितुं च वाक्यम् ॥५६२॥

समन्वयाध्यायेऽस्मिन् प्रतिपादितमर्थमुपसंहरति । शक्नोतीति । वाक्यं वेदान्तवाक्यं सिद्धं ब्रह्मात्मवस्तु मानान्तरनैरपेक्ष्येणावबोधयितुं शक्नोत्येवेत्युक्तमिति शेषः । सिद्धार्थव्युत्पत्तिसमर्थनादित्यर्थः । एवमुत्तरत्रापि कार्यरहितं कार्यशेषत्वरहितं नियोगादिनिरासेन स्वप्रधानमेवेत्यर्थः । अत्र पूर्वार्धेन समन्वयसूत्रवर्णकद्वयार्थः क्रमेण प्रदर्शितः तत्फलमखण्डब्रह्मावबोधस्तत्फलं मुक्तिश्चोत्तरार्धेन । अर्पयितुं ज्ञानद्वारेति शेषः ॥ ५६२ ॥

एतत्समन्वयनिरूपणमेवमस्मिन्
बुद्धिस्थतामुपगते सति वाक्यजन्यम् ॥
विज्ञानमद्वयगतं न ततोऽन्यदन्यत्
पुंसोऽपराधकृतमित्युदियात् प्रतीचि ॥ ५६३ ॥

इति श्रीदेवेश्वरपूज्यपादशिष्यश्रीसर्वज्ञात्ममुनेः कृतौ
शारीरकमीमांसाभाष्यप्रकरणवार्त्तिके
संक्षेपशारीरके प्रथमोऽध्यायः ॥ १ ॥

समन्वय उक्तातिरिक्तमपि किञ्चिन्निरूपणीयमस्ति किमित्याशङ्कां निवर्त्तयन्नेतावतैव समन्वयविषयाखिलाशङ्कानिवृत्तेर्नान्यन्निरूपणीयमित्याशयेनाह । एतदिति । ननु निर्णीतपदार्थावगमस्य वाक्यात्तत्तदर्थावगमे लोके पृथङ् न्यायो नापेक्ष्यत इत्याशङ्क्य तत्त्वम-

स्यादिवाक्यार्थस्यातिगहनतया वादिभिः स्वेच्छया पृथक्पृथगर्थकल्पनात्तदर्थतदाभासविवेचनाय वर्णितरूपेण समन्वयोऽपि निरूपणीय एवेत्याशयेनाह । एवमस्मिन्निति । उक्तप्रकारेणास्मिन् समन्वये बुद्धिस्थे सति अद्वयब्रह्मविषयमेव विज्ञानं श्रुतिजन्यं न ततोऽप्यद्वयज्ञानादन्यच्छ्रुतिजन्यं किं तु पुंसोऽपराधकृतं पुरुषस्य वेदान्ततात्पर्याज्ञानादिदोषादुत्थितमिति प्रतीचि स्वात्मनि स्वयमेवोदियात् स्फुरेदित्यर्थः । तस्मादवश्यं समन्वयसूत्रन्यायेनाधिकारिणाखण्डैकरसे ब्रह्मणि सत्यज्ञानादिलक्षणे वेदान्तानां तात्पर्यं निरूपणीयं तच्च निःशेषं निरूपितम् । तथा च वेदान्तवाक्यरूपप्रमाणगतासंभावनानिरासेन वाक्यार्थनिर्णयः समन्वयनिरूपणफलं सिद्धमतीति भावः ॥ ५६३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरानन्दसरस्वती
पूज्यपादशिष्यश्रीमन्मधुसूदनसरस्वतीविरचितायां
संक्षेपशारीरकटीकायां प्रथमोऽध्यायः ॥ १ ॥

॥ शुभं भूयात् ॥

शोधन पत्रम् ।

पृ०	पं०	अशुद्धस्य	शोधनम्
१	१०	तपोवना	तपोवना
२	१०	प्रतिपादानर्थं	प्रतिपादनार्थं
५	२०	ग्रन्थकार	ग्रन्थकार
६	१२	सुपायदेयम्	सुपादेयम्
७	१६	तदेन्नतज्ञा	तदेतज्ज्ञा
८	१	तदभ्रमा	तद्भ्रमा
१०	१६	चाऽसत्य	चा सत्य
१३	२२	साच्चत्का	साचात्का
२०	८	सम्भवादभाव	सम्भवात्तदभाव
२६	१०	न्द्यक	न्यक
३०	१	प्रकाशनशक्त्याद्यतिरे	प्रकाशनशक्त्यतिरे
३२	२२	नन्नि	ननि
३४	१५	नत्वात्मनो	नन्वात्मनो
३५	७	ज्ञानं	ज्ञातं
,,	,,	ततोऽन्यः	ततोन्यस्
३७	२२	मितिव थ्य	मिति व्यव
३९	२	दिनैश्व	दिनैव
४०	६	भाव	भावः
४०	१२	प्रेयवि	प्रे यो वि
४५	४	दृष्टमाच	दृष्टमात्र
४८	१४	ह्यत्यन्तर	ह्यत्यन्तरं
५१	७	भ्रान्तिसा	भ्रान्तित्वसा
,,	१२--१३	प्रागनुभूत	प्रागननुभूत
,,	२०	ज्ञानस्य	ज्ञातस्य
६१	१३	क्षिखभ्रमः	क्षिखन्भ्रमः
६५	७	ज्ञानस्य	ज्ञातस्य
७२	१२	नन्वात्मनोऽज्ञाना	नन्वात्मनो ज्ञाना

पृ०	पं०	अशुद्धस्य	शोधनम्
७६	८	मनेनयथेद	मनेन पथेद
७७	८	यथास्या	पथास्या
८१	९	ज्ञाधात्व	ज्ञातधात्व
८३	२	तत्र	तन्न
८९	११	परमात्मनोऽहंकार	परात्मनोऽहंकार
९४	८	हिंसादिनियम	हिंसादियम
१०२	१४	प्रवृत्तिप्रसव	प्रतिप्रसव
११४	२१	यितुं	यतु,
१२०	६	कुतोऽस्मि	कुतोऽस्मिन्
१४०	७	नुगशब्दा	मुगतं शब्दा
१७६	१४	सुख्यो	सुख्ये
१८४	२१	सत्या तत्रभादन्या	सत्यता तत्र चान्या
१९०	२१	पूर्णब्रह्मभेदा	पूर्णब्रह्माभेदा
१९२	१७	प्राण	प्राणा
१९३	१	एवा नियमेन	एव नियमेन
१९४	१७	घाध्येऽस्य	घाध्योऽस्य
१९८	१०	विधेयः	विज्ञेयः
२०१	१३	हष्टस्य	हस्तस्य
२०५	१३	धनी	धती
२१५	१३	गिरां	गिरा
२१६	३	गिर्रा	गिरा
२२४	१७	चन्द्रेबाधित	चन्द्रेऽबाधित
२२६	१७	धर्मत्वज्ञाना	धर्मत्वाज्ञाना
२२७	१९	तया वि	तयाऽवि
”	२१	तिरश्चो	तिरिश्चो
२३०	२२	पदेन	केन पटेन
२५३	८	तन्यप्र	तन्यम्, प्र
२६१	८	तत्राद्दा	तद्दा
२६३	१५	प्रभा	प्रासा
२७१	७	प्रभा	प्राभा
२८०	७·८	सेवमित्य	सेवेत्य
२८७	१३	युज	युजा
२९२	२०	शब्देपि	शब्दोऽपि

पृ०	पं०	अशुद्धस्य	शोधनम्
२९७	२२	ग्ङमि	ग्ङ द्र
३००	१९	विषयाभेदेन यसप्तर्म	विषयसप्तमी
३१२	२२	ब्राह्मणः	ब्रह्मणः
३१३	१९	स्वप्नो	स्वप्ने
३१९	४	त्युदक्तं	त्युक्तं
३२९	१९	स्वाभियधंभ्	स्वाभिधेयम्
३४२	११	फलवान्	यत्नवान्
३४७	१२	युक्त्यनु	युक्त्यानु
३५९	१९	सा पद	सपद
३७१	१५	स्याप्रमा	स्याप्रामा
३७३	५-६	तत्क्रतुर्भवति	तत्क्रतुर्भवति यत्क्रतुर्भवति
३८८	६	नञोऽर्थौ	नञर्थौ
४०४	१३	धेयो भा	धेयोऽभा
४०६	१७	संवदन	संवेदन
४०७	७	पापजनक	पापाजनक
४१७	३	सङ्घो	प्रसङ्घो
४२४	२१	सर्वसगुण	सर्वं सगुण
४३४	१९	वाचिनो	गामिनो
४५६	१	निश्चय	निश्चया

Bhawan's Sri Sankaracharya
Bharatiya Vidya Mahavidyalaya
2316
BHARATIYA VIDYA BHAVAN LIBRARY
S. N. ....